समराङ्गणसूत्रधारा

महाराजाधिराजश्रीभोजदेवविरचितं समराङ्गणसूत्रधारापरनामधेयं
वास्तुशास्त्रम् महासमागमनो नाम प्रथमोऽध्यायः
देवः स पातु भुवनत्रयसूत्रधारस्त्वां बालचन्द्रकलिकाङ्कितजूटकोटिः
एतत्समग्रमपि कारणमन्तरेण कात्स्न्र्यादसूत्रितमसूत्र्यत येन विश्वम्
१
सुखं धनानि ऋद्धिश्च सन्ततिः सर्वदा नृणाम्
प्रियाण्येषां तु संसिद्धयै सर्वं स्याच्छुभलक्षणम् २
यच्च निन्दितलक्ष्मा च तदेतेषां विघातकृत्
अतः सर्वमुपादेयं यद्भवेच्छुभलक्षणम् ३
देशः पुरं निवासश्च सभा वेश्मासनानि च
यद्यदीदृशमन्यच्च तत्तच्छ्रेयस्करं मतम् ४
वास्तुशास्त्रादृते तस्य न स्याल्लक्षणनिश्चयः
तस्माल्लोकस्य कृपया शास्त्रमेतदुदीर्यते ५
अथैकदा जगज्जन्महेतुमम्बुरुहासनम्
पृथ्वी पृथुभयभ्रान्ता चकिताक्षी समाययौ ६
प्रणम्य प्रणतिप्रह्वनिखिलत्रिदशेश्वरम्
सगद्गदमुवाचेति भूतधात्री पितामहम् ७
भगवन्नहमेतेन पृथुना पृथुतेजसा
उपद्रुता त्वां शरणं प्राप्ता त्रायस्व मां ततः ८
वदन्त्यामिति मेदिन्यामाविरासीदथो पृथुः
संरम्भमुक्तहृदयो ब्रह्माणं प्रणनाम च ९
जगादैनमथ स्निग्धध्वनिगम्भीरया गिरा
कुर्वंस्तद्यानहंसानां पयोदध्वनिशङ्कितम् १०
त्वयास्मि जगतां नाथ जगतोऽधिपतिः कृतः
स्थापितानि च भूतानि सर्वाण्यपि वशे मम ११
तेष्वियं मम विश्वेश कदाचिद्वशवर्तिनी

समीकरोमि पाषाणजालान्यस्याः किलाधुना १२
व्यस्तानि धनुषा तावद्भौर्भूत्वेयं पलायिता
दोग्धुकामोऽहमप्येनां चिरमन्वगमं महीम् १३
यत्रक्वापि प्रयात्येषा तत्र मामेव पश्यति
अपश्यन्त्यन्यतस्त्राणमदुग्धा त्वामुपस्थिता १४
अस्यां वर्णाश्रमस्थानविभागश्च विधास्यते
इयं च दुर्गमानेकद्रोणीधरकुलाकुला १५
विधास्येऽस्यां कथं त्वेतदिति मे शङ्कितं मनः
पृथुनेत्यथ विज्ञप्तो भगवानब्जसम्भवः १६
उवाच बोधयन्नेनं कृत्वा भूमिं च निर्भयाम्
इयं मही महीपाल विधिवत् पालिता सती १७
सस्यैरुत्पाद्य निष्पन्नैस्तव भोग्या भविष्यति
यच्च ते स्यादभिप्रेतं स्थानादिविनिवेशनम् १८
तदेष त्रिदशाचार्यः सर्वसिद्धिप्रवर्तकः
सुतः प्रभासस्य विभोः स्वस्त्रीयश्च बृहस्पतेः १९
विश्वाभिसायिधीः सर्वं विश्वकर्मा करिष्यति
राजन्नसौ महेन्द्रस्य विदधावमरावतीम् २०
अन्या अप्यमुना रम्याः पुर्यो लोकभृतां कृताः
त्वया क्षेत्रीकृतां मूर्त्तिं दृष्ट्वा साद्रिद्रुमामसौ २१
सन्निवेशान् पुरग्रामनगराणां विधास्यति
तद्गच्छ वत्स लोकानामितस्त्वं हितकाम्यया २२
भयोज्झिता त्वमप्युर्वि पृथोः प्रियकरी भव
काले स्मृतः स्मृतः पुरयो राज्ञः प्रियचिकीर्षया २३
त्वमप्यखिलमेवैतद् विश्वकर्मन् करिष्यसि
इत्युक्त्वा गमनमुपेयुषि प्रजेशे स्वं स्थानं क्षितिभुजि चाश्रिते
मुदोर्व्याम् ।

प्रालेयावनिभृतमाजगाम खेलत्सिद्धस्त्रीपरिगतमाशु विश्वकर्मा २४
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे महासमागमनो नाम प्रथमोऽध्यायः

अथ विश्वकर्मणः पुत्रसंवादो नाम द्वितीयोऽध्यायः

अथ पृष्ठे हिमगिरेः शशाङ्कशुचिरोचिषि
सिद्धामरवधूभुक्तमणिमञ्जुगुहागृहे १
विस्तीर्णासनमासीनं सर्वज्ञमथ संस्मृताः
आययुर्विश्वकर्माणं चत्वारो मानसाः सुताः २
जयो विजयसिद्धार्थौ चतुर्थश्चापराजितः
तमुपागम्य शिरसा नेमुः प्राञ्जलयो मुनिम् ३
तानुवाच मुनिर्वत्सा विदितं वो यथा पुरा
वास्तुब्रह्म सदा विश्वं व्याप्नोति सकलं जगत् ४
धर्म्यं कर्म तदा स्वेष्टप्राप्तयै लोकावनानि च
व्यवस्थाप्य चकारैष लोकपालश्च कल्पनाम् ५
अहमप्यमुना विश्वनाथेनाम्बुजजन्मना
लोकानां सन्निवेशार्थमादिष्टोऽस्मि स्वयम्भुवा ६
रम्याणि नगरोद्यानसभास्थानान्यथो मया
सुरासुरोरगादीनां निर्मितान्यात्मबुद्धितः ७
गत्वोर्वीं वैन्यनृपतेर्वत्साः प्रियचिकीर्षया
नगरग्रामखेटादीन् करिष्यामि पृथक्पृथक् ८
कार्ये त्वमुष्मिन् सकले मम विश्वसृजार्पिते
सम्यक्साहायकैर्भाव्यं भवद्भिरिति नः स्थितम् ९
यतस्त्रिभुवनालोकप्रोद्यतस्याब्जिनीपतेः
सहायतां तमश्छेदे कलयन्ति मरीचयः १०
स्वयं करिष्येऽहमथो निवासाय पृथोः पुरीम्

विचित्रनगरग्रामखेटामतिमनोहराम् ११
भवन्तः पुनरागत्य चत्वारोऽपि चतुर्दिशम्
तांस्तान् निवेशान् कुर्वन्तु पृथग्जनकृताश्रयान् १२
अन्तरेष्वध्वपाथोधिशैलानां सरितां तथा
विधातव्यानि दुर्गाणि नृपाणां भयशान्तये १३
वर्णप्रकृतिवेश्मानि संस्थानानि च लक्ष्मभिः
विधेयानि प्रतिग्रामं प्रतिपूः प्रतिपत्तनम् १४
तानित्थमात्मतनयानभिधाय सम्यक्
सारार्थभूतमपरिस्फुटतोज्झितं च ।
स्थानार्पितोरुभरनिर्वृतचित्तवृत्ति-
स्तूष्णीं प्रभासतनयो नयविज्जगाम १५

इति श्रीमहाराजाधिराजश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे विश्वकर्मणः पुत्रसंवादो नाम
द्वितीयोऽध्यायः

अथ प्रश्नो नाम तृतीयोऽध्यायः

अथ तेषु जयो नाम वाक्यं तद्विश्वकर्मणः
श्रुत्वा कृताञ्जलिः प्राह स्निग्धगम्भीरया गिरा १
ज्ञानैकनिधिरप्यस्मान् यत् सहायतया किल
वृणोषि तेन न वयमात्मानं बहु मन्महे २
तदिदानीं हितार्थे नः प्रजानामपि च प्रभो
अप्रमेयप्रभावस्त्वं सर्वमाख्यातुमर्हसि ३
पूर्वमेकार्णवे जाते जगति प्रलयं गते
महाभूतामरपुरीज्योतिषां कथमुद्भवः ४
किमाकारा किमाधारा किंप्रमाणा च मेदिनी
विस्तृतिः परिधिश्चास्या बाहुल्यमपि कीदृशम् ५

उच्छ्रायव्यासदीर्घत्वैः कैः केऽस्यां कुलभूभृतः
कति ख्यातानि वर्षाणि द्वीपा नद्योऽब्धयस्तथा ६
काः सूर्येन्दुग्रहर्क्षादिगतयश्च पृथक्पृथक्
भूमेरुपरि किं चैषामन्योन्यं प्रोक्तमन्तरम् ७
किमाधारं दिवि ज्योतिश्चक्रं भ्रमयते च कः
लोके कथं महाभूतान्यूर्ध्वाधो बिभ्रति स्थितिम् ८
युगधर्मव्यवस्थाभिः काश्चादौ लोकवृत्तयः
कश्चादिमस्ततो राज्ञां ग्रहाणां वर्णिनां कथम् ९
कति देशाः कति भुवः पृथक्त्वेन निरूपिताः
कार्यः क्व च कथं सन्निवेशो जनपदाश्रयः १०
व्यक्तचिह्नैः स्वनस्पर्शगन्धवर्णरसादिभिः
काः शस्ता निन्दिताः काश्च पुराणामपि भूमयः ११
कार्यं केन विधानेन भूभृत्पुरनिवेशनम्
किं फलं सुनिविष्टेऽस्मिन् दुर्निविष्टे च किं पुनः १२
कतिप्रकारं दुर्गं च दुर्गकर्मक्रमश्च कः
किमग्रपुरसंस्थानमनिन्द्यं किं च निन्दितम् १३
कश्चात्रानुक्रमविधिः प्रमाणैरुपपादितः
प्राकारगोपुराट्टालपरिखावप्रकर्म च १४
तमङ्गनिर्गमद्वारप्रतोल्यट्टालकादिभिः
कीदृशः प्रविभागश्च रथ्याचत्वरवर्त्मभिः १५
भूमिप्रमाणसंस्थानं सीमा च क्षेत्रदिक्पथैः
नगरग्रामखेटानां निवेशाः स्युः पृथक्पृथक् १६
पुरस्याभ्यन्तरे पूर्वं कैर्द्रव्यावयवक्रमैः
कस्मिन् स्थाने कथं कार्यं शक्रध्वजनिवेशनम् १७
प्रतिसंवत्सरं तस्य नियुक्तस्य कथं पुनः
हिताय नृपलोकानां विधातव्यो महोत्सवः १८

गृहेषु केषु केष्वत्र कासु कासु ककुप्सु च
भागैर्बाह्यान्तरैः कैः कैः कार्याः काः काश्च देवताः १९
कैः कैर्यानपरीवारवर्णरूपविभूषणैः
कार्याः कैः कैः सुरा वस्त्रवयोवेषायुधध्वजैः २०
प्रमाणमितिसंस्थानसङ्ख्यानोच्छ्रयलक्ष्मभिः
प्रासादाः कस्य के वा स्युः सुरराजद्विजातिषु २१
प्राकारपरिखागुप्तं पुरे स्याद्गोपुरं क्व च
युग्ममध्याम्बुवेश्मानि क्व च स्युः क्व महानसम् २२
कोष्ठागारायुधस्थानभाण्डागारनिवेशनैः
व्यायामनृत्तसङ्गीतस्नानधारागृहादिभिः २३
शय्यावासगृहप्रेक्षावेश्मादर्शगृहैः पृथक्
क्रीडादोलाश्रयारिष्टगृहान्तः पुरवेश्मभिः २४
विटङ्कभ्रमनिर्यूहकक्षासंयमनादिभिः
अशोकवनिकाभिश्च लतामण्डपवेश्मभिः २५
वापीभिर्दारुगिरिभिश्चित्राभिः पुष्पवीथिभिः
एतैर्विशेषैरन्यैश्च विचित्रैर्विपिनाश्रयैः २६
मानोन्मानक्रियायामद्रव्याकृतिविनिर्मितः
निकेतननिवेशः स्याद्राज्ञां भागाश्रितः कथम् २७
पुरोधःसैन्यभूश्रेष्ठदैवचिन्तकमन्त्रिणाम्
कं कं च भागं प्राप्य स्युर्निवेशा नृपवेश्मनः २८
पुरे स्युर्दिक्षु भागेषु पदभागेषु केषु च
विप्रराजन्यविट्शूद्रास्तज्जैरन्तरजैः समम् २९
तथा कृषितुलाशिल्पकलापण्योपजीविनः
हिंसाश्रिताश्च पुरुषा निवेश्याः स्युः कथं क्व च ३०
निवेशाः कीदृशाश्चैषां कियन्तो वा भवन्ति ते
शस्यं लोकेन वा तेषां कैः प्रवेशजलभ्रमैः ३१

धिष्ण्यमाद्यं कतिविधं द्रव्याण्याद्यानि कानि वा
हेतुरेषां च सर्वेषां स्याच्च किदृगनुक्रमः ३२
भजन्ते योगमन्योन्यं कानि द्रव्याणि कैः सह
कानि योगं न गच्छन्ति कैर्वा कः क्व वसेत् पुमान् ३३
इष्टकाकर्म किं चेष्टं कीर्तिता कतिधा च भूः
परिकर्मक्रमस्तासां वह्न्यम्बुपवनैश्च कः ३४
गुरुवर्णिध्वजोर्वीशतद्भृत्यप्रतिमा पुराम्
वृक्षाः के के प्रशस्ताः स्युर्गृहार्थे के च गर्हिताः ३५
तच्छेदस्रावसंभूतं शब्ददिक्पातगर्भजम्
विज्ञायते कथं कर्तृकारकादिशुभाशुभम् ३६
प्रमाणं तक्षणच्छेदैः शोधितानां कथं भवेत्
आहृत्य स्थापनं पूर्वं दारूणां स्थानके क्व च ३७
सामान्यतोऽखिलानां काः काश्च जातेर्विशेषतः
प्रशस्तैर्लक्ष्मभिर्युक्ता भूमयः परिकीर्तिताः ३८
शल्योद्धारविधिः कीदृक् कीदृशं भूमिकर्म च
दिग्ग्रहः सूत्रणं चाधिवासनं च कथं भवेत् ३९
प्रमाणं मूलपादस्य शिलान्यासे च को विधिः
विभज्यते कथं वेश्म शालालिन्दविभाजनैः ४०
मानानि कानि भित्तीनां पीठानामुच्छ्रयाश्च के
कथं तानि विकल्प्यानि वर्णानां मेखलादिभिः ४१
समस्तकानां स्तम्भानां द्वारस्तम्भासनैः सह
नागवीथ्युपधानानां समं करठविनिर्गमैः ४२
जयन्तीसङ्ग्रहतुलाकार्याणां वास्तुनोऽपि च
कीदृशं फलकानां च प्रमाणं परिकीर्तितम् ४३
स्वमानात् सर्ववर्णानां तलोच्छ्रायास्तु कीदृशाः
का गवाक्षकपोतालिवेदिकाजालकक्रियाः ४४

स्थूणा निसृष्टिकोत्सूका मृगाल्युपतुलास्तथा
सान्तःप्राणिशिरोवंशाः किंप्रमाणाः प्रकीर्तिताः ४५
छाद्योदयाः कियन्तः स्युर्वृत्तच्छाद्यक्रमश्च कः
त्र्यश्राणां खण्डवृत्तानां लुपानां च क्रियाः कथम् ४६
सीमालिन्दशिरस्तासां कीदृशी चावलम्बना
कतिप्रकाराः प्रासादशिरसां च विकल्पनाः ४७
यच्चान्यदेवमादि स्यात्प्रासादभवनादिषु
द्रव्यकाष्ठकलासङ्गि प्रमाणं तस्य कीदृशम् ४८
शालालिन्दप्रमाणानि चतुःशालेषु धामसु
ज्यायोमध्ययवीयस्सु मूषाभिः काष्ठकल्पना ४९
एकद्वित्रिचतुःशालान्येषां संयोगतोऽपि च
कथं कति च वेश्मानि कल्प्यन्ते प्रविभागशः ५०
कथं च षोडशचतुःषष्ट्येकाशीतयः शतम्
संविभागाः पदानां स्युः कथमत्रामरस्थितिः ५१
आद्यो नवपदो वास्तुरन्त्यः साहस्रिकः कथम्
अङ्गप्रत्यङ्गभागेषु केषु केषु क्व तस्थुषः ५२
कथमेते सुराः सरवे वास्तोरस्य व्यवस्थिताः
एतद्वंशशिरश्चक्षुःकुक्षिहृन्मूर्धमर्मसु ५३
जायेत पीडा द्रव्येषु सन्निविष्टेषु कस्य का
वास्त्वारम्भप्रवेशेषु यात्रायां स्थापनेषु च ५४
दूतस्वप्ननिमित्ताद्यैः कथं ज्ञेयं शुभाशुभम्
कारुक्रियासु चित्रेषु तथा लेप्यक्रियासु च ५५
योज्यं किं कैमयोग्यं च किं भूपभवनादिषु
हस्तस्य लक्षणं मानसंज्ञा वै ज्ञायते कथम् ५६
किं हव्येष्वग्निलक्ष्म स्यात् किं च निर्युक्तलक्षणम्
अनुक्रमेण वर्णानां बलिकर्म च कीदृशम् ५७

विधेयं विधिना केन भवने च प्रवेशनम्
पतिते स्फुटिते जीर्णे प्लुष्टे वज्राशनिद्गते ५८
निमग्नभग्ननिर्भिन्नप्रशीर्णेषु च वास्तुषु
मधुवल्मीकसंभूतौ प्रविरूढे च दारुणि ५९
जायते किं फलं कुत्र प्रायश्चित्तेन को विधिः
इत्येवमादिकमनेकविधं विधानं वेश्मोपगं च पृथगाश्रयसंभृतं च
अस्मास्वनल्पकरुणार्द्रितचित्तवृत्तिर्व्याख्यातुमर्हसि समस्तमनुक्रमेण
६०

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे प्राश्नाध्यायस्तृतीयः

अथ महदादिसर्गश्चतुर्थोऽध्यायः

जयस्येति समाकर्ण्य विश्वकर्मा च तद्वचः
जगाद गर्जदम्भोदध्वनिगम्भीरया गिरा १
साधु वत्स त्वया सम्यक् प्रज्ञयातिविशुद्धया
प्रश्नोऽयमीरितो वास्तुविद्याब्जवनभास्करः २
स त्वं निधाय प्रश्नानां समुदायममुं हृदि
वदतो मेऽवधानेन शृणु यद्ब्रह्मणोदितम् ३
इदमासीद्युगान्ताग्निप्लुष्टं संवर्तकादिभिः
समुत्सृजद्भिरम्भांसि विश्वमेकार्णवीकृतम् ४
तमोभूते ततस्तस्मिन् भोगपर्यङ्कमाश्रितः
हरिः सुष्वाप सलिले कृत्वोदरगतं जगत् ५
अथास्य नाभावम्भोजमभूत् तस्मिन्नगायत
सर्वज्ञानाश्रयः श्रीमांश्चतुर्वक्त्रः सुरेश्वरः ६
स कदाचिद् दधच्चेतः प्रजासृष्टिं प्रति प्रभुः
महान्तमसृजत् तत्र पूर्वं विश्वस्य हेतवे ७

त्रिधाहङ्कृतमेतस्मान्मनोऽभूत् सात्त्विकादतः
राजसादपि चाक्षाणि तन्मात्राणि च तामसात् ८
तेभ्यः पञ्च महाभूतान्याविरासन्ननुक्रमात्
व्योमादीनि धरान्तानि स्वैः स्वैर्युक्तानि तैर्गुणैः ९
अधरोत्तरभावश्च सम्यगेषामथोच्यते
आदौ पृथ्वी ततोऽधस्तादापस्तासां च पावकः १०
तस्याप्यधस्तात्पवनस्ततः खमवकाशदम्
भूतादिस्थं वियत्सोऽपि महता परिवारितः ११
महांश्च विशति व्यक्तं व्यक्तमव्यक्तकं पुनः
ग्राह्यग्राहकभावेन व्यक्तो भूतसमुद्भवः १२
आधाराधार्यभावश्च यथार्थौ च स्थितिव्ययौ
महाभूतानि सदुर्णान्येवं सृष्ट्वा ततः प्रभुः १३
मनः पुनरसौ सर्गे भौतिके सम्यगादधौ
सुरासुरान् सगन्धर्वान् यक्षरक्षांसि पन्नगान् १४
नागान् मुनीनप्सरसो मनसा समजीजनत्
अर्केन्दू चक्षुषो जातौ गगनभ्रमणक्षमौ १५
गात्रेभ्योऽपि च नक्षत्रचक्रमस्मादजायत
इन्द्रियेभ्यश्च पञ्चभ्योऽभूत्ताराग्रहपञ्चकम् १६
ग्रहत्वं पुनरेतेषामिन्द्रियग्रहणाद्विदुः
सुरेन्द्रचापचिह्नानां विद्युद्बलयशालिनाम् १७
भीमाशनिभृतां चासीत्केशेभ्योऽम्बुमुचां भवः
विश्वमापूरयन् कृत्स्नमाविरासीत्तदिच्छया १८
त्रिलोकीपावनस्तिर्यग्गामी चण्डः समीरणः
ततश्चण्डानिलोद्धूतमुपर्यर्कांशुतापितम् १९
वायुभिः शोषमानीतं जगाम घनतां पयः
तस्योपरिष्टादम्भोधेरधः कुण्डलितं वपुः २०

विष्णोः सज्यात्वमभ्येत्य धत्तेऽनन्तोऽखिलां भुवम्
न तप्तं येषु येष्वम्भः प्रदेशेष्वर्करश्मिभिः २१
नीतं न वानिलैः शोषं तत्र तत्राब्धयोऽभवन्
महाम्भोवीचिसङ्घाता विच्छिन्नाश्चण्डमारुतैः २२
यत्र यत्रापुरैक्यं ते तत्र तत्राद्रयोऽभवन्
निश्चलत्वार्थमवनिश्चर्मवद्विततार्थ तैः २३
शैलैः कीलैरिव स्थानेष्वाचिता तेषु तेष्वियम्
वृद्धिं गताद्रिनिःष्यन्दैर्भूभृतां प्रविभागजा २४
निम्नगाभूत्ततोऽम्भोधेः कान्ता निम्नानुसारिणी
मेदिन्यन्तेषु जलधिपर्यन्तेषु विनिर्ययुः २५
अम्भांसि यत्र यत्रासंस्ते द्वीपाश्चित्ररूपिणः
सनिम्नगाम्बुधिद्वीपा विभक्ताखिलभूधरा २६
व्यक्ता बभूव कृत्स्नैवं भूमिर्भूतानि बिभ्रती
स चक्रे रौरवादीनां निरयाणामधः क्षितेः २७
स्वकर्मफलभुक्त्यर्थं स्थानं दुष्कृतकर्मणाम्
जरायुजाण्डजोद्भिज्जस्वेदजैः सह स प्रभुः २८
चतुर्धेत्यसृजल्लोके भूतग्रामं चराचरम्
द्वेधा जरायुजास्तत्र मनुष्याः पशवस्तथा २९
ग्राम्याः सप्ताभवंस्तेषु सप्तारण्यकृतालयाः
पुमान् गौस्तुरगच्छागौ मेषो वेगसरः खरः ३०
ग्रामवासैकनिरताः सप्तैते परिकीर्तिताः
सिंहद्विपोष्ट्रमहिषाः शरभो गवयः कपिः ३१
अरण्यगोचरा जीवाः सप्तैते वत्स निर्मिताः
धर्माधर्मविवेकित्वाच्छ्रेयान् ग्राम्येषु पूरुषः ३२
अरण्यचारिषु श्रेष्ठः सिंहः शौर्यबलादिभिः
सुपर्णा भुजगाः कीटा येऽपि च स्युः पिपीलिकाः ३३

चतुर्धेत्यण्डजन्मानो जन्मिनस्ते प्रकीर्त्तिताः
क्लेदकेशसमुद्भूताः कृमियूकादिजन्तवः ३४
सर्वेऽपि स्वेदजन्मानस्ते प्रजापतिना कृताः
उद्भिज्जाः पञ्चधा भूत्वा निर्दिष्टाः स्थावराश्च ते ३५
द्रुमा वल्ल्यश्च गुल्माश्च वंशाः सतृणजातयः
छन्नान्तःकरणत्वं च स्वस्थानात्त्यागितापि च ३६
छिन्नप्ररोहिता चैषां वैशेषिकगुणत्रयम्
गायत्री भूतसंज्ञैषां चतुर्विंशतिपर्विका ३७
ज्ञात्वैनां पुरुषः पुण्यां भवति स्वर्गभाजनम्
भुवनभूजलवह्निमरुद्व्योमप्रमुख एष भवस्तव कीर्त्तितः
वंसुमतीपरिमाणविनिश्चयं कथयतः शृणु सम्प्रति वत्स मे ३८
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे महदादिसङ्ग्राध्यायश्चतुर्थः

अथ भुवनकोशः पञ्चमोऽध्यायः

अथो यथाक्रमं भूमेः कृत्स्नायाः कथयामि ते
विष्कम्भपरिधी वत्स बाहुल्यमपि च स्फुटम् १
विष्कम्भोऽस्याः समुद्दिष्टो दशयोजनकोटयः
लक्षाण्यपि च मेदिन्यास्तद्वदेकोनविंशतिः
विष्कम्भत्रिगुणो यावद्विष्कम्भांशश्च पञ्चमः २
मेदिन्याः परिधिस्तावद्योजनैः परिकीर्त्तितः
द्वात्रिंशत्कोटयः षष्टिर्लक्षाणि परिधिः क्षितेः ३
अशीतिश्च सहस्राणि योजनानां प्रकीर्त्तितः
योजनानां सहस्राणि विंशतिर्लक्षयोर्द्वयम् ४
इति बाहुल्यमेतस्याः क्षितेर्वत्स तवोदितम्
चतुर्णां सलिलादीनां भूतादेर्महतोऽपि च ५

उत्तरोत्तरमुर्वीतो मानं शतगुणं विदुः
तोयादिषु स्थितेयं भूश्चक्रवद्वृत्तशालिनी ६
पात्रस्थापरपात्रश्रीहारीरयन्यान्यपि क्रमात्
प्रमाणमिदमेतेषां क्षित्यादीनां तवोदितम् ७
द्वीपादीनां तु पाथोधिनिवेशः पुनरुच्यते
द्वीपानामम्बुधीनां च सप्तानामपि मध्यगः ८
जम्बूद्वीपो भवेद्वृत्तः सहस्रशतविस्तृतः
हिमाद्रिर्हेमकूटाख्यो निषधो नीलसंज्ञितः ९
श्वेतः शृङ्गी च षडमी भवन्त्यस्मिन् कुलाचलाः
एतस्मादुत्तरेणाद्रेस्तुषाराङ्कितमेखलात् १०
पूर्वापरायताः सर्वेऽप्यद्रयो यावदम्बुधि
अन्तरा नीलनिषधौ जम्बूद्वीपस्य नाभिगः ११
वृत्तः पुण्यजनाकीर्णः श्रीमान् मेरुर्महाचलः
उदग्याम्यायते मेरोः प्राग्भागे माल्यवान् गिरिः १२
सेवितः सिद्धनारीभिरानीलनिषधायतः
सुमेरोः पश्चिमेनाद्रिर्गन्धर्वकुलसङ्कुलः १३
माल्यवत्सदृशायामो महीभृद्गन्धमादनः
पर्वताबुभयान्तस्थौ हिमवान् शृङ्गवांस्तथा १४
योजनानां सहस्रे द्वे सार्धे स्यादुच्छ्रयस्तयोः
श्वेतश्च हेमकूटश्चेत्यन्तयोः पृथिवीधरौ १५
योजनानां सहस्रार्धमेकैकस्योच्छ्रयस्तयोः
निषधाचलनीलाद्रिमाल्यवद्गन्धमादनाः १६
सहस्रयोजनोच्छ्रायाश्चत्वारोऽमी पृथक्पृथक्
एतेऽष्टावपि शैलेन्द्राः सहस्रद्वयविस्तृताः १७
उच्छ्रयार्धमधश्चापि विलग्नाः सह मेरुणा
मेरोः समुच्छ्रयोऽशीतिः सहस्राणि चतुर्युता १८

षोडशाधः सहस्राणि द्वात्रिंशन्मूर्ध्नि विस्तृतिः
जम्बूतरुर्महान् मध्ये सुमेरोर्निषधस्य च १९
द्वीपस्यामुष्य यद्योगाज्जम्बूद्वीप इति श्रुतिः
शृङ्गैर्हिमशिलानद्धैः सर्वतो हिमवानयम् २०
महान्तो निवसन्त्यत्र पिशाचा यक्षराक्षसाः
कूटैर्हेममयैर्हेमकूट इत्यवनीधरः २१
यं सर्वतो निषेवन्ते सदा चारणगुह्यकाः
तरुणार्कप्रभाजालप्रतिमो निषधाचलः २२
निवसन्ति सुखं तत्र शेषवासुकितक्षकाः
हेमाब्जकर्णिकाकारः सुमेरुर्मणिकन्दरः २३
अत्रामराः साप्सरसस्त्रयस्त्रिंशद्वसन्ति ते
वैडूर्यनद्धैः शिखरैर्नीलो नीलमहीधरः २४
कलयन्ति तपोनित्या यत्र ब्रह्मर्षयः स्थितिम्
श्वेतः स काञ्चनैः शृङ्गैर्गगनोल्लेखिभिर्वृतः २५
दोर्दर्पशालिनां यत्र निवासस्त्रिदशद्विषाम्
महानीलमयो बर्हिपिच्छच्छायो बहिर्महान् २६
पितृणामालयः शृङ्गैरुच्छ्रितैः शृङ्गवान् गिरिः
हिमाचलस्य याम्येन क्षाराब्धिवृतमन्यतः २७
वर्षं स्याद्भारतं नाम प्रथमं कार्मुकाकृति
तुषारनिलयस्याद्रेर्हेमकूटाचलस्य च २८
मध्ये किंपुरुषं नाम द्वितीयं वर्षमीरितम्
अन्तरे हेमकूटस्य निषधस्य च भूभृतः २९
हरिवर्षमिति प्रोक्तं तृतीयं वर्षमुत्तमम्
निषधाचलनीलाद्रिमाल्यवद्गन्धभूभृताम् ३०
चतुर्णां मध्यगं वर्षं तुर्यमस्मिन्निलावृतम्
उत्तरे नीलशैलस्य याम्ये च श्वेतभूभृतः ३१

पञ्चमं वर्षमत्यर्थरम्यं रम्यकसंज्ञितम्
श्वेतशृङ्गवतोः शैलराजयोरनयोरिह ३२
मध्ये षष्ठं हिरण्यांशुरम्यं हैरण्यकाद्वयम्
अस्योत्तरे शृङ्गवतो याम्ये च क्षारवारिधेः ३३
कुरुवर्षाभिधं वर्षमुत्तरेण प्रचक्षते
अन्तरा नीलनिषधौ प्राग्भागे माल्यवद्गिरेः ३४
भद्राश्वमष्टमं वर्षं प्राक्समुद्रान्तमीरितम्
गन्धमादनशैलस्य प्रत्यक् प्राक्चापराम्बुधेः ३५
नवमं वर्षमाचार्याः केतुमालं प्रचक्षते
इति प्रोक्तानि वर्षाणि नवामूनि मया तव ३६
साम्प्रतं पुनरेतेषां प्रमाणमवधारय
प्रमाणेन सहस्राणि चतुस्त्रिंशच्चतुर्दिशम् ३७
योजनानामिहेच्छन्ति चतुरश्रमिलावृतम्
प्राक्प्रत्यग्भागगे वर्षे तस्योदग्याम्यतः समे ३८
एकत्रिंशत्सहस्राणि किञ्चित् प्राक्प्रत्यगायते
यान्युक्तानि षडन्यानि वर्षाण्येभ्योऽवराणि ते ३९
तेषां नवसहस्राणि प्रत्येकं विस्तृतिर्मता
वर्षे किम्पुरुषे नार्यो नराश्च प्लक्षभोजनाः ४०
जीवन्त्ययुतमब्दानां जात्यजाम्बूनदत्विषः
हरिवर्षे नरा नार्यो वसन्तीक्षुरसाशिनः ४१
सायुतं च सहस्रं ते जीवन्ति रजतत्विषः
इलावृते नराः पद्मरागभासोद्गतास्तथा ४२
जम्बूफलरसाहाराः सपादायुतजीविनः
नास्मिन् मेरुतटच्छन्ने तारकार्केन्दुरश्मयः ४३
स्वाङ्गप्रभाभिः किन्त्वत्र कृतोद्योता वसन्त्यमी
कैरवोदरसच्छाया भद्राश्वे साङ्गना नराः ४४

नीलाम्रकफलाहारा भवन्त्यत्रायुतायुषः
दलत्कुवलयश्यामाः केतुमाले शरीरिणः ४५
शरदामयुतं तेषामायुः पनसभोजिनाम्
श्वेताभो रम्यके रम्ये न्यग्रोधफलभुग्जनः ४६
हरिवर्ष इव प्रोक्तमेतस्मिन् मानमायुषः
श्यामत्विषः स्त्रियो वर्षे पुमांसश्च हिरण्यके ४७
जीवन्त्ययुतमब्दानां सर्वेऽपि लकुचाशिनः
कुरुष्वभीष्टदैर्वृद्धैर्जीवन्ति स्त्रीयुता नराः ४८
सपादमयुतं देवगर्भभा गौरकान्तयः
पुण्यकर्मा वसत्येषु वर्षेषु निखिलो जनः ४९
शोकव्याधिजरातङ्कशङ्कोन्मुक्तः सदा सुखी
वनैः कीर्णानि सर्वाणि कुसुमस्तबकानतैः ५०
उद्भिज्जाद्भिर्नदीभिश्च तैस्तैस्तुङ्गैश्च पादपैः
उदञ्चद्वीचिमालेन लावणेनाब्धिना बहिः ५१
पर्वाद्विप्लोऽयमुक्तस्ते जम्बूद्वी मयालिः
द्वादशाम्बुनिधावत्र पृथग्भूमिभृतः स्थिताः ५२
त्रयस्त्रयो दिशि दिशि स्फारोर्मिस्थगितोपलाः
मैनाकश्च बलाहश्च चक्रनामा च दक्षिणे ५३
नारदाख्यो वराहाख्यः सौमकाख्यश्च पश्चिमे
उदग्भागेऽपि च द्रोणकङ्कचन्द्रा इति त्रयः ५४
धूम्रको दुन्दुभिश्चैव सार्द्रकश्चेति पूर्वतः
सहस्रं योजनानां ते दीर्घास्तस्यार्धमुच्छ्रिताः ५५
मग्नास्तदर्धमम्भोधौ विस्तृताश्च धराधराः
जुष्टाः सर्वे सुरैः शृङ्गप्रौढिलीढविहायसः ५६
ज्वलितौषधयः कान्तविचित्रद्रुमवीरुधः
द्वीपाः शाककुशक्रौञ्चशाल्मल्य इति च क्रमात् ५७

गोमेदः पुष्कराख्यश्च षडमी बाह्यतः स्थिताः
क्षीराज्यदधिमद्येक्षुरसस्वाद्वम्भसोऽर्णवाः ५८
द्वीपान् शाकादिकानेते परिवार्य स्थिताः क्रमात्
स्वद्वीपतुल्याः सर्वे ते प्रमाणेन यथाक्रमम् ५९
अमी शाकादयो द्वीपा जम्बूद्वीपप्रमाणतः
यथाक्रमं स्युर्द्विगुणास्तथाम्भोनिधयोऽपिच ६०
शाके सप्ताद्रयस्तेषूदयो जलधरस्तथा
नारको रैवतः श्यामो राजतोऽथाम्बिकेयकः ६१
चतुःसाहस्त्रिकस्तेषां विष्कम्भोऽर्धं समुच्छ्रयः
तदर्धं भूप्रदेशश्च सेवितानां सुरर्षिभिः ६२
वृत्तानां द्वीपवत्तेषां बाह्यतोऽमून्यनुक्रमात्
वर्षाणि सन्निविष्टानि सप्त तानि ब्रवीमि ते ६३
जलदाख्यं कुमारं च सुकुमारं मणीचकम्
कुसुमोत्तरमोदाकीमहाद्रुमवनानि च ६४
कुशे विद्रुमहेमाख्यौ द्युतिमानथ पुष्पवान्
कुशेशयो हरिद्मामृन्मन्दरश्च कुलाचलाः ६५
विष्कम्भोऽष्टसहस्राणि तेषां प्रत्येकमीरितः
तदर्धमुच्छ्रयस्तद्वदुच्छ्रयार्धमधोगमः ६६
उद्भिदं वेणुवत्संज्ञं सरालमथ लम्बनम्
वर्षं श्रीमत्प्रभाकृच्च कपिलं पन्नगाभिधम् ६७
क्रौञ्चे क्रौञ्चोऽन्धकारश्च देवो गोविन्दवामनौ
द्विविदः पुण्डरीकश्चेत्यस्मिन् सप्त कुलाद्रयः ६८
विष्कम्भोऽयुतमेतेषां विष्कम्भार्धं समुच्छ्रयः
अधोगतिस्तदर्धं च वर्षाण्येषां तु बाह्यतः ६९
कुसलाख्याष्टवर्षाख्ये परापतमनोनुगे
मुनिवर्षान्धकाराख्ये सप्तमं दुन्दुभीति च ७०

गिरयः शाल्मलिद्वीपे रक्तः पीतः सितस्तथा
वैपुल्यमेषां द्वात्रिंशत्सहस्राणि प्रचक्षते ७१
वैपुल्यार्धं समुच्छ्रायस्तदर्धमवनौ गतिः
वर्षे शान्तभयं वीतभयं चेत्यत्र संस्थिते ७२
गोमेदे तु सुरश्चेति कुमुदश्चेति भूधरौ
योजनानां चतुःषष्टिस्तौ सहस्राणि विस्तृतौ ७३
उच्छ्रायो विस्तरस्यार्धं तदर्धं चाप्यधोगतिः
धातकीखण्डनामास्य मध्ये वर्षमुदीरितम् ७४
अस्त्यद्रिः पुष्करद्वीपे मानसोत्तरसंज्ञितः
बाह्यतो वर्षमेतस्य महावीतमिति स्मृतम् ७५
विस्तृतोऽष्टौ सहस्राणि शैलोऽयं द्वे तथायुते
सहस्रशतमन्यच्च सुरसिद्धर्षिसेवितः ७६
व्यासार्धेनोच्छ्रयस्तस्य तदर्धेनाप्यधोगमः
सुरेशानां नगर्योऽस्मिन् मया वत्स निवेशिताः ७७
ऐन्द्री वस्वोकसारा प्राग् याम्या संयमनी ततः
प्राचेनसी सुखा पश्चात्तथा सौम्युत्तरे विभा ७८
धर्मरक्षार्थमेतासु चत्वारश्चतसृष्वपि
तथा लोकव्यवस्थार्थं पृथग्लोकभृतः स्थिताः ७९
लोकालोकाचलः स्वादुसलिलाद्द्विगुणो बहिः
स्वादूदाब्धिप्रमाणात्सविस्तारादि्द्विगुणोऽपि च ८०
समुच्छ्रितोऽसौ नियुतं नियुतार्धमधो गतः
पञ्च क्रोशाः प्रतिदिशं नियुतानि तथा नव ८१
तद्वच्च नियुतस्यार्धं मेरुमध्यात्तदन्तरम्
समुद्भासितदेहार्धस्तिग्मांशोः किरणैरयम् ८२
तत्समेन च भूम्यर्धेनावृतः परतः पुनः
भौतान्यावरणान्युर्व्या यस्यैतानि स्थितान्यधः ८३

बाह्यतोऽपि च भूम्यूर्ध्वं निविष्टानि तथानघ
इति वत्स तव प्रोक्तः सन्निवेशोऽखिलः क्षितेः ८४
स्थितिं गतिं च कथयाम्यर्कादीनामतःपरम्
सूर्येन्दुधिष्ण्यज्ञसितभौमार्कित्रिदशार्चिताः ८५
सप्तर्षयो ध्रुवश्चेति भूमेरूर्ध्वं क्रमात् स्थिताः
चत्वारि द्वे तथा भूमेरूर्ध्वमा सूर्यनन्दनात् ८६
षडेवमन्तराणि स्युः सहस्राणां शतं शतम्
ग्रहान्तराणि यान्यन्यान्यवशिष्टान्यनुक्रमात् ८७
तानि चत्वार्यपि द्वे द्वे लक्षे प्रोक्तानि मानतः
धरित्रीध्रुवयोर्मध्ये योजनानां चतुर्दश ८८
नियुतानि समुत्सेधस्त्रैलोक्यस्य प्रकीर्त्तितः
एकाथ द्वे चतस्रोऽष्टावन्तरं कोटयः क्रमात् ८९
महोजनस्तपःसत्यलोकानामुपरि ध्रुवात्
ये स्थिताः सत्यलोकोर्ध्वमधस्तादण्डकर्परात् ९०
एका कोटिर्भवेत्तेषां पञ्चाशन्नियुतान्विता
अथावरणयोगोऽस्य विहितः पद्मजन्मना ९१
यथैवाधस्तथा निर्यक्तथैवोर्ध्वमपि क्रमात्
वहेऽब्दाः प्रवहे सूर्यः स्थितः शीतांशुरुद्वहे ९२
संवहस्थानि नक्षत्राण्यावहस्थाः पुनर्ग्रहाः
सप्तर्षयः परिवहे ध्रुवश्चापि परावहे ९३
प्रदक्षिणममी सप्त मरुतो भ्रमयन्त्यमून्
मेघीभूतः स्थितो मध्ये सुमेरुरुद्दमाभृति ध्रुवः ९४
समस्तमपि तद्बद्धं ज्योतिश्चक्रं भ्रमत्यदः
सप्ताश्वेनैकचक्रेण रथेन रथिनां वरः ९५
तेजोमयेन सततं भ्राम्यति ज्योतिषां पतिः
केतुमालेरजन्यर्धं करोत्यस्तं कुरुष्वपि ९६

मध्यन्दिनं च भद्राश्वेस्तं गच्छन् भारते रविः
रसाब्धिपक्षसङ्ख्यानि योजनानि निमेषतः ९७
सप्तविंशतिकां चाष्टौ भागान्सर्पत्यहर्पतिः
योजनान्यध्विनन्दर्नु गुणसङ्ख्यानि काष्ठया ९८
नवांशकचतुष्कं च क्रामत्यहिमदीधितिः
वह्नयग्निवसुखेन्द्रक्ष्मासङ्ख्यातान्यब्जिनीपतिः ९९
योजनस्य त्रिभागं च प्रयाति कलयैकया
वियत्खव्योमभूताश्विगुणपावकसङ्ख्यया १००
योजनान्युष्णकिरणो मुहूर्तेन प्रसर्पति
रात्र्यहेण सहस्राणि पञ्चाशन्नवकोटयः १०१
लक्षाणि सप्तनवतिर्गतिः स्यात् तिग्मरोचिषः
मध्येन पुष्करद्वीपस्यार्को गत्यानया व्रजन् १०२
नभस्तलेन पुनरप्युदयादुदयं श्रयेत्
इत्थं गतिरियं सम्यक्तिग्मभानोर्निरूपिता १०३
गतिं चन्द्रग्रहर्क्षाणां भोगं चार्काद्विभावयेत्
प्रोक्तं तवेत्यहोरात्रप्रमाणमधुनानघ
पक्षमासर्तुवर्षादीन्व्यवहाराय कल्पयेत् १०४
इति निगदित एष द्वीपशैलाम्बुधीना
मवनिवलयवर्त्ती कात्स्न्यर्यतः सन्निवेशः
गतिरपि दिनभर्त्तुः कीर्त्तिता विश्वमानं
पुनरिह युगधर्मं कीर्त्यमानं निबोध १०५

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे भुवनकोशाध्यायः पञ्चमः

अथ सहदेवाधिकारः षष्ठोऽध्यायः

अथ प्राक्कथितादस्माद्भूतसर्गादनन्तरम्

प्रजासीदमरैः सार्धमियं पूर्णजनाकुला १
शोकव्याधिशरातङ्कविमुक्तास्त्रिदशा इव
पुराभवन् कृतयुगे पुमांसः स्थिरयौवनाः २
ते निकुञ्जेषु शैलानां नदीषु च सरस्सु च
वनेषु च विचित्रेषु चिक्रीडुर्दैवतैः सह ३
हेलया ते समुत्पत्य कदाचिदमरैः सह
निरर्गलाः समासाद्य स्वर्विचेरुः सुरा इव ४
चित्राम्बरावृताः सर्वे नानाभरणशालिनः
विमानाकृतयस्तेषामासन् कल्पद्रुमा द्रुमाः ५
मनोज्ञाभिः सह स्त्रीभिर्विचित्राभरणास्त्रियः
कल्पद्रुमेष्वकार्षुस्ते वासं क्रीडां च तेष्वथ ६
क्षुत्तृड्दुःखोज्झिताः सर्वे बभूवुरयुतायुषः
रत्नावदातदेहास्ते कदाचिद्भूरसाशिनः ७
रतिप्रायास्तदासंस्ते स्वेच्छाहारविहारिणः
स्वीकारविग्रहच्छेदविशदीकृतचेतसः ८
नास्मिन्नर्कस्तपत्युग्रं न वाति प्रबलोऽनिलः
नीहारच्छेदसुन्दर्यो निशाः पूर्णेन्दुभूषणाः ९
भिन्नस्निग्धाञ्जनश्यामाः सतडिन्मन्द्रनिस्वनाः
अचण्डाशनयश्चासन् कबरीकान्तयो घनाः १०
माद्यत्पिकवधूदष्टमाकन्दमुकुराङ्कुराः
आसन्सदापुष्पफलाभोगा येषां वनालयाः ११
एकोऽग्रजन्मा वर्णोऽस्मिन् वेदोऽभूदेक एव च
ऋतुर्वसन्त एवैकः कुसुमायुधबान्धवः १२
रूपश्रुतसुखैश्वर्यभाजस्ते निखिला अपि
समत्वान्नाभवत्तेषामुत्तमाधममध्यता १३
न खेटनगरग्रामपुरक्षेत्रखलादिकम्

न दंशमशकक्रव्याद्भयं वा न ग्रहादि च १४
कल्पद्रुमाप्तभोगानां न चैषां प्रभुरप्यभूत्
पुरास्मिन् भारते वर्षे तेषां निवसतामिति १५
जगाम सुबहुः कालः सुरैः सार्धं सुरश्रियाम्
अज्ञाततत्प्रभावानां सहसंवाससंभवा १६
अथैषामभवद्दैवादवज्ञा त्रिदशान् प्रति
अपूज्यमानास्ते पूज्याः सर्वेऽप्यखिलवेदिनः १७
आदाय तत्कल्पतरुं निपेतुर्द्यां दिवौकसः
दिवंगमनशक्तिश्च दिव्यो भावश्च तद्गतः १८
सरसः परमो भूमौ भूरसश्च न्यवर्तत
स्मृत्वा कल्पद्रुमांस्तांस्तान् क्रीडास्ताश्च सुरैः सह १९
व्यलपन् बहुधात्यर्थमनर्थकृतचेतसः
ततो विलपतां भूरि स्वैरमाहारहेतवे २०
प्राणत्राणार्थमेतेषामभूत् पर्पटको भुवि
भूरसेनैव तेनैते कुर्वाणाः प्राणरक्षणम् २१
विना कल्पद्रुमैर्वासमन्यवृक्षेषु चक्रिरे
अथैषां पश्यतामेव कदाचिद्भाग्यसंक्षयात् २२
विपर्ययाच्च कालस्य भूमेः पर्पटकोऽप्यगात्
ततः पर्पटके नष्टे तुषशूककणोज्झिताः २३
अकृष्टपच्या मेदिन्यामभवञ्शालितण्डुलाः
शाल्योदनेन तेनाथ सुखादुव्यञ्जनेन ते २४
परमां तृप्तिमासेदुः परितोषात्तचेतसः
तन्नाशशङ्कया शालितण्डुलानां द्रुमेष्वधः २५
ते व्यधुर्महतो राशींस्तत्क्षेत्राणि च चक्रिरे
अजायत ततो लोभो मात्सर्येर्ष्यापुरस्सरः २६
तत्र तत्र शनैश्चक्रे पदन्यासं च मन्मथः

द्वन्द्वप्राप्तया ततस्तेषां बिभ्रतामुत्तमां गतिम् २७
धैर्यध्वंसादभूत् स्त्रीषु भृशं रागतुरङ्गमः
दारक्षेत्रनिमित्तानि भूयांस्येषामनन्तरम् २८
परिक्लेशैकमूलानि द्वन्द्वान्यासन्पृथक्पृथक्
ततः स्वक्लृप्तमर्यादोच्छेदिष्वेष्वजितात्मसु २९
अविनीतेष्वभाग्येषु स शालिस्तुषतामगात्
प्रवृद्धरजसां तेषां सा पुराश्लोकता गता ३०
मलप्रवृत्तिरभवत् तुषधान्योपसेवया
तुषधान्ये ततो नष्टे परिभुक्ते च सञ्चये ३१
चीरवल्कलवस्त्राणां कन्दमूलफलाशिनाम्
ऋतवः कालपर्यासात् षड् वसन्तादयोऽभवन् ३२
ततस्तेषामभूद्दोषरोगशोकाकुलं वपुः
मनश्च कामक्रोधेर्ष्यादैन्यासूयादिदूषितम् ३३
आधिदैवकमुष्णाम्बुशीतादिजनितं महत्
आधिभौतिकमप्यासीद्दुःखं व्यालमृगादिजम् ३४
इत्थं दुःखत्रयार्त्तास्ते व्यवायाद्यभिगुप्तये
हिमनीहारशीताम्बुवाताद्यापच्छिदेऽपि च ३५
अजातप्रीतयो वृक्षैः कुट्टिमानि गृहाणि ते
व्यधुश्छित्त्वाश्मभिर्वृक्षानन्यान् दुःखार्तचेतसः ३६
स्मृत्वा कल्पद्रुमाकारास्तद्रूपाणि गृहाणि ते
एकद्वित्रिचतुःसप्तदशशालानि चक्रिरे ३७
शब्दा प्राकारपरिखेष्वाच्छन्नेषु तृणादिभिः
हृष्टास्तेष्वनयन् कालमाप्तेषु गृहमेधिनः ३८
इत्यमीषु गृहिणो गृहेषु ते शीतवातजलतापनाशिषु
हर्षसंवलितमानसाश्चिरं सन्निरस्तविपदोऽवसन् सुखम् ३९
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि

वास्तुशास्त्रे
सहदेवाधिकारो नाम षष्ठोऽध्यायः

अथ वर्णाश्रमप्रविभागः सप्तमोऽध्यायः

अथामरगणैः सार्धमाजगाम पितामहः
दुःखच्छेदाय मर्त्यानामादाय नृपतिं पृथुम् १
स तानूवे प्रभुर्वोऽसौ मरुतामिव वासवः
दण्डधारी च दुष्टानां प्रभावे लोकपालवत् २
प्रतापतापितारातिसिंहः सिंहपराक्रमः
युष्माकमाधिपत्येऽसावभिषिक्तो मया पृथुः ३
रक्षाकृत्सर्वशिष्टानामुच्छेत्ता दुष्टचेतसाम्
वृत्तितो भीतिहर्ता च भविष्यत्येष वो नृपः ४
भवद्भिरेतदायत्तैर्भवितव्यं ममाज्ञया
करिष्यत्येष वो नीत्या चातुर्वर्ण्याश्रमस्थितीः ५
उक्त्वेति ब्रह्मणि गते नाथमासाद्य तेऽथ तम्
अवोचन् दुःखिता दुःखादस्मात् त्रायस्व नः प्रभो ६
कल्पद्रुमामरत्यक्तान् द्वन्द्वार्तिक्लान्तचेतसः
व्यसनार्णवनिर्मग्नान् पाहि नः पृथिवीपते ७
अथो पृथुरुवाचैतान् मा भैष्टसुखमास्यताम्
दुःखान्यपहरिष्यामि करिष्ये च सुखानि वः ८
ततः स चतुरो वर्णानाश्रमांश्च व्यभाजयत्
तेषु ये वेदनिरताः स्वाचाराः संयतेन्द्रियाः ९
सूरयश्चावदाताश्च ब्राह्मणास्तेऽभवंस्तदा
यजनाध्ययने दानं याजनाध्यापनार्थिताः १०
धर्मास्तेषां विमुच्यान्त्यांस्त्रींस्तुल्याः क्षत्रवैश्ययोः
ये तु शूरा महोत्साहाः शरण्या रक्षणक्षमाः ११

दृढव्यायतदेहाश्च क्षत्रियास्त इहाभवन्
विक्रमो लोकसंरक्षाविभागो व्यवसायिता १२
एतेषामयमप्युक्तो धर्मः शुभफलोदयः
निसर्गान्नैपुणं येषां रतिर्वित्तार्जनं प्रति १३
श्रद्धादाद्यदयावन्तो वैश्यांस्तानकरोदसौ
चिकित्सा कृषिवाणिज्ये स्थापत्यं पशुपोषणम् १४
वैश्यस्य कथितो धर्मस्तद्वत्कर्म च तैजसम्
नातिमानभृतो नातिशुचयः पिशुनाश्च ये १५
ते शूद्रजातयो जाता नातिधर्मरताश्च ये
कलारम्भोपजीवित्वं शिल्पिता पशुपोषणम् १६
वर्णत्रितयशुश्रूषा धर्मस्तेषामुदाहृतः
ब्रह्मचारी गृहस्थो वा वानप्रस्थस्तथा यतिः १७
इत्याश्रमाः पृथक् तेन चत्वारः प्रविभाजिताः
गुरुशुश्रूषणं भैक्षं व्रतचर्याग्निकर्म च १८
स्वाध्यायश्चाभिषेकश्च धर्मोऽयं ब्रह्मचारिणः
पूजाग्न्यतिथिदेवानां स्ववृत्त्या जीवनं दमः १९
असमानर्षिगोत्रेषु विवाह ऋतुगामिता
परस्य स्त्रीषु वैमुख्यं परानुग्रहशीलता २०
विनिवृत्तिरकार्येभ्यो धर्मोऽयं गृहिणां कृतः
देवतातिथिसत्कारो ब्रह्मचर्यं वने स्थितिः २१
वल्काजिनजटाचीरधारणं शयनं भुवि
उपोषणैर्व्रतैर्देहकर्शनं नियमैस्तथा २२
आहारोऽकृष्टपच्यैश्च धर्मोऽयं वनवासिषु
वैराग्यमिन्द्रियजयश्चिन्तात्यागः प्रशान्तता २३
आकिञ्चन्यमनारम्भो यतिधर्मः सदा स्मृतः
क्षमत्वं गुर्वधीनत्वं शौचं स्वाध्यायनित्यता २४

विशुद्धिर्व्यवहारेषु शिष्यधर्मोऽयमीरितः
शुचित्वं वाङ्मनःकायैः पतिशुश्रूषणं क्षमा २५
पूजनं पतिपूज्यानां स्त्रीधर्मः शौचमेव च
एवं वर्णाश्रमान् सम्यक् कृत्वा वर्णांस्तदुद्भान् २६
विभज्य तेषां वैन्येन ते ते धर्माः प्रकीर्तिताः
वृत्तिं कर्माणि चैतेषां पृथगुद्दिश्य सोऽभ्यधात् २७
स्वधर्मावस्थितानां वो भावि लोकद्वये सुखम्
य एतां स्थितिमुल्लङ्घ्य मोहादन्यद्विधास्यति २८
तस्याहं यमवत्क्रुद्धः करिष्याम्यनुशासनम्
युक्तानां कर्मसु स्वेषु वृत्त्यर्थं भवतामहम् २९
खेटकग्रामवेश्मानि विधास्यामि पुराणि च
इत्युक्त्वा तानथो कोटच्या कार्मुकस्य पृथुर्नृपः ३०
विषमां साधयामास पृथिवीं पृथुविक्रमः
तत्सङ्कलेशेन गौर्भूत्वा नश्यन्ती तेन मेदिनी ३१
विधेर्नियोगाद्दुदुहे साधु सस्यानि भूतये
कल्पितास्तेन शैलानां सरितामन्तरेषु च ३२
समेषु चावकाशेषु पुरादीनां विभक्तयः
तेन सीराग्रकृष्टेयं धान्यैरुप्तैर्यथाविधि ३३
ससस्या क्रियते क्षोणी भगवत्यम्बुदागमे
इत्युद्भवो निगदितः प्रथमो नृपस्य
धर्मेण सार्धमपि चाश्रमवर्णभेदाः
प्रोक्ताः कृषिव्यतिकरोऽपि च दर्शितस्ते
कात्स्न्र्येन वत्स शृणु देशविभागभूमिम् ३४

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे वर्णाश्रमप्रविभागो नाम सप्तमोऽध्यायः

अथ भूमिपरीक्षा नामाष्टमोऽध्यायः

देशाश्च देशभूम्यश्च समासात्तव सम्प्रति
तत्सङ्ख्या तद्विभागाश्च प्रोच्यन्तेऽवहितः शृणु १
देशः स्याज्जाङ्गलानूपसाधारणतया त्रिधा
त्रिविधस्याप्यथैतस्य यथावल्लक्ष्म कथ्यते २
दूराम्बुरिरिणप्रायो ह्रस्वकण्टकिपादपः
रूक्षोष्णचण्डपवनः कृष्णमृत्तेषु जाङ्गलः ३
निम्नो भूरिजलः स्निग्धो बहुमत्स्यामिषो हिमः
स्यादनूपः सरित्प्रायः स्निग्धोच्छ्रितबहुद्रुमः ४
यः पुनर्नातिशीतोष्णः स्याद्देशद्वयलक्षणः
स साधारण इत्युक्तो देशो देशविशारदैः ५
जाङ्गलादिषु देशेषु त्रिपुरयेषु स्वलक्षणैः
युक्ताः षोडश विज्ञेया भूमयः प्रविभागतः ६
बालिशस्वामिनी भोग्या सीता गोचररक्षिणी
अपाश्रयवती कान्ता खनिमत्यात्मधारिणी ७
वणिक्प्रसाधिता द्रव्यसम्पन्नामित्रघातिनी
आश्रेणीपुरुषा शक्यसामन्ता देवमातृका ८
धान्या हस्तिवनोपेता सुरक्षा चेति षोडश
भुवः संज्ञाभिरुद्दिष्टा लक्ष्मासामथ कथ्यते ९
भूभुजा बालिशेनापि शक्यते या प्रशासितुम्
या च भद्रजना सा स्याद्बालिशस्वामिनी क्षितिः १०
वितरन्त्यधिकं यस्यां भागभोगादिकान् करान्
नरा भूरिश्रियः सात्र भोग्येति क्षितिरुच्यते ११
यस्यां नदाश्च नद्यश्च गिरिर्मध्येऽथवा बहिः
विभक्तक्षेत्रसीमा सा सीता गोचररक्षिणी १२
सरिदद्रिवनाद्येषु त्रासाद्यस्यां विशेज्जनः

जनापाश्रययोग्यत्वादपाश्रयवतीति सा १३
वनोपवनवत्यद्रिसरित्कुञ्जमनोहरा
देहिनो रमयत्युर्वी या सा कान्तेति कीर्तिता १४
यस्यां सदैव जायन्ते कलधौतादिधातवः
लवणानि च भूयांसि प्राहुः खनिमतीति ताम् १५
यात्यन्तं नानुगृह्येत दण्डकोशासनादिभिः
स्फीतलोकाश्रया या च सा स्याद्भूरात्मधारिणी १६
प्रसिध्यन्त्यसकृद्यत्र पण्योपक्रयविक्रयाः
वणिक्प्रसाधितेत्युक्ता सा भूर्वणिगलङ्क्रता १७
शाकाश्वकर्णखदिरश्रीपर्णीस्यन्दनासनैः
वेणुवेत्रशराद्यैश्च युक्ता द्रव्यवतीति भूः १८
यस्यां जनपदाः साधु विभक्तास्त्यक्तविक्रमाः
योगं यान्ति च मित्राणि स्याद्भूः सामित्रघातिनी १९
न क्षुद्रा वन्दिनो यस्यां दुर्गप्रत्यन्तसंश्रयाः
भूः साश्रेणीमनुष्येति विनीतैराश्रिता जनैः २०
मन्त्रोत्साहादिवैमुख्यं यस्यां सामन्तभूभुजः
भजन्ते सा स्मृता शक्यसामन्ता भूः समन्ततः २१
जीवन्ति क्षेत्रिणो यस्यां नदी नद्यादिवारिभिः
तां देवमातृकेत्याहुरनपेक्षितवारिदाम् २२
निष्पद्यन्तेऽधिकं यस्यां बीजान्युप्तान्ययत्नतः
कृष्टानुपहृतक्षेत्रा धान्या सा धान्यशालिनी २३
पर्यन्तेष्वद्रयो यस्यां या च हस्तिवनाश्रिता
सा हस्तिवनवत्युर्वी भूभृतः सैन्यवर्धिनी २४
दुष्प्रधृष्यैव या नित्यं विषमत्वादरातिभिः
विषमाद्रिसरिद्दुप्ता सा सुरक्षेति भूः स्मृता २५
षोडशेत्युदिता भूम्यः प्रविभागाद्यथातथम्

अन्या जनपदादीनां ब्रूमः सम्मिश्रलक्षणाः २६
धातुस्यन्दोल्लसत्कुञ्जगुल्मद्रुमलतावृतैः
उत्सङ्गिताः पृथुशिलैः समन्तादवनीधरैः २७
तीर्थावतारकान्ताभिः स्वादुतोयाभिरावृताः
नदीभिः पुलिनप्रान्तैर्विचित्रद्रुमशालिभिः २८
कोकिलालापसुभगैर्मधुमत्तालिशालिभिः
विचित्रफलपुष्पाढ्यैः काननैरुपशोभिताः २९
दलत्कुवलयश्रेणीक्वणन्मधुपहारिभिः
सरसीदेवखाताद्यैर्भूषिताः प्राज्यवारिभिः ३०
समैः सुगन्धिभिः स्वादुशीतैः कान्तैरभङ्गुरैः
क्षेत्रैरक्षतसीमान्तैः सस्यनिष्पादिभिर्वृताः ३१
निष्कण्टकाश्मवल्मीकैः प्रभूतयवसेन्धनैः
विभक्तक्षेत्रसीमान्तैर्गोचरैरुपशोभिताः ३२
स्थले तृणसमुद्राणामन्तरेषु वसुन्धराः
प्रशस्यन्ते समासन्नस्वादुशीतलवारयः ३३
दुरात्मनामधृष्या यास्तथानेकाश्रयान्विताः
संरम्भत्रासनिर्मुक्तं मनश्च रमयन्ति याः ३४
तास्वेवंगुणयुक्तासु महीषु विनिवेशयेत्
यथास्थानं जनपदान् खेटग्रामपुरादि च ३५
युता महीध्रमूला स्वप्राकारैस्तु पृथक्पृथक्
चतस्रः कीर्तिता धन्या भूमयो दुर्गहेतवः ३६
दुरारोहतया दुर्गे टङ्कच्छिन्न इवान्ततः
समपृष्ठेऽम्बुयुक्ताद्रौ गिरिदुर्गावनिर्भवेत् ३७
कण्टकिद्रुमनीरन्ध्रनद्धे साम्भसि कानने
गूढप्रवेशमार्गे भूर्मूलदुर्गेति कीर्तिता ३८
द्वीपेषु स्वादुतोयेषु बह्वगाधजला बहिः

रम्यावकाशदेशा स्याज्जलदुर्गा च मेदिनी ३९
स्निग्धाः सारभृतः शुद्धाः प्रदक्षिणजलाशयाः
बहूदकास्तरुच्छन्ना निबिडाः प्रागुदक्प्लवाः ४०
दूर्वासस्त्वौषधीमुञ्जकुरुन्दकुशवल्कलैः
परितः परिणद्धाश्च स्वादुस्वच्छस्थिरोदकाः ४१
वास्तुयज्ञामरस्थानाद्यारामोद्यानसंभृताः
तटाकवापीस्थानैश्च याः समन्तादलङ्कृताः ४२
या वाहनानां सुखदा मिथुनानां रतिप्रदाः
पुरार्थं ताः प्रशस्यन्ते भूमयो जनितश्रियः ४३
कुङ्कुमागुरुकर्पूरस्पृक्कैलाचन्दनादिभिः
सुगन्धा मिश्रितैरेभिः पृथक्स्थैर्वा वसुन्धरा ४४
कल्हारपाटलाम्भोजमालतीचम्पकोत्पलैः
स्थलाम्बुप्रभवैश्चान्यैः सुगन्धा कुसुमैस्तथा ४५
गोमूत्रगोमयक्षीरदधिमध्वाज्यगन्धभाक्
समानगन्धा मदिरामाध्वीकेभमदासवैः ४६
शालिपिष्टकगन्धैश्च धान्यगन्धैश्च या तथा
प्रशस्ताखिलवर्णानामीदृग्गन्धा वसुन्धरा ४७
सिता रक्ता च पीता च कृष्णा चैव क्रमान्मही
विप्रादीनां हि वर्णानां सरवेषामथवा हिता ४८
स्वादुः कषाया तिक्ता च कटुका चेत्यनुक्रमात्
वर्णानां स्वादतः शस्ता सर्वेषां मधुराथवा ४९
घर्मागमे हिमस्पर्शा या स्यादुष्णा हिमागमे
प्रावृष्युष्णहिमस्पर्शा सा प्रशस्ता वसुन्धरा ५०
मृदङ्गवल्लकीवेणुदुन्दुभीनां समा ध्वनौ
द्विपाश्चाब्धिसमस्वाना चेति स्युर्भूमयः शुभाः ५१
इदानीमप्रशस्तानां भुवां लक्ष्माभिदध्महे

पुरादिसन्निवेशार्थं परित्याज्या भवन्ति याः ५२
भस्माङ्गारकपालास्थितुषकेशविषाश्मभिः
मूषकोत्करवल्मीकशर्कराभिश्च निर्भरा ५३
रूक्षा प्ररोहिणी निम्ना भङ्गुरा सुषिरोषरा
वामावर्तजलास्त्राविरयसारा विषमोन्नता ५४
कटुकरटकिनिःसारशुष्कनिष्फलपादपा
क्रव्यात्पक्षिसमाकीर्णा कृमिकीटवती च या ५५
सुकृतान्यपि भोज्यान्नभक्ष्यपानानि तत्क्षणात्
यस्यां विनाशमायान्ति सह तूर्यादिनिस्वनैः ५६
सरित् पूर्ववहा यस्यां पुरार्थं तामपि त्यजेत्
बहुनापि यतस्तत्र कालेनायाति सा पुनः ५७
वसासृङ्मज्जविरमूत्रमलकोथपतत्रिणाम्
समगन्धां त्यजेदुर्वीं तैलस्य च शवस्य च ५८
सदैव धूम्रवर्णा या मिश्रवर्णाथवा मही
विवर्णा रूक्षवर्णा वा सा न स्यादिष्टदायिनी ५९
तिक्ताम्ललवणा चापि भूमिर्या स्वादतो भवेत्
तां लोकविद्वेषकरीं त्यजेत् पुरनिवेशने ६०
या रूक्षखरसंस्पर्शा सदैवोष्णा हिमाथवा
अनिष्टसुखसंस्पर्शा या स्यात्तामपि सन्त्यजेत् ६१
क्रोष्टृष्ट्रश्वखरस्वाना या च निर्झरनिस्वना
भिन्नभाण्डसमक्रूरध्वनितापि च नेष्यते ६२
इति गन्धादिभिर्भूमिः कथितेयं शुभाशुभा
हलेन कृष्यमाणायां भूमौ काष्ठे समुद्धृते ६३
विद्याद्भयं वह्निभवमिष्टकायां धनागमम्
पाषाणेषु तु कल्याणं कुलप्रध्वंसमस्थिषु ६४
सरीसृपेषु सर्वेषु स्तेनेभ्यो भयमादिशेत्

अनूषरा बहुतृणा शस्ता स्निग्धोत्तरप्लवा ६५
प्रागीशानप्लवा सर्वप्लवा वा दर्पणोदरा
शुभेऽह्न्युपोषितः स्नातः शुचिः शुक्लस्रगम्बरः ६६
स्वस्ति विप्रान् वाचयित्वा वास्तुदेवान् समर्च्य च
करप्रमाणं कुर्वीत खातं तद्भूमिमध्यगम् ६७
ततस्तन्मृदमाकृष्य तत् तयैवानुपूरयेत्
खाताधिकमृदुक्ता भूः श्रेष्ठा मध्या च तत्समा ६८
प्रहीणखातमृत् द्वोणी हीना शस्ता न सा नृणाम्
खन्यमाने यदा खाते तन्मृदोऽन्तर्विलोक्यते ६९
मणिशङ्खप्रवालादि तदातिश्रेयसी क्षितिः
सापि प्रशस्यते भूमिर्यस्यां स्युः खातपांसवः ७०
तुषकेशोपलाङ्गारभस्मास्थिलववर्जिताः
भृत्वाद्भिः खातमापूर्णे तस्मिन् पदशतं व्रजेत् ७१
तावच्चेदागमेऽम्भः स्यात्तदा भूः सार्वकामिकी
मध्यमात्रप्रहीणे स्यात् ततो हीनतरेऽधमा ७२
खाते सितादिमाल्यानि यस्यां निश्युषितानि च
यद्वर्णानि न शुष्यन्ति सा तद्वर्णेष्टदा मही ७३
खातस्योदक्प्रभृतिषु दिक्षु प्रज्वालयीत वा
दीपान् यस्यां चिरं तिष्ठेत् तद्वर्णेष्टप्रदा हि सा ७४
इत्येवं कीर्त्तिताः कात्स्न्यर्याल्लक्ष्मभिः पुरभूमयः
खर्वटग्रामखेटानामेता एव स्मृता हिताः ७५
वर्णिनां वर्णधाम्नां च शिबिराणां च सर्वदा
प्रासादयज्ञवाटानामेता एवेष्टदा भुवः ७६
इत्येवमादिभिरिमाः शुभलक्ष्मयुक्ता
भूम्यः शुभा निगदिता नगरादिहेतोः
आभ्यः परेण बहुधा परिकल्प्यमानं

ब्रूमस्त्रिधा स्थितवतोऽपि करस्य मानम् ७७

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
भूमिपरीक्षा नामाष्टमोऽध्यायः

अथ हस्तलक्षणं नाम नवमोऽध्यायः

हेतुः समस्तवास्तूनामाधारः सर्वकर्मणाम्
मानोन्मानविभागादिनिर्णयैकनिबन्धनम् १
परिध्युदयविस्तारदैर्घ्याणां स्युरमी यतः
ज्येष्ठमध्याधमा भेदा यं च ज्ञात्वा न मुह्यति २
इदानीं तस्य हस्तस्य सम्यङ् निश्चयसंयुतम्
कथ्यते त्रिविधस्यापि लक्षणं शास्त्रदर्शितम् ३
रेणवष्टकेन वालाग्रं लिक्षा स्यादष्टभिस्तु तैः
भवेद् यूकाष्टभिस्ताभिर्यवमध्यं तदष्टकात् ४
अष्टाभिः सप्तभिः षड्भिरङ्गुलानि यवोदरैः
ज्येष्ठमध्यकनिष्ठानि तच्चतुर्विंशतिः करः ५
सोऽष्टभिः पर्वभिर्युक्तः करः कार्यो विजानता
करस्यार्धं चतुःपर्व शेषं स्याद्वक्तमङ्गुलैः ६
तत्राग्रे पर्वरेखाः स्युस्तिस्रः पुष्पकभूषिताः
शेषास्वङ्गुलरेखासु पुष्पाणि विदधीत न ७
अत्रार्धे मध्यतः कार्यं द्वेधा पञ्चममङ्गुलम्
मध्यं त्रिधाष्टमं कार्यं चतुर्धा द्वादशं ततः ८
हस्तः स्वाङ्गुलमानेन विधेयाङ्गुलमिष्यते
तत्साधं द्विगुणं वापि बाहुल्यं तु तदर्धतः ९
कथितः करभेदोऽयमङ्गुलानां विभेदतः
तस्य निर्माणदारूणि देवताश्च प्रचक्ष्महे १०

खदिराञ्जनवंशादि श्लक्ष्णं हीरं मनोरमम्
सारवच्च भवेदिष्टं दारु हस्तप्रकल्पने ११
ग्रन्थिलं लघु निर्दग्धं जीर्णं विस्फुटितं तथा
अदृढं कोटराक्रान्तं दारु हस्ताय नेष्यते १२
त्रिविधस्याप्यथैतस्य पर्वरेखासु देवताः
मध्यादारभ्य विज्ञेयाः क्रमेण नव वच्मि ताः १३
ब्रह्मा वह्निर्यमो विश्वकर्मा नाथश्च पाथसाम्
वायुर्धनाधिपो रुद्रो विष्णुश्चाग्रे जगत्पतिः १४
वास्तुद्रव्यविभागेषु यानेषु च विशेषतः
प्रारभेत यतो मानं कल्पयेद्देवतास्ततः १५
विद्धैश्च द्रव्यमध्यैश्च देवताभिश्च पीडिते
प्रत्येकं त्रिदशस्थाने यथोक्तं फलमादिशेत् १६
शिरोर्त्तिरनलप्लोषो मरणं स्थपतेर्वधः
अतिसारो मरुद्व्याधिरर्थभ्रंशो भयं नृपात् १७
कुलपीडा च महती कर्तृकारकयोरिति
यथाक्रममभी दोषा ब्रह्मादीनां निपीडनात् १८
ब्रह्मानलकयोर्मध्ये यदा हस्तं तु धारयेत्
कर्मस्वधिगतस्तेषां पुत्रलाभो भविष्यति १९
कर्मणः सुष्ठुनिष्पत्तिस्तिष्टतेभोगमक्षयम्
ब्रह्मा यमस्तयोर्मध्ये यदा हस्तं तु धारयेत् २०
कर्ता सशिल्पिकश्चैव नचिरेण विनश्यति
विश्वानलकयोर्मध्ये हस्तसूत्रं यदा धृतम् २१
सुकर्मणि मध्यान्तं निष्पन्ने पुरवृद्धिता
यमजलदयोर्मध्ये मध्यमं च विनिर्दिशेत् २२
पवनो विश्वकर्मा चोभयोर्मध्ये च धारणम्
यदा तु तत्र कर्मान्तं शुभं तत्सर्वकामदम् २३

नीरधनदयोर्मध्ये मध्यमं च विनिर्दिशेत्
एषां मध्ये यदा वत्सहस्तं तत्र यदा धृतम् २४
अनावृष्टिभयं लोके देशभङ्गो न संशयः
रुद्रपवनयोर्मध्ये रुचिहस्तं तु धारयेत् २५
तत्र लक्ष्मीवतस्तस्य कार्यसिद्धिर्न संशयः
विष्णुधनदयोर्मध्ये यदा पाणिकरायतः २६
विविधास्तत्र भोगाश्च प्रजायन्ते नरस्य हि
ज्येष्ठादीनामथैतेषां संज्ञाभेदो विधीयते २७
यच्च येन भवेद्द्रव्यं मेयं तदपि कीर्त्यते
यवाष्टकाङ्गुलैः क्लृप्तः प्रकर्षेणायतः किल २८
ज्येष्ठो हस्तः स विद्वद्भिः प्रोक्तः प्राशयसंज्ञितः
यः पुनः कल्पितः सप्तयवक्लृप्तैरिहाङ्गुलैः २९
तज्ज्ञैः स मध्यमो हस्तः साधारण इति स्मृतः
मात्रेत्यल्पं यतः प्रोक्तं हस्तश्च शय उच्यते ३०
तेन मात्राशयः स स्याद्धस्तो यः षडयवाङ्गुलः
विभागायामविस्ताराः खेटग्रामपुरादिषु ३१
प्रासादवेश्मपरिखाद्वाररथ्यासभादिषु
मार्गाश्च निर्गमाश्चैषां सीमक्षेत्रान्तराणि च ३२
वनोपवनभागाश्च देशान्तरविभक्तयः
योजनक्रोशगव्यूतिप्रमाणमपि चाध्वनः ३३
प्राशयेन प्रमातव्याः खातक्रकचराशयः
तलोच्छ्रयान् मूलपादान् जलोद्देशानधः क्षितेः ३४
तथा दोलाम्बुशस्त्रादि पातमानविनिर्णयम्
शैलखातनिकेतानि सुरुङ्गामानमान्तरम् ३५
साधारणेन वाटयध्वमानं च परिकल्पयेत्
आयुधानि धनुर्दण्डान् यानं शयनमासनम् ३६

प्रमाणं कूपवापीनां गजानां वाजिनां नृणाम्
अरघट्टेक्षुयन्त्राणि युगयूपहलानि च ३७
शिल्प्युपस्करनौछत्रध्वजातोद्यानि यानि च
वृसीधर्मोपकरणपटवानादिकं च यत् ३८
नल्वदण्डांस्तथा मात्राशयहस्तेन मापयेत्
भेदत्रयान्वितमपि प्रोक्तं हस्तस्य लक्षणम् ३९
संज्ञाभेदोऽथ सामान्यमानानां प्रतिपाद्यते
स्यादेकमङ्गुलं मात्रा कला प्रोक्ताङ्गुलद्वयम् ४०
पर्व त्रीण्यङ्गुलान्याहुर्मुष्टिः स्याच्चतुरङ्गुला
तलं स्यात्पञ्चभिः षड्भिः करपादाङ्गुलैर्भवेत् ४१
सप्तभिर्दिष्टिरष्टाभिरङ्गुलैस्तूणिरिष्यते
प्रादेशो नवभिस्तैः स्याच्छ्यतालो दशाङ्गुलः ४२
गोकर्ण एकादशभिर्वितस्तिर्द्वादशाङ्गुला
चतुर्दशभिरुद्दिष्टः पादो नाम तथाङ्गुलैः ४३
रत्निः स्यादेकविंशत्या स्यादरत्निः करोन्मितः
द्वाचत्वारिंशता किष्कुरङ्गुलैः परिकीर्त्तितः ४४
चतुरुत्तरयाशीत्या व्यामः स्यात्पुरुषस्तथा
षण्णवत्याङ्गुलैश्चापं भवेन्नाडीयुगं तथा ४५
शतं षडुत्तरं दण्डो नल्वस्त्रिंशद्धनुर्मितः
क्रोशो धनुःसहस्रं तु गव्यूतं तद्द्वयं विदुः ४६
चतुर्गव्यूतमिच्छन्ति योजनं मानवेदिनः
एकं दश शतमस्मात्सहस्रमनु चायुतम् ४७
नियुतं प्रयुतं तस्मादर्बुदन्यर्बुदे अपि
वृन्दखर्वनिखर्वाणि शङ्कुपद्माम्बुराशयः ४८
ततः स्यान्मध्यमन्त्यं च परं चापरमप्यतः
परार्धं चेति विज्ञेयं दशवृद्ध्योत्तरोत्तरम् ४९

सङ्ख्यास्थानानि कथितान्येवमेतानि विंशतिः
इदानीं कालसङ्ख्यायाः प्रमाणमभिधीयते ५०
दृङ्निमेषो निमेषः स्यात् तैः पञ्चदशभिः स्मृता
काष्ठा ताभिः कला ताभिर्मुहूर्त्तस्तैरहर्निशम् ५१
त्रिंशतैतत् त्रिकं विद्यात्क्रमादित्युत्तरोत्तरम्
अहोरात्रैः पुनः पञ्चदशभिः पक्ष उच्यते ५२
पक्षद्वयेन मासः स्याद्भवेन्मासद्वयादृतुः
ऋतुत्रयं स्यादयनं वत्सरस्त्वयनद्वयम् ५३
दशधायमिति प्रोक्तः कालः कालविदां वरैः
इत्युक्तमेतदखिलं करमानमत्र सम्यक्तया निगदितापि च
कालसङ्ख्या
अन्तःपुरं जनपदामरधाममार्गैराचक्ष्महे नगरसंप्रविभागमत्र ५४
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे
हस्तलक्षणं नाम नवमोऽध्यायः

अथ पुरनिवेशो दशमोऽध्यायः

पुरस्य त्रिविधस्यापि प्रमाणमथ कथ्यते
प्राकारपरिखाट्टालद्वाररथ्याध्वभिः सह १
ज्येष्ठं तत्र चतुश्चापसहस्रं पुरमिष्यते
मध्यं द्वाभ्यां सहस्राभ्यामेकेन व्यासतोऽधमम् २
साष्टमांशं सपादं वा सार्धं वा व्यासमायतम्
कुर्यादेकैकमायामं चतुरास्त्रीकृतं शुभम् ३
चतुःषष्टिपदाख्येन पुरं सर्वं प्रकल्पयेत्
द्विरष्टकोष्ठं तत्कुर्यात्षट्पथं नवचत्वरम् ४
चतुरश्रीकृते क्षेत्रे प्रागुदीच्यन्तमागताः

चतुर्भागान्तरा वंशाः कार्यास्तस्य त्रयस्त्रयः ५
वंशषट्कविभक्तेऽस्मिन् पदषोडशकान्विते
राजमार्गः शुभः कार्यो मध्यमं वंशमाश्रितः ६
कार्यो ज्यायसि च ज्यायांश्चतुर्विंशतिकः करैः
विंशत्या मध्यमे मध्योऽधमे षोडशकोऽधमः ७
बलस्य चतुरङ्गस्य पौराणां पार्थिवस्य च
असम्बाधसमश्चैष कार्योऽयं काश्मशर्करः ८
महारथ्याद्वयं कार्यं तदुपान्तस्थवंशयोः
तद्द्वादश दशाष्टौ स्यात्करान् ज्येष्ठादिकं त्रिषु ९
पदमध्यगतं कार्यं यानमार्गचतुष्टयम्
ज्येष्ठादिषु पुरेष्वेषु तत्पद्यं च चतुःकरम् १०
उपरथ्या महामार्गस्यार्धं वा द्विशयाधिकम्
शेषा रथ्यास्तदर्धेन विधातव्याः प्रमानतः ११
यानमार्गचतुष्कस्य कार्यौ पार्श्वद्वयाश्रितौ
पदाष्टकपदान्तस्थौ द्वौ द्वौ जङ्घापथावपि १२
पुरे ज्येष्ठे त्रिहस्तौ तौ मध्यमेऽर्धकरोज्झितौ
मध्यमादर्धहस्तेन हीनौ स्यातां कनीयसि १३
पुरस्यान्तर्गतौ कार्यौ घराटामार्गौ तथापरौ
राजमार्गगुणोपेतौ प्रमाणेन च तद्विधौ १४
प्राक्प्रत्यगायताः सप्तदश मार्गा इतीरिताः
याम्योत्तरायतास्तद्वदन्ये स्युस्तत्प्रमाणतः १५
घराटामार्गप्रमाणेन घराटामार्गस्य बाह्यतः
समन्ततो वप्रभुवं स्थापयेत् तद्विधानवित् १६
महारथ्याप्रमाणेन तद्भूमेर्बाह्यतस्ततः
व्यासखातान्तरैः सार्धं विधेयं परिखात्रयम् १७
खातोत्पादोज्झितं कार्यं सत्र्यंशेनार्धतोऽपि वा

व्यासतः स्यादशेषेण मूलतस्तद्वदेव तत् १८
कुर्याद्वप्रं स्वभूभागे परिखोत्खातया मृदा
सोत्सङ्गं गजपृष्ठं वा गोत्रीयपदताडितम् १९
खातोद्वृत्तमृदा वप्रनिर्माणाधिकया ततः
भूप्रदेशान्पुरा निम्नानापूर्य समतां नयेत् २०
एवं संशोध्य परिखात्रितयं परितोऽश्मभिः
विधेयमिष्टकाभिर्वा सम्यग्बद्धतलम् स्थिरम् २१
सिरावारिभिरापूर्णं पूर्णं वागागिनाम्भसा
विचित्राब्जमनोहारि ससंग्राहाम्बुनिर्गमम् २२
सर्वपार्श्वेष्वथैतस्य गन्धान्धमधुपाङ्गनान्
सुमनोविटपारामान् कुर्याद् वासान् समुत्सकान् २३
बाह्यभागं पुनस्तस्य विदध्यात्सर्वतोदिशम्
द्रुममूलैर्लताजालैः करटकैरपि संवृतम् २४
वप्रोर्ध्वभागगं मध्यं स्थूलोपलशिलाचितम्
कुर्यात्प्राकारमुद्दामं यद्वा पक्वेष्टकामयम् २५
ज्यायान्करैर्द्वादशभिर्दशभिर्मध्यमः स्थितः
कनीयानष्टभिर्हस्तैर्विस्तारः स्यात् त्रिधेत्यसौ २६
उच्छ्रायः सप्तदशभिः करैर्ज्यायान् प्रशस्यते
मध्यमः पञ्चदशभिस्त्रयोदशभिरन्तिमः २७
ऊर्ध्वं न सप्तदशकान्न त्रयोदशकादधः
प्राकारोच्छ्रयमिच्छन्ति नापि युग्मकरोन्मितम् २८
हस्ते हस्तेऽङ्गुलद्वन्द्वमायतः सम्यगुच्छ्रयात्
यस्य वा द्वादशकरा मूले भवति विस्तृतिः २९
चतुरस्त्रो च्छ्रितिस्तस्य शिरः स्याद्दशविस्तृतम्
हस्तोच्चं कपिशीर्षं स्याद्द्विहस्ता कारण्डवारिणी ३०
कार्याः कर्णाश्रितैर्द्वारकर्णान्तस्थैश्च संयुताः

प्राकारेऽट्टालकास्तस्मिन् दिक्षु दिक्षु चतुर्दिशम् ३१
द्विभौमांश्चरिकोर्ध्वं च प्राकारोच्छ्रायविस्तृतान्
तदर्धं निर्गमान् कुर्यात्ससालाट्टालकानथ ३२
शतं शतं स्याद्धस्तानां मिथश्चाट्टालकान्तरम्
इत्थं पुरमगम्यं स्यात्पत्त्यश्वरथदन्तिनाम् ३३
चरिकां संचरद्वारां सुखारोहां सवेदिकाम्
ससोपानां सनिर्यूहां कुर्यात्सकपिशीर्षकाम् ३४
राजमार्गमहारथ्यासंश्रितानि चतुर्दिशम्
त्रीणि त्रीणि विधेयानि पुरे द्वाराणि तद्विदा ३५
राजमार्गमहाद्वारचतुष्कं विस्तरान्नव
अष्टौ सप्त करा नोर्व्या द्विगुणं त्रिकरोज्झितम् ३६
महारथ्याश्रयं द्वारं तत्षट्पञ्चचतुष्करम्
उच्छ्रयात्सार्धसार्धैकहस्तोनं विस्तरेण तत् ३७
कुर्यात्प्रतोलीः सर्वेषु महाद्वारेष्वथो दृढाः
दृढार्गलाश्चेन्द्रकीलाः कपाटपरिघान्विताः ३८
राजमार्गसमा शाला स्यात्प्रतोलीविनिर्गमा
तदर्धं कोष्ठकान्तः स्याद्व्यासोऽधर्धं तयोः स्मृतः ३९
चतुरश्रामिति न्यस्य प्रतोलीं वदनायताम्
व्यासतस्त्र्यंशविन्यस्तमार्गां मूषाद्वयान्विताम् ४०
अन्तर्भित्तौ चतुर्द्वारं महाद्वारेण सम्मितम्
विकल्पकोष्ठकान्तेषु दारुभिस्तद्विभूषयेत् ४१
द्वारे चोभयतःशाले द्वे द्वे द्वारे च मूषयोः
ते कार्ये सम्मुखे व्यासाद्द्विकरे द्विगुणोच्छ्रिते ४२
तद्दारुमूषयोः पट्टमध्यं पञ्चकरोच्छ्रितम्
तद्वत्कार्या द्वितीया भूर्द्वारशेषोदयोच्छ्रिता ४३
बहिर्द्वारविनिर्मुक्तां पूर्ववत्तां प्रकल्पयेत्

पुरःसंरोधनसहैर्गवाक्षैरग्रतो युताम् ४४
तलं ततो महाद्वारस्योर्ध्वे बद्ध्वा तृतीयकम्
रोधनद्वारयुग्हर्म्यसंयुक्तं सपरिक्रमम् ४५
सन्नयस्तस्तम्भवेद्यन्यदूर्ध्वं तस्योपकल्पयेत्
व्यालजालशतघ्नयस्त्रशस्त्रयस्त्रादिभिर्युतम् ४६
वृद्धिशोभाभिगुप्तयर्थं पुरस्य प्रविकल्पयेत्
बृहद्द्वाराणि परितस्त्रितलाभिः प्रतोलिभिः ४७
प्रतोल्या दक्षिणाद्भागादुच्छ्रितो वामतो गतः
यावद्द्वितीयं तत्पार्श्वमेकः कार्यो बहिः स्थितः ४८
द्वितीयो वामभागात्तु निर्गत्यास्यैव वेष्टकः
कार्यः स्यादा तदुत्थानात्प्राकारस्तस्य बाह्यतः ४९
एतयोरन्तरालं च राजमार्गेण सम्मितम्
कर्तव्यं स्यादिहैवं तु वक्त्रद्वारकमुत्तमम् ५०
दृष्ट्वा दृष्ट्वोपभोगार्हान्सरिद्गिरिजलाशयान्
पक्षद्वाराणि कुर्वीत स्वेच्छया तत्र तत्र च ५१
जलभ्रमान्पुरे कुर्याच्छिलादारुतिरोहितान्
द्विकरान्करमात्रान्वा साम्भसोऽस्मिन् प्रदक्षिणान् ५२
छिन्नकर्णं विकर्णं च वज्रं सूचीमुखं तथा
वर्तुल व्यजनाकारं चापाकृतिधरं च यत् ५३
शकटद्विसमं यच्च विस्तारादि्द्वगुणायतम्
विदिक्स्थं सर्पचक्रं च तत् पुरं निन्दितं भवेत् ५४
छिन्नकर्णे वसंल्लोकः पुरे तस्करतो भयम्
व्याधिभ्यो वापरेभ्यो वा प्राप्नोतीति विनिर्दिशेत् ५५
विद्विष्टस्वामिता सर्वलोकगर्हानपत्यता
जायते स्वल्पमायुष्यं विकर्णपुरवासिनाम् ५६
स्त्रीजयं विषरोगांश्च भेदांश्च विविधांस्तथा

जनो वसन्नवाप्नोति वज्राकृतिधरे पुरे ५७
व्रजन्ति प्राणिनो नाशं द्युद्व्याधिपरिपीडिताः
निवसन्तः सदा सूचीमुखाकारधरे पुरे ५८
स्वामिना सह हीयन्ते सर्वतः सञ्चयोज्झिताः
स्वल्पायुषश्च जायन्ते जना वृत्तपुराश्रयाः ५९
ऋसत्यवादिनः स्वल्पायुषः पवनपीडिताः
जनाः स्युश्चलचित्ताश्च नगरे व्यजनाकृतौ ६०
दुश्चरित्राङ्गनायुक्तस्तथा बहुनपुंसकः
चापाकारे पुरे लोको निवसन् भवति ध्रुवम् ६१
रोगशोकानलस्तेनभयं तत्र प्रजायते
शकटद्विसमाकारं पुरं यद्विनिवेश्यते ६२
ऋारम्भासिद्धिदं विप्रभयदं ज्ञातिभेदकृत्
पौराणां स्वामिनश्च स्याद्गजवाजिक्षयावहम् ६३
परैराक्रम्य भुज्येत तत्पुरं बलशालिभिः
द्विगुणायतसंस्थानं यत्क्वचिद्विनिवेश्यते ६४
जनक्षयोऽग्निदाहश्च स्त्रीकृतानि भयानि च
पुरे भवति दिङ्मूढे न च निर्योगमेति तत् ६५
शस्त्रानिलपिशाचाग्निभूतयक्षभयार्दिताः
रुक्पीडिताश्च नश्यन्ति भुजङ्गकुटिले जनाः ६६
पुराणामप्रशस्तानि संस्थानानीदृशानि यत्
एकस्मिन्नपि तेनैषां न पुरं विनिवेशयेत् ६७
संस्थानमेकमप्येषां प्रमादात्क्रियते यदि
तदा राष्ट्रं निपीडयेत द्युद्विद्विषद्भीतिमृत्युभिः ६८
शास्त्रज्ञः स्थपतिस्तस्मात्प्रयत्नपरया धिया
यथावत्कथितं चारु नगरं विनिवेशयेत् ६९
वेदीनिवेशयात्रायां देवागाराभिचारयोः

नदीकर्मणि मैत्रे च शान्तिं कुर्याच्छ्रमेषु च ७०
यज्ञे पुरनिवेशे च स्थापने प्रयतः सुधीः
कुर्यात्तथाभ्युदयिकं यद्वान्यदपि किञ्चन ७१
पुरे भीतिकरं शश्वदनायुष्यमपौष्टिकम्
कृतमप्रयतैः कर्म नृपतिघ्नं च जायते ७२
विहितं यदशास्त्रज्ञैर्यच्च निर्लक्षणैः कृतम्
कृतमप्रयतैर्यच्च तदशस्तं फलोज्झितम् ७३
शास्त्रज्ञः स्थपतिर्ज्योतिर्विदा तद्वत्पुरोधसा
अधिष्ठितः पुरे कर्म विदध्याच्छान्तिकेषु च ७४
पुरोहितोऽग्निं जुहुयाद्दद्यान्मौहूर्त्तिकः स्थिरम्
स्थपतिश्च बलिं दद्याद्योजयेदिति शान्तिकम् ७५
तदा तस्मिन् पुरे शान्तिर्यत्र मर्मस्थिताः सुराः
पूज्यन्ते सततं पौरैश्चत्वरस्थायिनस्तथा ७६
चतुःप्रकारं स्थापत्यमष्टधा च चिकित्सितम्
धनुर्वेदश्च सप्ताङ्गो ज्योतिषं कमलालयात् ७७
सामान्यलक्षणोत्पातनिमित्तानि च सर्वशः
ब्रह्मा विष्णुश्च रुद्रश्च त्यजन्त्येते न तत् पुरम् ७८
नगरस्य विभागोऽयं यथावत्समुदीरितः
खेटं तदर्धविष्कम्भमाहुर्ग्रामं तदर्धतः ७९
योजनेन पुरात्खेटं खेटाद्ग्रामं प्रचक्षते
गव्यूतिपरिमाणेन ग्रामाद्ग्रामं प्रचक्षते ८०
द्विक्रोशाद्विषये सीमा तदर्धेन पुरस्य सा
खेटके पुरसीमार्धं ग्रामे खेटार्धतः स्मृता ८१
त्रिंशद्धनूंषि विष्कम्भः पुरे दिग्वर्त्मसु स्मृतः
विंशतिः खेटके मार्गो ग्रामे दश च दर्शितः ८२
नव ग्रामसहस्राणि नवतिश्च प्रचक्षते

चतुःषष्टिमपि ग्रामान् ज्यायो राष्ट्रं विदुर्बुधाः ८३
दशार्धं च सहस्राणि ग्रामाणां त्रिशती तथा
ग्रामाश्चतुरशीतिश्च मध्यमं राष्ट्रमीरितम् ८४
सहस्रमेकं ग्रामाणां तद्वच्च शतपञ्चकम्
द्व्यूना च ग्रामपञ्चाशत् कनीयो राष्ट्रमुच्यते ८५
अध्यर्धसङ्ख्ययैतेषां ज्येष्ठमध्यकनीयसाम्
विधाय नवधैकैकं विभजेद्विधिवत्सुधीः ८६
राष्ट्रेष्वेवं विभक्तेषु यथाभागं विधानवित्
निवेशयेत्पुराण्येषु सप्त सप्त यथागमम् ८७
विभागश्च प्रमाणं च लक्षणं चादिमस्य यत्
जातिवर्णाधिवासश्च यथावत्तदिहोच्यते ८८
सुवर्णकारानाग्नेय्यां तथा वह्न्युपजीविनः
निवेशयेत् कर्मकरानन्यानपि विधानवित् ८९
वैश्यानामक्षधूर्तानां चक्रिकाणां च दक्षिणे
नटानां नर्त्तकानां च गृहाणि विनिवेशयेत् ९०
निवेशयेत् सौकरिकान् मेयीकारान् मृगच्छिदः
कैवर्तान् नैर्ऋताशायां दमनाधिकृतांस्तथा ९१
रथेषु कौशलं येषां येषां स्यादायुधेषु च
वारुण्यां दिशि तान् सर्वान् पुरस्य विनिवेशयेत् ९२
कर्मस्वधिकृता ये च ये चापि परिकर्मिणः
शौण्डिका ये च तान् सर्वान् वायोर्दिशि निवेशयेत् ९३
यतीनामाश्रयान् ब्रह्मवत्सानां च तथा सभाम्
प्रपाश्च पुण्यशालाश्च कुर्याद्दिशि धनेशितुः ९४
घृतविक्रयिणो ये च फलविक्रयिणश्च ये
निवेशिताः प्रशस्यन्ते पुरस्येशानदिग्गताः ९५
पूर्वभागे बलाध्यक्षान् राज्ञो मुख्यांस्तथा बले

निवेशयेत्तथाग्नेय्यां बलं नानाविधं सुधीः ९६
श्रेष्ठिनो दक्षिणाशायां तथा देशमहत्तरान्
याम्येकहारान् कुर्वीत तथा ककुभि निर्ऋतेः ९७
कोशपालमहामात्रादेशिकान् कारुकानपि
निर्यामकांश्च कुर्वीत सलिलाधिपतेर्दिशि ९८
वायोः ककुभि कुर्वीत दण्डनाथान् सनायकान्
पुरोहितज्योतिषिकानुत्तरस्यां निवेशयेत् ९९
विप्राः सौम्य दिशो भागे क्षत्रियाः शक्रदिग्गताः
वैश्यशूद्रास्तु कर्तव्या दक्षिणापरयोः क्रमात् १००
निघेया वणिजो वैद्या मुख्याश्चापि चतुर्दिशम्
चतुर्दिशं विशेषेण स्थापयीत बलानि च १०१
नगरस्य बहिः प्राच्यां लिङ्गस्थान् विनिवेशयेत्
श्मशानानि तथा तत्स्थान् याम्यायां स्थपतिः सुधीः १०२
सर्वतोदिशमुद्दिष्टो विभागो नगरे यथा
तथा ग्रामेषु खेटेषु सेनायाश्च निवेशने १०३
नगराभिमुखौ कार्यौ संपूर्णाङ्गमहोदयौ
द्वारे द्वारे सौम्यमुखौ लक्ष्मीवैश्रवणौ शुभौ १०४
राष्ट्रं खेटमथ ग्रामं पश्यन्तेतपुरं महत्
तत्रारोग्यार्थसंसिद्धी प्रजाविजयमादिशेत् १०५
क्लेशबन्धवधैर्लोकाः स्युर्मिथः सूत्रहिंसकाः
ग्रामं खेटं पुरं राष्ट्रं यदेतौ नैव पश्यतः १०६
स्थाप्यन्ते ये यथा देवा नगरे सर्वतोदिशम्
बाह्यान्तरासु भूमीषु ब्रूमहे तानतःपरम् १०७
चतुर्दिशं समारभ्य प्राकारपरिखान्ततः
बहिः शते शते सार्धे धनुषां द्विशतेऽपि च १०८
धनुःशतमितैः शुद्धैरनिन्द्यैर्धरणीतलैः

स्वस्वप्रासादयुक्तानि स्वस्वानुगगृहैः सह १०९
निवेशनानि कुर्वीत त्रिदशानां यथाक्रमम्
नगराभिमुखं चित्रवनभाञ्जि शुभानि च ११०
याम्योत्तरायतं वंशं विकल्पपुरमध्यगम्
बहिरन्तश्च कुर्वीत देवानां विनिवेशनम् १११
प्राच्यां प्रत्यङ्मुखान्कुर्यात्प्राङ्मुखांश्चाम्बुभृद्दिशि
याम्योदकपार्श्वयोस्तस्य प्रादक्षिण्येन वंशगान् ११२
दक्षिणस्यां न कुर्वीत त्रिदशानप्युदङ्मुखान्
चैत्यशानित्सभायज्ञमातृप्रथमयान्विताः ११३
इत्यमी कथिताः सम्यग्ये यथादिङ्मुखाः सुराः
दिक्षु दिक्षु बहिर्ये स्युस्तानिदानीं प्रचक्ष्महे ११४
विष्णोर्दिनाधिनाथस्य सहस्रनयनस्य च
धर्मस्य च विधातव्यं दिशि प्राच्यां निकेतनम् ११५
सनत्कुमारसावित्र्योर्मरुतां मारुतस्य च
पूर्वदक्षिणदिग्भागे विदधीत निकेतनम् ११६
गणेशमातृभूतानां याम्ये प्रेतपतेर्गृहम्
भद्रकाल्याः पितृणां स्याद्वेश्म चैत्यं च नैर्ऋते ११७
सागरस्य नदीनां च शिल्पिभर्तुः प्रजापतेः
निलयं पश्चिमाशायां विदध्याद्वरुणस्य च ११८
फणिनां भवनं कार्यमपरोत्तरदिग्गतम्
शनैश्चरस्य चात्रैव कात्यायन्याश्च मन्दिरम् ११९
विशाखस्कन्दसोमानां तथा यक्षाधिपस्य च
पृथक्पृथग्विधातव्याः प्रासादाः सौम्यदिग्गताः १२०
जगद्गुरोर्महेशस्य श्रियो वह्नेश्च मन्दिरम्
पूर्वोत्तरस्यां ककुभि प्रविधेयं मनोरमम् १२१
नदीनामम्बुधीनां च समन्तान्नगरस्य च

कान्तारेष्वद्रिषु स्थानं सर्वत्रेष्टमुमापतेः १२२
निवेश्यन्ते स्वदिग्भागेष्वेवं यस्मिन् सुरोत्तमाः
सम्यक्समृद्धिमासाद्य चिरं नन्दति तत्पुरम् १२३
नगरस्य विदूरेऽपि ककुप्सु निखिलाखपि
बाह्यतोऽभिमुखा देवाः शस्यन्ते न पराङ्मुखाः १२४
क्रियते यदि भूभागे वंशेन स पराङ्मुखः
विधिमेनं तदा तस्मिंस्तज्ज्ञः शास्त्रोक्तमाचरेत् १२५
तद्वेषवर्णभूषास्त्रवाहनैरन्वितं सुरम्
तद्भित्तौ प्रकटाकारं नगराभिमुखं लिखेत् १२६
वैकङ्कतशमीबिल्वैः क्षीरकण्टकिभिर्द्रुमैः
उदपानाग्न्यगारेषु स्यान्न दोषोऽन्तरस्थितैः १२७
अर्चाश्रितेष्वयं प्रोक्तो विधिर्नालेग्व्यवर्तिषु
कर्तव्याः सर्वतोवक्त्रास्तस्माच्चित्रगताः सुराः १२८
विधानं यद्यथा प्रोक्तं सुरधाम्नां पुराद्बहिः
तत्तथाभ्यन्तरेऽपि स्यात्कार्यं स्वस्वदिगाश्रयम् १२९
मध्ये पुरस्य कर्तव्यं गृहमम्भोजजन्मनः
निवेशनं तथेन्द्रस्य तथैव हलिकृष्णयोः १३०
मातृयक्षगणाधीशान् शिवकान् भूतसङ्घकान्
विनापि वेश्मभिः कुर्यात्पुरे चत्वरमार्गगान् १३१
राज्ञा वर्णाश्रमकलापण्यशिल्पोपजीविनः
स्वदिक्पदस्थाः कर्तव्यास्ते देवाश्चेच्छता श्रियम् १३२
प्रासादे सति भक्तीच्छाशक्तियुक्तो यदापरम्
प्रासादं कारयेत्पूर्वं न तदा पीडयेत् सुधीः १३३
प्रतिवेश्म प्रतिग्रामं प्रतिदेवकुलं तथा
कुर्यात्प्रतिपुरं चापि न प्राङ्नगुणाधिकम् १३४
पूर्वप्रासादतो रुद्रसोमयोर्ब्रह्मणोऽथवा

प्रासादे विहितेऽन्यस्मिन् भवेत् पीडाग्रजन्मनाम् १३५
कृते धाम्नयधिकेऽन्यस्मिन् वह्नेर्वाचस्पतेरुत
पुरोधसां भयं विद्याद्ध्रुवं ज्योतिर्विदां तथा १३६
धनाधिपामराधीशयमानां वरुणस्य वा
अधिकेविहिते धाम्नि भयं विद्यान्महीपतेः १३७
स्कन्दधाम्नोऽधिकेऽन्यस्मिन् विहिते तस्य वेश्मनि
सेनापतेर्बलानां च पीडा सञ्जायते ध्रुवम् १३८
प्रजापतेरभ्यधिकं हरेर्वान्यत् कृतं गृहम्
कर्तुः कारयितुश्च स्याद्बन्धाय च विनष्टये १३९
गणेशयक्षफणिनामधिकोऽन्यः कृतो यदि
प्रासादः स्यात्तदा नित्यं सेनाङ्गानां महद्भयम् १४०
स्त्रीनाम्नयो देवतास्तासां पीडयन्ते यदि वेश्मभिः
मुख्यानां पुरनारीणां तदा कुर्वन्त्युपद्रवम् १४१
पूर्वामरेषु सर्वेषु पीडितेष्वमरालयैः
अन्यैस्तल्लिङ्गिनां पीडा चैत्यैर्वा चैत्यपीडितैः १४२
हीनाधिकप्रमाणेषु दुर्निविष्टेषु धामसु
कर्तुः कारयितुः पीडा स्यान्न पूजा तथास्य च १४३
नैवातिसंभृतं कुर्यात्स्वल्पमल्पामरालयम्
पुरं चानाश्रितं कुर्याद् वेधभागाश्रितं न च १४४
ज्येष्ठमध्यकनिष्ठानि नवषट्त्रिपदान्तरे
सुरवेश्मानि कुर्वीत दोषायापरथा पुनः १४५
कथितोऽयं विधिः स्वैः स्वैस्त्रिदशानां निवेशने
बहिर्निवेशनात्स्वेच्छं विदध्यादमरालयम् १४६
नगरेषु समग्रेषु ग्रामेषु निखिलेषु च
खेटकेषु च सर्वेषु सामान्योऽयं विधिः स्मृतः १४७
इत्युक्त एष नगरोपगतः सुराणां

स्वस्वप्रभागविहितः पदसन्निवेशः
ब्रूमो विभागमधुनां गृहदेवतानां
सम्यक्शुभाशुभफलप्रविभागयुक्तम् १४८
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे पुरनिवेशो दशमोऽध्यायः

अथ वास्तुत्रयविभागो नामैकादशोऽध्यायः

चतुरश्रीकृते क्षेत्रे विभक्ते नवधा ततः
मध्ये महाद्युतिर्ब्रह्मा विधेयो नवभिः पदैः १
तस्मादनन्तरं प्राच्यां षट्पदः कीर्तितोऽर्यमा
आग्नेयकर्णे सवितृसावित्रौ पदिकावुभौ २
ब्रह्मणोऽनन्तरं याम्ये विवस्वान् षट्पदाश्रितः
नैर्ऋते पदिकौ कर्णे जयेन्द्रौ कथितावुभौ ३
षट्पदः स्यात्ततो मित्रः काष्ठायां पत्युरम्भसः
कर्णेऽपरोत्तरे यक्ष्मा रुद्रश्च पदिकावुभौ ४
षड्भिः पदैस्ततः सौम्ये निश्चलः पृथिवीधरः
आपस्तथापवत्सश्च पदिकावीशदिग्गतौ ५
इत्यन्तःसंश्रया देवाः प्रोक्ता ब्रूमो बहिःस्थितान्
ज्ञेयं प्रदक्षिणं तेषां स्थानं पूर्वोत्तरादितः ६
अग्निस्तदनु पर्जन्यो जयन्तश्चेन्द्र एव च
रविः सत्यो भृशश्चेति न भस्तस्मात्ततोऽनिलः ७
पूषाख्यो वितथाख्यश्च गृहक्षतयमावथ
गन्धर्वो भृङ्गराजश्च मृगः पितृगणस्ततः ८
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलेश्वरः
असुरः शोषनामा च पापयक्ष्मा ततः परम् ९
रोगो नागश्च मुख्यश्च भल्लाटः सोम एव च

चरकोऽथादितिर्दैत्यमातेति पददेवताः १०
वह्नेर्वायोः पितॄणां च व्याधेश्चैव क्रमाद्बहिः
चरकी च विदारी च पूतना पापराक्षसी ११
पदभोगोऽस्ति नैतासां स्थानमेव हि केवलम्
पदभोगमथ ब्रूमो बहिःस्थानां नभःसदाम् १२
तत्राष्टौ द्विपदाधीशा जयन्तो भृश एव च
वितथो भृङ्गसुग्रीवशोषमुख्यास्तथादितिः १३
एभ्यः शेषा बहिर्ये तु ते स्युः पदभुजः सुराः
एकाशीतिपदे प्रोक्तो देवतानां पदक्रमः १४
चतुरश्रीकृते क्षेत्रे दशधा प्रविभाजिते
भवेच्छतपदो वास्तुर्ब्रूमोऽत्राप्यमरस्थितिम् १५
द्विरष्टगुणितं मध्ये पदमेकं पितामहः
भुङ्क्ते शतपदे वास्तौ चतुर्गुणितमर्यमा १६
विवस्वतोऽथ मित्रस्य तद्वच्च पृथिवीभृतः
भोगमिच्छन्ति वै तेषामर्यम्ण इव सूरयः १७
सवित्राद्यापवत्सान्ता ये च नोक्ताः सुरोत्तमाः
यथैकाशीतिके तद्वत्तेषां भोगः पदाष्टकम् १८
अग्न्यन्तरिक्षपवना मृगश्च पितरोऽपि च
रोगोऽदितिस्तथाध्यर्धपदभाजो बहिः स्थिताः १९
चतुर्विंशतिरुक्ता ये पर्जन्याद्याः सुरोत्तमाः
अदित्यन्ता द्विपदिकास्ते शेषं प्राक्प्रसाधितम् २०
चतुरश्रीकृते क्षेत्रे पूर्ववद्भाजितेऽष्टभिः
चतुःषष्टिपदो वास्तुश्चतुःषष्ट्या पदैर्भवेत् २१
अस्मिन्पदानि चत्वारि भुनक्त्यन्तः पितामहः
अर्यमाद्याः सुराश्चात्र द्वे द्वे मध्यगताः पदे २२
पध्येऽष्टौ बाह्यतोऽष्टौ ये स्थिताः कर्णेषु चाष्टसु

ये देवाः सर्व एवात्र ते पदार्धभुजः स्मृताः २३
पर्जन्योऽथ भृशः पूषा भृङ्गदौवारिकौ तथा
शोषनागादितिप्रान्ताः स्युरध्यर्धपदस्पृशः २४
जयन्तादिषु बाह्येषु चरकान्तेषु कीर्तिता
प्रत्येकं षोडशस्वत्र सुरेषु द्विपदस्थितिः २५
सिरां वह्निपदादूर्ध्वं नयेत्पितृपदान्ततः
बाह्याशानिर्गतां चैनां रोगनामानमानयेत् २६
द्विनाम्नः प्रापयेद्भृङ्गं भृङ्गात्सुग्रीवमानयेत्
ततोऽदितिं तां गमयेद्द्विनामानं प्रवेशयेत् २७
सौराद्याम्यं पदं नीत्वा वारुणं प्रापयेत्ततः
नयेत्पदं ततः सौम्यं तत आदित्यमानयेत् २८
भृशादानीय वितथं शोषाख्यं वितथादथ
शोषान्मुख्यं समानीय नयेत् तस्मात्पुनर्भृशम् २९
ये विभागाः समुद्दिष्टा यथासङ्ख्येन तैरिह
यज्ञामरनृणां वास्तु समस्तं विभजेत्सुधीः ३०
देवैः सर्वैरप्यमीभिर्विशोकः
प्रीत्युत्कर्षादित्थमालोक्यतेऽसौ
कृत्स्नानेषोऽप्यब्जपत्रायताक्षः
पश्यत्येतान् स्फारितेनेक्षणेन ३१

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे
वाष्तुत्रयविभागो नाम एकादशोऽध्यायः

अथ नाड्यादिसिरादिविकल्पो नाम द्वादशोऽध्यायः

अथाभिधीयते वास्तुः कनीयान् षोडशास्पदः
पदैः षोडशभिः स स्यात् तत्र देवान् प्रचक्ष्महे १

भुङ्क्ते मध्ये स्थितो मुख्यः पदमेकं सुरोत्तमः
क्लृप्तं पदचतुर्भागैश्चतुर्भिश्चतुराननः २
पदार्धभागभोक्तारश्चत्वारोऽमी सुरोत्तमाः
अर्यमा च विवस्वांश्च मित्रश्च क्ष्माधरोऽपि च ३
सवित्राद्यापवत्सान्ता येऽष्टौ कोणेषु वेधसः
चतुर्भागभुजस्ते स्युस्त्रिदशास्तपनत्विषः ४
चतुर्थी शादिकोणेषु ये स्थिताः क्रमशः सुराः
अष्टभागभुजस्तेऽष्टौ विनिर्दिष्टा मनीषिभिः ५
ये तथादितिपर्यन्ताः पर्जन्याद्याः सुरोत्तमाः
तेऽष्टौ चतुर्भागभुजो विद्वद्भिरिह कीर्तिताः ६
चरकान्ता जयन्ताद्या ये बाह्यस्थितयोऽमराः
भोगोऽर्धपदिकस्तेषां षोडशानामपि स्मृतः ७
चतुरश्रीकृते क्षेत्रे त्रयस्त्रिंशद्विभाजिते
अन्त्यपङ्क्तिद्वयं साधं चरक्याद्यर्थमुत्सृजेत् ८
अन्तरे वीथिकामर्धपदिकामुत्सृजेत्ततः
मध्ये तु सप्तविंशत्या भोगैर्वास्तु विभाजयेत् ९
एकोनत्रिंशता युक्तं पदानां शतसप्तकम्
यद्भवेत् तत्र गर्भे स्यादेकाशीतिपदः स्वभूः १०
अष्टादशपदाश्चाष्टौ चपप्रभृतयः पृथक्
अर्यमाद्यं चतुःपञ्चाशत्पदं स्याच्चतुष्टयम् ११
ईशादयस्त्वदित्यन्ता बाह्या नवपदाः सुराः
देशानां सन्निवेशेऽसौ साहस्रो वास्तुरुच्यते १२
अथोच्यते वृत्तवास्तुर्वृत्तप्रासादहेतवे
एकश्चतुःषष्टिपदभागः शतपदोऽपरः १३
अष्टधा भाजिते वृत्तविष्कम्भे भागिकान्तरान्
चतुरः परिधीन्कुर्यान्मध्यवृत्तं द्विभागिकम् १४

स्याद्बहिर्वृत्तवलयमष्टाविंशतिभागिकम्
तदन्तर्वृत्तवलयमष्टाष्टांशोज्झितं क्रमात् १५
एवं कृते भवेन्मध्ये ब्रह्मणस्तच्चतुष्पदम्
इत्थं चतुःषष्टिपदो वृत्तवास्तुरुदाहृतः १६
दशधा भाजिते वृत्तविष्कम्भे भागिकान्तराः
कार्याः परिधयः पञ्च मध्ये वृत्तं द्विभागिकम् १७
बहिस्थं वलयं तस्य भजेत् षट्त्रिंशता ततः
शेषं चतुःषष्टिपदस्थित्या स्याच्छतवास्तुनि १८
देवतापदसङ्ख्यैरनयोश्चतुरश्रवत्
एवं कार्यवशात्कार्या वास्तवोऽन्येऽपि धीमता १९
त्र्यश्रे षडश्रे चाष्टाश्रे षोडशाश्रे च वृत्तवत्
वृत्तायतेऽर्धचन्द्रे च वास्तौ पदविभाजनम् २०
एक एव पुमानेषु बहुधा परिकल्पितः
सर्वस्मिन्नपि संस्थाने विभक्ते लक्षयेत्ततः २१
शरीरं वास्तुपुंसोऽस्य गुणदोषा भवन्ति यत्
मुखं मूर्धा ततः श्रोत्रे दृक्ताल्वोष्ठरदाः क्रमात् २२
वक्षः करठः स्तनौ नाभिर्मेढ्रमुष्कावथो गुदम्
बाहू प्रबाहू पाणी स्फिगूरुजङ्घं पदद्वयम् २३
कल्पयेदेवमेतेन स भवेत् पुरुषाकृतिः
सिरावंशानुवंशाश्च सन्धयः सानुसन्धयः २४
मर्माणयथ महावंशा लक्ष्या वास्तुशरीरगाः
सिराः कर्णगता याः स्युस्ता नाड्यः परिकीर्तिताः २५
पदस्य षोडशो भागस्तत्प्रमाणं प्रकीर्तितम्
महावंशौ प्राक्प्रतीच्यौ याम्योदीच्यौ च मध्यगौ २६
प्रमाणं पञ्चमो भागः पदस्योदाहृतं तयोः
वंशास्तेऽस्मिन् समुद्दिष्टा रेखा याः स्युर्मुखायताः २७

यास्तिर्यगायता रेखास्तेऽनुवंशाः प्रकीर्तिताः
सम्पाता ये स्युरेतेषाम् मर्म तत्संप्रचक्षते २८
उपमर्माणि तान्याहुः पदमध्यानि यानि हि
भागोऽष्टमोऽथ दशमो द्वादशः षोडशोऽपि च २९
पदतो मानमिष्टं स्याद्वंशादीनामनुक्रमात्
वंशाष्टकस्य यः सन्धिः स सन्धिरिति कीर्तितः ३०
ये पुनः स्युस्तदङ्गानां प्रोक्तास्ते चानुसन्धयः
वालाग्रतुल्यं सन्धीनां प्रमाणं परिचक्षते ३१
तदर्धमनुसन्धीनां प्रमाणं समुदीरितम्
यत्नेनैतानि सन्त्यज्य वास्तुविद्याविशारदः ३२
द्रव्याणि प्रयतो नित्यं स्थपतिर्विनिवेशयेत्
महावंशस्य नाक्रान्तिं कुर्याद्द्रव्येण केनचित् ३३
इतरेषु पुनर्द्रव्यं मध्यवंशेषु सन्त्यजेत्
महावंशसमाक्रान्तौ भवेत्स्वामिवधो ध्रुवम् ३४
वर्षेण तपनाद्भीतिं वंशानां पीडनाद्विदुः
उपमर्माणि रोगाय मर्माणि कुलहानये ३५
उद्वेगायार्थनाशाय सिराश्च स्युः प्रपीडिताः
कलिः स्यात्सन्धिविद्धेषु पीडितेष्वनुसन्धिषु ३६
तस्मादेतानि सर्वाणि पीडितान्युपलक्षयेत्
ज्ञात्वा सिराः सानुसिराश्च नाडीर्वंशानुवंशानपि वास्तुदेहे
यत्नेन मर्माणि फलानि चैषां वेधं त्यजेद्यस्तमुपैति नापत् ३७

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे नाडीवंशानुवंशानां सिरानुसिरामर्मानुमर्मवेधविकल्पो नाम द्वादशोऽध्यायः

अथ मर्मवेधस्त्रयोदशोऽध्यायः

एकाशीतिपदो यः स्यात्तथा शतपदश्च यः
चतुःषष्टिपदो यश्च वास्तुरत्र त्रिधोदितः १
यद्येन विभजेत्तेषु तदिदानीं प्रचक्ष्महे
यानि मर्माणि चैतेषां कथ्यन्त इह तान्यपि २
वर्णिनां भवनादीनि निवेशा राजवेश्मनाम्
एकाशीतिपदेनेन्द्रस्थानं च विभजेत् सुधीः ३
प्रासादा विविधास्तद्वद्विचित्राश्चात्र मण्डपाः
तान् मापयेच्छतपदप्रविभागेन बुद्धिमान् ४
यः पुनः स्याच्चतुःषष्टिपदस्तेन विभाजयेत्
नरेन्द्रशिबिरग्रामखेटादि नगरादि च ५
अन्तस्त्रयोदश सुरा द्वात्रिंशद्बाह्यतश्च ये
तेषां स्थानानि मर्माणि सिरा वंशाश्च तेषु तु ६
मुखे हृदि च नाभौ च मूर्ध्नि च स्तनयोस्तथा
मर्माणि वास्तुपुंसोऽस्य षण्महान्ति प्रचक्षते ७
वंशानुवंशसम्पाताः पदमध्यानि यानि च
देवस्थानानि तान्याद्ये पदषोडशकान्विते ८
देवस्थानानि सम्पाताश्चतुःषष्टिपदे पुनः
तथैकाशीतिपदिके पदान्तशतिकेऽपि च ९
चतुर्ष्वपि विभागेषु सिरा याः स्युश्चतुर्दिशम्
मर्माणि तानि चोक्तानि द्वारमध्यानि यानि च १०
भित्तिविस्तृतमध्येन यद्वा मध्येन दारुणः
मर्म यत्पीड्यते येन गृहे तत्रोच्यते फलम् ११
द्वारैर्वा भित्तिभिर्वापि मर्मणां परिपीडनात्
दौर्गत्यं गृहिणः प्राहुः कुलहानिमथापि वा १२
भवेत्स्वामिक्षयः स्तम्भैस्तुलाभिः स्त्रीपरिक्षयः

स्नुषावधो जयन्तीभिर्बन्धुनाशश्च सङ्ग्रहैः १३
मर्मस्थानगतैः कायैर्भर्तुः कायो निपीड्यते
सुहृद्विश्लेषमिच्छन्ति सन्धिपालैश्च तद्विदः १४
नागपाशैर्धनोच्छेदो नागदन्तैः सुहृत्क्षयः
कपिच्छकैश्च मर्मस्थैः प्रेष्याणां क्षयमादिशेत् १५
षड्दारुकाण्ययनुसिरागवाक्षालोकनानि च
मर्ममध्योपगान्येतान्यावहन्ति धनक्षयम् १६
द्वारद्रव्यतुलास्तम्भनागदन्तगवाक्षकैः
द्वारमध्यार्दितै रोगकुलपीडाधनक्षयान् १७
नृपदण्डभयं पत्युः पीडनं च प्रचक्षते
द्वारमध्येषु षड्दारुमध्येष्वपि च सूरयः १८
कर्णद्रव्यादिभिर्विद्धेष्वेतदेव फलं विदुः
शय्यानुवंशविहिता गृहिणां कुलनाशिनी १९
क्षयावहा नागदन्ता भर्तुः शय्यावितानगाः
वातायनैरथ स्तम्भैर्ये विद्धा नागदन्तकाः २०
ते शस्त्रभीतिदा भर्तुर्यद्वा चौरभयप्रदाः
द्रव्यधान्यविनाशाय शोकाय कलहाय च २१
गृहमध्यगतं द्वारं भवेत्स्त्रीदूषणाय च
द्रव्येणान्यतरेणापि महामर्म निपीडितम् २२
भवेत्सर्वस्वनाशाय गृहिणो मरणाय च
अंशुकाश्चोर्ध्ववंशाश्च तुम्बिकाः सेन्द्रकीलकाः २३
पुरप्रासादगेहानां वेधेऽप्येते न दोषदाः
इत्थं सुरक्षितिपवर्णगृहाश्रितोऽयं
भेदः पदेष्वखिलमर्मगतो व्यधश्च
उक्तः पृथक्पृथगमुष्य फलं च सम्यग्
ब्रूमोऽथ वास्तुपुरुषाङ्गविभागमत्र २४

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रं मर्मवेधो नाम त्रयोदशोऽध्यायः

अथ पुरुषाङ्गदेवतानिघण्टवादिनिर्णयश्चतुर्दशोऽध्यायः

देवतानां पदैरित्थं संविभक्तैः पृथग्विधैः
स्थपतिः प्रयतः कुर्याद्वास्तुमित्थं पुमाकृतिम् १
शिरस्तस्याग्निरुद्दिष्टं दृष्टिर्दित्यम्बुदाधिपौ
जयन्तश्चादितिश्चास्य कर्णौ वायुर्मुखे स्थितः २
अर्कः स्याद्दक्षिणे वामे भुजे सोमः प्रतिष्ठितः
महेन्द्रचरकौ सापवत्सावस्योरसि स्थितौ ३
स्तनेऽर्यमा दक्षिणे स्याद्वामे च पृथिवीधरः
यक्ष्मा रोगश्च नागश्च मुख्यो भल्लाट इत्यमी ४
दक्षिणेतरमेतस्य बाहुं देवाः समाश्रिताः
सत्यो भृशो नभो वायुः पूषा चेत्यथ दक्षिणम् ५
पञ्चापि बाहुमेतस्य संश्रितास्त्रिदिवौकसः
सावित्रसवितारौ च रुद्रशक्तिधरावपि ६
चत्वारोऽमी कलाधिस्थाः करयोर्हृदि च स्वभूः
वितथौकः क्षतौ पार्श्वे दक्षिणेऽस्य व्यवस्थितौ ७
वामे पुनः स्थितावस्य देवौ शोषासुराभिधौ
मित्राभिधो विवस्वांश्च द्वावप्युदरमाश्रितौ ८
मेढ्रमध्यस्थितावस्य सुराविन्द्रजयाभिधौ
यमश्च वरुणश्चोर्वोः क्रमाद्दक्षिणवामयोः ९
गन्धर्वभृङ्गौ समृगौ जङ्घां राज्यामथेतराम्
द्वास्थसुग्रीवपुष्पाख्याः संश्रिताः पितरोऽङ्घ्रिगाः १०
एकाशीतिपदस्येशदिग्विभागाश्रितं शिरः
माहेन्द्रीसंश्रितं विद्याच्चतुःषष्टिपदस्य तु ११

एकाशीतिपदाज्जातो वास्तुः शतपदाभिधः
यः षोडशपदः स स्याच्चतुष्षष्ठिपदोद्भवः १२
मध्ये य एव देवानां स्थितो ब्रह्माब्जसंभवः
स सहस्राननोऽचिन्त्यविभवो जगतां प्रभुः १३
योऽयं वह्निरिहोक्तः स सर्वभूतहरो हरः
पर्जन्यनामा यश्चायं वृष्टिमानम्बुदाधिपः १४
जयन्तस्तु द्विनामाख्यः कश्यपो भगवानृषिः
महेन्द्रस्तु सुराधीशो दनुजानां विमर्दनः १५
आदित्यं पुनरिच्छन्ति विवस्वन्तमहस्करम्
सत्यो भूतहितो धर्मो भृशः कामोऽथ मन्मथः १६
योऽन्तरिक्षः स्मृतो देवस्तन्नभः समुदाहृतम्
मारुतो वायुरुद्दिष्टः पूषा मातृगणः स्मृतः १७
अधर्मो वितथाख्यः स्यात्कलेरप्रतिमः सुतः
गृहक्षतः पुनर्योत्र स चन्द्रतनयो बुधः १८
प्रेताधिपो मतः श्रीमान् यमो वैवस्वतश्च सः
गन्धर्वो भगवान् देवो नारदः परिकीर्तितः १९
भृङ्गराजमिहेच्छन्ति राक्षसं निर्ऋतेः सुतम्
यो मृगोऽस्मिन्ननन्तः स स्वयंभूर्धर्म इत्यपि २०
आदिः प्रजापतिः स्त्रष्टा मनुः सुग्रीव ईरितः
पुष्पदन्तस्तु विनतातनयः स्यान्महाजवः २१
वरुणः पाथसां नाथो लोकपालः स कीर्तितः
असुरो राहुरर्केन्दुमर्दनः सिंहिकात्मजः २२
शोषस्तु भगवानेष सूर्यपुत्रः शनैश्चरः
पापयक्ष्मा क्षयः प्रोक्तो रोगस्तु कथितो ज्वरः २३
भुजङ्गमानामधिपः श्रीमान् नागस्तु वासुकिः
त्वष्टा स्यान्मुख्यसंज्ञोऽत्र विश्वकर्माभिधश्च सः २४

चन्द्रो भल्वाट इत्युक्तः कुबेरः सोमसंज्ञितः
चरको व्यवसायाख्यः श्रीरिहादितिसंज्ञिका २५
दितिरत्रोच्यते शर्वः शूलभृद्वृषभध्वजः
हिमवानाप इत्युक्त आपवत्स उमा स्मृता २६
आदित्यस्त्वर्यमा वेदमाता सावित्र उच्यते
देवी गङ्गात्र विद्वद्भिः सवितेति प्रकीर्तिता २७
मृत्युः शरीरहर्तासौ विवस्वानिति स स्मृतः
जयाभिधस्तु वज्रीति स्यादिन्द्रो बलवान् हरिः २८
मित्रो हलधरो माली रुद्रस्तूक्तो महेश्वरः
राजयद्मा गुहः प्रोक्तः क्षितिध्रोऽनन्त उच्यते २९
चरकी च विदारी च पूतना पापराक्षसी
रक्षोयोनिभवा ह्येता देवतानुचरीर्विदुः ३०
इत्येष वास्तुदेवानां निघण्टुः परिकीर्तितः
क्षो मूर्ध्नि हो दृशोर्मध्ये सो घ्राणे चिबुके तु षः ३१
शः कण्ठे हृदये वः स्याल्लकारो नाभिदेशगः
रेफो बस्तौ यकारस्तु मेढ्रे मः पुष्यकावुभौ ३२
नकार ऊरुर्णो जानु ञकारः पिण्डिकाश्रितः
ङकारो गुल्पह्योरन्ते पकारोऽङ्घ्रितले स्मृतः ३३
उक्तानि वास्तुपुरुषस्य यथावदित्थमङ्गानि वास्तुपददैवतनामभेदाः
वार्णाश्च वास्त्ववयवेष्विह षोडशैव ब्रूमोऽथ दैवतवशेन पुरे
निवेशम् ३४

इति महाराजाधीराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे
पुरुषाङ्गदेवतानिघण्टुक्षराङ्गनिर्णयो नाम चतुर्दशोऽध्यायः

अथ राजनिवेशो नाम पञ्चदशोऽध्यायः

कृते पुरनिवेशेऽथ चतुःषष्टिपदाश्रये
नियुक्तपरिखासालगोपुराट्टालकेऽपि च १
विभक्तरथ्ये परितः प्रविभाजितचत्वरे
क्रमादन्तर्बहिः क्लृप्तदेवतायतनस्थितौ २
प्रागुदक्प्रवणे देशे प्राग्द्वाराभ्युन्नतेऽथवा
यशः श्रीविजयाधायि मैत्रं पदमधिष्ठितम् ३
यथावर्णक्रमायातं चतुरश्रं समं शुभम्
पुरमध्यादपरतोदिक्स्थं कुर्यान्नृपालयम् ४
दुर्गेषु भूवशात्कार्यं यद्वा दिक्त्वपरास्वपि
विवस्वद्भूधरार्यम्णां कार्यमन्यतमे पदे ५
त्रिचत्वारिंशता युक्ते ज्येष्ठं स्याद्द्वे धनुःशते
मध्यं शतं तु द्वाषष्टिः शतं साष्टकमन्तिमम् ६
ज्येष्ठे पुरे विधातव्यं ज्येष्ठं राजनिवेशनम्
मध्यमे मध्यमं कार्यं कानिष्ठं च कनीयसि ७
प्राकारपरिखागुप्तं चारुकान्ति समन्ततः
तमङ्गभ्रमनिर्यूहसुदृढाट्टालकान्वितम् ८
एकाशीत्या पदैर्भक्तं विधेयं नृपमन्दिरम्
राजमार्गं समाश्रित्य वास्तुद्वारमुदङ्मुखम् ९
युक्त्यानयैव कर्तव्यमन्यदिक्संश्रयेऽपि च
भल्लाटपदवर्त्यस्य गोपुरद्वारमिष्यते १०
तत्पुरद्वारविस्तारोच्छ्रायसम्मितमिष्टदम्
महेन्द्रं द्वारमिच्छन्ति निविष्टस्य महीधरे ११
वैवस्वते पुष्पदन्तमर्यणि च गृहद्वतम्
अन्येष्वेषामपरतः प्रदक्षिणपदेष्वथ १२
अन्यान्यपि स्वासु दिक्षु द्वाराण्येवं प्रकल्पयेत्

आभिमुख्ये च सर्वेषां शस्यन्ते गोपुराणि च १३
तदीयनगरद्वाराद्विंशत्यंशोज्झितानि वा
पद्मद्वाराणि सुग्रीवे जयन्ते मुख्यनाम्नि च १४
वितथेऽथ भ्रमांस्तद्वद्विदधीत प्रदक्षिणान्
वास्तौ विभक्ते पुरवत्क्लृप्तेऽमरपदव्रजैः १५
तत्र मैत्रपदस्थाने निवेशायावनीपतेः
प्रासादः प्राङ्मुखः कार्यो यथावत्पृथिवीञ्जयः १६
श्रीवृक्षं सर्वतोभद्रं मुक्तकोणमथापरम्
यमिच्छेन्नृपतिः कुर्यात्प्रासादं शुभलक्षणम् १७
शालापरिक्रमोपेतकर्मान्तैरपि चान्वितम्
तत्र प्राच्यां भवेद्गेहमादित्यपदसंश्रितम् १८
धर्माधिकरणं सत्ये व्यवहारेक्षणाय च
भृशे च कोष्ठागारं स्यादम्बरे मृगपक्षिणाम् १९
अग्नेः ककुभमाश्रित्य कार्यं वायोर्महानसम्
सभाजनाश्रयं पूष्णि विदध्याद्भोजनास्पदम् २०
सावित्रे वाद्यशाला स्यात्सवितृस्थाश्च वन्दिनः
चर्माणि वितथे कुर्यात्तद्योग्यान्यायुधानि च २१
स्वर्णरूप्यादिकर्मान्तान्विदधीत गृहक्षते
याम्ये दक्षिणतो गुप्तिं कोष्ठागारं च कल्पयेत् २२
प्रेक्षासङ्गीतकानि स्युर्गन्धर्वे वासवेश्म च
कार्या वैवस्वते शाला रथानां दन्तिनां तथा २३
पश्चिमोत्तरभागस्थां वापीमपि च कारयेत्
वायौ सुग्रीवपदयोर्गन्धर्वस्य च बाह्यतः २४
कुर्यादन्तःपुरस्थानं प्राकारवलयावृतम्
कुर्यात्तद्गोपुरद्वारमुदगास्यं जयाभिधे २५
कार्यः स्थपतिना चैव प्रासादश्चापराङ्मुखः

क्रीडादोलालयान्भृङ्गे कुमारीभवनं तथा २६
नृपान्तःपुरमिच्छन्ति मृगे पित्र्ये त्ववस्करम्
नृपस्त्रीणामुपस्थानगृहमिन्द्रपदे विदुः २७
सुग्रीवपदसंसक्तमरिष्टारमिष्टदम्
द्वास्थसुग्रीवपित्र्यं शपश्चाद्भागे मनोहरा २८
विघेयाशोकवनिका स्नानधारागृहाणि च
लतामण्डपसंयुक्ताः स्युरत्रैव लतागृहाः २९
दारुशैलाश्च वाप्यश्च पुष्पवीथ्यः सुकल्पिताः
पुष्पदन्ते भवेद्यन्त्रकर्मान्तः पुष्पवेश्म च ३०
वरुणस्य पदे कुर्याद्वापीपानगृहाणि च
स्यात्कोष्ठागारमसुरे शोषे त्वायुधमन्दिरम् ३१
भाण्डागारं तु रौद्राख्ये विदध्यात्स्थपतिः श्रिये
उलूखलशिलायन्त्रभवनं पापयद्दमणि ३२
दारुकर्मान्तमप्याहुः श्रेयसे राजयद्दमणि
स्यादोषधेरधिष्ठानं रोगे दिशि नभस्वतः ३३
नागानां शस्यते स्थानं पदे नागस्य सूरिभिः
भवन्ति मुख्ये व्यायामनाट्यचित्रगृहाणि च ३४
गवां स्थानं तथा क्षीरगृहं भल्लाटनामनि
उदक्प्रदेशे सौम्यस्य पुरोधःस्थानमिष्यते ३५
राज्ञोऽभिषेचनं चात्र दानाध्ययनशान्तयः
चामरच्छत्रधाम स्यान्मन्त्रवेश्म च भूधरे ३६
कार्यिणां चात्र कार्याणि स्थितः पश्येन्नराधिपः
विधेया मन्दुराश्वानामुत्तरं पार्श्वमाश्रिता ३७
महीधरपदस्यैव यथावद्दक्षिणामुखी
कार्या सर्वत्र चाश्वानां शाला राज्ञो यथागृहम् ३८
विशतो दक्षिणेन स्याद्वामेन च विषाणिनाम्

वेश्मानि राजपुत्राणां विदध्याच्चरकाभिधे ३९
अत्रैव विद्याधिगमशालाश्चैषां निवेशयेत्
नृपस्य मातुरदितिस्थाने कुर्यान्निवेशनम् ४०
पृथगत्रैव शिबिकाशय्यासनगृहं विदुः
नृपद्विपानां शस्ता स्यादापे सदनकल्पना ४१
अभिषेचनकं स्थानमिहैव स्याद्विषाणिनाम्
आपवत्सपदे हंसक्रौञ्चसारसनादिताः ४२
स्युः फुल्लाब्जवनाः स्वच्छसलिलाः सलिलाशयाः
पितृव्यमातुलादीनां कार्यं दितिपदे गृहम् ४३
अन्येषामपि चात्रैव सामन्तानां महीपतेः
ऐशान्यामनलस्थाने वोच्छ्रितस्तम्भवेदिकम् ४४
कार्यं देवकुलं चारु सुश्लिष्टमणिकुट्टिमम्
पर्जन्यस्य पदे होराज्योतिर्विदूहमिष्यते ४५
जये सेनापतेर्वेश्म विधेयं विजयप्रदम्
द्वारं प्राकारमाश्रित्य पदेऽर्यम्णः प्रशस्यते ४६
प्राग्दक्षिणाश्रितं शस्त्रकर्मान्तं शस्त्रमत्र च
विभुञ्जेद्ब्रह्मणः स्थानमिन्द्रध्वजयुतं नृणाम् ४७
तत्राशुभानि वेश्मानि निवेशाश्चासुखावहाः
गवाक्षस्तम्भशोभिन्यो विधेयाश्चानुकामतः ४८
सभा यथादिक्प्रभवा नृपवेश्माभिगुप्तये
सर्वत्र नृपतेः सौधान्नृपसौधस्य सम्मुखा ४९
पश्चाद्भागाश्रिता यद्वा शाला कार्या विषाणिनाम्
इत्यास्पदं सुरपदास्पदकल्पमाद्य-
मेतद्यथावदनुतिष्ठति यः सदैव
स क्ष्मामिमां भुजबलक्षपितारिपक्षः
सप्ताम्बुराशिरशनां नृपतिः प्रशास्ति ५०

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे राजनिवेशो नाम पञ्चदशोऽध्यायः

अथ वनप्रवेशो नाम षोडशोऽध्यायः

प्राग्वोदग्वापि गेहार्थे द्रव्यं विधिवदानयेत्
गन्तव्यमेव धिष्ण्येषु मृदुद्विप्रचरेषु च १
उपवास्यं च तेष्वेव च्छेद्यं भेद्यं च दारुणैः
प्रवेशनं स्थिरैः कार्यमारम्भः शस्यते चरैः २
गत्वा शुभे शुचौ देशे निवेशं कारयेत् ततः
तस्मिन्निवेश्य कर्मान्तमन्नपानेन तर्पयेत् ३
पुष्टतुष्टपरीवारः द्वापायां समुपोषितः
गृहयोग्यं परीक्षेत न्यस्तशस्त्रस्ततोऽङ्घ्रिपम् ४
पुरश्मशानग्रामाध्वह्रदचैत्याश्रमोद्भवान्
क्षेत्रोपवनसीमान्तर्विषमस्थलनिम्नजान् ५
कट्वम्लतिक्तलवणास्ववनीषु तथोद्गताम्
श्वभ्रावृतान् स्थिरोर्वीषु सम्भूतांश्च त्यजेद्द्रुमान् ६
सम्यक् संलक्ष्य वृक्षाणां वर्णस्नेहत्वगादिकम्
विजानीयाद्वयस्तेषां बालान् वृद्धांश्च सन्त्यजेत् ७
शतानि त्रीणि वर्षाणां सारद्रुमवयः स्मृतम्
गृह्णीयात् षोडशादूर्ध्वं सार्धवर्षशतावधेः ८
वयसः परिणामेन निर्वीर्यत्वं यथा नृणाम्
प्रोक्तं तद्वद्द्रुमाणां च स्यात्तथा छिद्रपत्रता ९
भङ्गुराः सुषिरास्ते स्युः सकोलाक्षाः खरत्वचः
तस्मादिमांस्त्यजेद्वृक्षांस्तथा चैवोर्ध्वशोषिणः १०
वक्रान् रूक्षानवप्लुष्टान् दुःस्थितानपि च द्रुमान्
वर्जयेद् भग्नशाखांश्च द्व्येकशाखान्वितांस्तथा ११

अन्यैरधिष्ठितान् विद्युत्पातवातसरित्क्षतान्
ग्रन्थिनिर्युक्तदानांश्च भ्रमराहिकृताश्रयान् १२
संसृष्टानेकतो भ्रष्टान् मधुभिर्बलिभिर्वृतान्
मांसामेध्याशनैस्तद्वद्दूषितानपि पक्षिभिः १३
लूतातन्त्वावृतान्वन्यसत्त्वोद्धृष्टान् गजक्षतान्
बुध्नतोऽतिबृहत्स्कन्धांश्चिह्नभूतांस्तथाध्वनः १४
अकाले पुष्पफलिनो रोगैरपि च पीडितान्
वासभूतानुलूकानां त्यजेदन्यानपीदृशान् १५
खदिरो बीजकः सालो मधूकः शाकशिंशपे
सर्जार्जुनाञ्जनाशोकाः कदरो रोहिणीतरुः १६
विकङ्कतो देवदारुः श्रीपर्णीपादपस्तथा
कुटुम्बिनाममी प्रोक्ताः पुष्टिदा जीवदास्तथा १७
वृक्षाणां लक्ष्यते येषां भारवारिसहिष्णुता
ते यथायोग्यमन्येऽपि शस्यन्ते गृहकर्मणि १८
कर्णिकारधवप्लक्षकपित्थविषमच्छदाः
शिरीषोदुम्बराश्वत्थशेलुन्यग्रोधचम्पकाः १९
निम्बाम्रकोविदाराक्षव्याधिघाताश्च गर्हिताः
गृहकर्मणि नेष्टास्ते यतस्तेऽनिष्टदायितः २०
नेष्टाः करटकिनः स्वादुफलाः क्षीरद्रुमाश्च ये
सुगन्धयश्च ये तद्वद्ध्रुवं तेषु पशुक्षयः २१
सत्त्वप्रमाणच्छाया तु नियतं दृश्यते यदा
द्रुमच्छाया तदा ग्राह्या तत्प्रमाणस्तु स द्रुमः २२
नक्षत्रं लक्षयेद्वृक्षे पूर्वस्यां दिशि तत्क्षतेः
स्याद्वृस्याद्यक्षरं यस्य तत्र जातं तमादिशेत् २३
क्षेम्यं तं स्वामिनो वृक्षं ज्ञात्वा साधकमेव च
अग्रन्थिकोटरं स्निग्धमृजु सारसमन्वितम् २४

पीनस्कन्धं हरित्पत्रं वृत्तं चाभ्यर्च्य पादपम्
द्विजान् सन्तर्प्य च स्वस्ति वाच्यं च स्थपतिस्ततः २५
पक्वापक्वामिषैस्तद्वद्भूतभक्तैः सुरासवैः
गन्धैश्च धूपमाल्यैश्च बलिं दद्यान्निशागमे २६
अपक्रामन्तु भूतानि यानि वृक्षाश्रितानि हि
कल्पनं वर्तयिष्यामि क्रियतां वासपर्ययः २७
धन्यः शिवः पुष्टिकरः प्रजावृद्धिकरो भव
स्वस्ति चन्द्रानिलयमाः सूर्यरुद्रानलास्तथा २८
दिशो नद्यस्तथा शैलाः पान्तु त्वामृषिभिः सह
जल्पेद्यो मानुषगिरा कम्पते वाभिमन्त्रितः २९
स त्याज्यः स्यात्तथा म्लानप्रवालकुसुमश्च यः
ततो भास्करमालोक्य वृक्षं कृत्वा प्रदक्षिणम् ३०
स्वस्तिवाक्येन विप्राणां छेत्ता स्थित्वोदगाननः
प्राङ्मुखो वा तरुं छिन्द्याच्छस्त्रैः क्षौद्रार्दितानतैः ३१
शाखिनच्छिद्यमानस्य जायते यद्यसृक्स्रुतिः
कम्पनं वा ध्वनिर्वाऽपि मृत्युः स्याद्गृहिणस्तदा ३२
यद्वा दधिमधुक्षीरघृतानि स्रवति द्रुमः
छिद्यमानस्तदा विद्याद्बन्धव्याधिन्कुटुम्बिनः ३३
अतीव यस्य स्रवति श्यामः स्नेहान्वितो रसः
सुगन्धिः स्वल्पमधुरः कषायः स प्रशस्यते ३४
प्राच्यां शुभस्तरोः पात उदीच्यां कर्मसाधकः
याम्यप्रत्यङ्निपाते तु शान्तिं कृत्वा द्रुमं त्यजेत् ३५
ज्ञातितः स्यात्तदा भीतिर्यदान्यं मर्दयेत् पतन्
दूरं दलति यो मूलं छिन्नो वा धरणीरुहः ३६
कूजत्यतीव वायुश्च स्मृतः सोऽथ शुभप्रदः
खरोष्ट्रयोः शृगालानां दर्शनं भुजगस्य वा ३७

छेदे स्यात्कर्मविघ्नाय निगडैर्बन्धनाय वा
हलचक्रपताकाब्जध्वजच्छत्रादिदर्शनम् ३८
श्रीवृक्षवर्धमानादिदर्शनं वा शुभप्रदम्
उत्क्षिप्यते यदि च्छेदात्तदर्द्धिः स्यात्कुटुम्बिनः ३९
सर्वतः परिहानिः स्याच्छिन्नश्चाक्षिप्यते यदि
एकवृक्षे यथोद्दिष्टलक्षणोत्क्षेपदर्शने ४०
शेषान् दोषविनिर्मुक्तान् पादपानुपलक्षयेत्
धीरस्तं कल्पयेत् सम्यगनुलोमार्जवं तरुम् ४१
छिन्द्याच्च शुभभागार्धदशभागाधिकं कृतम्
तुङ्गीसाद्यवमध्यश्च सगर्भो धरणीरुहः ४२
ज्ञेयानि मण्डलान्यस्य तत्क्षणोच्छेदनेऽपि च
मञ्जिष्ठाभे विदुर्भेकं कपिलाभे च मूषकम् ४३
पीतभासि तथा गोधां सर्पं दीर्घसितायते
गुडच्छाये मधु भवेत् कृकलासस्तथारुणे ४४
गृहगोधा कपोताभे गौधेरो घृतमण्डभे
रसाञ्जनाभे शस्त्राभे कमलोत्पलभासि च ४५
धौतासियष्टिवर्ने च मण्डले जलमादिशेत्
आकारो यस्य सर्पस्य वर्णो वा संप्रदृश्यते ४६
तं सर्पगर्भितं वृक्षमादिशेदविचारयन्
तस्करेभ्यो भयं क्षौद्रे सलिले सलिलाद्भयम् ४७
विद्यात्सर्पे विषाद्भीतिं पाषाणे भयमग्रितः
अजाविगोमहिष्युष्ट्रासभादिनिपीडितम् ४८
गोधागौधेरमण्डूककृकलासैश्च गर्भिते
मूषके पुनरिच्छन्ति मरणं वास्तुवेदिनः ४९
अमुनैव वदन्त्यन्ये गृहपीडां मनीषिणः
क्षेमेण यद्यविघ्नः स्यादसङ्गश्चागमो यदि ५०

वनान्तरे तदा क्षेमं सुभिक्षं च समादिशेत्
अर्घदानविधिना विधानविद्द्रव्यमागतमिहार्चयेद्गृही
प्रत्युपेतकुलिशायुधध्वजं द्रव्यमुज्ज्वलमुतावनीपतिः ५१
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे वनप्रवेशो नाम षोडशोऽध्यायः

अथ इन्द्रध्वजनिरूपणं नाम सप्तदशोऽध्यायः

सुराणामर्थसिद्ध्यर्थं वधाय च सुरद्रुहाम्
यथा शक्रध्वजोत्थानं प्राह ब्रह्मा तथोच्यते १
भगवन्तमथाम्भोजसंभव वचसांपतिः
प्रोवाच कथमिन्द्रेण जेतव्यास्त्रिदशद्विषः २
सोऽब्रवीत्सर्वरत्नानां ध्वजं कुरुत सङ्गताः
तं चाभिचारिकैर्मन्त्रैरुद्वहन्तोऽभिमन्त्रितम् ३
स्थितं चोपरि यन्त्रस्य सम्यक् पञ्चिशतान्वितम्
अग्रतो देवसैन्यस्य नयन्तो जेष्यथ द्विषः ४
सहस्रधारमप्येकमन्यं रिपुकुलान्तकम्
दिव्यरूपमयं प्रादाद्ध्वजमिन्द्राय दुर्धरम् ५
वीर्यप्रवर्धनी चेष्टिरेतदर्थं विधीयते
कर्मणानेन निःशेषाञ्शक्रः शत्रूञ्जयेदिति ६
जयैषी तमथ क्षिप्रमसृजच्चेतसा ध्वजम्
यन्त्रस्थितं स येनाजावमोहयदरीन् हरिः ७
आदित्या वसवो रुद्रा विश्वेदेवास्तथाश्विनौ
अलञ्चक्रुस्तमालोक्य मरुतश्च विभूषणैः ८
तेजो वीर्यं वपुश्चेष्टां बलमप्येष पश्यताम्
अहरच्छत्रुसैन्यानां तेजस्वी तरसा ध्वजः ९
तमभ्यर्च्य सुराधीशः शत्रून् बलवतोऽप्यसौ

त्रिरात्रेणाजयद्युद्धे कुलिशेन बलाद्बली १०
ततः प्रीतस्तमृत्विजोऽसौ वैष्णवे द्वादशे तिथौ
त्रैलोक्यराज्यं प्राप्याभ्यषिञ्चद्बलनिषूदनः ११
स सर्वलोकमभ्यर्च्य सर्वलोकाभिपूजितः
ध्वजमभ्यर्च्य तुष्टाव वाक्यैर्वृत्रनिषूदनः १२
ततस्तमन्तिके वीक्ष्य ध्वजं प्रोवाच वासवः
इन्द्रध्वजाक्षया लोकाः करिष्यन्ति तवार्चनम् १३
वीक्षमाणा निमित्तानि भूमिपालाश्च शास्त्रतः
ततः प्रभृत्यसौ लोके सर्वलक्षणसंभृतः १४
वरप्रदानादिन्द्रस्य नृपैः शक्रध्वजोऽर्च्यते
दुर्गमायतनं वह्निशरणं वेदिकाः कृताः १५
विचित्राः स्थालिकापाका भक्षपानानि यानि च
एतान्यायतनात् प्राक्स्युर्यद्वान्यानि प्रकल्पयेत् १६
विजेतुं यदि वाञ्छास्ति दुर्धर्षान् द्वेषिणो रणे
तेजो बलं यशश्चाप्तुं तदैन्द्रं कारयेद्ध्वजम् १७
सेनायां वा पुरे वापि प्रतिष्ठाप्य पुरन्दरम्
विजयार्थं महीपालैरभिप्रशमनाय च १८
यथा शक्रध्वजोत्थानविधानं जगतीभुजः
करिष्यन्ति तथा सम्यक् कात्स्न्र्येन प्रतिपाद्यते १९
वनादुपाहृतं द्रव्यमथ प्राग्विधिना सुधीः
पाद्यार्घ्यादिभिरभ्यर्च्य गन्धैर्माल्यैरलङ्कृतम् २०
द्विजान् संपूज्य च शुचौ देशे सम्यक्समाहितः
पूर्वाग्रमुत्तराग्रं वा प्रयत्नादवतारयेत् २१
प्रागुदग्वा पुरस्याथ स्थपतिः कर्मवानपि
कारयेत् सर्वयन्त्राणि ध्वजपूर्वाणि शिल्पिभिः २२
श्रेष्ठं द्वात्रिंशता हस्तैर्विंशत्या युतयाष्टभिः

मानं स्यान्मध्यमं तस्य चतुरन्वितयाधमम् २३
मूलविस्तृतिरायामादङ्गुलार्धं करे करे
विष्कम्भोऽग्रे च मूलार्धात् तत्त्र्यंशाद्वाखिलेष्वपि २४
ध्वजमूलाष्टमांशोनं विस्तारात्कुष्यमिष्यते
विस्तारार्धेन च स्थूलं स्थूलत्वत्रिगुणायतम् २५
ध्वजविस्तारबहलं साङ्घ्रिबाहल्यविस्तृतम्
भ्रमपीठं विधातव्यं सार्धायामं शुभावहम् २६
सम्मितो ध्वजकुष्येण वेधः स्याद्भ्रमपीठगः
कुष्यकोटयधिकावृत्तावद्यौ कोटिद्वयायतौ २७
कार्यावङ्घ्री भ्रमस्थूलौ भ्रमविस्तृतिविस्तृतौ
तद्युक्तिवेधे तावेत द्विस्तृतेर्द्विगुणोच्छ्रितौ २८
ध्वजायतिचतुर्भागात्पीठमत्र प्रकल्पयेत्
मल्लप्रतिष्ठितं मध्ये प्रान्तयोः स्तम्भधारितम् २९
तत्पीठस्तम्भनीयाभ्यां द्वाराभ्यामन्वितं दृढम्
याम्योत्तरप्रतिद्योभं प्राङ्मुखं सुदृढार्गलम् ३०
केतुव्यासार्धविस्तारं तद्दैर्घ्यार्धांशकोच्छ्रितम्
विस्तारसदृशायामं मध्ये स्याद्वज्रिणो गृहम् ३१
मल्लश्च पीठिकाङ्घ्री च बाहू स्तम्भविनिर्गतौ
शक्रमाता कुमार्यश्च ध्वजविस्तृतिविस्तृताः ३२
निम्नभागाश्च सर्वेषां स्वविस्तृतिचतुर्गुणाः
कार्या वा पञ्चगुणिताः सप्त मूलदेशतः ३३
कन्यानामुदयः प्रोक्तो यः षष्ठांशस्त्रिसंगुणः
इन्द्रमाता तु सर्वाभ्यः स्यात्तदष्टांशतोऽधिका ३४
वेधः स्वविस्तरैः सप्तभागे स्यात् कन्यकोदयात्
निर्वेधश्चतुरश्रः स्याल्लकटस्य समाहितः ३५
निर्वेधावस्य चोर्ध्वाधः सप्तांशान्तरवर्तिनौ

कार्यौ सूचीव्यधावन्यौ सूचीमानप्रमाणतः ३६
कन्याव्यासत्रिभागेन सूची विस्तारतो भवेत्
पादोनबहला चारुदारुजा दृढसंहिता ३७
कुमारीव्याससंयुक्ता द्विगुणा कलटायतिः
एतद्बाह्यान्तरं ज्ञात्वा यन्त्रं संयोजयेत्ततः ३८
तयोरधस्तदर्धेन मृगाल्यौ सूचिविस्तृतौ
क्षेत्रस्य लेखितं कार्यं सम्बन्धे सूचिकन्ययोः ३९
साङ्घ्रिकेतनमूलार्धं लकटे विस्तृतायती
अक्षाभ्यां योजयेत् सम्यग्दृढं बाह्वक्षवेधयोः ४०
पञ्चानामपि तुल्यैव कन्यानां स्यात्प्रकल्पना
कृत्वानुपूर्व्या यन्त्राणि स्थापयेदखिलान्यपि ४१
आश्विने मासि पक्षे च धवले प्रतिपत्तिथौ
स्थिरोदयैर्ग्रहैः सौम्यैर्वीक्षिते त्वाष्ट्रभेऽपि च ४२
पौरजानपदैः सर्ववादित्रध्वनितेन च
यन्त्राण्युत्क्षिप्य यष्टिं च कर्मस्थानान्नयेज्जलम् ४३
चित्रप्रतिसराकीर्णां यष्टिं तत्राज्यलेपिताम्
चूर्णैः सर्वौषधीभिश्च स्थपतिः स्नापयेत् स्वयम् ४४
जलाशयात्समुत्तार्य नृणां कलकलस्वनैः
प्रागग्रां स्थापयेद्दारुहस्तिन्योः प्राक्समुन्नताम् ४५
अर्हतेप्सितवासोभिराच्छाद्यार्च्य स्रगादिभिः
विक्षिप्य च बलिं दिक्षु द्विजातीन् स्वस्ति वाचयेत् ४६
त्रिसध्यं पूजितां तत्र सर्वप्रकृतिभिस्ततः
पञ्चाहं वासयेद्यष्टिं गुप्तां चापधरैर्नरैः ४७
तस्मिन्नेवाह्नि यन्त्राणि सर्वाण्यपि च यष्टिवत्
स्नातान्याच्छादितानीन्द्रस्थानदेशं प्रवेशयेत् ४८
सूत्रितेऽथ ध्वजस्थाने यष्टेरष्टांशदैर्घ्यतः

तदर्धविस्तृते दिक्स्थे समे प्रागायते शुभे ४९
विभक्तेऽत्र विभागानामेकाशीत्या ततः क्रमात्
विन्यस्तास्वथ सर्वासु देवतासु यथातथम् ५०
प्राचि मध्ये मैत्रपदे तन्मध्यान्मरुतो दिशि
मल्लं निम्नप्रमाणेन पादकोणे निवेशयेत् ५१
भृङ्गमुख्यपदद्वन्द्वमध्ययोर्वायुकोणयोः
न्यस्येत्स्तम्भौ तयोः पीठीं मल्ले च विनिवेशयेत् ५२
पीठिका निर्गता बाहुयुग्मात्तत्राग्रयोगतः
स्तम्भिन्यौ रोपयेद्ब्राह्मं पृथक्पदयुगं श्रिते ५३
प्रतिद्दोभाविह द्वौ द्वौ बाहुद्वितयमाश्रितौ
बाह्यतः प्रान्तपदयोर्मैत्रयोर्विनिवेशयेत् ५४
प्राच्यां मल्लाग्रतो ज्ञात्वा शक्रस्योर्ध्वगतिं क्रमात्
योजयेद्भ्रमणोपेतौ भ्रमपादावभङ्गुरौ ५५
मल्लात्पश्चिमदिग्भागे वरुणस्याश्रितां पदम्
भद्रां निवेशयेन्निम्नमानतः शक्रमातरम् ५६
स्युः पर्जन्यान्तरिद्दद्वार्यद्दमणां पदमाश्रिताः
क्रमान्नन्दोपनन्दाख्यजयाख्यविजयाभिधाः ५७
विन्यस्तास्वथ सर्वासु कुमारीषु विभागशः
त्रयस्त्रयः प्रतिद्दोभा योज्या दाढर्याय बाह्यतः ५८
निद्दिपन्नखिलं द्रव्यं भावयेत् पददेवताः
प्राप्नोति तत्तदाख्यां तद्द्रव्यं पूजां च तद्गताम् ५९
पीठीपृष्ठसमं कन्यापार्श्वयोरुभयोरपि
कुर्यादनुसरद्वन्द्वं कीलकैर्बद्धमायसैः ६०
संश्रित्यानुसरद्वन्द्वं पीठीं चोपरि सङ्ग्रहात्
बध्नीयात्कीलकैर्लौहैर्यन्त्रनिश्चलताकृते ६१
यन्त्रकर्मणि निर्वृत्त इति शास्त्रविधानतः

प्रवेशयीत स्वस्थाने त्रिदशाधिपमैन्द्रभे ६२
स्नातस्य विधिवद्वस्त्रच्छन्नस्यालेपितस्य च
श्रीखण्डाद्यैः सुरभिभिः कुसुमैरर्चितस्य च ६३
रौहिणादिमुहूर्तेषु त्रिषु मैत्रेऽथ वज्रिणः
प्रवेशमभिनन्दन्ति करणेष्वर्चितेषु च ६४
स्थपतिर्वा पुरोधा वा शुचिः स्नातः समाहितः
गन्धमाल्यार्चितान् विप्रांस्तर्पयेद्दक्षिणादिभिः ६५
ततो मङ्गलघोषेण वादित्रनिनदेन च
पुण्याहजयशब्दैस्तमुत्क्षिपेयुः समाहिताः ६६
अलङ्कारभृतः पौराः प्रहृष्टमनसोऽखिलाः
नीरुजो बलिनः शक्ताः प्रकृत्यभिमताश्च ये ६७
स्तुवीरन् पुण्यमनसः स्तुतिभिः सूतमागधाः
वन्देरन्वन्दिनश्चैनं सेवेरन् गणिका अपि ६८
प्रविशन्तं निजं स्थानमनुगच्छेन्नराधिपः
सुराधिपं बलामात्यपौरजानपदान्वितः ६९
प्रोद्यत्कलकलारावसुस्वराः पुरुषा यदि
उत्क्षिपेयुः प्रहृष्टा वा वहेयुर्वा सुराधिपम् ७०
तदा भवति भूपालो जयी नन्दन्ति च प्रजाः
राष्ट्रे सुखं पुरे हर्षो भवेन्नश्यन्ति चेतयः ७१
मुञ्चत्युत्थापितः कृच्छ्राद्यदि शय्यां स गौरवात्
तदा नृपतिरभ्येति महतीं विमनस्कताम् ७२
स्खलन्तो दुःखिता दीना निःश्वसन्तः पदे पदे
वैचित्त्यभाजो गच्छेयुर्देशहानिस्तदा ध्रुवम् ७३
भूमौ यदैकदेशेन ह्रसितः पतति ध्वजः
न सुभिक्षं न च क्षेमो न राज्ञो विजयस्तदा ७४
दीर्णे भग्नेऽथ पतिते कृत्स्ने चास्मिन् समुद्धृते

स्यान्नृपस्यावनिच्छेदः सुतध्वंसोऽथवा मृतिः ७५
वस्त्रालङ्कृतिमाल्यानां हरणात् पतनादुत
तादृशद्रव्यविध्वंसः पौराणां भवति ध्रुवम् ७६
पुरं भवति निःशब्दं निष्प्रभं वा प्रवेशने
समुच्छ्रये वा शक्रस्य तदा तन्नाशमृच्छति ७७
शक्रं स्वस्थानमानीतं शीघ्रं सुखमविघ्नतः
प्राग्वत्प्रदक्षिणं न्यस्येत्प्रागग्रं शयने निजे ७८
कुर्यात्तत्रैव नक्षत्रे शय्यास्थस्यामरेशितुः
भ्रमे कुष्ये च संयोगं यथाभागविकल्पितम् ७९
कुष्ये संयोज्यमानश्चेद्ध्वजो निपतति क्षितौ
तदा नरपतेः स्थानभ्रंशो भवति निश्चितः ८०
कुष्ययोगे यदा शक्रो वामतः परिवर्तते
तदा स्यात्स्थपतेर्मृत्युर्भवेद्भङ्गश्च दक्षिणे ८१
स्ववेधं प्रतिपद्येत तद्यष्टिर्यदि कृच्छ्रतः
प्रमादिनस्तदा राज्ञो जायते व्यसनं महत् ८२
निष्कुष्य योजितः शक्रध्वजो विघटते यदि
विश्लिष्यति तदा सन्धिः सामन्तैः सह भूपतेः ८३
स्फुटेद्भज्येत वा कुष्ये योज्यमानोऽथ सर्वतः
तदा भङ्गे नृपव्याधिः स्फुटनादङ्गनावधः ८४
अविदीर्णमपर्यस्तमव्यङ्गमविलम्बितम्
यथावन्नयासमायाति योगं चेद्वासवध्वजः ८५
धनभृत्याङ्गनापत्यैः सामन्तैश्चान्वितोऽनुगैः
निरातङ्को बलाङ्गश्च वृद्धिमेति तदा नृपः ८६
यत्नतो रक्ष्यमाणस्य शय्यास्थस्यैव वज्रिणः
तस्याङ्गान्यखिलान्येव कुटन्यादीनि योजयेत् ८७
ऐन्द्रं बलाकं यक्षेशं सर्पमादं दिगाह्वयम्

मयूरं चेन्द्रशीर्षं च पिटकाष्टकमित्यदः ८८
स्वप्रमाणेन कर्तव्यं स्पष्टरूपसमन्वितम्
तदाख्याश्चान्तरेष्वेषां सन्धयो वस्त्रनिर्मिताः ८९
मूलादन्वग्रमायातैः स्ववंशैर्विदलैर्दृढैः
गुणैश्च वेष्टयेदेनं घनैरशिथिलैर्ध्वजम् ९०
साङ्घ्रिणा ध्वजनाहेन सत्र्यंशेनाथ विस्तृतिः
विधेया शक्रपिटकस्योच्छ्रयस्तु तदर्धतः ९१
अस्मिन्नष्टौ दिशः कृत्वा वंशव्यवहिते ततः
न्यस्येद्दिगीशांश्चतुरस्तस्योपरि यथादिशम् ९२
पञ्चमांशगते कुष्याद्वज्रिणः पिटके कृते
शेषाण्यप्यष्टभागोनान्यस्मिन्नचस्येद्यथाक्रमम् ९३
बलाकादीनि विस्तृत्या चरणोनानि चोच्छ्रितौ
स्ववर्णवन्ति वृत्तानि रामणीयकवन्ति च ९४
भङ्गपातविपर्या ससिद्धयः पिटकोद्भवाः
पीडार्त्तिमृत्यवेऽत्यर्थमेकैकस्य प्रकीर्तिताः ९५
शुद्धान्तामात्यचित्तानां बलस्य यशसोऽपि च
वसुमत्याश्च धाम्नां च नृपते राष्ट्रस्य च ९६
केतुषड्भागविस्तारा रज्ञवोऽष्टौ सुवर्तिताः
विधेयाः स्युर्ध्वजायामत्रिगुणायतयो दृढाः ९७
छादितं छदिभिः पूर्वं कुट्टनीसहितं शुभम्
यत्नेनासन्नदिवसे विदध्यादमरध्वजम् ९८
अर्केन्दुग्रहताराङ्कं वेणुगुल्मेन्द्रशीर्षकम्
साष्टकरठगुणं दरडसूत्रादर्शान्वितं शुभम् ९९
ससस्यफलपुष्पाढचं शुभवस्त्रमलङ्कृतम्
दृढमन्वितमष्टाभिः सन्ततामिश्च रज्जुभिः १००
ध्वजपट्टं विदध्याच्च चित्रं सुरचितं तथा

निमित्तार्थं च लोकानां शोभाहेतोर्ध्वजस्य च १०१
सपत्तनपुरारामगन्धर्वत्रिदशासुरम्
निखिलं जगदालेख्यमस्मिन्नद्रिद्रुमाकुलम् १०२
ध्वजाग्रे रश्मिभिर्नद्धं सुविन्यस्तं च भूतले
विन्यसेत्तमसम्मूढमधोभागसमाश्रितम् १०३
प्रमोदगीतवादित्रनटनर्तकसंयुतः
तदग्रे जागरः कार्यः समस्तामेव तां निशाम् १०४
पुरोहितस्ततो भास्वत्युदिते प्रयतेन्द्रियः
अग्नेः परिग्रहं कुर्यान्मूलस्य प्रागुदग्दिशि १०५
कृत्वोपलेपनं तस्मिन्नुल्लेखाभ्युद्धनैस्ततः
संस्कृत्यास्तीर्य दर्भांश्च ज्वालयेत्तत्र पावकम् १०६
तत्राज्यपात्राण्याज्यं च गन्धांश्च कुसुमानि च
द्रव्याणि वाचनीयानि समिधश्च पलाशजाः १०७
सौवर्णौ स्रक्स्रुवाविन्द्रभक्तं च बलयोऽपि च
इत्येतत्सर्वमाहृत्य जुहुयात् पावकं ततः १०८
पुत्रदारपशुद्रव्यसैन्ययुक्तस्य भूपतेः
विजयावाप्तिजनकैर्मन्त्रैः शान्तिविधायिभिः १०९
सुस्वनःसुमहार्चिश्च स्निग्धश्चेद्धोऽपि च स्वयम्
कान्तिमान् सुरभिर्जिघ्रन् होतारं शस्यतेऽनलः ११०
तप्तकाञ्चनसच्छायो लाक्षाभः किंशुकच्छविः
प्रवालविद्रुमाशोकसुरगोपसमद्युतिः १११
ध्वजाङ्कुशगृहच्छत्रयूपप्राकारतोरणैः
सदृशार्चिः प्रशस्तोऽग्निर्माङ्गल्यैरपरैस्तथा ११२
स्निग्धः प्रदक्षिणशिखो विधूमो विपुलोऽनलः
सुभिक्षक्षेमदः प्रोक्तो दीप्यमानश्चिरं तथा ११३
धूम्रो विवर्णः परुषः पीतो वा नीलकोऽथवा

विच्छिन्नो भैरवरवो वामावर्त्तशिखोऽल्पकः ११४
मन्दार्चिर्द्युतिमुक्तोऽसृग्वसागन्धः स्फुलिङ्गवान्
धूमावृतः सफेनश्च हुतभुग्न जयावहः ११५
दर्भाणां संस्तरं वह्निर्होमाङ्गान्यपराणि वा
हूयमानो दहति चेद्धानिस्तदभिनिर्दिशेत् ११६
होमे वोत्सर्पयेत्पीठं दह्यमानो यदाग्निना
भूम्येकदेशनाशः स्याल्लाभः स्यादुपकर्षणात् ११७
सर्वतो वाप्यगाधो यः स वर्धयति पार्थिवान्
यां दिशं यान्ति च ज्वालास्तस्यां विजयमादिशेत् ११८
दुर्वर्णाशुचि दुर्गन्धि मक्षिकाखुविडम्बितम्
आज्यं राज्यच्छिदे प्राहुर्हूयते यच्च भस्मनि ११९
हीनाधिकप्रमाणाश्च विदीर्णा घुणभक्षिताः
वातरुग्णद्रुमोत्थाश्च समिधोऽर्थक्षयावहाः १२०
सगर्भाश्च सपुष्पाश्च विच्छिन्नाग्रास्तृणान्विताः
कुर्वन्त्युपद्रवं दर्भा दुष्प्रलूनाश्च ये तथा १२१
दुष्टानि पांसुकीर्णानि कीटजर्जरितानि च
बीजानि बीजनाशाय स्युरपुष्टानि यानि च १२२
माल्यं विगन्धि प्रम्लानं न पीतं न सितं च यत्
कीटैः खरिडतपीतं च न जयाय न वृद्धये १२३
विस्रावीरणयुद्धतान्युग्रखरिडतस्फुटितानि च
दुर्भिक्षरोगकारीणि प्राहुः पात्राणि सर्पिषः १२४
अशुचौ पतिते च स्यान्मक्षिकाकीटदूषिते
बलौ च शक्रभक्ते च क्षुन्मारः केशभाजि च १२५
यथोदितान्यरूपाणि सर्पिरादीन्यनुक्रमात्
भवन्ति राष्ट्रपुरयोर्भयाय निखिलान्यपि १२६
वितीर्य गन्धमाल्यादीन् देवताभ्यो यथादिशम्

पुरोधाः स्थपतिर्वाथ प्रीतचित्तः क्षिपेद्बलिम् १२७
ध्वजनैर्ऋृतदिग्भागे द्विजमुख्यानुपस्थितान्
शीलवृत्तयुतान् भूरिगन्धमाल्यैः स्वलङ्कृतान् १२८
वृद्धान् षट्कर्मनिरतान् सुहृदो वेदपारगान्
मनःप्रियान् पूर्णगात्रान् समर्थान् सर्वतः शुचीन् १२९
शुक्लाम्बरान्दर्शनीयान् गौरप्रायान् बलान्वितान्
अमुण्डाजटिलाक्लीबादीक्षितान् व्याधिताकृशान् १३०
यथेष्टं दक्षिणाभिस्तान् संयोज्याष्टशतेन वा
साक्षतैः प्रीतमनसः कुसुमैः स्वस्ति वाचयेत् १३१
शक्रं ते चाष्टभिः कुम्भैः सुदृढैर्वारिपूरितैः
स्वर्चितैरभिषिञ्चेयुर्मूले चाकृष्टमण्डलैः १३२
स्तुतैर्वैजयिकैर्मन्त्रैः स्तुतिभिश्च द्विजोत्तमैः
राज्यमाघोषयेदेतैरात्मना च महीपतिः १३३
कुर्वीत सर्वबन्धानां मोक्षं हिंसां समुत्सृजेत्
दोषान् जनपदस्यापि दशाहं विषहेत वै १३४
सुवासा भूषितः स्नातः सदाचारप्रयत्नवान्
ध्वजोच्छ्रायं शुचिर्भूपः सबलः प्रतिपालयेत् १३५
सोपवासः शुचिः स्नातः प्रयतो विजितेन्द्रियः
कृताञ्जलिपुटश्चेमं मन्त्रं स्थपतिरुच्चरेत् १३६
ओं नमो भगवति वागुले सर्वविटप्रमर्दनि स्वाहा
सुरासुराणां सङ्ग्रामे प्रवृत्ते त्वं यथोत्थितः
तथा नृपस्य देवेन्द्र जयायोत्तिष्ठ पूजितः १३७
स्तुत्वेति स्थपतिस्तस्य कृत्वा चानुप्रदक्षिणम्
कारयेद्देवराजस्य ध्वजदण्डसमुच्छ्रयम् १३८
स्वलङ्कृतैः सितस्वच्छमाल्याम्बरविलेपनैः
पौरैर्जानपदैस्तद्वत् प्रयतैः परिचारकैः १३९

सालिङ्गझल्लरीशङ्खनन्दिडिण्डिमगोमुखैः
हृष्टैरन्यैश्च वादित्रैर्वाद्यमानैर्महास्वनैः १४०
गायद्भिश्च नटद्भिश्च गायनैर्नटनर्तकैः
हृष्टोत्कृष्टोद्धतध्वानैर्गजस्यन्दनवाजिभिः १४१
तैश्च वादित्रनिनदैस्तैश्च पुण्याहनिस्वनैः
दृढरज्जुभिराकृष्टं श्रवणे ध्वजमुच्छ्रयेत् १४२
यत्नेनोत्थाप्यमानस्य तस्योच्छ्रायगतस्य च
नृपद्विवाहनादीनां निमित्तान्यवलोकयत् १४३
कुटनीनिहिताभोगं पताकादर्पणोज्ज्वलम्
चित्रपट्टस्फुटाटोपमर्केन्दुगुणभूषणम् १४४
अस्त्रस्तमाल्यालङ्कारमशीर्णच्छत्रमस्तकम्
अकम्पितमदीर्णाङ्गमदिग्भ्रष्टं सुरेश्वरम् १४५
सममूर्ध्वसमश्लिष्टमनवद्यतमद्रुतम्
अविलम्बितविभ्रान्तमृजुमार्गसमुद्गतम् १४६
इत्थं शक्रध्वजोत्थानं कुर्यं राज्ञो जयावहम्
पौरजानपदानां च क्षेमारोग्यसुभिक्षकृत् १४७
यदा शक्रध्वजः प्राचीमुच्छ्रितः प्रतिपद्यते
तदामन्त्रिगणक्षत्रनृपप्राग्वासिवृद्धिदः १४८
आग्नेयीं ककुभं याते वर्धन्ते वह्निजीविनः
प्रारब्धकार्यनिष्पत्तिरयत्नाच्चोपजायते १४९
दक्षिणां दिशमायाते केतने नमुचिद्विषः
तदा स्युर्वैश्यलोकस्य पूजाधान्यधनर्द्धयः १५०
सर्वाशासंपदः श्रेष्ठा जायन्ते नैर्ऋताश्रिते
न स्याद्गर्भो वृथा तद्वद्वधबन्धभयं न च १५१
श्रिते प्राचेतसीमाशामस्मिञ्शूद्रजयो भवेत्
क्षुत्तृष्णाग्निभयं न स्याद्वृष्टिरिष्टा च जायते १५२

द्रुमसस्यफलर्द्धिः स्यात्केतौ वायोः श्रिते दिशम्
चतुष्पदविवृद्धिश्च रोगोच्छित्तिश्च जायते १५३
चतुर्णामपि वर्णानां सम्पत्स्यात्सौम्यदिग्गते
विशेषात्सा द्विजेन्द्राणां तथा सिध्यन्ति चाध्वराः १५४
ऐशीमाशां श्रिते धर्मपरो भवति पार्थिवः
वृद्धिर्जनपदस्य स्यात्तथा पाषण्डिनामपि १५५
यदि किञ्चिद्व्रजेत्पूर्वं रज्ज्वाकृष्टः शतक्रतुः
विजिगीषोर्नरेन्द्रस्य तदा यात्रा प्रसिध्यति १५६
प्रतिष्ठां लभते भूमौ भ्रमं भित्त्वा यदि ध्वजः
सशैलकाननामुर्वीं तदा जयति पार्थिवः १५७
दिक्सर्पणे फलं प्रोक्तमित्यव्यङ्गस्य वज्रिणः
विपरीतं तदेवोक्तं व्यङ्गस्य निखिलं पुनः १५८
यदि स्वलङ्कृतः पूर्वं योज्यमानः शतक्रतुः
उत्क्षिप्तो रज्जुयन्त्रेण स्तोकमर्धे स्थितोऽपि वा १५९
शय्यायां यदि वा भूमावुत्सङ्गे वा पतत्यसौ
तदा नृपं राजदारान् कुमारं वा विनाशयेत् १६०
उत्थितोऽर्धोत्थितो वापि यदि क्षुभ्यति कम्पते
स्थानान्तरं व्रजेद्वापि सञ्चरेद्वा कथञ्चन १६१
विगृह्यते तदा भूपो भ्रश्यति स्थानतोऽपि वा
भयाज्जनपदो वास्य चलत्येव न संशयः १६२
आकृष्टासु यदाष्टासु च्छिद्यते कापि रज्जुषु
अमात्यमरणं तत्स्यादेकैकांशेन निश्चितम् १६३
मूलमध्याग्रभागे वा प्रोच्छ्रितो यदि भज्यते
पौरसेनापतिनृपान् क्रमशो हन्त्यसौ तदा १६४
छत्रार्कवेणुगुल्मेन्द्रशीर्षकण्ठगुणा यदि
पतन्ति भूमाविन्द्रो वा तदा हन्ति महीपतिम् १६५

नृपो वधमवाप्नोति तैर्भग्नैः पततैर्ध्वतैः
अभग्नैर्विधुतैरेतैः क्षयं व्रजति साधनम् १६६
क्रमशो हन्युरादर्शवैजयन्तीन्दुतारकाः
पतन्त्यो दृक्चमूनाथपुरोधःस्त्रीर्महीपतेः १६७
माल्यैर्विभूषणैर्यानैः शस्त्रवस्त्रफलाशनैः
यान्ति केतुच्युतैरेतै राज्ञस्तान्येव संक्षयम् १६८
शीर्यते शक्रपिटकं कूटेभ्यः शक्रवेश्म वा
यस्यां ककुभि तत्राहुर्हानिं पूर्वे विपश्चितः १६९
भङ्गे मृगालीलकटाक्षार्गलानामनुक्रमात्
पीडा सञ्जायते वेश्यानृपतिश्रेष्ठिरक्षिणाम् १७०
भग्ना भ्रमात्क्षपादैर्वा मल्लमातृकुमारिकाः
राष्ट्रं हन्युर्नरेन्द्रस्य प्रियामातृसुतान् क्रमात् १७१
निर्घातोऽशनिरुल्का वा ध्वजे यदि पतेत् तदा
अनावृष्टिभयं राज्ञः पराजयमथादिशेत् १७२
कुर्वन्ति मक्षिकाः शक्रे मधुच्छत्रं समुच्छ्रिते
यस्मिंस्तत्र द्विषद्रोधं षण्मासाच्चादिशेत्पुरे १७३
मक्षिका वा खगा वा चेद्भ्रमेयुः पार्श्वतो हरेः
प्रदक्षिणा बहिष्थानमासाद्याहुस्तदा मृतिम् १७४
गृध्रश्येनकपोताश्चेल्लीयन्ते शक्रमूर्धनि
तदा कुर्वन्ति दुर्भिक्षविग्रहक्षितिपक्षयान् १७५
यदि केतौ निलीयन्ते कुररोलूकवायसाः
राज्ञः क्रमात्तदा हन्युर्मन्त्रिपुत्रपुरोधसः १७६
मयूरो यदि वा हंसः समाश्रयति वासवम्
समस्तलक्षणोपेतस्तदा स्यान्नृपतेः सुतः १७७
चक्री बलाका हंसी वा यदि केतौ निलीयते
तदा नरपतिर्भार्यामवाप्नोत्यतिसुन्दरीम् १७८

खगैः सुवृष्टिर्जलजैः सुभिक्षं स्यात्फलाशिभिः
विष्ठाशिभिश्च दुर्भिक्षं भीतिः स्यात्पिशिताशिभिः १७९
यदि चित्रपटन्यस्ताः सुरयक्षोरगोत्तमाः
विचित्राकृतिभिर्युक्ता वाहनायुधभूषणैः १८०
अष्टौ च ककुभो मूर्ताः प्रनृत्ताश्चाप्सरोगणाः
सग्रहास्तारका मेघाः स्फीता नद्यस्तथाब्धयः १८१
वाप्यः पङ्केरुहच्छन्ना हंसवन्ति सरांसि च
फलपुष्पावतंसानि वनान्युपवनानि च १८२
देवतायतनान्याद्यगोपुराणि पुराणि च
भवनान्यतिशुभ्राणि शयनासनवन्ति च १८३
प्रहृष्टाः पार्थिवा भृत्या बलवाहनशालिनः
पौरा जानपदा लोकाः क्रीडाभाजः कुमारकाः १८४
चत्वारो मुदिता वर्णा नटनर्तकशिल्पिनः
सगोव्रजलतागुल्मद्रुमौषधिभृतो नगाः १८५
मृगपक्षिगणाः शस्ता मङ्गलान्यखिलानि च
विचित्रापानवसुधाः फलभक्षाश्च पक्षिणः १८६
यथानिवेशं शोभन्ते तदा देशे पुरेऽपि च
क्षेमारोग्यसुभिक्षाणि जयं राज्ञश्च निर्दिशेत् १८७
एतेषां कुट्टने पाते छेदे नाशेऽथवा हृतौ
प्लोषे वाप्यशुभं वाच्यं यथायोनि यथादिशम् १८८
स्थिते वा पतिते वापि चित्रपट्टे भुवस्तले
उपप्लवो नरेन्द्रस्य भवेज्जनपदस्य च १८९
राजते यद्यलङ्कारः सकलो यावदुत्सवम्
अनस्तोऽविप्लुतश्चोर्वीं तदा कृत्स्नां जयेन्नृपः १९०
नटनर्तकसङ्घेषु प्रनृत्यत्सु पठत्सु च
शुभे शुभं समादेश्यमितरस्मिन्नशोभनम् १९१

ये वर्गाः सम्प्रहृष्यन्ति मङ्गल्या गजवाजिनः
सुवेषचेष्टालङ्काराः शुभं तेष्वादिशेद्ध्रुवम् १९२
अमङ्गलैषिणो ये स्युर्विकृता दीनचेतसः
पुरुषा योषितो वापि निर्दिशेत् तेषु वैशसम् १९३
प्रभिन्नकरटा नागा बृहन्तस्तोयदा इव
अदीनाश्च स्वतन्त्राश्च नृपतेर्विजयावहाः १९४
आलिखन्तः खुरैः क्ष्मोर्णीं दन्तिनौर्हृष्टचेतसः
हेषमाणा हयाश्चापि शंसन्ति नृपतेर्जयम् १९५
सतडिद्गर्जिताम्भोदा वृष्टिश्चेज्जायते तदा
महीपतेर्जयं विद्यात्सुभिक्षं क्षेममेव च १९६
अथार्धरात्रे सम्प्राप्ते रोहिण्यां दशमेऽहनि
शक्रस्य पातमिच्छन्ति मुनयः प्रतिवत्सरम् १९७
ततः समाजे निर्वृत्ते शक्रकेतौ प्रतिष्ठिते
गन्धतोयैश्च पुष्पैश्च विदधीताम्बुसेवनम् १९८
अमेध्यैर्वस्त्रखण्डैर्वा भस्मकेशास्थिकर्दमैः
यदा क्रीडन्ति मनुजा दुर्भिक्षं जायते तदा १९९
विप्राः प्राच्यां विलम्बेयुः पतन्तं वासवध्वजम्
सुभिक्षं क्षेममारोग्यमन्यथा स्याद्विपर्ययः २००
अष्टाङ्गोक्तो ध्वजाङ्गे यो विशेषः सोऽथ कथ्यते
पुरे ब्रह्मपुरात् प्राच्यामिन्द्रस्थानं विधीयते २०१
मात्राशयेन हस्तेन प्रमाणं तस्य कीर्तितम्
चतुःषष्टिसमायामं चतुरश्रं समन्ततः २०२
एकाशीतिपदेनैव भजेत्क्षेत्रं विभागतः
क्षेत्रस्यार्धेन कुर्वीत ध्वजायामं प्रमाणतः २०३
ततो वृद्धिर्विधातव्या हस्ते हस्तेऽङ्गुलं बुधैः
अर्धाङ्गुलं वा वृद्धिः स्याद्ध्वजस्येन्द्रस्य कुत्रचित् २०४

तावद्वृद्धिर्विधातव्या यावत्क्षेत्रसमोऽङ्गुलैः
ततः प्रमाणमाद्यं यत्तत्पुनर्विनियोजयेत् २०५
प्रमाणमङ्गुलैः केतोः स्याच्चत्वारिंशता मितम्
तस्य संवत्सरे वृद्धिः कर्तव्या द्व्यङ्गुलैर्बुधैः २०६
ब्रह्मस्थाने च कुर्वीत ब्रह्मावर्त्तं विचक्षणः
ब्रह्मणोऽनन्तरं प्राच्यां भवेद्दैवतमर्यमा २०७
तत्र यन्त्रस्य पादौ स्तः समुच्छ्रायेण षट्पदौ
तस्यैव पश्चिमे भागे मित्रो भवति देवता २०८
ततः प्रभृति यन्त्रस्य वामवेधो नतो भवेत्
पूर्वापरं च निम्नं स्यादेष यन्त्रविधिः स्मृतः २०९
यन्त्रस्य पश्चिमे भागे वरुणो दैवतं भवेत्
वरुणस्य पदान्ते च वंशस्थे द्वे कुमारिके २१०
खानिले चतुरो हस्तान् दशहस्तोच्छ्रिते च ते
रुद्रस्थाने च कर्तव्या कुमारी सुप्रतिष्ठिता २११
सोमयोगे चतुर्थी स्यादापभागे च पञ्चमी
षष्ठी च सवितुर्भागे यमभागे च सप्तमी २१२

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
इन्द्रध्वजनिरूपणं नाम सप्तदशोऽध्यायः

अथ नगरादिसंज्ञा नामाष्टादशोऽध्यायः

नगरं मन्दिरं दुर्गं पुष्करं साम्परायिकम्
निवासः सदनं सद्म क्षयः क्षितिलयस्तथा १
यत्रास्ते नगरे राजा राजधानीं तु तां विदुः
शाखानगरसंज्ञानि ततोऽन्यानि प्रचक्षते २
शाखानगरमेवाहुः कर्वटं नगरोपमम्

ऊनं कर्वटमेवेह गुणैर्निगम उच्यते ३
ग्रामः स्यान्निगमादूनो ग्रामकल्पो गृहस्त्वसौ
गोकुलावासमिच्छन्ति गोष्ठमल्पं तु गोष्ठकम् ४
उपस्थानं भवेद् राज्ञां यत्र तत्पत्तनं विदुः
बहुस्फीतवणिग्युक्तं तदुक्तं पुटभेदनम् ५
विधाय कुटिका यत्र पत्रशाखातृणोपलैः
पुलिन्दाः कुर्वते वासं पल्ली स्वल्पा तु पल्लिका ६
नगरं वर्जयित्वान्यत्सर्वं जनपदः स्मृतः
नगरेण समं कृत्स्नं राष्ट्रं देशोऽथ मण्डलम् ७
आवासः सदनं सद्म निकेतो मन्दिरं मतम्
संस्थानं निधनं धिष्ण्यं भवनं वसतिः क्षयः ८
अगारं संश्रयो नीडं गेहं शरणमालयः
निलयो लयनं वेश्म गृहमोकः प्रतिश्रयः ९
गृहस्योपरिभूमिर्या हर्म्यं तत्परिकीर्तितम्
तस्यारोहणमार्गो यः सोपानं तत्प्रचक्षते १०
काष्ठकैर्यत्र रचितं स्थूणयोरधिरोहणम्
सा निःश्रेणिरिति प्रोक्ता सोपानैर्विपुलैः पदैः ११
स्मृतः काष्ठविटङ्कोऽसौ यत्काष्ठैः संवृतं गृहम्
सुधालिप्ततलं हर्म्यं सौधं स्यात्कुट्टिमं च तत् १२
वर्षाभयेन या छन्न तालशाकदलादिभिः
स्मृताभिगुप्तिरन्तस्था सर्वोपरि गृहस्य सा १३
वातायनं तु भित्तीनामवलोकनमुच्यते
लघुर्वातयनो यः स्यादवलोकनकं हि तत् १४
हर्म्यस्य मध्ये यच्छिद्रं स उ लोक इति स्मृतः
हर्म्यप्राकारकः स स्यात्करण्ठा हर्म्यतलस्य या १५
वितर्दिकाष्ठमाला स्यात्सर्वतश्छदमूलगा

तत्स्तम्भेषु मृगा ये तु ते स्युरीहामृगा इति १६
निर्यूहो हर्म्यदेशाद्यः काष्ठानामुपनिर्गमः
वलीकमिति विज्ञेयं काष्ठं छेदाद्विनिर्गतम् १७
छन्नैश्चतुर्भिः पार्श्वैर्यत्तच्चतुश्शालमुच्यते
त्रिभिस्त्रिशालं तत्प्राहुर्द्वाभ्यां तत्स्याद्द्विशालकम् १८
एकशालकमेकेन च्छन्नेन गृहमुच्यते
गृहमेकं तु यच्छन्नं सर्वं शालेति सा स्मृता १९
शालानां यत्पुनर्मध्यं वापी पुष्करिणी च सा
संछन्ना चापि यस्य स्यात्तद्गर्भगृहमुच्यते २०
गृहे महाजनस्थानं त्रिकुडचं यत्प्रकल्पितम्
उपस्थानं तदत्राहुः स्याच्चोपस्थानकं लघु २१
प्रासादस्तु स एव स्यादल्पा प्रासादिका स्मृता
दीर्घप्रासादिका यासौ वलभीत्यभिधीयते २२
शालाग्रे वलभी या स्यादलिन्देति वदन्ति ताम्
शालां विना तु वलभी वलभेति निगद्यते २३
अल्पाल्पास्तु चतुष्कुडचा ये तेऽपवरका मताः
गृहे चाभ्यन्तरस्थानं शुद्धान्त इति कीर्त्यते २४
प्रतोलीं तां विदुर्लोकः सुरङ्गामिव यां वसेत्
सा कक्षेत्युदिता तज्ज्ञैर्यदवस्थान्तरं गृहे २५
यदुपस्थानकं नाम ये चापवरकास्तथा
ते कोष्ठका या तु करठा कुडचं भित्तिश्चयश्च सा २६
भक्तशाला भवेद्या तु तन्महानसमुच्यते
यच्छन्नं द्वारदेशे तु तमाहुर्द्वारकोष्ठकम् २७
प्रवेशनमिति प्राहुर्द्वारनिर्गमनं तथा
जलनिर्गमनस्थानं विज्ञेयमुदकभ्रमः २८
भवनस्याङ्गणं यत्तु तदाहुर्भवनाजिरम्

वनाजिरं वनमही त्वाश्रमाजिरमाश्रमे २९
उत्तरोदुम्बरस्याधः श्लिष्टां मध्ये च कुडयोः
तज्ज्ञास्तां देहलीत्याहुः कपाटाश्रयमेव च ३०
कपाटं द्वारपक्षः स्यात्कपाटपुटमेव च
पक्षः पिधानावरणो द्वारसंवरणं तथा ३१
कपाटं संपुटस्ते द्वे कपाटयुगलं च तत्
कलिका द्वारबन्धार्था या स्यात्तामर्गलां विदुः ३२
सा स्यादर्गलसूचीति यदि दीर्घा प्रमाणतः
पुराणां सा तु परिघः फलिहो गजवारणम् ३३
छिद्रैर्गवाक्षप्रतिमैश्छिद्रितं सर्वतस्तु यत्
फलकं तद्गवाक्षः स्याज्जालमित्यपि कथ्यते ३४
हर्म्यद्वारे गृहद्वारे तथा हर्म्यावलोकने
प्राकारान्तरपृष्ठे तु या च प्रासादिका भवेत् ३५
पार्श्वयोरुभयोरेषां फलकद्वयमुच्छ्रितम्
उपर्युपरि संक्षिप्तमर्धचन्द्रद्वयाकृति ३६
आनने द्वे यथा चास्मिन् श्लिष्टैरग्रयैर्महाधरैः
तयोरुपरि सन्धौ च तारकाकृति मण्डलम् ३७
तत्तोरणमिति प्रोक्तं यच्च तेन परिष्कृतम्
सुवर्णतोरणं च स्यान्मणितोरणमेव च ३८
पुष्पतोरणमप्येतत्क्रियते पुष्पकादिभिः
तोरणाग्रे ठकारो यः सिंहकर्णः स उच्यते ३९
नाम्ना संयमनानीति गृहसञ्चरभूमयः
गृहस्य पार्श्वे यद्यस्मिंस्तत्तत्संयमनं विदुः ४०
भित्तेर्यद्वाथ दारूणां तरङ्गाग्रवदानतम्
मरालपाली सा हर्म्यात्प्रणाली निर्गमोऽम्भसः ४१
स चा प्राकार इत्युक्तः कण्ठः स्यादङ्गणस्य यः

द्वारस्य तु समीपं यत्प्रद्वारं तदिहोच्यते ४२
यदिष्टकचितं मूले द्वारस्य भवति स्थलम्
दीर्घं वा ह्रस्वमथवा तदास्थलकमिष्यते ४३
मूत्रभूमिरमेध्येति वर्चस्कोऽवस्करस्तथा
गृहाच्च भित्तिसामान्यं बाह्यं परिसरो मतः ४४
विस्तीर्णमुच्छ्रितं यत्स्याद्वेश्म सोऽट्ट उदाहृतः
संक्षिप्तमेतदेवोक्तं तज्ज्ञैरट्टालकाख्यया ४५
तदेवात्यन्तसंक्षिप्तमट्टालीति निगद्यते
अट्टाली या तु नात्युच्चा तामत्राट्टालिकां विदुः ४६
एकनाडीगतच्छिद्रैः काष्ठनालैः परिश्रितम्
यत्र काष्ठप्रणालीति छदपृष्ठेऽम्बु धावति ४७
स्तम्भशीर्षकरूपाणि काष्ठमूलाश्रितानि च
सुषिराणि प्रयत्नेन काष्ठनाडीमुखान्तरैः ४८
रूपाणामथ तेषां तु स्तननासामुखाक्षिभिः
नानास्थानस्थितानां च वृषवानरदंष्ट्रिणाम् ४९
कृतसूक्ष्मान्तरच्छिद्रैः प्रवर्षति समन्ततः
तद्धारागृहमित्युक्तं धारागारादिनामभृत् ५०
कांस्यैर्लोहैस्तथा पट्टैर्निर्मृष्टादर्शनिर्मलैः
निचिता यस्य भित्तिः स्यात्तद्दर्पणगृहं विदुः ५१
पक्षद्वारं तदत्राहुर्यन्महाद्वारतोऽपरम्
यत्प्राकाराश्रितं द्वारं पुरे तद्गोपुरं विदुः ५२
निर्गताश्चोच्छ्रिताश्चैव प्राकारस्यान्तरान्तरा
उपकार्या इति प्रोक्ताः क्षेमाश्चाट्टालका मताः ५३
चयप्रकारशालाः स्युः पुरीसंवरणाभिधाः
प्राकारादनुपालास्तु प्राकार उपनिष्कलाः ५४
क्रीडागृहं यदारामे तदुद्यानं प्रचक्षते

तीरेऽम्भसो जलोद्यानं जलवेश्माम्बुमध्यगम् ५५
क्रीडागृहं यदत्रोक्तं क्रीडागारं तदुच्यते
विहारभूमिराक्रीडभूमिरित्यभिधीयते ५६
देवधिष्ण्यं सुरस्थानं चैत्यमर्चागृहं च तत्
देवतायतनं प्राहुर्विबुधागारमित्यपि ५७
छन्नं भवेद्यत्तु महाजनस्य स्थानं सभा सा कथिता च शाला
गवां पुनर्मन्दिरमत्र गोष्ठमाचक्षते वास्तुनिवेशविज्ञाः ५८
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे
नगरकर्वटग्रामगृहायतनसंज्ञा नामाष्टादशोऽध्यायः

अथ चतुःशालविधानं नामैकोनविंशोऽध्यायः
ब्रूमो नृपचमूनाथवर्णिनां भवनान्यथ
प्रशस्तान्यप्रशस्तानि कृत्स्नान्यपि यथाक्रमम् १
वेश्मनामेकशालानां शतमष्टाधिकं स्मृतम्
द्वापञ्चाशद्द्विशालानां त्रिशालानां द्विसप्ततिः २
चतुःशालानि वेश्मानि यानि तेषां शतद्वयम्
पञ्चाशच्चाधिका षड्भिर्विज्ञातव्या मनीषिभिः ३
सहस्रं पञ्चशालानां स्यात्तथा पञ्चविंशतिः
षट्शालानां षण्णवतिः स्यात्सहस्रचतुष्टयम् ४
अष्टाङ्गे त्वेकशालस्य भेदाः पञ्चाशदीरिताः
द्विशालानां तु सर्वेषां प्रभेदाः शतपञ्चकम् ५
शतं शतं च प्रत्येकं त्रिशालानामुदाहृतम्
द्विचत्वारिंशदधिकं चतुःशालशताष्टकम् ६
द्विनवत्युत्तराण्येवं शतानि दश सप्त च
षोडशैव सहस्राणि षोडशोना चतुःशती ७

वेश्मानि सप्तशालानि भवन्ति परिसङ्ख्यया
पञ्चषष्टिसहस्राणि तथा पञ्चशतानि च ८
गृहाणामष्टशालानां षट्त्रिंशदपरा भवेत्
लक्षद्वयं सहस्राणि द्विषष्टिः शतमेव च ९
गृहाणां नवशालानां चत्वारिंशच्चतुर्युता
दशलक्षसहस्राणि चत्वारिंशत्तथाष्ट च १०
शतानि दशशालानां पञ्च षट्सप्ततिस्तथा
गृहद्वितययोगेन संयुक्ताख्यानि विंशतिः ११
गृहद्वितययोगेन द्वात्रिंशदिह वेश्मनाम्
दशपञ्च तथान्यानि भवन्ति हलकान्यपि १२
गृहमालाथ सङ्घट्टो गृहनाभिर्गृहाङ्गणम्
उद्भिन्नं भिन्नकक्षं च निलीनं प्रतिपादितम् १३
अन्यानि चाष्टभेदानि भवन्त्युत्तमवर्णिनाम्
लक्षणं नाम संस्थानं चैतेषां प्रतिपाद्यते १४
वर्णिनां स्याच्चतुःशालं मितं द्वात्रिंशता करैः
सेनापतेश्चतुःषष्टिस्तद्वदेव पुरोधसः १५
श्रेष्ठमष्टशतं राज्ञामेतानि तु यथाक्रमम्
चतुःषडष्टहान्या स्युः पञ्चमं च पृथक्पृथक् १६
विशोधयेत्कनीयोभिर्मध्यमानि यथाक्रमम्
नरेन्द्रपुरुषाणां स्युर्वेश्मान्येतानि वृद्धये १७
गृहाणि शोधयेत्प्राग्वज्जचायांस्यपि च मध्यमैः
भवन्त्येतानि भूपानां रतिकोशप्रतिश्रयाः १८
दशांशयुक्तो विस्तारादायामो विप्रवेश्मनाम्
अष्टषट्चतुरंशाढ्यः क्षत्रादित्रयवेश्मनाम् १९
यो विस्तारः स एव स्यादायामोऽस्मिन् यथाक्रमम्
विट्शूद्रयोः स्यादाधिक्यं मध्ये ज्येष्टे च सद्मनि २०

कर्णसूत्राद्बहिः स्तम्भान्नयसेत् सर्वान्प्रयत्नतः
धाम्नां षोडशहस्तानां पञ्चानां चतुरुत्तरा २१
वृद्धिः शालास्तु तेषां स्युश्चतुरंशेन विस्तृताः
शालाव्यासार्धतोऽलिन्दः सर्वेषामपि वेश्मनाम् २२
तस्याः षोडशहस्ते स्यात् पञ्चमांशद्वयेन वा
सप्तमांशत्रयेण स्याद्द्वयोरपरवेश्मनोः २३
अन्त्ययोर्हस्तयोः स स्याच्चतुर्भिर्नवमांशकैः
पञ्चभिः षड्भिरेभिश्च सार्धैः साङ्घ्रिगैः करैः २४
दैर्घ्यं स्याद्दशभिः सार्धैः शालायाः षोडशादिषु
निवेशदशमांशो यः स युतः सप्तभिः करैः २५
शालाया विस्तरः प्रोक्तः श्रेष्ठानामिह वेश्मनाम्
अलिन्दमानं प्रागेव प्रोक्तं निखिलवेश्मनाम् २६
यच्छालालिन्दयोः शेषं भवेद्गर्भगृहं हि तत्
मूषावच्छिन्नमिच्छन्ति शालादैर्घ्यं विपश्चितः २७
शालाव्यासप्रमाणा स्यात्सर्वेषामवकोसिमा
दिशासु भवने शाला विदिशाकर्णसामयः २८
कर्णशाला तु या प्रोक्ता सा च ज्ञेयावकोसिमा
अलिन्दशालयोर्मध्ये या स्यान्मूषेति सा स्मृता २९
पूर्वद्वारं नियम्यादावादिमूषा तदुत्तरा
मूषा भद्रा इति प्राहुस्तत्संख्यामवधारयेत् ३०
यावन्मूषं भवेद्वेश्म तावद्भद्रं तदुच्यते
भद्राभद्रे शक्रदिक्स्थे सौम्यासौम्ये यमाश्रिते ३१
शान्ताशान्ते प्रतीचीस्थे सौम्यदिक्स्थे शिवाशिवे
अलिन्दा इति केऽप्याहुर्मूषा इत्यपरे विदुः ३२
भद्रा इति जगुः केचिदन्ये परिसरा इति
एकद्वित्रिचतुःपञ्चषट्सप्ताष्टक्रमेण याः ३३

मूषास्तासां प्रवहणासंज्ञाः स्युर्वेश्मनामिह
तासामाद्याः प्रशस्ताः स्युरप्रशस्तास्ततः पराः ३४
नामतो गुणतश्चैव शुभाशुभफलोदयात्
अष्टावादौ गुरून्नचस्येत्ततश्चाद्यगुरोरधः ३५
लघुं न्यस्येत्ततः शेषान् विदधीत यथोपरि
गुरुभिः पूरयेदादिं यावत्स्युर्लघवोऽखिलाः ३६
आद्यपङ्क्तौ गुरुश्चैको लघुश्चैको यथाक्रमम्
अतः परं तु द्विगुणाः प्रतिपङ्क्ति भवन्त्यमी ३७
मूषाभेदाश्चतुःशाले षट्पञ्चाशच्छतद्वयम्
अलिन्दवीथीप्रग्रीवनिर्यूहकगवाक्षकैः ३८
तमङ्गभद्रविन्यासरचनाभिरनेकधा
अपरस्परसंबाधात्संवृतैर्विवृतैरपि ३९
गृहभेदाः प्रसूयन्ते येषां संख्या न विद्यते
यत्संबद्धचतुश्शालममूषालिन्दकं हि तत् ४०
एकभद्रादिगेहानां ब्रूमो नामान्यतः परम्
यान्येकलघुलक्षाणि प्रस्तारे तानि तद्विदः ४१
कथयन्त्येकभद्राणि क्रमसंख्याविभागतः
प्रागायतं प्राग्विलग्नं जयं संयमनप्रियम् ४२
प्रतीच्यं प्रासविन्यासं सुभद्रं कलहोत्तरम्
अष्टौ तान्येकभद्राणि द्विभद्राणयभिदध्महे ४३
पूर्वोत्तरोत्तरं पूर्वाद्भद्रादिह विधानतः
स्यातां प्राग्मेलकाद्यद्वत्पूर्वाद्या दक्षिणा परे ४४
ईरं सुनीथमाग्नेयं द्वीपमाप्यं सुसंयमम्
अर्धर्चमैभं व्याकोशं नैर्ऋतं वृषभं विनम् ४५
काव्यं विपासमानीरं कान्तं सौभं विपश्चिमम्
गवयं श्रीवहं श्लिष्टं गणं भीममयोगमम् ४६

वर्तं चलं शठं क्रान्तमित्यष्टाविंशको गणः
द्विभद्राणां समाख्यातस्त्रिभद्राणामतः परम् ४७
ऐन्द्रं विलोममायामं वधमेकाद्यमन्तिकम्
प्रकाशं पैत्रमायस्तं भद्रं प्रान्तं प्रसाधकम् ४८
द्यमं विघातमायातं कान्तं चित्रं द्विमन्दिरम्
सुदद्यिणं भयं श्लिष्टं प्रमोदं व्यायतं वियत् ४९
आप्यं सुनागं नागेन्द्रमीरितं शोभनं घनम्
शस्तोत्तरं कफं कर्णं क्रुष्टं क्रान्तं क्रमागतम् ५०
द्विशस्तं द्विभयं प्रोक्तं चक्रं मलयमायतम्
वनं भारं सुगाराख्यमागारं वीरमेव च ५१
व्यायाममायुतं तद्वद्व्याहृतं च ततः परम्
दुर्गमं द्योभसंज्ञं च कृत्रिमं द्योभणं तथा ५२
चारुरुच्याभिधानं च ध्रुवं कथमिति क्रमात्
षट्पञ्चाशत्त्रिभद्राणि चतुर्भद्राण्यतः परम् ५३
कृतमर्चायनं पौष्णमुद्गतं मिश्रमुत्सुकम्
विघ्नं विपद्यमाहूतं रुचकं वर्धनं पृथु ५४
कलहं छलमायास्यं त्रिनाभं स्वस्तिकं स्थिरम् ५५
शरलं द्विगुणं नाद्यं चित्रं भ्रान्तं विधारणम्
साधारणं नतं त्र्यंशमृषं रोगं विशेषणम् ५६
प्रतीच्यं त्रिसमं स्वैरं सुप्रतीकं नलं द्यपम्
व्याप्तमाक्रीडनं व्यर्थमीशानं सुखमव्ययम् ५७
मगधं द्यिप्रमागस्त्यमेकोजं द्विर्गतं लिहम्
पर्कं विलोममुद्दण्डं मुण्डं मातङ्गमाखिलम् ५८
खर्वं पिनाकमुद्यन्तं विशिखं प्रसभं रजम्
चुरुकं सफलं वामं वर्धनं धावनं सहम् ५९
चयं सेव्यं कलं तीर्णं चतुर्भद्राणि सप्ततिः

पञ्चभद्रायथोच्यन्ते षट्पञ्चाशदनुक्रमात् ६०
कानलं लोलुपं जिह्मं प्रगालं सालिनं जिनम्
सुजयं विजयं यामं जयं ज्ञातं जपं तपम् ६१
जमं वरं चरं वैरं विशिषं सुप्रभं प्रभम्
प्रतीक्षं क्षमिणं युक्तं शान्तं त्रैतं विनोदनम् ६२
सन्दोहं विप्रदोहं च विद्रुतं सततं ततम्
व्याकुलं लीनमालीनं विचित्रं लम्बनं खरम् ६३
शेखरं विबुधं चैत्रं व्यासक्तं संपदं पदम्
त्रिशिखं चतुरं प्रातं सुस्थितं दुःस्थितं स्थितम् ६४
चक्रं वक्रं लघं लाभं संपर्कं मूलमव्ययम्
अष्टाविंशतिरन्यानि षड्भद्राणि निबोधत ६५
किन्नरं कौस्तुभं हर्म्यं धार्मिकं निषधं वसु
साटिकं वामनं गौरमस्थिरं क्रमिणं खलम् ६६
विवरं वालिशं धौमं त्रिपुष्टं मन्दिरं भवम्
अशोकं भास्वरं चौष्यं लातव्यं सुस्वनं मखम् ६७
वाजि नेत्रं भ्रमं घोषं सप्तभद्रायतः परम्
भाण्डीरं वैसहं प्रस्थं प्रतानं वासुलं कटम् ६८
लक्ष्मीवासं सुगन्धान्तमष्टधैतानि नामतः
अन्यच्च सर्वतोभद्रमेकं भद्राभिरष्टभिः ६९
संप्रकल्प्यं चतुःशालं ब्रूमश्चैषां शुभाशुभम्
प्रदक्षिणा शुभा मूषा विपरीता विपर्यये ७०
समवाये यथा भूयो जानीयात्साध्वसाधु च
तथाष्टावेकभद्राणि सप्तभद्राणि च क्रमात् ७१
द्विभद्रायष्टभिर्युक्ता षड्भद्राणि च विंशतिः
षट्पञ्चाशत्त्रिभद्राणि पञ्चभद्राणि चोन्नयेत् ७२
सप्ततिश्च चतुर्भद्रायेकं भद्राभिरष्टभिः

एवं शतद्वयं पिण्डः षट्पञ्चाशच्च वेश्मनाम् ७३
भद्रैः पूर्वविधानेन चतुःशालाक्रियादिषु
मूषा स्यात्कुड्यजैस्तेषु चतुश्शालेषु वेश्मसु ७४
अनुवंशाश्रिते मूषे स्वस्तिके स्तःपराङ्मुखे
मुखायते च पुरतो द्वे स्यातामवकोसिमे ७५
नोदङ्मुखः स कर्तव्यः कार्यः प्राग्जीवसंयुतः
वर्धमाने तथा कार्ये यथा प्राग्ग्रीवसंयुतः ७६
वर्धमाने तथा कार्ये द्वारमूषे मुखायते
मूषाया दक्षिणे स्यातां दीर्घवामेऽवकोसिमे ७७
नन्द्यावर्तगृहे सर्वा नन्द्यावर्ता भवन्ति ताः
द्वे स्तरु मूषे रुचके स्यातामायते त्ववकोसिमे ७८
सर्वद्वारवहा मूषाः सर्वतोभद्रवेश्मनि
आदिमूषा भवेदेका गृहं प्रागायतं हि तत् ७९
द्वितीयया प्राग्विलग्नमेकया तदनन्तरम्
प्रदक्षिणेन वेश्मानि जयादीन्येकयैकया ८०
मूषया स्युः क्रमादेवं कथ्यन्ते तत्फलान्यथ
धनमर्थविनाशश्च जयश्चैवाशुभं सदा ८१
प्रीतिरुद्वेगकल्याणकलहाश्चाप्यनुक्रमात्
यत्र पूर्वे उभे मूषे तदीरं परिकीर्तितम् ८२
यत्र पूर्वा तृतीया च तत्सुनीतं गृहं विदुः
आग्नेये द्वितृतीये स्तो द्वीपे चाद्यचतुर्थिके ८३
द्विचतुर्थ्यौ तथा चाप्ये त्रिचतुर्थ्यौ सुसंयमे
अर्धर्चे त्वाद्यपञ्चम्यौ द्वितीयैभे सपञ्चमी ८४
व्याकोशे च त्रिपञ्चम्यौ नैर्ऋते द्विशराभिधे
वृषभे प्रथमाषष्ठ्यौ द्विषष्ठ्यौ च तथा विने ८५
काव्ये तृतीया षष्ठी च विपासेऽब्धिरसाभिधे

आनीरे पञ्चमीषष्ठयौ साद्या कान्ते च सप्तमी ८६
सौभे द्वितीयासप्तम्यौ त्रिसप्तम्यौ विपश्चिमे
गवये सप्तमीतुर्ये श्रीवहे पञ्चसप्तमी ८७
सषष्ठी सप्तमी श्लिष्टे गणे पूर्वाष्टमी तथा
भीमेऽष्टमी द्वितीया च त्र्यष्टम्यौ चाप्ययोगमे ८८
वर्ते चतुर्थ्यष्टमी च पञ्चमी चाष्टमी चले
षष्ठ्यष्टम्यौ शठे क्रान्ते सप्तमी चाष्टमीति च ८९
इत्यष्टाविंशतिः प्रोक्ता द्विभद्राणामिहौकसाम्
अथ ब्रूमस्त्रिभद्राणि तत्रैन्द्रं पुष्टिवर्धनम् ९०
स्याद्याम्यपश्चिमद्वारमाद्यमूषात्रयान्वितम्
आद्या द्वितीया तुर्या च यस्य द्वारं विपश्चिमम् ९१
विलोमं नाम तद्वेश्म शूद्राणां पुष्टिवर्धनम्
आद्या तृतीया तुर्या स्यादायामे सर्वतोमुखे ९२
वधे द्वित्रिचतुर्थ्यः स्युर्द्वारं च स्यादुदग्दिशि
यत्र साद्ये द्विपञ्चम्यावेकाद्यं तदुदाहृतम् ९३
साद्ये यत्र द्विपञ्चम्यौ तत्प्रोक्तं गृहमन्तिकम्
यत्र स्युर्द्वित्रिपञ्चम्यः प्रकाशं सर्ववृद्धिकृत् ९४
पूर्वा चतुर्थीपञ्चम्यौ यत्र तत्पैत्रमुच्यते
पञ्चमी द्विचतुर्थ्यौ च यत्रायस्तं तदीरितम् ९५
त्रिचतुःपञ्चमीयुक्तं भद्रमाहुर्मनीषिणः
आद्या द्वितीया षष्ठी च यत्र तत्प्रान्तशब्दितम् ९६
आद्या तृतीया षष्ठी च स्यात्प्रसाधकवेश्मनि
तद्भवेत्सर्वतोद्वारं तथा सर्वार्थसाधकम् ९७
द्वितीया च तृतीया च षष्ठी च क्षमनामनि
तस्य प्रत्यग्दिशि द्वारं शूद्रवर्गस्य चेष्टदम् ९८
षष्ठी चतुर्थी चाद्या च स्युर्विघाताख्यवेश्मनि

षष्ठी द्वितुर्ये यस्मिंस्तदायातं दक्षिणामुखम् ९९
षट्चतुस्त्रियुतं कान्तं तत्स्यात्सर्वार्थसाधकम्
षट्पञ्चाद्यान्वितं चित्रं तच्च स्याद्याम्यदिङ्मुखम् १००
द्वितीयापञ्चमीषष्ठ्यो यस्मिन् स्युस्तद्दुर्मन्दिरम्
यत्र त्रिपञ्चमीषष्ठ्यस्तद्वदन्ति सुदक्षिणम् १०१
चतुर्थीपञ्चमीषष्ठ्यो भये स्युस्तन्न वृद्धिकृत्
पूर्वाद्वितीयासप्तम्यो यत्र तच्छ्लिष्टसंज्ञितम् १०२
याम्यास्यमिदमिच्छन्ति शुभं सर्वार्थदं नृणाम्
साद्ये तृतीयासप्तम्यौ प्रमोदे परिकीर्तिते १०३
यत्र स्युर्द्वित्रिसप्तम्यस्तद्वेश्म व्यायतं स्मृतम्
यत्राद्या च चतुर्थी च सप्तम्यपि च तद्वियत् १०४
द्विचतुःसप्तमीमूषमाप्यं स्याद्दक्षिणामुखम्
त्रिचतुस्सप्तमीभिस्तु सुनागं वेश्म कीर्त्यते १०५
तच्च याम्यापरमुखं धनधान्यसुखप्रदम्
सप्तमी पञ्चमी पूर्वा मूषा नागेन्द्रसंज्ञिते १०६
मूषा द्विपञ्चसप्तम्यो याम्यं च मुखमीरिते
त्रिपञ्चसप्तमीमूषाशोभितं शोभनं भवेत् १०७
चतुर्थी पञ्चमी यत्र सप्तम्यपि च तद्धनम्
पूर्वा षष्ठी सप्तमी च स्मृता शस्तोत्तरे गृहे १०८
द्वितीयासप्तमीषष्ठ्यो यमिंस्तत्कफसंज्ञितम्
द्वारं वारुणमेतस्य हितं च स्याद्द्विजन्मनाम् १०९
कर्णं स्यात्पश्चिमद्वारं त्रिषष्ठीसप्तमीयुतम्
चतुर्थीसप्तमीषष्ठ्यो मूषाः स्युः क्रुष्टसंज्ञिते ११०
सप्तमीपञ्चमीषष्ठीयुक्तं क्रान्तं यशस्करम्
आद्याष्टमी द्वितीया च मूषा प्रोक्ता क्रमागते १११
आद्याष्टमी तृतीया च द्विशस्ते भवने स्मृताः

यत्राष्टमी त्रिद्वितीये द्विभयं तदुदाहृतम् ११२
आद्याष्टमी चतुर्थी च यत्र तच्चक्रसंज्ञितं
तुर्याष्टमी द्वितीया च यत्र तन्मलयं विदुः ११३
तुर्याष्टमी तृतीया च यत्र तत्प्रोक्तमायतम्
आद्याष्टमी पञ्चमी च स्याद्यस्मिंस्तद्वनं स्मृतम् ११४
द्वितीया पञ्चमी मूषा यत्र स्यादष्टमी तथा
तद्भाराख्यमुदग्वक्त्रं शुभं विघ्नकृदन्यथा ११५
त्रिपञ्चम्यष्टमीभिस्तु सुगारं परिकीर्तितम्
यत्राष्ठमी तदागारं चतुर्थी पञ्चमी तथा ११६
यस्मिन्नाद्याष्टमीषष्ठ्यो वीरं तदिह कीर्तितम्
षष्ठ्यष्टमी द्वितीया च गृहे व्यायामनामनि ११७
षष्ठ्यष्टमीतृतीयाभिर्मूषाभिः प्रोक्तमायुतम्
षष्ठ्यष्टमीचतुर्थ्यः स्युर्यत्र तद्वय्याहृतं विदुः ११८
षष्ठ्यष्टमीपञ्चमीभिर्दुर्गमं व्याधिकृन्मतम्
आद्याष्टमीसप्तमीभिः संयुक्तं क्षोभमुच्यते ११९
द्विसप्तम्यष्टमीयुक्तं गृहं कृत्रिमसंज्ञितम्
त्रिसप्तम्यष्टमीभिस्तु मूषाभिः क्षोभणं भवेत् १२०
चारुरुच्यं चतुःसप्तम्यष्टमीभिः समन्वितम्
सप्तपञ्चम्यष्टमीभिर्युक्तं ध्रुवमिति स्मृतम् १२१
षट्सप्तम्यष्टमीयुक्तं कथं सर्वार्थसिद्धिदम्
इत्युक्तानि त्रिभद्राणि शस्तान्येतेषु यानि च १२२
तानि नित्यं प्रयोज्यानि वर्णानां च मनीषिभिः
आद्याश्चतस्रो मूषाः स्युर्यत्र तत्कृतसंज्ञितम् १२३
सर्वद्विगुणकृत्पूर्वप्रत्यग्द्वारं नचान्यथा
आद्यास्तिस्रः पञ्चमी च यस्मिन्नर्चायनं हि तत् १२४
तद्भवेत्पश्चिमद्वारं गृहं सर्वगुणान्वितम्

यस्मिन्नाद्या द्वितीया च चतुर्थी पञ्चमी तथा १२५
तत्पौष्णं दक्षिणद्वारं सर्ववृद्धिकरं नृणाम्
आद्यास्तिस्रस्तथाद्या च यस्मिंस्तद्गृहमुद्गतम् १२६
द्वारेण पश्चिमेनैतच्छस्यते दक्षिणेन वा
द्व्याद्याश्चतस्रो यत्र स्युस्तन्मिश्रं प्रीतिवर्धनम् १२७
प्रशस्तं क्षत्रियादीनामस्य द्वाः प्राच्यपाचि वा
आद्यास्तिस्रस्तथा पष्ठी यस्मिन् मूषास्तदुत्सुकम् १२८
तच्छस्तं पश्चिमद्वारं विप्रादीनां जयावहम्
आद्या द्वितीया तुर्या च मूषा षष्ठी च यत्र तत् १२९
याम्याप्रत्यङ्मुखं शस्तं विघ्नं नाम कुलर्द्धितम्
आद्या तृतीया तुर्या च यस्मिन् षष्ठी च तच्छुभम् १३०
विपक्षं नाम धाम स्याद्द्वारमस्य च पश्चिमम्
द्व्याद्यास्तिस्रो गृहे यस्मिन् मूषा षष्ठी च तच्छुभम् १३१
स्याद्याम्यपश्चिमद्वारमाहूतं नाम तद्गृहम्
आयाद्वितीयापञ्चम्यो यत्र षष्ठी च तद्भवेत् १३२
रुचकं नाम याम्यप्रागद्वारं सकलकामदम्
एकत्रिपञ्चषष्ठ्यः स्युर्यत्र तद्वर्धमानकम् १३३
प्राक्पश्चिमोत्तरद्वारं चातुवर्ण्यस्य वृद्धिदम्
यत्र स्युर्द्वित्रिपञ्चम्यो मूषाः षष्ठी च तद्गृहम् १३४
स्यात्पूर्वदक्षिणद्वारं प्रथितं पृथुसंज्ञया
यस्मिन्नाद्याचतुःपञ्चषष्ठ्यस्तत् कलभं विदुः १३५
गुणैरुपेतं सकलैरुदग्द्वारं निकेतनम्
द्विचतुःपञ्चमीषष्ठ्यो यस्मिंस्तच्छलमुच्यते १३६
दक्षिणं मुखमेतस्य पश्चिमं वा प्रशस्यते
चतसरस्त्र्यादयो यस्मिन्नायास्यं तदुदीरितम् १३७
अप्रशस्तं वदन्त्येतत् तद्विदो भवनाधमम्

आद्यास्तिस्रः सप्तमी च मूषाः स्युर्यत्र तद्गृहम् १३८
त्रिनाभमुत्तरद्वारं शस्तं सर्वगुणान्वितम्
आद्याद्वितुर्यासप्तम्यो यत्र तत्स्वस्तिकं स्मृतम् १३९
प्राक्पश्चिमोत्तरद्वारं चातुर्वर्ण्यैऽपि शस्यते
आद्याचतुर्थीसप्तम्यो मूषाः स्युर्यत्र वेश्मनि १४०
तदिह स्थिरमित्युक्तं द्वारं चैतस्य दक्षिणम्
द्व्याद्यास्तिस्रः सप्तमी च यत्र तत्सरलं विदुः १४१
तद्भवेत्पश्चिमद्वारं सर्वदोषोज्झितं गृहम्
यत्राद्या च द्वितीया च पञ्चमी सप्तमी तथा १४२
द्विगुणं नाम तद्वेश्म द्वारं चास्य यथेप्सितम्
आद्यातृतीयापञ्चम्यः सप्तम्यपि च यत्र तत् १४३
नाद्यं नामातिशीलाद्यं प्रशस्तं सर्वदेहिनाम्
द्वितीया च तृतीया च पञ्चमी सप्तमी गृहे १४४
यत्र तच्चित्रनामेष्टद्वारं चित्रगुणैर्वृतम्
आद्यावतुर्थीपञ्चम्यो यत्र स्युः सप्तमी तथा १४५
तद्भ्रान्तं नाम पूर्वोदग्द्वारं भवनमृद्धिकृत्
यत्र द्वितीया तुर्या च पञ्चमी सप्तमी तथा १४६
विधारणं गृहं तत्स्यात्सर्वकामविवर्धनम्
तृतीया यत्र तुर्या च पञ्चमी सप्तमी तथा १४७
तत्साधारणमित्याहुः सर्वद्वारं सुखावहम्
आद्या द्वितीया षष्ठी च सप्तमी यत्र तन्नतम् १४८
आद्या द्वितीया षष्ठी च त्र्यंशे स्यात्सप्तमी तथा
द्वितीया च तृतीया च ऋषे षष्ठी च सप्तमी १४९
आद्या तुर्या च षष्ठी च रोगे स्यात्सप्तमी तथा
यत्र द्वितीया तुर्या च स्यात् षष्ठी सप्तमी च तत् १५०
विशोषणं नाम गृहं दक्षिणोत्तरदिङ्मुखम्

तृतीया यत्र तुर्या च स्यात् षष्ठी सप्तमी गृहे १५१
प्रतीच्यमीप्सितद्वारं तद्गृहं सर्वकामदम्
यत्राद्यापञ्चमीषष्ठीसप्तम्यस्त्रिसमं हि तत् १५२
प्रभूतवृद्धिदं वेश्म समस्तैरन्वितं गुणैः
द्वितीयापञ्चमीषष्ठीसप्तम्यो यत्र वेश्मनि १५३
तदिह स्वैरमित्याहुर्धनधान्यसुखावहम्
तृतीयापञ्चमीषष्ठीसप्तम्यो द्वारमुत्तरम् १५४
पश्चिमं वा भवेद्यत्र सुप्रतीकं च वृद्धिकृत्
तुर्याद्याभिश्चतसृभिर्नलमुत्तरदिङ्मुखम् १५५
आद्याद्वित्र्यष्टमीभिः स्यात्सर्वरुग्भीतिकृत् द्वयम्
व्याप्ते पूर्वा द्वितीया च स्याच्चतुर्थी तथाष्टमी १५६
आद्यातृतीयातुर्याः स्युराक्रीडे तद्वदष्टमी
द्व्याद्यास्तिस्रः क्रमाद्वयर्थे मूषाः स्यादष्टमी तथा १५७
ईशानाख्ये स्युराद्याद्वित्रिपञ्चम्योऽष्टमी तथा
पूर्वाष्टमीत्रिपञ्चम्यो यस्मिंस्तत् सुखसंज्ञितम् १५८
तत्पूर्वोदङ्मुखं वृद्ध्यै जायते हानयेऽन्यथा
यत्र स्युरष्टमीद्वित्रिपञ्चम्यस्तदिहाव्ययम् १५९
द्वारं यथेष्टमेतस्य वास्तुविद्याविदो जगुः
यस्मिन् पूर्वाष्टमीतुर्यापञ्चम्यो मगधं हि तत् १६०
प्रागुदक्पश्चिमद्वारमिदं शंसन्ति सूरयः
यत्र द्वितुर्यापञ्चम्यो मूषाः स्युस्तद्वदष्टमी १६१
तत्क्षेमं नाम सुखकृद्यथेष्टं द्वारमिष्यते
त्रिपञ्चम्यष्टमीतुर्या आगस्त्ये पश्चिमामुखे १६२
द्वितीयाद्याष्टमीषष्ठ्यो यत्रैकोजं तदुच्यते
तृतीयाद्याष्टमीषष्ठ्यो यत्र तद्दुर्गतं गृहम् १६३
द्वित्रिषष्ठ्योऽष्टमी चापि यस्मिंस्तल्लिहमुच्यते

आद्यातुर्याष्टमीषष्ठ्यो यत्र तत्पर्कमुच्यते १६४
षष्ठ्यष्टमीद्वितुर्याभिः स्याद्विलोमाभिधं गृहम्
षष्ठ्यष्टमीद्वितुर्याभिरुद्दण्डमिति कीर्तितम् १६५
यस्मिन्नाद्याष्टमीषष्ठीपञ्चम्यो मुण्डमेव तत्
द्विपञ्चम्यष्टमीषष्ठ्यो मूषा मातङ्गसंज्ञिते १६६
त्रिपञ्चम्यष्टमीषष्ठ्यो भवन्त्यस्खलनामनि
तत्खर्वनाम तुर्याद्यास्तिस्रो यस्मिंस्तथाष्टमी १६७
आद्याद्वितीयासप्तम्यः पिनाके स्युस्तथाष्टमी
त्रिसप्तम्यष्टमीपूर्वा यत्रोद्यन्तं तदुच्यते १६८
अष्टमीद्वित्रिपञ्चम्यो यस्मिंस्तद्विशिखं गृहम्
आद्या चतुर्थीसप्तम्यः प्रसभे स्युस्तथाष्टमी १६९
रजे द्वितुर्यासप्तम्यो मूषाः स्युस्तद्वदष्टमी
त्रिसप्तम्यष्टमीतुर्या यत्र तद्रुचकं विदुः १७०
प्राक्प्रत्यग्द्वारमेतस्य शूद्राणामतिवृद्धिदम्
सप्तम्याद्याष्टमी मूषा पञ्चम्यपि च सैफले १७१
वामे द्विपञ्चसप्तम्यो मूषा ज्ञेयास्तथाष्टमी
त्रिपञ्चसप्तम्यष्टम्यो यस्मिंस्तद्वर्धमानकम् १७२
विशेषतो वृद्धिकरं वैश्यानामिति तद्विदः
चतुःपञ्चाष्टसप्तम्यो यस्मिंस्तद्भावनं भवेत् १७३
सप्तम्याद्याष्टमीषष्ठ्यो यत्र तत्सहमुच्यते
द्विसप्तषष्ठ्यष्टमीभिर्मूषाभिश्चयनं भवेत् १७४
षष्ठ्यष्टमीद्विसप्तम्यो यस्मिंस्तत् सेव्यमीरितम्
यत्र तुर्याष्टमी षष्ठी सप्तमी चेति तत्कलम् १७५
तीर्णे षष्ठ्यष्टमीपञ्चसप्तम्यः सर्वकामदे
यत्राद्याः पञ्च तत् प्रोक्तं कानलं सर्वकामदम् १७६
एकद्वित्रिचतुःषष्ठ्यो यत्र तल्लोलुपं स्मृतम्

आद्यास्तिस्रः पञ्चषष्ठ्यौ यस्मिंस्तज्जिह्ममुच्यते १७७
प्रगाले पञ्चमीषष्ठीतुर्यापूर्वाद्वितीयकाः
त्रितुर्यापञ्चमीषष्ठ्यः साद्याः स्युः सालिनाभिधे १७८
यत्र द्वित्रिचतुःपञ्चषष्ठ्यस्तज्जिनमुच्यते
एकद्वित्रिचतुर्थ्यः स्युः सुजये सप्तमीयुताः १७९
पञ्चमीसप्तमीद्वित्रिपूर्वाः स्युर्विजयाभिधे
यत्रैकद्विचतुःपञ्चसप्तम्यो यामनाम तत् १८०
यत्रैकत्रिचतुःपञ्चसप्तम्यस्तज्जयं विदुः
मूषा द्वित्रिचतुःपञ्चसप्तम्यो ज्ञातसंज्ञिते १८१
आद्यास्तिस्रस्तथा षष्ठीसप्तम्यौ यत्र तज्जपम्
आद्याद्वितुर्याषष्ठीभिः सप्तम्या च तपं विदुः १८२
षष्ठीत्रितुर्यासप्तम्यो जये मे पूर्वान्विता मताः
द्वित्रितुर्यास्तथा षष्ठीसप्तम्यौ वरसंज्ञिते १८३
चरं तद्यत्र पूर्वे द्वे पञ्चषट्सप्तमीयुते
चैत्ये स्यात्सप्तमी षष्ठी पञ्चम्याद्या तृतीयका १८४
विशिरवे द्वित्रिपञ्चम्यः स्यात् षष्ठी सप्तमी तथा
चतुर्थी पञ्चमी षष्ठी सप्तम्याद्या च सुप्रभे १८५
प्रभाख्ये द्विचतुःपञ्चषष्ठ्यः स्युः सप्तमी तथा
त्रिचतुःपञ्चसप्तम्यः षष्ठी च स्यात्प्रतीक्षके १८६
आद्याश्चतस्रो यत्र स्युः साष्टम्यः क्षमिणं हि तत्
सप्त पूर्वा द्वित्रिपञ्चम्यो युक्तनाम्नि तथाष्टमी १८७
शान्ते द्वितुर्यापञ्चम्यः पूर्वा स्यादष्टमी तथा
पूर्वात्रितुर्यापञ्चम्यः साष्टम्यस्त्रैतसंज्ञिते १८८
विनोदे द्वित्रिपञ्चम्यश्चतुर्थी चाष्टमी तथा
सन्दोहे त्वष्टमिषष्ठ्यौ तिस्रः पूर्वादिकास्तथा १८९
आद्याद्वितुर्याषष्ठीभिरष्टम्या विप्रदोहकम्

षष्ठ्यष्टमीत्रितुर्याद्या यस्मिंस्तद्विद्रुतं विदुः १९०
द्वित्रितुर्याष्टमीषष्ठ्यो यत्र तत्सततं मतम्
आद्याद्विपञ्चमीषष्ठ्यस्ततनाम्नि तथाष्टमी १९१
आद्यात्रिपञ्चमीषष्ठ्यो व्याकुले स्युस्तथाष्टमी
द्वित्रिपञ्चचतुष्षष्ठ्यो विज्ञेया लीनसंज्ञके १९२
तुर्याद्यापञ्चमीषष्ठ्य आलीने स्युस्तथाष्टमी
द्वितुर्यापञ्चमीषष्ठ्यो विचित्रे तद्वदष्टमी १९३
आद्याश्चतस्रो मूषाः स्युः साष्टम्यो लम्बनाह्वये
आद्यास्तिस्रोऽष्टमी तद्वत्सप्तम्यपि भवेत् खरे १९४
शेखरे सप्तमीतुर्याद्वितीयाद्यास्तथाष्टमी
विबुधे त्वष्टमी तुर्या तृतीयाद्याथ सप्तमी १९५
चैत्राख्ये द्व्यष्टमीतुर्यासप्तम्यः सतृतीयकाः
आद्याद्विपञ्चसप्तम्यो व्यासक्ताख्ये तथाष्टमी १९६
आद्यात्रिपञ्चसप्तम्यः साष्टम्यः सम्पदाभिधे
यत्र द्वित्र्यष्टमीपञ्चसप्तम्यस्तत्पदं विदुः १९७
तुर्याद्यापञ्चमी षष्ठी सप्तम्यस्त्रिशिखे तथा
द्विपञ्चम्यष्टमीतुर्यासप्तम्यश्चतुराभिधे १९८
त्रिसप्तम्यष्टमीतुर्यापञ्चम्यः प्रान्तनामनि
आद्याद्वितीयासप्तम्यः षष्ठ्यष्टम्यौ च सुस्थिते १९९
दुःस्थितं यत्र षष्ठ्याद्या चतुर्थी सप्तमी तथा
स्थितेऽष्टमीद्विसप्तम्यस्त्रिषष्ठ्यावपि च स्मृते २००
चक्रे षष्ठ्यष्टमीतुर्यासप्तम्याद्याः प्रकीर्तिताः
वक्रे द्वितीयासप्तम्यौ षष्ठ्यष्टम्यौ चतुर्थिका २०१
लधेऽष्टमीत्रिसप्तम्यस्तुर्याषष्ठ्यौ च कीर्तिते
पञ्चमीसप्तमीषष्ठ्यो लाभे पूर्वाष्टमी तथा २०२
द्विपञ्चसप्तम्यष्टम्यः षष्ठी संपर्कसंज्ञिते

त्रिपञ्चषष्ठीसप्तम्यो मूलनाम्नि तथाष्टमी २०३
स्युरष्टसप्तषट्पञ्चचतुर्थ्यस्त्वव्ययाभिधे
पूर्वाद्या यत्र षण्मूषाः किन्नरं नाम तद्गृहम् २०४
यत्राद्यापञ्चसप्तम्यो सह तत्कौस्तुभं विदुः
पूर्वाद्वित्रिचतुःषष्ठीसप्तम्यो हर्म्यसंज्ञिते २०५
सप्तमी पञ्चमी षष्ठी द्वित्रिपूर्वाश्च धार्मिके
निषधे द्विचतुःपञ्चषष्ठ्याद्याः सप्तमी तथा २०६
त्रिचतुःपञ्चषट्सप्तम्याद्याः स्युर्यत्र तद्वसु
साटीके त्रिचतुःपञ्चद्विषष्ठ्यः स्युस्तथाष्टमी २०७
यत्राद्यापञ्चसप्तम्यो वामनं नाम तद्विदुः
आद्याद्वित्रिचतुःषष्ठ्यः साष्टम्यो गौरनामनि २०८
आद्याद्वित्र्यष्टमीषष्ठ्यः पञ्चमी चास्थिराभिधे
क्रमिणे त्रिचतुःपञ्चपूर्वाः षष्ठ्यष्टमी तथा २०९
खले पूर्वाष्टमीषष्ठीत्रितुर्याः पञ्चमीयुता
विवरे त्रिचतुःपञ्चद्विषष्ठ्यः स्युस्तथाष्टमी २१०
आद्याद्वित्रिचतुःसप्तम्यष्टम्यो बालिशाभिधे
पूर्वाष्टमीद्वित्रिसप्तपञ्चम्यो धौमनामनि २११
त्रिपुष्टे द्विचतुःपञ्चसप्तम्याद्यास्तथाष्टमी
मन्दिरे त्रिचतुःपञ्चसप्तम्याद्यासथाष्टमी २१२
भवे द्वित्रिचतुःपञ्चम्यष्टम्यः सप्तमी तथा
अशोके द्वित्रिषट्सप्तम्यष्टम्यः पूर्वया सहि २१३
भास्वरे द्विचतुःषष्ठ्यः सप्तम्याद्याष्टमीयुता
त्रिसप्तम्यष्टमीषष्ठीतुर्याद्याश्चौष्यसंज्ञिते २१४
द्वित्रितुर्याष्टमिषष्ठ्यो लातव्ये सप्तमी तथा
द्विसप्तम्यष्टमीषष्ठीपञ्चम्याद्याश्च सुस्वने २१५
त्रिपञ्चम्यष्टमीषष्ठीसप्तम्याद्यास्तथा मखे

द्वित्रिसप्ताष्टमीषष्ठीपञ्चम्यो वाजिसंज्ञिते २१६
नेत्रे पूर्वाचतुःपञ्चषट्सप्तम्योऽष्टमी तथा
भ्रमे स्युर्द्विचतुःपञ्चषट्सप्तम्योऽष्टमी तथा २१७
घोषे च त्रिचतुःपञ्चषट्सप्तम्योऽष्टमी तथा
एकद्वित्रिचतुःपञ्चषट्सप्तम्यो भवन्ति चेत् २१८
मूषास्तदानीं भाण्डीरमिति प्राहुर्निवेशनम्
एकद्वित्रिचतुःपञ्चषष्ठ्यो यत्र तथाष्टमी २१९
तद्वैसनमिति प्राहुर्वास्तुविद्याविदो गृहम्
एकद्वित्रिचतुःपञ्चसप्ताष्टम्यो गृहे यदि २२०
मूषा भवन्ति तद्विद्यात्प्रस्थमित्यभिधानतः
एकद्वित्रिचतुर्थ्यः स्युः षष्ठी सप्तम्यथाष्टमी २२१
यस्मिन् मूषास्तदत्राहुः प्रतानमिति मन्दिरम्
चतुर्थीवर्जिताभिः स्यान्मूषाभिर्वेश्म वासुलम् २२२
कटं तृतीयाहीनाभिर्विज्ञातव्यं निवेशनम्
मूषाभिरद्वितीयाभिर्लघ्वीवासुमुदाहृतम् २२३
सुगन्धान्तमनाद्याभिरष्टाभिः सर्वभद्रकम्
इत्येकभद्रप्रभृतीनि वेश्मान्युक्तानि यावद्गृहमष्टभद्रम्
एतांश्चतुश्शालगृहप्रभेदान् यो वेत्ति पूजां स लभेत लोके २२४

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे
चतुश्शालविधानं नाम एकोनविंशोऽध्यायः

अथ निम्नोच्चादिफलानि नाम विंशोऽध्यायः

अग्रतःपृष्ठतःशब्दौ द्वारेण नियतौ गृहे
यतो द्वारं तदग्रं स्यात्पृष्ठं पृष्ठमुदाहृतम् १
द्रव्यायामोदयव्यासैः शाला यत्राधिका भवेत्

वामा वा दक्षिणा वपि अग्रतः पृष्ठतोऽपि वा २
हन्ति द्रव्याधिका द्रव्यमायामाभ्यधिका कुलम्
उच्छ्रायाभ्यधिका पूजां सन्ततिं विस्तराधिका ३
यस्य निम्ना भवेद्भूमिर्वामा दक्षिणकास्थला
बहुदोषं हि तद्वास्तु पुत्रपौत्रविनाशकम् ४
यस्य दक्षिणका निम्ना भूमिर्वामास्थला भवेत्
यत्नेनापि कृतं तत्स्याद्धर्तुरल्पफलोदयम् ५
पश्चिमेन भवेन्निम्ना भूमिः स्थूलतराग्रतः
यत्र तत्सर्ववर्णेषु सर्वकामप्रदं गृहम् ६
अग्रतश्च यदा हीनं पृष्ठतश्चोच्छ्रितं भवेत्
भवनं स्वामिनो ह्याशु विरागव्यसनाय तत् ७
सच्छत्रं च सकक्षं च तथैव सपरिक्रमम्
सप्रभं च समाख्यातं गृहमत्र चतुर्विधम् ८
बाह्योदकं च सच्छत्रं सकक्षमुभयोदकम्
सावश्यायं तु यद्वेश्म तद्विद्यात्सपरिक्रमम् ९
एकेनाप्यत्र मुखतः पृष्ठतः पार्श्वतोऽपि वा
सप्रभं स्यादलिन्देन लक्षणं तु पृथक्पृथक् १०
एकोऽलिन्दस्तु कर्तव्यो मुखतो दक्षिणेन वा
मुखे राजप्रसादाय दक्षिणेऽर्थविवर्धनः ११
वामतस्तु न कर्तव्य एकोऽलिन्दो न पृष्ठतः
वामतोऽर्थविनाशाय पृष्ठतो म्रियते गृही १२
यस्य स्यातामलिन्दौ द्वौ गृहस्योभयपार्श्वयोः
धनलाभं विजानीयात्तत्प्रवेशे कुडुम्बिनः १३
यस्य स्यातामलिन्दौ द्वावग्रतः पृष्ठतस्तथा
धनधान्यमवाप्नोति सौभाग्यं चापि तद्गृही १४
यस्य वा हलकालिन्दो मुखतो दक्षिणेन वा

राजप्रसादैस्तत्स्वामी धनधान्यैश्च वर्धते १५
वामतो हलकालिन्दो मुखतश्च कृतो यदि
राजदण्डभयं विद्यात्पत्नी चास्य विनश्यति १६
दक्षिणो हलकालिन्दः पश्चिमश्च कृतो यदि
ततः परापि वृद्धिः स्यात्सौभाग्यं च परं भवेत् १७
पृष्ठतो हलकालिन्दो वामतश्च कृतो यदि
कलत्रमरणं तत्र भवेद्दुर्भगतापि च १८
पृष्ठतो वामतश्चैव पुरतो दक्षिणेन वा
अलिन्दस्य कृतस्याथ वक्ष्यामोऽनुक्रमात्फलम् १९
पृष्ठतो दारनाशाय धनलाभाय दक्षिणे
अग्रे राजप्रसादाय वामतोऽर्थविनाशनः २०
समापितं तु यद्वास्तु सर्वतः परिशोधितम्
स्वामिनस्तद्भवेद्धन्यं स्थपतेश्च यशस्करम् २१
अर्जितं वर्धते तस्य वृद्धिश्च स्यान्नृपश्रिया
धर्मकामाश्च वर्धन्ते कीर्त्तिरायुर्यशो बलम् २२
नित्यं प्रक्रीडितजनं नित्यं सन्निहितश्रि तत्
नृत्यवादित्रगीतैश्च नित्यामोदं निरामयम् २३
तत्र नैकप्रकाराणि त्रिशालान्युपलक्षयेत्
प्रकारेषु च सर्वेषु निन्द्यौ याम्यापरोज्झितौ २४
एकस्मिन्स्वामिनो मृत्युरपरस्मिन् धनक्षयः
पूर्वोत्तरोज्झितौ धन्यौ संज्ञाश्चैषां प्रकारतः २५
स्युरुदक्पूर्वयाम्याप्यशलाहीनान्यनुक्रमात्
हिरण्यनाभसुक्षेत्रचुल्लीपद्मघ्ननामभिः २६
विनियोगो यथालिन्दमलिन्दव्यूढिरिच्छया
वेश्मान्यथ द्विशालानि कीर्त्यन्ते षड् यथाक्रमम् २७
दिक्कर्णेसु द्विशालानि तत्कर्णान्येषु निर्दिशेत्

संमुखे द्वे समेतानि षडेतान्युपलक्षयेत् २८
सिद्धर्थं दक्षिणाप्रत्यग्भवन्त्यत्रार्थसिद्धयः
यमसूर्यमुदक्प्रत्यक्तत्र मृत्युभयं सदा २९
प्रागुदीच्योस्तु दण्डः स्याद्दण्डस्तत्र सदा भवेत्
प्राग्याम्ययोस्तु वाताख्यं वास्तु तत्कलहोत्तरम् ३०
उदग्दक्षिनसाम्मुख्ये द्विशालं काचवास्त्विति
तत्र ज्ञातिविरोधः स्यान्न तत्कुर्यात्कदाचन ३१
प्राक्प्रतीच्योस्तु साम्मुख्ये चुल्लीवास्तु विनिर्दिशेत्
तत्र वित्तक्षयो घोरः कदाप्येतन्न कारयेत् ३२
चतुश्शालं त्रिशालेन प्रान्तं प्राकारवर्तिना
पूर्वेण सप्तशालेषु मणिच्छन्द इति स्मृतम् ३३
अन्यानि चैवं त्रीण्याहुः प्रान्तमेव प्रदक्षिणम्
अपरं परिधानं च सपक्षमिति तानि च ३४
एकभित्ती तु शाले द्वे गृहसंघट्ट उच्यते
न तं कुर्यात्स हि सदा बन्धदोषवधप्रदः ३५
इत्युच्चनीचगृहभागफलं प्रदिष्ट-
मस्मिन्नलिन्दफलमप्यशुभं शुभं च
यद्द्वित्रिशालगृहलक्ष्म तदप्यमुष्मिन्
सामान्यतो द्वितययोगभवं च सम्यक् ३६

इति महाराजाधिराजश्रीभोजदेवविरते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
निम्नोच्चलच्छत्रादिसंज्ञालिन्दफलसद्वास्तुफलद्विशालत्रिशालगृह-सङ्घट्टलक्षणफलानि नाम विंशोऽध्यायः

अथ द्वासप्ततित्रिशाललक्षणं नामैकविंशोऽध्यायः

अथ द्वासप्ततेर्ब्रूमस्त्रिशालानां यथाक्रमम्

अभिधानानि कात्स्न्र्येन लक्षणानि पृथक्पृथक् १
मुख्यानि तेषु चत्वारि कथ्यन्ते तानि नामतः
हिरण्यनाभं सुक्षेत्रं चुल्ली पद्मघ्नमेव च २
हिरण्यनाभमुत्कृष्टं हीनमुत्तरशालया
तत्स्याद्धनप्रदं भर्तुः सुक्षेत्रं पूर्वया विना ३
सुक्षेत्रं लक्षणोपेतमृद्धिवृद्धिप्रदं विभोः
चुल्ली दक्षिणया हीना शालया वित्तनाशिनी ४
पद्मघ्नं पश्चिमाहीनं वैरकृत्कुलनाशनम्
अलिन्दयोगादेतेषां लघुप्रस्तारयोगतः ५
मूषायोगाच्च भेदाः स्युरष्टादश पृथक्पृथक्
जाम्बूनदं हिरण्याख्यं रुक्माख्यं हेमसंज्ञितम् ६
कनकं काञ्चनं स्वर्णं सुवर्णं च ततः परम्
सन्तापसंज्ञं सारं च तथा चामीकराह्वयम् ७
तपनं तापनीयं च शातकुम्भमथापि च
हिरण्यनाभं कल्याणं भूषणं भूतिभूषणम् ८
भेदा हिरण्यनाभस्येत्यष्टादश भवन्त्यमी
नागं सूर्यप्रभाख्यं च मत्तवारणकं तथा ९
चतुर्थं केसरीत्युक्तं वासवं चेन्द्रमेव च
हरिंहँसं सारसाण्डं कुञ्जरं तोयदं तथा १०
मेघमालाभिधानं च धारासारं महोदरम्
कर्दमं नामतश्चान्यत् सुक्षेत्रं प्रकरं तथा ११
सुक्षेत्रानुगतान्याहुस्तथान्यद्धान्यपूरकम्
चुल्लीभेदानथ ब्रूमस्तेषामाद्यं भुजङ्गमम् १२
निर्जीवाख्यं विहङ्गं च नकुलं पन्नगाह्वयम्
शतच्छिद्रं च सर्पं च कोपसंज्ञं भगन्दरम् १३
उद्वेजनाख्यं सन्न्यासं निस्तोषं करुणाननम्

वारणं दारणं चुल्ली ककुदं कन्दरं तथा १४
इति चुल्लीप्रभेदेषु मन्दिराणि दशाष्ट च
ब्रूमः पद्मघ्नसंबद्धगृहनामानि सम्प्रति १५
राद्धसं ध्वान्तसंहारं देवारि सुरदारुणम्
घोषणं व्याघ्रशार्दूले शोषणाख्यं विशोषणम् १६
मत्तदं च निरानन्दं शाकुनं विघ्ननिर्घृणे
रिपुसंहदपद्मघ्ने सुतघ्न वैरिपूरणम् १७
इत्यष्टादश पद्मघ्नभेदाः प्रोक्ता यथाक्रमम्
हिरण्यनाभभेदेषु धन्यं जाम्बूनदं गृहम् १८
आद्याद्याभिश्चतसृभिर्मूषाभिरुपलक्षितम्
यत्राद्याद्वित्रिपञ्चम्यो हिरण्यं नाम तच्छुभम् १९
पञ्चम्याद्याद्वितुर्याभिः स्याद्रुक्मं रुक्मदं गृहम्
आद्यात्रितुर्यापञ्चम्यो यत्र तद्धेमसंज्ञितम् २०
द्वित्रितुर्यापञ्चमीभिः कनकं कनकावहम्
साद्याभिर्द्वित्रिषष्ठीभिः काञ्चनं काञ्चनप्रदम् २१
आद्याद्वितुर्याषष्ठीभिः स्वर्णं स्वर्णविवृद्धये
सुवर्णमाद्यात्रिचतुःषष्ठीभिः स्यात्सुवर्णदम् २२
स्याद्द्वित्रितुर्याषष्ठीभिः सन्तापं तापशान्तिकृत्
आद्याद्विपञ्चमीषष्ठ्यो यत्र तत्सारमुत्तमम् २३
चामीकरं त्रिषष्ठ्याद्यापञ्चमीभिर्गृहोत्तमम्
द्वित्रिषट्पञ्चमीभिः स्यात्तपनं नाम मन्दिरम् २४
षट्तुर्याद्यापञ्चमीभिस्तापनीयमुदाहृतम्
शातकुम्भं द्विषट्पञ्चचतुर्थीभिर्भवेद्गृहम् २५
हिरण्यनाभं त्रिचतुःपञ्चषष्ठीभिरीरितम्
कल्याणमाद्यात्रिचतुःपञ्चषष्ठीभिरुच्यते २६
षट्पञ्चद्वित्रितुर्याभिर्भवेद् भूषणसंज्ञितम्

आद्याद्वित्रिचतुःपञ्चषष्ठीभिर्भूतभूषणम् २७
अथ सुक्षेत्रभेदानां लक्षणान्यभिदध्महे
यत्राद्याद्वित्रितुर्याभिस्तन्नागं नाम मन्दिरम् २८
यत्राद्याद्वित्रिपञ्चम्यस्तत्सूर्यप्रभमुच्यते
आद्याद्वितुर्यापञ्चम्यो यत्र तन्मत्तवारणम् २९
आद्यात्रितुर्यापञ्चम्यो यत्र तत्केसरीं विदुः
वासवं पञ्चमीतुर्याद्वितीयाभिस्तदुच्यते ३०
षष्ठ्याद्यात्रिद्वितीयाभिरिन्द्रमन्दिरमीरितम्
आद्याद्वितुर्याषष्ठीभिर्हरिसंज्ञमुदाहृतम् ३१
आद्यात्रितुर्याषष्ठीभिर्हंससंज्ञं निवेशनम्
षष्ठीद्वित्रिचतुर्थीभिः सारसं नामतो भवेत् ३२
आद्याद्विपञ्चषष्ठीभिः कथयन्तीह कुञ्जरम्
आद्यात्रिपञ्चषष्ठीभिर्विज्ञेयं तोयदं गृहम् ३३
मेघमालं त्रिषट्पञ्चद्वितीयाभिरुदाहृतम्
धारासारं चतुःपञ्चषडाद्याभिर्भवेद्गृहम् ३४
द्विचतुःपञ्चषष्ठीभिर्महोदरमिति स्मृतम्
कर्दमं नाम षट्पञ्चत्रितुर्याभिर्जयावहम् ३५
षट्पञ्चतुर्यात्र्याद्याभिः सुक्षेत्रं स्याद्धनप्रदम्
द्वित्रिषट्पञ्चतुर्याभिर्भवेत्प्रकरमृद्धिदम् ३६
आद्याभिश्च षडेताभिर्विज्ञेयं धान्यपूरकम्
अष्टादशैते सुक्षेत्रगृहभेदाः प्रकीर्तिताः ३७
आद्याद्वित्रिचतुर्थीभिर्मूषाभिः स्याद्भुजङ्गमम्
निर्जीवमाद्यापञ्चत्रिद्वितीयाभिर्निवेशनम् ३८
आद्याद्विपञ्चतुर्याभिर्वहन्तीभिर्विदन्तीह विहङ्गमम्
पञ्चाद्यात्रिचतुर्थीभिर्मूषाभिर्नकुलं विदुः ३९
पञ्चद्वित्रिचतुर्थीभिः पन्नगं नामतो भवेत्

शतच्छिद्रं षडाद्यात्रिद्वितीयाभिर्भवेद्गृहम् ४०
आद्याद्वितुर्यांषष्ठीभिः सर्पमित्यभिधीयते
आद्यात्रिषट्चतुर्थीभिः कोपमित्यभिशब्दितम् ४१
षट्चतुस्त्रिद्वितीयाभिर्भवेद्वेश्म भगन्दरम्
आद्याद्विपञ्चषष्ठीभिरुद्वेजनमुदाहृतम् ४२
सन्न्यासमाद्यापञ्चत्रिषष्ठीभिर्भवनाधमम्
द्वित्रिषट्पञ्चमीभिस्तु निस्तोयमभिधीयते ४३
तुर्याद्यापञ्चषष्ठीभिः करुणाननमुच्यते
द्विचतुःपञ्चषष्ठीभिर्वारणं मुखवारणम् ४४
त्रिचतुःपञ्चषष्ठीभिर्दारणं श्रीविदारणम्
चुल्ल्याद्यात्रिचतुःपञ्चषष्ठीभिर्वित्तनाशनम् ४५
षट्पञ्चद्वित्रितुर्याभिः ककुदं नाम मन्दिरम्
कन्दरं षट्चतुःपञ्चत्रिद्व्याद्याभिर्गृहाधमम् ४६
अथाष्टादश कथ्यन्ते भेदाः पद्मघ्नसंश्रयाः
तेषु राद्धसमाद्याद्वित्रिचतुर्थीभिरुच्यते ४७
पञ्चाद्याद्वितृतीयाभिर्ध्वान्तसंघातमीरितम्
पञ्चाद्याद्विचतुर्थीभिर्देवारीति निगद्यते ४८
आद्यात्रिपञ्चतुर्याभिर्विज्ञेयं देवदारुणम्
पञ्चत्रिद्विचतुर्थीभिर्घोषणं दुःखघोषणम् ४९
षडाद्याद्वितृतीयाभिर्व्याघ्रमित्यभिधीयते
आद्याद्वितुर्यांषष्ठीभिः शार्दूलं स्यान्निवेशनम् ५०
आद्यात्रितुर्यांषष्ठीभिः शोषणं पुत्रशोषणम्
षट्तुर्याद्वितृतीयाभिर्विजानीयाद्विशोषणम् ५१
आद्याद्विपञ्चषष्ठीभिर्मत्तदं नाम मन्दिरम्
निरानन्दाख्यमाद्यात्रिपञ्चषष्ठीभिरुच्यते ५२
पञ्चषड्द्वितृतीयाभिः शाकुनं नामतो भवेत्

विघ्नमाद्याचतुःपञ्चषष्ठीभिर्विघ्नवर्धनम् ५३
निर्घृणं षट्चतुःपञ्चद्वितीयाभिरसौख्यकृत्
त्रिचतुःपञ्चषष्ठीभिर्वदन्ति रिपुसंहदम् ५४
षट्पञ्चतुर्यात्र्याभिः पद्मघ्नं सुतनाशनम्
षट्पञ्चद्वित्रितुर्याभिः सुतघ्नं स्सुतसूदनम् ५५
षट्पञ्चद्वित्रितुर्याद्या यत्र तद्वैरिपूरणम्
पद्मघ्नस्यानुगान्येवं गृहाणयष्टादश क्रमात् ५६
चतुराद्यास्त्रिशालेषु मूषा बाह्या न चान्तरा
स्याद्विनाद्यां द्वितीयां च त्रिशालं पञ्चभद्रकम्
बाह्यतः क्रममुत्सृज्य त्रिशालविधिरीरितः ५७
हिरण्यनाभादिनिकेतनानां चतुष्टयस्यैवममी प्रकाराः
द्विसप्ततिः कृत्स्नतयोपदिष्टाः प्रत्येकमष्टादशभेदक्लृप्ताः ५८
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे द्वासप्ततित्रिशाललक्षणं नामैकविंशोध्यायः

अथ द्विशालगृहलक्षणं नाम द्वाविंशोध्यायः

द्विशालानि द्विपञ्चाशत्स्युः शुभान्यशुभानि च
लक्षणानि क्रमात्तेषामिदानीं सम्प्रचक्ष्महे १
सिद्धार्थं यमसूर्यं च दण्डाख्यं वातसंज्ञितम्
चुल्ली काचं च मुख्यानि द्विशालानि षडेव हि २
अनेकभेदभिन्नानि लघुप्रस्तारयोगतः
मूषाभेदक्रमेण स्युर्भेदाभेदक्रमेण तु ३
तथा निलीनकरणाद्वीथिकालिन्दमार्गतः
प्राग्ग्रीवादिविधानेन द्वैशाल्यादिविपर्ययात् ४
यथासम्भवमेतानि कथयामः समासतः
निर्वाहतश्च मूषाणामनिर्वाहाच्च नामतः ५

छन्दतो गुणतो रूपादशुभानि शुभानि च
हितार्थाय नरेन्द्राणां वर्णिनां लिङ्गिनामपि ६
हस्तिनी महिषी चेति द्वे शाले यत्र वेश्मनि
तत्सिद्धार्थमिति ज्ञेयं वित्तसम्पत्तिकारकम् ७
मृत्युदं महिषीगावीभ्यां भवेद्यमसूर्यकम्
दण्डं स्याच्छगलीगावीशालाभ्यां दण्डभीतिदम् ८
वातं करेणुच्छगलीयुक्तमुद्वेगकारकम्
महिष्यजाभ्यामुद्वेगकरी चुल्ली धनापहा ९
काचं करेणुगावीम्यां सुहृत्प्रीतिविनाशनम्
एकमूषममूषं च न द्विशालेषु कारयेत् १०
व्यत्यासात्काचचुल्ल्योश्च सर्वाभिस्तिसृभिस्तथा
चत्वार्याद्यानि भिद्यन्ते लघुप्रस्तारयोगतः ११
प्रत्येकमेकादशधा मन्दिराण्यभिधानतः
अन्ये चतुर्धा भिद्येते प्रत्येकं द्वे निवेशने १२
एषां मूषा भिदाभेदात्तद्वाह्यावाहहेतुकाः
वसुधारं भवेत्तेषामाद्यं सिद्धार्थकं ततः १३
कल्याणकं शाश्वतं च शिवं कामप्रदं तथा
स्त्रीदं शान्तं निष्कलङ्कं धनाधीशं कुबेरकम् १४
सिद्धार्थमनुजान्येवमेतान्येकादश क्रमात्
संहारं यमसूर्यं च कालं वैवस्वतं यमम् १५
करालं विकरालं च कबन्धं मृतकं शवम्
यमसूर्यस्य भेदाः स्युः सद्मनो महिषं तथा १६
प्रचण्डचण्डे दण्डाख्यमुद्दण्डं कण्डकोटरे
विग्रहं निग्रहं धूम्रं निर्धूमं दन्तिदारुणं १७
एकादशामी दण्डस्य भेदा दण्डभयप्रदाः
मरुत्पवनवाताख्यान्यनिलं सप्रभञ्जनम् १८

घनार्यम्बुदविध्वंसि प्रलयं कलहं कलिः
कलिचुल्ली च वातस्य भेदा उद्वेगदायकाः १९
रोगं चुल्ल्यनलं भस्म चुल्ल्या भेदचतुष्टयम्
काचस्य तु च्छलं काचं कुलघ्नं च विरोधि च २०
द्वापञ्चाशद्द्विशालानाममी भेदाः प्रकीर्तिताः
ब्रूमः साम्प्रतमेतेषां लक्षणानि पृथक्पृथक् २१
आद्याद्वितीये वहतो यत्र मूषे धनप्रदे
वसुधाराभिधानं तद्गृहं सर्वार्थकानुगम् २२
आद्यातृतीये वहतो यत्र सिद्धार्थकं हि तत्
सर्वोपद्रवनिर्मुक्तं सिद्धिकृच्चिन्तितार्थकृत् २३
द्वितृतीयं वहन्मूषं भवेत् कल्याणमृद्धिकृत्
वहदाद्यचतुर्थीकं शाश्वतं गृहमुत्तमम् २४
शिवं द्वितीयातुर्याभ्यां वहन्तीभ्यां सुखप्रदम्
कामदं त्रिचतुर्थीभ्यां भवेच्चिन्तितकामदम् २५
आद्याद्याभिस्तु तिसृभिः स्त्रीप्रदं संप्रदं प्रभोः
आद्याद्वितीयातुर्याभिः शान्तं शान्तिप्रदायकम् २६
आद्यातृतीयातुर्याभिर्निष्कलङ्कं समृद्धिकृत्
द्वितृतीयाचतुर्थीभिर्धनेशं धनवर्द्धनम् २७
आद्याद्याभिश्चतसृभिः कुबेरं वित्तवृद्धिकृत्
यमसूर्यप्रभेदेषु ब्रूमो लक्ष्म फलानि च २८
आद्याद्वितीयामूषाभ्यां संहारं स्वामिनाशनम्
गृहमाद्यातृतीयाभ्यां मृत्युदं यमसूर्यकम् २९
द्वितृतीयं वहन्मूषं कालं योषिद्विनाशनम्
वैवस्वतं वहत्तुर्यप्रथमं रोगकारकम् ३०
यमालयं द्वितुर्याभ्यां स्वामिनो यमदर्शनम्
करालं त्रिचतुर्थीभ्यां भर्तुः प्राणविनाशनम् ३१

आद्याभिस्तिसृभिः स्वामिनाशनं विकरालकम्
आद्याद्वितीयातुर्याभिः कबन्धं भर्तृनाशनम् ३२
आद्यातृतीयातुर्याभिर्भर्तृघ्नं मृतकालयम्
शबं द्वित्रिचतुर्थीभिः स्वामिनो मरणप्रदम् ३३
आद्याद्याभिश्चतसृभिः स्वामिघ्नं महिषं विदुः
प्रचण्डं दण्डभेदेषु पूर्वया सद्वितीयया ३४
गृहमादौ विजानीयाद्भर्तुर्नृपभयप्रदम्
चण्डमाद्यातृतीयाभ्यां चण्डदण्डभयप्रदम् ३५
दण्डं स्याद्द्वितृतीयाभ्यां राजदण्डाय दारुणम्
उद्दण्डमाद्यातुर्याभ्यां स्वामिनो दण्डभीतिदम् ३६
काण्डं द्वितीयातुर्याभ्यां काण्डवद्भेदकारकम्
कोटरं त्रिचतुर्थीभ्यां स्वामिनो विग्रहावहम् ३७
प्रथमाद्वितृतीयाभिर्विग्रहं वधबन्धकृत्
आद्याद्वितीयातुर्याभिर्निग्रहं विग्रहावहम् ३८
आद्यातृतीयातुर्याभिर्धूम्रं सर्वधनापहम्
द्वितृतीयाचतुर्थीभिर्निर्धूमं धननाशनम् ३९
आद्याद्याभिश्चतसृभिर्दन्तिदारुणमर्थहृत्
आद्याद्वितीयामूषाभ्यां वातभेदेषु मन्दिरम् ४०
मरुत्संज्ञं भवेत् तत्र वसतां कलहः सदा
उद्वेगकारि पवनं तृतीयाद्योपलक्षितम् ४१
वाताख्यं द्वितृतीयाभ्यां सदा सन्तापकारकम्
सन्तापोद्वासकार्याद्यातुर्याभ्यामनिलं भवेत् ४२
प्रभञ्जनं द्वितुर्याभ्यां शोकसन्तापकारकम्
तृतीयया चतुर्थ्या च घनार्युद्वेगकारकम् ४३
आद्यया द्वितृतीयाभ्यां रोगं कार्यार्थनाशनम्
आद्याद्वितीयातुर्याभिः प्रलयं चित्ततापकृत् ४४

आद्याद्वितीयातुर्याभिः कलहं कलहावहम्
द्वितृत्तीयाचतुर्थीभिः कलिः सन्तापकारकम् ४५
आद्याद्याभिश्चतसृभिः कलिचुल्ली धनापहा
रोगमाद्याद्वितीयाभ्यां चुल्लीभेदेषु शोकदम् ४६
स्याद्द्वितीयातृतीयाभ्यां चुल्ली वित्तविनाशनी
वसुघ्नमनलं नाम त्रितुर्याभ्यां निवेशनम् ४७
वित्तघ्नमाद्यातुर्याभ्यां भस्माख्यं स्वामिनः सदा
उदङ्मुखाभ्यां मूषाभ्यां काचभेदेषु मन्दिरम् ४८
छलं नाम भवेन्नित्यं बन्धुवर्गापमानकृत्
दक्षिणोत्तरमूषाणां पौरस्त्ये वहतो यदि ४९
काञ्चं नाम तदा वेश्म सज्जनानन्दकारकम्
मूषाभ्यां दक्षिणाभ्यां स्यात्कुलहं त्रिकुलक्षयम् ५०
दक्षिणोत्तरमूषाणां पाश्चात्ये वहतो यदि
विरोधं नाम तद्वेश्म सर्वलोकविरोधकृत् ५१
उक्तान्येवं द्विपञ्चाशद्द्विशालानां समासतः
एनानि मूषावहनप्रभेदात्फलप्रभेदाच्च निदर्शितनि
द्विशालवेश्मान्यधुनैकशालान्युदाह्रियन्ते भवनानि सम्यक् ५२
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे द्विशालगृहलक्षणं नाम द्वाविंशोऽध्यायः

अथ एकशालालक्षणफलादि नाम त्रयोविंशोऽध्यायः
गृहाणामेकशालानां वक्ष्यामो लक्षणान्यथ
शस्तानां निन्दितानां च यथावदनुपूर्वशः १
विन्यसेच्चतुरः पूर्वं गुरून् वर्णान् यथाविधि
एभ्य एव प्रसूयन्ते भेदाः षोडश वेश्मनाम् २
गुरोरधो लघुं न्यस्येत्पूर्वं शेषं यथोपरि

गुरुभिः पूरयेत्पश्चाद्यावत्स्युर्लघवोऽखिलाः ३
विद्यादलिन्दान्सर्वेषु लघुस्थानेषु पण्डितः
सव्यावर्तं गृहमुखादेतांश्च विनियोजयेत् ४
एषामलिन्दसंयोगाद्भवनानां पृथक्पृथक्
नामानि गुणदोषाश्च वक्ष्यन्तेऽनुक्रमादतः ५
ध्रुवं धन्यं जयं नन्दं खरं कान्तं मनोरमम्
सुमुखं दुर्मुखं क्रूरं सुपक्षं धनदं क्षयम् ६
आक्रन्दं विपुलं चैव विजयं गृहमुत्तमम्
ध्रुवे जयमवाप्नोति धन्ये धान्यागमो भवेत् ७
जये सपक्षाञ्जयति नन्दे सर्वाः समृद्धयः
खरमायासदं वेश्म कान्ते च लभते श्रियम् ८
आयुरारोग्यमैश्वर्यं तथा वित्तस्य सम्पदः
मनोरमे मनस्तुष्टिर्गृहभर्तुः प्रकीर्तिता ९
सुमुखे राज्यसन्मानं दुर्मुखे कलहः सदा
क्रूरव्याधिभयं क्रूरे सुपक्षं गोत्रवृद्धिकृत् १०
धनदे हेमरत्नादि गाश्चैव लभते पुमान्
क्षयं सर्वक्षयं गेहमाक्रन्दं ज्ञातिमृत्युदम् ११
आरोग्यं विपुले ख्यातिर्विजये सर्वसम्पदः
यदि धन्ये द्वितीयोऽपि मुखालिन्दः प्रयुज्यते १२
तद्गृहं रम्यनामेह भर्तुः सौभाग्यकारकम्
मुखालिन्देन नन्दाख्यं द्वितीयेन सुयोजितम् १३
तच्छ्रीधरमिति ख्यातं तस्मिन् श्रीर्नित्यमाविशेत्
अलिन्दश्चेद्द्वितीयोऽपि कान्तस्यास्ये निवेश्यते १४
मुदितं तद्भवेद्भर्तुर्भूतिकृद्भवनोत्तमम्
सुमुखस्य यदालिन्दो वक्त्रेऽन्यो विनिवेश्यते १५
वर्धमानं तदा तत्स्यात्स्वामिलक्ष्मीविवर्धनम्

क्रूरं युक्तं द्वितीयेन मुखालिन्देन मन्दिरम् १६
करालं तद्विजानीयाद्भर्ता तस्य विनश्यति
अलिन्देन द्वितीयेन धनदं योजितं पुनः १७
सुनाभं तद्भवेत् तस्मिन् पशून् पुत्रानवाप्नुयात्
आक्रन्दस्य पुरोभागे यद्यलिन्दः कृतोऽपरः १८
ध्वाङ्क्षसंज्ञं गृहं तज्ज्ञा निन्दितं प्रवदन्ति तत्
द्वितीयालिन्दघटना विजयस्य मुखे यदि १९
तत्समृद्धमिति ख्यातं गृहं स्यात्पुण्यकर्मणाम्
यान्युक्तानि ध्रुवादीनि पूर्ववेश्मानि षोडश २०
शालाविभागं ज्ञात्वैषां तिर्यद्षड्दारु विन्यसेत्
षोडशान्ये च भेदाः स्युः संज्ञाश्चैषामनुक्रमात् २१
सुन्दरं वरदं भद्रं प्रमोदं विमुखं शिवम्
सर्वलाभं विशालं च विलक्षमशुभं ध्वजम् २२
उद्द्योतं भीषणं शून्यमजितं कुलनन्दनम्
नामभिर्वेश्मनामेषां गुणदोषान्प्रकल्पयेत् २३
यथार्थनामान्येतानि यस्मात्प्रोक्तान्यविस्तरात्
एभ्य एवापराणि स्युर्वेश्मान्यन्यानि षोडश २४
शालापुरोविनिर्युक्ततिर्यक्षड्दारुकारणात्
हंसं सुलक्षणं सौम्यं जयन्तं भव्यमुत्तमम् २५
रुचिरं सम्भृतं क्षेममाक्षेमं सुकृतं वृषम्
उच्छन्नं व्ययमानन्दं सुनन्दं चेति कीर्तितम् २६
एषामपि यथार्थत्वाद्गुणदोषान् निरूपयेत्
शालामध्ये च तिर्यक्स्थं षड्दारु विनिवेशयेत् २७
विहाय मर्मणां वेधानमीषामेव वेश्मनाम्
षोडशैव परेऽपि स्युर्भेदास्तांश्च यथाक्रमम् २८
कथयामः समासेन यथार्थैरेव नामभिः

अलङ्कृतमलङ्कारं रमणं पूर्णमम्बरम् २९
पुरयं सुगर्भं कलशं दुर्गतं रिक्तमीप्सितम्
सुभद्रं वन्दितं दीनं विभवं सर्वकामदम् ३०
शालान्तः स्थितषड्दारुपश्चादपवरैः कृतैः
एभ्योऽपरेऽपि निर्दिष्टा भेदाः षोडश वेश्मनाम् ३१
प्रभवं भाविकं क्रीडं तिलकं क्रीडनं सुखम्
यशोदं कुमुदं कालं भासुरं सर्वभूषणम् ३२
वसुधारं धनहरं कुपितं वित्तवृद्धिदम्
कुलोदयं च विज्ञेयं गुणदोषास्तु पूर्ववत् ३३
अनन्तरमिहोक्तानि यानि वेश्मानि षोडश
प्रत्येकं तान्यलिन्देन परिकुर्याच्चतुर्दिशम् ३४
तद्भेदेभ्यः प्रसूतानि कथयामो विधानतः
चूडामणिं प्रभद्रं च क्षेमं शेखरमद्भुतम् ३५
विकाशं भूतिदं हृष्टं विरोधं कालपाशकम्
निरामयं सुशालं च रौद्रं मोघं मनोरथम् ३६
सुभद्रं चेति सदनं संज्ञाभिरुपलक्षयेत्
वेश्मनामेकशालानां शतं स्याच्चतुरुत्तरम् ३७
कथितं तच्च संस्थानैर्नामभिश्च यथाक्रमम्
हस्तिनी महिषी गावी छागली च यथाक्रमम् ३८
तद्द्वयेन द्विपूर्वाणि ब्रूमो नामानि वेश्मनाम्
द्विहंसकं द्विचक्राह्वं द्विसारसमथापरम् ३९
द्विकोकिलं बुधैः ख्यातं हस्तिन्यादेः क्रमाद्गृहम्
त्रीणयायुः पशुधान्यानां क्रमादाद्यानि वृद्धये ४०
एतेषामेव नाशाय भवेद्वेश्म द्विकोकिलम्
इत्येकशालभवनान्युदितान्यलिन्द
षड्दारुकापवरकावरणादिभेदैः

संज्ञा च लक्षणफलैः करिणीमुखाभिः
शालाभिरेवमपराणि च युग्मजानि ४१
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे एकशाललक्षणफलद्विहंसकादिलक्षणफलानि नाम
त्रयोविंशोऽध्यायः

अथ द्वारपीठभित्तिमानादिकं नाम चतुर्विंशोऽध्यायः
कर्णशालानिबद्धानि मण्डपैरन्तरस्थितैः
असम्बाधाजिराणि स्युर्हलानि दश पञ्च च १
ईश्वरं वृषभं चन्द्रं रोगं पापं भयप्रदम्
नन्दनं खादकं ध्वाङ्क्षं विकृतं विलयं क्षयम् २
याम्यं च विपरीतं च भद्रकं चेति नामतः
एतानि हलकाख्यानि विद्याद्गेहानि यत्नतः ३
अग्निरक्षोनिलेशानकोणगानां यथाक्रमम्
एकद्वित्रिचतुर्थाख्या हलकानां प्रकल्पयेत् ४
अनेन क्रमयोगेन च्छन्दोभेदा भवन्ति च
तत्राद्येनेश्वरं नाम हलकेन गृहं भवेत् ५
सर्वलक्षणसंयुक्तं सर्ववृद्धिफलप्रदम्
वृषभं तु द्वितीयेन पुत्रदारविवर्धनम् ६
प्रथमं च द्वितीयं च गृहे तु हलकं यदि
चन्द्रं वृद्धिकरं नृणां सर्वलक्षणसंयुतम् ७
वायव्यं हलकं यत्र रोगं रोगविवर्धनम्
प्रथमं च तृतीयं च गृहे तु हलकं यदि ८
पापं तन्नामतो वास्तु सर्वपापप्रयोजकम्
पितृरोगोक्तकोणाभ्यां भयदं रोगमृत्यवे ९
पितृरोगाग्निकोणेषु नन्दनं गृहमादिशेत्

सुखमर्थप्रदं शान्तं हलकं परिकीर्तितम् १०
ईशान्यां तु चतुर्थेन खादकं खादकं गृहम्
लाङ्गलाद्या यदा शाला ईशान्यां च यदापरा ११
ध्वाङ्क्षं तन्नामतो वास्तु दरिद्राणां विधीयते
द्वितीया च चतुर्थी च शाला लाङ्गलके यदि १२
विकृतं विकृतावासं प्रवासोऽत्र कुटुम्बिनः
आद्या शाला द्वितीया च चतुर्थी च यदा पुनः १३
विलयं हानिदं नित्यं गृहं तद्वित्तनाशनम्
वायव्यं हलकं यस्मिन्नैशान्यां च यदा पुनः १४
क्षयं क्षयकरं नित्यं हलकेषु गुहं भवेत्
अग्निवायुमहेशानां शाला लाङ्गलके यदि १५
याम्यं मृत्युकरं नृणां न तत्कुर्यात्कदाचन
मारुते नैर्ऋतैशान्योः शालाकर्णेषु लाङ्गलम् १६
विपरीतं व्याधिकरं नृणां नाशकरं तथा
चतस्रो हलके यत्र प्रादक्षिण्यमुखाः स्थिताः १७
भद्रकं नाम तद्वास्तु सर्वभद्रप्रयोजकम्
द्वारोच्छ्रायं सविस्तारं तलोच्छ्रायं च वेश्मनाम् १८
पीठस्य च समुत्सेधं भित्तिविस्तारमेव च
तथा दारुकलां चैव या प्रोक्ता गृहकर्मणि १९
एकशालाविधानं च तेषां नामानि यानि च
तत् सम्प्रति प्रवक्ष्यामो यथावदनुपूर्वशः २०
षोडशानां समुदयो विंशतेरपि चापरः
विंशतेः सचतुष्कायास्तथाष्टाविंशतेरपि २१
द्वात्रिंशतोऽपरश्चेति पञ्च वर्गाधिपा मताः
शालाचतुर्थभागेन भित्तिविस्तार इष्यते २२
वर्गेषु भित्तिलक्ष्मोक्तं षोडशादिषु पञ्चसु

मर्मपीडा भवेद्यत्र भित्तिस्तम्भतुलादिभिः २३
कुर्वीत ह्रासं वृद्धिं वा तत्र मर्मव्यथां त्यजन्
अतिसंवृतविस्तारं कार्यमुद्दिश्य बुद्धिमान् २४
शालाप्रविष्टं कुर्वीत हीनवास्तु ष्वलिन्दकम्
चतुरश्रीकृते क्षेत्रे भूमिभागे समीकृते २५
उपरिष्टाद्भवेत्पीठं तलादर्धसमुच्छ्रितम्
नियुक्ते तु ततः पीठे वास्तुविस्तारतोऽङ्गुलम् २६
प्रतिहस्तं समुद्धृतय सप्तत्या सह योजयेत्
द्वारोच्छ्रायाः समाख्याता वर्गेषूक्तेषु पञ्चसु २७
उच्छ्रायार्धेन वैपुल्यमष्टांशेन विवर्जितम्
द्वारविस्तारपादांशे पट्टविस्तार इष्यते २८
विस्तारार्धेन बाहल्यं सार्धं वेद्या तलोपरि
उत्तरोत्तरवैपुल्यं कुर्याच्छाखावशाद्बुधः २९
वेद्या विस्तारबाहल्ये विधेये शाखयोरपि
द्वारविस्तारपादेन मूले स्तम्भस्य विस्तृतिः ३०
दशभागविहीनाग्रे पट्टः स्तम्भेन सम्मितः
स्तम्भाग्रस्य त्रिभागेन पट्टकोटिर्विधीयते ३१
हीरग्रहणमायामे स्तम्भाग्रात्तु चतुर्गुणम्
पट्टान्यान्युद्भवेत्तत्र व्यासबाहल्ययोस्तथा ३२
पट्टकोटयर्धमुत्सेधादुत्सेधार्धेन निर्गतम्
तन्त्रकस्य प्रमाणं स्यादिति शास्त्रविदो विदुः ३३
द्रव्याण्युपर्युपर्यस्य परापरविभागतः
पट्टकोटयाश्चतुर्थेन प्रविभागेन ह्रासयेत् ३४
पूर्वामुखं गृहं यत्तु द्वारं माहेन्द्रसंयुतम्
हस्तिनी च भवेच्छाला तद्गृहं भद्रसंज्ञितम् ३५
भद्रं भद्रकरं भर्तुर्यशोबलविवर्धनम्

सिध्यन्ति चास्य कार्याणि भद्राख्ये वसतो गृहे ३६
दक्षिणाभिमुखं वेश्म द्वारं चास्य गृहक्षतम्
महिषी च भवेच्छाला तद्गृहं नन्दपीठकम् ३७
नन्दपीठगृहं पुंसा नित्यानन्दकरं स्मृतम्
सर्वसम्पद्गुणोपेतं धनधान्यविवर्धनम् ३८
वारुणयभिमुखं सद्म द्वारं च कुसुमाह्वयम्
गावी चैव भवेच्छाला सौरभं तद्विदुर्बुधाः ३९
सौरभे नित्यहृष्टत्वं वसतां गृहमेधिनाम्
सफलं कृषिवाणिज्यं पुत्राश्च वशवर्तिनः ४०
उत्तराभिमुखं धिष्ण्यं द्वारं भल्लाटसंयुतम्
छागली च भवेच्छाला पुष्कराख्यं तदुच्यते ४१
शीलवान् नित्यसन्तुष्टः सुहृत्सुजनवत्सलः
सुभगः पुष्कराख्ये च बहुपुत्रधनान्वितः ४२
भद्रं च नन्दपीठं च सौरभं पुष्करं तथा
प्रथमार्धे तु वर्गस्य प्रथमस्य प्रयोजयेत् ४३
सर्वभद्रादिकाः सर्वे निवेशा ये प्रकीर्तिताः
उत्पन्नास्ते विमानेभ्यः पञ्चभ्यः पञ्चपञ्चके ४४
द्वारस्य पीठस्य च मन्दिरेषु भित्तेश्च मानं कथितं क्रमेण
तथो देता दारुकलास्तु सम्यक्प्रहीणवास्तोः सकलं च लक्ष्म ४५

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे द्वारपीठभित्तिमानदारुकलाहीनवास्तुलक्षणं नाम चतुर्विंशोऽध्यायः

अथ समस्तगृहाणां सङ्ख्याकथनं नाम पञ्चविंशोऽध्यायः

वेश्मनां पञ्चशालानां कथ्यन्ते लक्षणान्यथ
चतुर्विंशतिसंयुक्तं सहस्रं तानि सङ्ख्यया १

गुरूणां दशसङ्ख्यानां प्रस्तारस्य च कल्पनात्
गृहाणां पञ्चशालानां भेदा लघुविभागतः २
पञ्चशालं भवेद्योगाद्गृहयोर्द्वित्रिशालयोः
यद्वा योगाद् भवेदेतच्चतुःशालैकशालयोः ३
चतुर्णामपि वर्णानामिदं सद्म प्रशस्यते
हिरण्यनाभप्रभृति वर्णानामिह वेश्मनाम् ४
सिद्धार्थादिसमायोगान्निष्पद्येत गृहाष्टकम्
योगाद्धिरण्यनाभस्य सिद्धार्थेन गृहं भवेत् ५
हेमकूटाख्यमस्यैव वातेन स्वर्णशेखरम्
सुक्षेत्रस्य च सिद्धार्थसंयोगेन श्रियावहम् ६
तस्यैव यमसूर्येण भवेद्वेश्म महानिधिः
चुल्ल्यास्तु यमसूर्येण सदादीप्तं प्रजायते ७
दण्डसंयोगतस्तस्य चित्रभान्बभिधं भवेत्
पद्मघ्नस्य तु दण्डेन सदादोषं विनिर्दिशेत् ८
पद्मघ्नस्यैव वातेन योगान्निर्विघ्नमुच्यते
न काचचुल्लीसंयोगस्त्रिशालादिषु शस्यते ९
अन्योन्यवीक्ष्यमाणानां भेदास्तेनेहे नोदिताः
एकशालयुतैर्भेदाः स्युश्चतुश्शालवेश्मनि १०
चत्वारः पञ्चशालानां ब्रूमस्तेषां च विंशतिः
यदा भवत्यजा शाला सर्वतोभद्रवेश्मना ११
सुदर्शनमिति प्राहुः पञ्चशालं तदा गृहम्
तदेव करिणीयोगात्सुरूपमिति कथ्यते १२
सुन्दरं महिषीयोगाद्गावीयोगात्तु शोभनम्
वर्धमानस्य चैतासां शालानां योगतः क्रमात् १३
सुनाभं सुप्रभं योग्यं विनोदं च भवेद्गृहम्
नन्द्यावर्तेऽप्येवमेव शालायोगेन जायते १४

सुखदं नन्दनं नन्दं पुण्डरीकं च मन्दिरम्
रुचकस्याप्यजादीनां योगेन स्युरनुक्रमात् १५
नामतो भद्ररुचिररोचिष्णूनि प्रहर्षणम्
स्वस्तिकेऽप्यनया युक्त्या भवेद्गृहचतुष्टयम् १६
घोषं सुघोषणं नन्दिघोषं श्रीपद्ममेव च
विंशतिः सर्वतोभद्रप्रभृत्यालययोगतः १७
जातानि पञ्चशालानि योग्यानि पृथिवीभुजाम्
पूर्वोक्तैरष्टभिः सार्धं स्यादष्टाविंशतिर्गृहैः १८
कथ्यते पञ्चशालानां मूषाभेदक्रमोऽधुना
विभद्रमेकं तत्रैकभद्राणि दशसङ्ख्यया १९
द्विभद्राणि पुनः पञ्चचत्वारिंशत्प्रचक्षते
त्रिभद्राणां शतं विंशत्युत्तरं द्वे दशोत्तरे २०
चतुर्भद्रगृहाणां तु द्विपञ्चाशच्छतद्वयम्
गृहाणां पञ्चभद्राणां षड्भद्राणां दशोत्तरे २१
द्वे शते सप्तभद्राणां स्याद्विंशत्युत्तरं शतम्
गृहाणामष्टभद्राणां चत्वारिंशच्च पञ्च च २२
दश स्युर्नवभद्राणि तथैकं दशभद्रकम्
एवं सहस्रमेकं स्याद्विंशतिश्च चतुर्युता २३
गृहाणां पञ्चशालानां मूषावहमसङ्ख्यया
अथ लक्ष्म च संख्यां च ब्रूमः षट्शालवेश्मनाम् २४
एकद्वित्रिचतुश्शालगृहाणां योजनान्मिथः
द्विशालस्यैकशालस्य त्रिशालस्य च योगतः २५
षट्शालं जायते वेश्म भेदास्तस्य तु षोडश
पक्षघ्नवातयोर्योगादेकशालगृहस्य च २६
स्यात्पङ्कजाङ्कुरं नाम गृहं षट्शालमुत्तमम्
हिरण्यनाभं सिद्धार्थं चैकशालेन वेश्मना २७

संयोज्यं तु यदा गेहं तदा स्याच्छ्रीगृहं शुभम्
संयोगादेकशालेन सुक्षेत्रयमसूर्ययोः २८
धनेश्वरं नाम गृहं जायते धनवृद्धये
दण्डाख्यचुल्ल्योः संयोगादेकशालगृहस्य च २९
प्रभूतकाञ्चनकरं गृहं स्यात्काञ्चनप्रभम्
द्वादशान्यानि जानीयाद्भवनान्यनया दिशा ३०
एतेषामेव भेदेषु शुभान्यखिलवर्णिनाम्
तुल्यात्त्रिशालद्वितयात्षट्शालकचतुष्टयम् ३१
स्याद्द्विशालचतुःशालयोगादन्यच्चतुष्टयम्
सिद्धार्थेन चतुःशालं वेश्मनां संयुतिर्यदा ३२
गृहं तदा स्यात् षट्शालं त्रैलोक्यानन्दकं शुभम्
यमसूर्येण संयुक्तं विलासचयमुच्यते ३३
दण्डयुक्तं चतुःशालं सुखदं नामतो भवेत्
वातेन च चतुःशालं संयुक्तं श्रीपदं भवेत् ३४
चतुर्विंशतिरन्यानि षट्शालान्यन्ययोगतः
पञ्च यानि चतुश्शालान्युचितानि महीभृताम् ३५
तेषां द्विशालयोगेन षट्शालान्यभिदध्महे
सिद्धार्थे सर्वतोभद्रयुक्ते स्याच्छ्रीपुरं गृहम् ३६
श्रीवासं सर्वतो भद्रे यमसूर्यान्विते भवेत्
दण्डाख्ये भद्रयुक्ते श्रीभूषणं जायते गृहम् ३७
वाताख्यं सर्वतोभद्रयोगाच्छ्रीभाजनं विदुः
सिद्धार्थे वर्धमानेन युक्ते स्याद्भूतिमण्डनम् ३८
यमसूर्ये तु तेनैव संयुक्ते भूतिभाजनम्
भूतिमानं तु दण्डाख्ये वाताख्ये भूतिभूषणम् ३९
नन्द्यावर्तस्य योगेन सिद्धार्थादि चतुष्टयम्
श्रीमुखं श्रीधरं श्रीमच्छ्रीधरं चेति जायते ४०

सिद्धार्थादिचतुष्कस्य भवेद्वुचकयोगतः
श्रियाकारं श्रियोवासं श्रीयानं श्रीमुखं तथा ४१
सिद्धार्थादिचतुष्कस्य भवेत्स्वस्तिकयोगतः
धनपालधनानन्तधनप्रदधनाह्वयम् ४२
भवन्त्येवं राजवेश्मयोगतो विंशतिर्गृहाः
प्राक्चतुर्विंशतिश्चेति चत्वारिंशच्चतुर्युता ४३
मूषाव्यूढिवशादेकभद्रादीन्यभिदध्महे
भिदाभिरेकं मूषाभिरभद्रं द्वादशैकया ४४
द्वाभ्यां षट्षष्टिरुद्दिष्टा विंशे द्वे तिसृभिः शते
स्याद्व्यूढाभिश्चतसृभिः पञ्चोनं शतपञ्चकम् ४५
शतानि पञ्चभद्राणां सप्त द्वानवतिस्तथा
चतुर्विंशा नवशती षड्भद्राणामुदाहृता ४६
जानीयात्सप्तभद्राणि संख्यया पञ्चभद्रवत्
गृहाणामष्टभद्राणां पञ्चोनं शतपञ्चकम् ४७
द्वे विंशे नवभद्राणां भवनानां शते विदुः
षट्षष्टिर्दशभद्राणि तथा द्वादशसङ्ख्यया ४८
स्युरेकादशभद्राख्यान्येकं द्वादशभद्रकम्
एवं षट्शालगेहानां स्यात्साहस्रचतुष्टयम् ४९
षण्णवत्यधिकं ब्रूमः सप्तशालानि साम्प्रतम्
तुल्यं त्रिशालद्वितयमेकशालेन युज्यते ५०
यदा स्युः सप्तशालानि तदा द्वादशसङ्ख्यया
एकशालं द्विशालं च चतुःशालेन युज्यते ५१
यदा तदा सप्तशालमपरं वेश्म जायते
सैकशालं चतुःशालं यमसूर्येण संयुतम् ५२
तदा भवेद्विभेदः स्यात्तद्गृहं श्रीप्रदायकम्
वातेन श्रीपदं तद्वद्दण्डेन श्रीप्रदं भवेत् ५३

सिद्धार्थकेन श्रीमालं तद्वदेव प्रजायते
पञ्चानां राजयोग्यानां स्युश्चतुश्शालवेश्मनाम् ५४
सप्तशालानि संयोगादेकशालद्विशालयोः
युज्यते सर्वतोभद्रं सिद्धाथं च यदा गृहम् ५५
एकशालेन जायेत श्रीपदं श्रीपदं तथा
सर्वतोभद्रगेहस्य यमसूर्यैकशालयोः ५६
योगेन श्रीफलं नाम स्याद्गृहं श्रीफलावहम्
सर्वतोभद्रदण्डाभ्यामेकशालं युतं यदा ५७
श्रीस्थलं नाम भवनं तदा स्यादास्पदं श्रियः
स्यादेकशाले मिलिते सर्वतोभद्रवातयोः ५८
लक्ष्मीनिवासभवनं गृहं श्रीतनुसंज्ञितम्
यदैकशालं सिद्धार्थं वर्धमानं च युज्यते ५९
श्रीपर्वताभिधानं स्यात्तदानीं भवनोत्तमम्
यमसूर्यस्य योगेन वर्धमानैकशालयोः ६०
श्रीवर्धनं नाम गृहं श्रियो वृद्धिकरं भवेत्
दण्डं च वर्धमानं च सैकशालं यदा भवेत् ६१
तदा श्रीसङ्गमं नाम भवेद्भवनमुत्तमम्
यदैकशालं वाताख्यं वर्धमानं च युज्यते ६२
भवनं श्रीप्रसङ्गाख्यं नृपयोग्यं तदा भवेत्
सिद्धार्थमेकशालेन नन्द्यावर्तेन चान्वितम् ६३
श्रीभारं नाम भवनं भवेद्भूपालसेवितम्
नन्द्यावर्तस्य योगेन यमसूर्यैकशालयोः ६४
राज्ञां सुखावहं वेश्म श्रीभारमिति च स्मृतम्
श्रीशैलमेकशालेन स्यान्नन्द्यावर्तदण्डयोः ६५
योगाद्भोगावहं राज्ञां सप्तशालं गृहोत्तमम्
एकशालस्य योगेन स्यान्नन्द्यावर्तवातयोः ६६

श्रीखण्डं नाम भवनं भूभृतां भूतिकृद्भवेत्
सिद्धार्थस्यैकशालेन संयोगाद्रुचकस्य च ६७
श्रीषण्डं नामतो वेश्म भवेद्योग्यं महीभृताम्
रुचकस्यैव योगेन यमसूर्यैकशालयोः ६८
स्याच्छ्रीनिधानं श्रीकुण्डं तस्य दण्डैकशालयोः
वातैकशालरुचकैर्युक्तैः श्रीनाभमुच्यते ६९
भवनं भूमिपालानां तद्भवेद्भूतिदायकम्
एकशालेन युज्येते सिद्धार्थस्वस्तिके यदा ७०
श्रीप्रियं स्यात्तदा वेश्म सन्ततं वल्लभं श्रियः
यमसूर्यैकशालाभ्यां स्वस्तिकं युज्यते यदा ७१
तदा श्रीकान्तमित्याहुर्भवनं भूभृतां हितम्
एकशालेन संयोगो दण्डस्वस्तिकयोर्यदा ७२
श्रीमतं नामतो वेश्म तदा स्याद्विजयावहम्
वातस्वस्तिकसंयोगमेकशालं यदा व्रजेत् ७३
श्रीप्रदत्तमिति प्राहुस्तदा वेश्म महीभृताम्
एकैकस्य द्विभेदत्वाच्चत्वारिंशदियं भवेत् ७४
एवमत्र प्रकाराः स्युश्चत्वारिंशद्युताष्टभिः
यदा त्रिशालं भवनं चतुश्शालेन युज्यते ७५
तदापि सप्तशालं स्याच्चतुर्धेदं समासतः
पञ्चानां राजगेहानां मिलत्येकतमस्य चेत् ७६
त्रिशालं स्यात्तदा सप्तशालं विंशतिभेदवत्
हिरण्यनाभभोगेन सर्वतोभद्रमन्दिरम् ७७
श्रीवत्सं जनयेद्वेश्म नरेन्द्राणां हितावहम्
श्रीवृक्षं सर्वतोभद्रे सुक्षेत्रे मिलिते भवेत् ७८
चुल्लीयुक्ते पुनस्तस्मिन् श्रीपालं नाम जायते
पद्मघ्ने सर्वतोभद्रयुक्ते श्रीकण्ठमुच्यते ७९

हिरण्यनाभे श्रीवासं वर्धमानयुते भवेत्
श्रीनिवासं तु सुक्षेत्रे वर्धमानेन मिश्रिते ८०
वर्धमानेन चुल्ल्या च गृहं श्रीभूषणं विदुः
पद्मघ्नं वर्धमानेन यदा संयोगमृच्छति ८१
तदा श्रीमण्डनं नाम जायते भवनोत्तमम्
जाते हिरण्यनाभस्य नन्द्यावर्तेन सङ्गमे ८२
स्याद्वेश्म श्रीकुलं नाम श्रियः कुलनिकेतनम्
नन्द्यावर्तेन सुक्षेत्रे युक्ते श्रीगोकुलं भवेत् ८३
नन्द्यावर्तस्य चुल्ल्याश्च योगे श्रीस्थावरं गृहम्
नन्द्यावर्तस्य पद्मघ्नयोगे कुम्भं प्रजायते ८४
हिरण्यनाभरुचकयोगे स्याच्छ्रीसमुद्गकम्
श्रीनन्दं नाम सुक्षेत्रे रुचकाख्येन संयुते ८५
चुल्ल्यां रुचकयुक्तायां श्रीह्रदं नाम जायते
श्रीधरं नाम पद्मघ्ने भवेद्रुचकसंयुते ८६
हिरण्यनाभेन युते स्वस्तिके श्रीकरण्डकम्
सुक्षेत्रेण युते तस्मिन् श्रीभाण्डागारसंज्ञितम् ८७
चुल्लीयुते श्रीनिलयं भवेन्नरपतिप्रियम्
स्वस्तिकस्य यदा योगः पद्मघ्नेन प्रजायते ८८
श्रीनिकेतनसंज्ञं स्यात्तदा नृपतिमन्दिरम्
उक्तानि सप्तशालानि नामलक्षणयोगतः ८९
सर्वाणि सार्वभौमानां नृपाणां मन्त्रिणामपि
भवन्ति च सतां वित्तयशोविजयवृद्धये ९०
एकादिमूषावहनप्रभेदादथ वेश्मनाम्
एतेषां सप्तशालानां ब्रूमः संख्यामनुक्रमात् ९१
वहत्येकापि नो यत्र मूषैकं तद्भवेद्गृहम्
विभद्रमेकभद्राणि विजानीयाच्चतुर्दश ९२

द्विभद्रवेश्मनां सैका नवतिः परिकीर्तिता
भवनानां त्रिभद्राणां चतुःषष्टिः शतत्रयम् ९३
सहस्रमेकाभ्यधिकं स्याच्चतुर्भद्रवेश्मनाम्
भवतः पञ्चभद्राणां द्वे सहस्रे द्विसंयुते ९४
षड्भद्राणां सहस्राणि त्रीणि त्रीणि गृहाणि च
द्वात्रिंशता चतुस्त्रिंशत्सप्तभद्रशतानि च ९५
अष्टभद्राणि षड्भद्रसङ्ख्यातुल्यानि जायते
गृहाणां नवभद्राणां द्वे सहस्रे तथा द्वयम् ९६
सहस्रं दशभद्राणामेकोत्तरमुदाहृतम्
तथैकादशभद्राणां चतुष्षष्ट्या शतत्रयम् ९७
सैका द्वादशभद्राणां नवतिर्वेश्मनां भवेत्
स्युस्त्रयोदशभद्राणि गृहाणीह चतुर्दश ९८
यच्चतुर्दशभिर्भद्रैरेकमेव हि वेश्म तत्
इत्येषां सप्तशालानां सहस्राण्यत्र षोडश ९९
एकोनत्रिंशती तद्वदशीतिश्चतुरुत्तरा
इदानीमष्टशालानि भवनान्यभिदध्महे १००
बहिरन्तश्चतुःशालद्वयादेकं समासतः
अन्यानि सर्वभद्रादिद्वयसंयोगतो दश १०१
एकोनत्रिंशता क्षेत्रं चतुरश्रं विभाजयेत्
भागद्वयेन मूषा स्याच्छाला भागचतुष्टयात् १०२
कुर्वीत पञ्चभिर्भागैस्तन्मध्येऽङ्गणवापिकाम्
चतस्रश्च प्रतिदिशं मूषाः स्युस्तत्र वास्तुनि १०३
शालयोनं सप्तशालं षट्शालं द्वितयोज्झितम्
त्रिहीनं पञ्चशालं स्यादष्टशालमिदं क्वचित् १०४
तुल्यत्रिशालद्वितयं द्विशालेन युतं यदा
अष्टौ तदाष्टशालानि गृहाण्यन्यानि निर्दिशेत् १०५

मूषाव्यूढिवशादष्टशालानामथ कथ्यते
सङ्ख्या तत्र विभद्रं स्यादवहन्मूषसंज्ञितम् १०६
षोडशैवैकभद्राणि द्विभद्राणां शतं विदुः
विंशं षष्टया त्रिभद्राणां विज्ञेयं शतपञ्चकम् १०७
अष्टादशाहुर्विंशानि चतुर्भद्रशतानि च
पञ्चभद्रसहस्राणि चत्वारि स्युः शतत्रयम् १०८
अष्टषष्टिश्च गेहानि तानि सम्यग्विभावयेत्
सहस्राष्टकमष्टौ च षड्भद्राणि प्रचक्षते १०९
एकादशसहस्राणि तथा शतचतुष्टयम्
जानीयात्सप्तभद्राणि चत्वारिंशद्गृहाणि च ११०
द्वादशैवाष्टभद्राणां सहस्राणि शताष्टकम्
सप्तत्याभ्यधिकं प्राहुर्वास्तुविद्याविशारदाः १११
एकादशसहस्राणि तथा शतचतुष्टयम्
चत्वारिंशच्च गेहानि नवभद्राणि सङ्ख्यया ११२
अष्टौ स्युर्दशभद्राणां सहस्राणयष्टभिः सह
तथैकादशभद्राणां सङ्ख्या स्यात्पञ्चभद्रवत् ११३
अष्टादशशतानि स्युर्विंशतिर्भवनानि च
इति द्वादशभद्राणां सङ्ख्या भवति वेश्मनाम् ११४
स्यात्त्रयोदशभद्राणां षष्टयग्रं शतपञ्चकम्
स्याच्चतुर्दशभद्राणां विंशत्यभ्यधिकं शतम् ११५
वेश्मानि स्युस्तथा पञ्चदशभद्राणि षोडश
एकमेव हि विज्ञेयं गृहं षोडशभद्रकम् ११६
पञ्चषष्टिसहस्राणि षट्त्रिंशं शतपञ्चकम्
गृहाणामष्टशालानां भवत्येकत्र सङ्ख्यया ११७
स्यात्समानचतुश्शालद्वययोगात्समासतः
एकैकशालयोग्गाच्च नवशालचतुष्टयम् ११८

सर्वतोभद्रमुख्यानां मिथो द्वितययोगतः
एकैकशालयोगाच्च चत्वारिंशत्तथापरा ११९
तुल्यत्रिशालत्रितयोगेन च चतुष्टयम्
गृहाणां नवशालानामन्यदुक्तं पुरातनैः १२०
संस्थानमुक्तं गेहानां नवशालात्मनामिदम्
मूषावहनभेदेन तत्सङ्ख्या कथ्यतेऽधुना १२१
अवहन्मूषमेकं स्याद्वहन्त्याष्टादशैकया
द्वाभ्यां शतं त्रिपञ्चाशदधिकं वेश्मनां भवेत् १२२
तिसृभिः स्युः शतान्यष्टौ सह षोडशभिर्गृहैः
षष्ट्या सहस्त्रत्रितयं ताभिश्चतसृभिर्भवेत् १२३
पञ्चाशीतिशतान्यष्टषष्टियुक्तानि पञ्चभिः
वहन्तीभिः प्रजायन्ते मूषाभिरिह वेश्मनाम् १२४
अष्टादशसहस्राणि तथा पञ्चशतानि च
चतुःषष्टिं च गेहानि मूषाभिः षड्भिरादिशेत् १२५
एकत्रिंशत्सहस्राणि सहितान्यष्टभिः शतैः
चतुर्विंशतियुक्तानि मूषाभिः सप्तभिर्विदुः १२६
चत्वारिंशत्सहस्राणि त्रिसहस्री च वेश्मनाम्
शतानि चाष्टपञ्चाशत्सप्त मूषाभिरष्टभिः १२७
चत्वारिंशत्सहस्राणि सहस्राणयष्ट षट्शती
विंशतिं चैव मूषाभिर्गृहाणां नवभिर्विदुः १२८
चत्वारिंशत्सहस्राणि सहस्त्रत्रयमोकसाम्
मूषाभिर्दशभिः साष्टपञ्चाशच्छतसप्तकम् १२९
एकत्रिंशत्सहस्राणि चतुर्विंशच्छताष्टकम्
मूषाभिरेकादशभिर्गृहाणां मुनयो जगुः १३०
अष्टादशसहस्राणि तथा पञ्चशतानि च
धाम्नां द्वादशमूषाणां चतुःषष्टिश्च जायते १३१

भवन्त्यष्टौ सहस्राणि तथा पञ्चशतानि च
स्यात्त्रयोदशमूषाणामष्टषष्टिश्च वेश्मनाम् १३२
स्याच्चतुर्दशमूषाणां त्रिसहस्री सषष्टिका
मूषाभिः पञ्चदशभिः षोडशाष्टशती तथा १३३
धाम्नां षोडशमूषाणां त्रिपञ्चाशच्छतं भवेत्
स्युः सप्तदशमूषाणि वेश्मान्यष्टादश स्फुटम् १३४
मूषाभिरष्टादशभिर्वेश्मैकं तद्विदो विदुः
लक्षद्वयं सहस्राणि द्वाषष्टिश्च शतान्विता १३५
वेश्मनां नवशालानां चत्वारिंशच्चतुर्युता
स्यात्समानचतुःशालद्वययोगात्समासतः १३६
एकेन च द्विशालेन दशशालचतुष्टयम्
सर्वतोभद्रमुख्यानां मिथो द्वितययोगतः १३७
एकद्विशालयोगाच्च चत्वारिंशत्तथापरा
तुल्यत्रिशालत्रितयमेकशालयुतं यदा १३८
साधारणं तदान्यत्स्याद्दशशालचतुष्टयम्
तुल्ये त्रिशाले युज्येते सर्वभद्रादिभिर्यदा १३९
तदान्या दशशालानां समुत्पद्येत विंशतिः
तेष्वेकमवहन्मूषं विंशतिर्मूषयैकया १४०
वहन्त्या स्यादुभाभ्यां तु नवत्यभ्यधिकं शतम्
चत्वारिंशानि तिसृभिः शतान्येकादश ध्रुवम् १४१
चत्वारि स्युश्चतसृभिः सहस्राणि शताष्टकम्
चत्वारिंशच्च गेहानि जायन्ते पञ्चभिः सह १४२
पञ्चभिस्तु सहस्राणि मूषाभिर्दशपञ्च च
जायन्ते सचतुष्काणि तथा पञ्चशतानि च १४३
अष्टात्रिंशत्सहस्राणि षड्भिः सप्त शतानि च
षष्टयुत्तराणि जायन्ते वेश्मनां परिसङ्ख्यया १४४

गृहाणां स्युः सहस्राणि सप्तभिः सप्तसप्ततिः
शतपञ्चकमन्यच्च भवेद्विंशतिसंयुतम् १४५
लक्षमेकं सहस्राणि पञ्चविंशतिरष्टभिः
शतानि नव जायन्ते सप्तत्यभ्यधिकानि च १४६
लक्षमेकं सहस्राणि सप्तषष्टिः शतानि च
नव स्युः षष्टियुक्तानि नवमूषाप्रचारतः १४७
लक्षं चतुरशीतिश्च सहस्राणि शतानि च
सप्त स्युर्दशभिस्तद्वद्पञ्चाशच्च षडुत्तरा १४८
लक्षमेकं सहस्राणि सप्तषष्टिश्च वेश्मनाम्
शतानि चैकादशभिः षष्ट्यानि नव निर्दिशेत् १४९
लक्षं तथा सहस्राणि जायन्ते पञ्चविंशतिः
शतानि च द्वादशभिर्नव तद्वच्च सप्ततिः १५०
सहस्राणि निकेतानां सङ्ख्यया सप्तसप्ततिः
सविंशतिः पञ्चशती त्रयोदशभिरीरिता १५१
अष्टात्रिंशत्सहस्राणि तथा सप्तशतानि च
स्युश्चतुर्दशभिः षष्ट्या वेश्मनामन्वितानि च १५२
स्यात्पञ्चदशसाहस्री शतैः पञ्चभिरन्विता
मूषाभिः पञ्चदशभिश्चत्वारि भवनानि च १५३
स्युः सहस्राणि चत्वारि तद्वदष्टौ शतानि च
तथा षोडशमूषाणां चत्वारिंशच्च पञ्च च १५४
सहस्रं सप्तदशभिः शतमेकं च वेश्मनाम्
चत्वारिंशच्च वेश्मानि भवन्ति परिसङ्ख्यया १५५
शतं नवत्यभ्यधिकमष्टादशभिरुच्यते
भवत्येकोनविंशत्या मूषाणां वेश्मविंशतिः १५६
एकमेव गृहं मूषाविंशतेर्वहनाद्भवेत्
सङ्ख्येयं दशशालानां मूषाभेदप्रचारतः १५७

प्रयुतं चत्वार्ययुतान्यष्टसहस्राणि पञ्च शतानि च
षट्सप्ततिर्गृहाणि च दशशालेष्वेकसङ्ख्येयम् १५८
चतुःशालादिगेहानि यावन्त्यादशशालतः
चतुर्गुणानि प्रत्याशं तान्यलिन्देन निर्दिशेत् १५९
एकद्वित्रिचतुःशालवेश्मनां सङ्गमान्मिथः
गृहाणि दशशालान्तान्येवमुक्तानि विस्तरात् १६०
समारभ्य चतुःशालं दशशालान्तवेश्मनाम्
सङ्ख्यामिदानीमैक्येन सर्वेषामभिदध्महे १६१
मूषाभेदेन लक्षाणि स्युस्त्रयोदश वेश्मनाम्
सहस्राणयष्टनवतिस्तथा वेश्मानि षोडश १६२
मूषासंस्थानभेदेन भिन्नानां वेश्मनां पुनः
जायन्ते कोटिशो भेदा यस्मान्नोक्तानि तान्यतः १६३
इत्थं चतुःशालमुखानि वेश्मान्युक्तानि यावद्दशशालमत्र
शालाप्रभेदेन मिथोऽभिषङ्गात्सङ्ख्या च तेषामुदिता यथावत् १६४
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे समस्तगृहाणां सङ्ख्याकथनं नाम पञ्चविंशोऽध्यायः

अथ आयादिनिर्णयो नाम षड्विंशोऽध्यायः

इदानीमभिधास्यामः सूत्रपातविधेः क्रमम्
शस्ते मासि सिते पक्षे विदध्यात्तं शुभेऽहनि १
चैत्रे शोकाकुलो भर्ता वैशाखे च धनान्वितः
ज्येष्ठे गृही विपद्येत नश्यन्ति पशवः शुचौ २
श्रावणे धनवृद्धिः स्यान्नभस्ये न वसेद्गृहे
कलहश्चाश्विने मासि भृत्या नश्यन्ति कार्त्तिके ३

मार्गशीर्षे धनप्राप्तिः सहस्ये कामसम्पदः
माघे वह्निभयं चैव फाल्गुने श्रीरनुत्तमा ४
द्वितीया पञ्चमी मुख्या सप्तमी नवमी तथा
एकादशीत्रयोदश्यस्तिथयः स्युः शुभावहाः ५
चन्द्रताराबलं भर्तुरनुकूलं च शस्यते
इयं हि सूत्रपाताख्या क्रिया प्रासादकर्मणि ६
कार्या पुरनिवेशे च प्रारम्भे भवनस्य च
शिलानिवेशने द्वारस्तम्भोच्छ्रायादिकेषु च ७
आद्रियेत सिते पक्षे शोभने लग्न एव हि
रवौ कन्यातुलालिस्थे गृहं वरुणदिङ्मुखम् ८
न कुर्यात्तद्धि शून्यं स्यान्न च वृद्धिर्भवेत्प्रभोः
न दक्षिणमुखं कुम्भमृगधन्विस्थिते रवौ ९
कुर्वीत निष्फलं तत्स्यान्नृपदण्डवधादिकृत्
न मीनवृषमेषस्थे कुर्वीत प्राङ्मुखं रवौ १०
तद्धनघ्नं कलिक्षुद्रराजचौरार्तिकृद्यतः
रवौ मिथुनसिंहस्थे न कर्किस्थेऽप्युदङ्मुखम् ११
कुर्यात्तद्धि दरिद्रत्वं दद्याच्चरणदासताम्
आयव्ययांशकर्क्षाणि प्रवक्ष्यामोऽथ वेश्मनाम् १२
गृहमानवशात्सम्यक्कर्तुः स्थानबलाबलम्
नगरे वा पुरादौ वा दण्डैर्मानं विधीयते १३
तदलाभे करैः कार्यं सम्यगायविशुद्धये
यत्र हस्तैर्मितिः क्षेत्रे तत्रायो हस्तसंश्रितः १४

क्षेत्रालाभे तु तत्रैव ग्राह्यः स स्यादिहाङ्गुलैः
अङ्गुलैस्तु मिते क्षेत्रे सोऽङ्गुलैस्तदलाभतः १५
पादैर्वाथ यवैर्वापि ग्राह्यः क्षेत्रानुसारतः
गृहेषु कर्महस्तेन मानं स्वामिकरेण वा १६
देवतानां तु धिष्ण्येषु कर्महस्तेन केवलम्
दैर्घ्यं हन्यात्पृथुत्वेन हरेद्भागं ततोऽष्टभिः १७
यच्छेषमायं तं विद्याच्छास्त्रदृष्टं ध्वजादिकम्
ध्वजो धूमोऽथ सिंहश्च श्वा वृषः खरकुञ्जरौ १८
ध्वाङ्क्षश्चेति त उद्दिष्टाः प्राच्याद्यासु प्रदक्षिणम्
अन्योन्याभ्हिमुखास्ते च कामं स्वच्छन्दचारिणः १९
पूर्वाचार्यैः समुद्दिष्टा आयवृद्धिविधायकाः
वृषसिंहगजाः शस्ताः प्रासादपुरवेश्मसु २०
ध्वजेऽर्थलाभः सन्तापो धूमे भोगो मृगाधिपे
कलिः शुनि धनं धान्यं वृषे स्त्रीदूषणं खरे २१
गजे भद्राणि दृश्यन्ते ध्वाङ्क्षे तु मरणं ध्रुवम्
वृषस्थाने गजं कुर्यात्सिंहं वृषभहस्तिनोः २२
न कुर्याद्वृषमन्यत्र शस्यते सर्वतो ध्वजः
कल्याणं कुरुते सिंहो ब्राह्मणस्य विशेषतः २३
क्षत्रियस्य गजः शस्तो वृषभः शस्यते विशः
शूद्रस्य ध्वज एवैकः शस्यतेऽर्थप्रदः सदा २४
एवमेते गृहादीनामायाः सर्वे प्रकीर्तिताः
प्रदद्यादासने सिंहमातपत्रेषु तु ध्वजम् २५

चिह्नेष्वपि च सर्वेषु चामरव्यजनादिषु
सिंहं गजं वा शस्त्रेषु रथेषु कवचेषु च २६
सार्यश्वगजपर्याणेष्विभं वृषभमेव च
अर्थधारणपात्रेषु शयनेषु मतङ्गजम् २७
याने च वाहने चैव मतिमान् योजयेद्गजम्
प्रासादप्रतिमालिङ्गपीठमण्डपवेदिषु २८
कुण्डेषु च ध्वजं दद्याद्देवोपकरणेषु च
आयो गृहवदुद्वाहवेदीमण्डपयोर्भवेत् २९
महानसे वृषं दद्याज्जलाधारे जलाशये
स्थाल्यां भोजनपात्रे च कोष्ठागारेऽन्नधारणे ३०
एतद्गृहे तथा दद्याद्गृहोपकरणेषु च
वृषभं गजशालायां प्रदद्याद्गजमेव वा ३१
वृषं तुरगशालासु गोशालागोकुलेषु च
गजाश्ववृषशालासु सिंहं यत्नेन वर्जयेत् ३२
अधमानां खरध्वाङ्कधूमश्वानः शुभावहाः
धूमोऽग्निजीविनां शस्तो ध्वाङ्क्षः सन्न्यासिनां हितः ३३
स्वगणानां श्वपाकानां स्ववेश्मानां खरः शुभः
नटनर्तकवेश्मेषु परयस्त्रीणां खरः शुभः ३४
कुलालरजकादीनां तथा गर्दभजीविनाम्
गृहादिषु क्षेत्रफलं गणयेदष्टभिर्भजेत् ३५
त्रिघनेन भजेच्छेषं नक्षत्रेऽष्टहृते व्ययः
पिशाचो राक्षसो यक्ष इति त्रेधा व्ययो मतः ३६

साम्याधिक्यन्यूनताभिरायतः स्याद्यथाक्रमम्
व्ययं क्षेत्रफले क्षिप्त्वा गृहनामाक्षराणि च ३७
भागं त्रिभिर्हरेत्तत्र यच्छेषं सोंऽशको भवेत्
चतुरङ्को यथा मन्त्रो मुख्यो लग्ने नवांशकः ३८
तथा गृहादिषु प्रोक्तं मुख्यत्वेनांशकत्रयम्
इन्द्रो यमश्च राजा च त्रयो नामाभिरंशकाः ३९
स्वनामतुल्यफलदा विज्ञातव्यास्त्रयोऽपि च
गणयेत्स्वामिनक्षत्राद्यावत्स्याद्भवनस्य भम् ४०
नवभिर्भाजिते तस्मिञ्शेषं तारा प्रकीर्तिता
जन्मसम्पद्विपत्क्षेमपापसाधकनैधनीः ४१
मैत्रीपरममैत्र्यौ च प्राहुः संज्ञाः समाः फले
त्रिसप्तपञ्चमीर्भर्तुर्गृहतारा विवर्जयेत् ४२
आद्याद्वितीयाष्टम्यस्तु ताराः स्युरिह मध्यमाः
तथा ऋक्षेऽपि चानिष्टे चन्द्रेऽष्टमगतेऽपि च ४३
नयते दुरितं तारा चतुःषरगणवती नृणाम्
सुरराक्षसमर्त्याख्या ऋक्षाणां स्युर्गणास्त्रयः ४४
यद्गणर्क्षो भवेद्भर्ता तद्गणर्क्षं गृहं शुभम्
मृगाश्विरेवतीस्वात्यो मैत्रं पुष्यपुनर्वसू ४५
हस्तः श्रवण इत्येष देवाख्यो नवको गणः
विशाखा कृत्तिकाश्लेषा नैर्ऋतं वारुणं मघा ४६
चित्रा ज्येष्ठा धनिष्ठेति नवको राक्षसो गणः
आर्द्राभरणयौ रोहिणयौ तिस्रः पूर्वास्तथोत्तराः ४७

इति नक्षत्रनवकं विज्ञेयं मानुषे गणे
गणसाम्यं शुभा तारा यस्यायातृ व्ययोऽल्पकः ४८
हितोंऽशकश्च तद्वेश्म भर्तुः शुभफलप्रदम्
आयो व्ययश्च योनित्वं ताराश्च भवनांशकाः ४९
गृहनामेति चिन्त्यानि करणानि गृहस्य षट्
त्रिभिः शुभैः शुभं वेश्म द्वाभ्यामेकेन चाशुभम् ५०
करणैश्चतुराद्यैस्तु शुभैरतिशुभं भवेत्
न समायव्ययं वेश्म नाव्ययं नाधिकव्ययम् ५१
न द्वितीयांशमसदृग्योनिभं च न कारयेत्
भर्तृतुल्याभिधानं च गृहं दूरात्परित्यजेत् ५२
समसप्तकमेकर्क्षं तृतीयैकादशं तथा
चतुर्थदशकं चेति कर्तव्यं मन्द्रिरं सदा ५३
षट्कोष्ठकं त्रिकोणं च वर्ज्यं द्विर्द्वादशं तथा
षट्कोष्ठके मृतिर्दैन्यं वियोगश्च भवेद्गृहे ५४
त्रिकोणे वसतां दुःखं वैधव्यं च प्रजायते
द्विर्द्वादशे पुत्रपौत्रगुरुबन्धुधनक्षयः ५५
हृतेऽष्टभिः क्षेत्रफले खनेत्रशशिभाजिते
शेषं जीवितमेतस्मिन् पञ्चभक्ते भवेन्मृतिः ५६
सभुजं सहषड्दारु मुखमण्डपसंयुतम्
आयामतः पृथुत्वाच्च मानं कृत्वा विभाजयेत् ५७
सर्वतः शोधितं वास्तु यच्च सम्यङ्मितं भवेत्
स्वामिनस्तद्भवेद्धन्यं स्थपतेश्च यशस्करम् ५८

अर्चितं वर्धते वास्तु नारीभिः पशुभिर्नरैः
कीर्त्त्यायुर्धनधान्यैश्च प्रमोदैस्तु महोत्सवैः ५९
मेरुश्च खण्डमेरुश्च पताका सूचिका तथा
उद्दिष्टं नष्टमिति षट् छन्दांसीह प्रचक्षते ६०
एकाद्येकोत्तरान् कोष्ठान् विन्यसेदिच्छयात्मनः
आद्यादारभ्य तद्वृद्धिर्यथा स्यात्पार्श्वयोः समम् ६१
मेरोरेकाधिका सङ्ख्या शरावस्येव चाकृतिः
प्रथमे कोष्ठके रूपमन्तं यावच्च पार्श्वयोः ६२
आसनोर्ध्वस्थयोर्न्यस्येन्मध्ये सङ्कलितं पृथक्
तस्मिन्निष्टविकल्पानां सङ्ख्या स्यादन्त्यपङ्क्तिगा ६३
खण्डमेरुं तु विन्यस्येत्तद्वदेवैकपार्श्वतः
प्रवृद्धैः कोष्टकैस्तत्राप्यङ्काः प्राग्वत्फलं तथा ६४
अथापरः खण्डमेरुः कोष्ठांस्तत्रेष्टसङ्ख्यया
कृत्वैकापचितान् वामविभागापचितानधः ६५
एकाद्येकोत्तरानङ्कानाद्यपङ्क्तौ निवेशयेत्
अन्यासु पङ्क्तिष्वाप्रान्तं शून्यान्याद्येषु कल्पयेत् ६६
द्वितीयेषु च कोष्ठेषु तासामेकैकमावयेत्
द्वितीयायां तृतीयादिकोष्ठकेषु यथाक्रमम् ६७
विकर्णयोगजानन्यानूर्ध्वाधोयोगसंभवान्
फलं विकर्णयोगोत्थमेकस्मिन् परिकल्पयेत् ६८
एकाधिकानभीष्टायाः सङ्ख्यायास्तिर्यगालिखेत्
कोष्ठानेकांच रूपादींस्तन्मध्ये द्विगुणोत्तरान् ६९

एकोनं पृष्ठतस्तेषामेकं द्विगुणमग्रतः
नातिक्रामेत्परां सङ्ख्यां पताकाछन्द उच्यते ७०
तद्विनेष्टाद्यगा सङ्ख्येत्येकाद्यैस्तैस्ततो गृहे
न्यस्ताङ्कसङ्ख्याः सङ्ख्याः स्युरलिन्दाद्यैः प्रकल्पिताः ७१
एकैकमिष्टस्थानेषु लिखेत्सैकेश्वतः परम्
अन्त्यादृते पूर्वपूर्वयुक्तेनायोजयेत्परम् ७२
अन्त्यादारभ्य तद्वनावेकाद्येषु च पर्ययात्
अलिन्दादिषु यत्र स्यात्सङ्ख्या सूचीं तु तां विदुः ७३
उद्दिष्टे स्थापयेत्सङ्ख्यामुद्दिष्टां सम्भवेच्च ताम्
दलयेद्रूपयुक्तां तु दलयेन्नाम सम्भवेत् ७४
लघुस्वरूपदलने सैकार्धे करणे गुरुः
यावदिष्टपदापितः स्याल्लघवोऽलिन्दकोदयः ७५
कृत्वा छन्दः समुद्दिष्टं तदन्ते लघुनि द्विकम्
न्यसेदेकं गुरूणां च द्विगुणं द्विगुणं ततः ७६
व्यत्ययाल्लघुनः स्थाने द्विगुणादेककं गुरोः
कुर्यात्तमाद्यस्थानाङ्कसङ्ख्यं नष्टे गृहं भवेत् ७७
प्राप्तस्यैकं कोष्ठमेकैकवृद्ध्या न्यस्येदूर्ध्वं पङ्क्तयो यावदिष्टाः
इष्टानेकादील्लिखेदानुपूर्व्या कर्णेनाधः शून्यरूपे च दद्यात् ७८
कर्णस्थाङ्कश्लेषतोऽङ्के भवेद्यस्तं विन्यस्येत्कोष्ठकेषु क्रमेण
उद्दिष्टाङ्को भद्रसङ्ख्यानि मध्ये याभ्यः कर्णश्लेषतो मूषिकास्ताः ७९
एकादिषु द्विगुणितेष्विह यावदिष्टमूषाक्रमव्युपहितेष्वथ तेषु विद्यात्
उद्दिष्टवेश्मकृतनिर्गममार्गमूषासत्काङ्कसैकयुतिनिर्मितसङ्ख्यमोकः

८०

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
आयव्ययनक्षत्रराशिफलतद्योगताराङ्कयोनितच्छन्दोगनिर्णयो नाम षड्विंशोऽध्यायः

अथ सभाष्टकं नाम सप्तविंशोऽध्यायः

नन्दा भद्रा जया पूर्णा सभा स्याद्भाविता तथा
दक्षा च प्रवरा तद्वद्विदुरा चाष्टमी मता १
चतुरश्रीकृते क्षेत्रे ततः षोढा विभाजिते
मध्ये पदचतुष्कं स्यात्सीमालिन्दस्तु भागिकः २
तद्बाह्योऽलिन्दकस्तद्वद्भवेत्प्रतिसराभिधः
प्राग्ग्रीवाख्यस्तृतीयश्च बहिः क्षेत्राच्चतुर्दिशम् ३
निसृष्टसौधैर्यैर्वा स्यादेकस्यां वा यदा दिशि
नन्दा भद्रा जया पूर्णा क्रमेण स्युः सभास्तदा ४
षड्भागभाजिते क्षेत्रे कर्णभित्तिं निवेशयेत्
सभा स्याद्भाविता नाम सप्राग्ग्रीवात्र पञ्चमी ५
स्तम्भान्षट्त्रिंशदेतासु पञ्चस्वपि निवेशयेत्
स्तम्भान्प्राग्ग्रीवसंबद्धान्पृथगेभ्यो विनिर्दिशेत् ६
दक्षेति षष्ठी परितस्तृतीयालिन्दवेष्टिता
प्रवरा सप्तमी द्वारैर्युक्तैषा परिकीर्तिता ७
प्राग्ग्रीवद्वारसंयुक्ता विदुरेत्यष्टमी सभा

सभानामिदमष्टानां लक्षणं समुदाहृतम् ८
इत्यष्टानां लक्ष्म सम्यक्सभाना-
मेतत्प्रोक्तं दिग्भवालिन्दभेदात्
तद्वद्द्वारालिन्दसंयोगश्च
ज्ञातेऽत्र स्याद्भूभृतां स्थानयोगः ९

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे सभाष्टकं नाम सप्तविंशोऽध्यायः

अथ गृहद्रव्यप्रमाणानि नामाष्टाविंशोऽध्यायः

उपादेयानि यान्यत्र परित्याज्यानि यानि च
गृहद्रव्यप्रमाणानि तानीदानीं प्रचक्ष्महे १
द्वारस्य गृहविस्तारैर्हस्ततुल्याङ्गुलैर्भवेत्
उच्छ्रायः सप्तभिर्युक्तैर्विस्तृतिस्तु तदर्धतः २
प्रकल्पयेद्गृहद्वारं क्रमेणैव कनीयसा
त्रैराशिकेन मध्यानां द्वादशांशं परित्यजेत् ३
इत्युच्छ्रितिस्तदर्धेन सर्वेषामपि विस्तरः
उच्छ्रायमुत्तमानां तु कुर्यादष्टांशवर्जितम् ४
विस्ताराङ्गुलसंयुक्तां कुर्यादतिकनियसाम्
चतुःषष्टिगृहद्वारमुदयेनार्धविस्तृतम् ५
विस्तारहस्ततुल्यानि षष्ट्या पञ्चशताथवा
संयुतान्यङ्गुलानि स्यादुच्छ्रायोऽर्धेन विस्तृतिः ६
गृहोत्सेधेन वा त्र्यंशहीनेन स्यात्समुच्छ्रितिः

तदर्धेन तु विस्तारो द्वारस्येत्यपरो विधिः ७
द्वारोच्छ्रायकरैस्तुल्येष्वङ्गुलेषु विनिक्षिपेत्
चत्वारि पेद्यापिण्डः स्यात्सपादं विदधीत तम् ८
सार्धं वा सत्रिभागं वा द्विगुणं चाधिकं न तु
एवं कृते भवेत् द्वारपेद्याया विस्तृतिः स्फुटा ९
सार्धेन पेद्यापिण्डेन पिण्डं स्यादम्बरो भवेत्
सार्धस्तु पेद्याविस्तारः स्यादुदुम्बरविस्तृतिः १०
पेद्यापिण्डेन तुल्या स्याच्छाखाया विस्तृतिः शुभा
सार्धया वैतया रूपशाखाया अपि विस्तृतिः ११
विस्तारार्धेन पेद्यायाः खल्वशाखा विधीयते
रूपशाखासमा वा स्यात्सार्धा वा बाह्यमण्डला १२
पादोना त्र्यंशहीना वा विस्तारादर्धमेव वा
प्रासादेषु च तुल्यः स्याद्द्वारशाखाविनिर्गमः १३
आद्या शाखा भवेद्देवी द्वितीया नन्दिनीति च
तृतीया सुन्दरी नाम चतुर्थी स्यात् प्रियानना १४
भद्रेति पञ्चमी शाखा प्रशस्ताः पञ्च वेश्मनि
अतोऽधिकास्तु याः शाखा गृहद्वारि न ताः शुभाः १५
विस्तारात् षोडशो भागश्चतुर्हस्तसमन्वितः
तलोच्छ्रयः प्रशस्तोऽयं भवेद्विदितवेश्मनाम् १६
सप्तहस्तो भवेज्ज्येष्ठे मध्यमे षट्करोन्मितः
पञ्चहस्तः कनिष्ठे तु विधातव्यस्तथोदयः १७
ज्येष्ठे भवेत्सप्तदशहस्ताच्छाला प्रविस्तृता

मध्यमे दशहस्तात्तु पञ्चहस्तात्कनीयसि १८
उदुम्बरार्थे बाहुल्यं तलन्यासं तु कारयेत्
तलन्याससमं पट्टमलिन्दस्य परिग्रहे १९
द्वारविस्तारपादेन स्तम्भकोटिर्विधीयते
साष्टांशेनाधिकेनाथ सत्रिभागे वा पुनः २०
कुर्यादेकादशांशेन तथास्यैव प्रपालकम्
स्तम्भान् कुर्यादृतेऽष्टांशान्नव द्वादशधाथवा २१
भागैस्ततः स्वार्धसमैरर्धभागसमन्वितैः
अधस्ताडष्टभागा स्यात्स्तम्भस्य प्रतिपालना २२
स्तम्भमूलस्य विस्तारादर्धेन स्थलनिर्गमः
तदर्धेन विधातव्यो मसूरकविनिर्गमः २३
उत्कालकसमुच्छ्रायः स्तम्भपिण्डसमः शुभः
कुम्भिकोत्कालवत्पिण्डे विस्तारेऽष्टांशसम्मिता २४
प्रागुक्तस्तम्भभागेन सपादेन विधीयते
दीर्घत्वमाद्यपत्राणां शेषाणां पादहानितः २५
पादः पादो भवेन्नयूनः पात्राणां रसनोच्छ्रयात्
सार्धभागोच्छ्रिता कार्या रसना कण्टकोपमा २६
सार्धपादोच्छ्रिता यद्वा जङ्घा शेषं यथोदितम्
इत्थं स्यात्पद्मकस्तम्भो युक्त्या युक्तस्वरूपकैः २७
अष्टाश्रो वा विधातव्यः स्तम्भसूत्रपरिक्रमात्
तद्विस्तारसमं त्यक्तोत्सेधं भागान्विभाजयेत् २८
अष्टाश्रच्छेदमानेन बाह्यसूत्रानुपल्लवान्

विदध्यान्मध्यभागे तु कोणांश्च पल्लविकाकुलान् २९
घटिका पुष्पमालाभिः पल्लवैश्चोपशोभिता
छेदभागः समः कार्यो बहिर्भागविवर्जितः ३०
घटपल्लवको नाम स्तम्भोऽयं परिकीरितः
विहितो वेश्मनामेष स्वामिनः श्रेयसे भवेत् ३१
कुबेरो वा विधातव्यः षोडशाश्रक्रियान्वितः
ऊर्ध्वतः पल्लवाकीर्णो जङ्घास्य चतुरश्रिका ३२
श्रीधरश्च भवेद्वृत्तः कल्पनास्य कुबेरवत्
एवं गृहाणां चत्वारः स्तम्भा लक्ष्मभिरीरिताः ३३
स्तम्भमूलस्य विस्तृत्या तलपदस्य विस्तृतिः
सपादया विधातव्या बाहुल्यं पादहीनया ३४
स्तम्भेन तुल्यं विस्तारे बाहल्ये पदसम्मितम्
हीरग्रहणमायामे स्तम्भाग्रात्त्रिगुणं भवेत् ३५
हीरग्रहणविस्तारं भागात्सप्त प्रकल्पयेत्
तत्स्यात्सृष्टोत्तरं भागं भागेनेष्टं प्रवेशनम् ३६
तस्याधस्तात्त्रिकरटेन त्रिभागं लम्बितेन च
लिखेदुभावर्धचन्द्रौ पार्श्वयोरुभयोरपि ३७
खल्वं कृत्वा ततो मध्यं भागद्वयमधोगतम्
कुर्यात्त्रिकरटकं कान्तं तुम्बिकामथ लम्बिकाम् ३८
द्वयोर्मध्येऽपरं भूयो द्विभागस्थं च करटकम्
तुम्बिकां लम्बमानां वा पत्रजातिविभूषिताम् ३९
तस्याश्चापरतीरं स्यात्पद्मपत्र्या विभूषितम्

तलपट्टसमः पेद्रो विस्तारात्पिण्डतोऽपि च ४०
पट्टत्र्यंशेन तीरे स्यात्पट्टपिण्डार्धनिर्गमः
स्तम्भाग्रेण समा कार्या विस्तारस्थौल्यतस्तुला ४१
तदर्धेन जयन्तीनां कर्तव्ये पिण्डविस्तृती
ताभ्यो विधेयाः पादोनाः सन्धिपाला यदृच्छया ४२
निर्यूहेषु च ये पट्टाः पादोनांस्तांस्तु कारयेत्
तुलापट्टाश्च पादोनास्तदर्धेन जयन्तिकाः ४३
तुलार्धेन विधातव्या प्रतिमोकस्य विस्तृतिः
पट्टस्योपरि कण्ठः स्याद्भूषितो रूपकर्मणा ४४
वेदिकाजालरूपाद्यो निर्यूहः संप्रशस्यते
विधातव्या च सच्छत्रा निबद्धाङ्गणवापिका ४५
स्तम्भपट्टांश्च विस्तीर्णान् सपादांस्तत्र कल्पयेत्
तुलापिण्डाः समाः कार्याः सङ्ग्रहैः सुदृढैर्युताः ४६
वेदिकाजालसम्पन्नं तलं कार्यं मनोरमम्
भूमौ भूमौ भवेत्तच्च द्वादशांशविवर्जितम् ४७
प्रणाल्यः सर्वतः कार्या मूलग्राहाग्रनिर्गमाः
दण्डच्छाद्यं गृहेषु स्याज्ज्ञेयं तच्च चतुर्विधम् ४८
भूताख्यं तिलकं तद्वन्मण्डलं कुमुदं तथा
गृहच्छाद्येषु तेषु स्यादुच्छ्रायोऽपि चतुर्विधः ४९
क्षेत्रतुर्यांशतः कार्यो दैर्घ्येणच्छाद्यदण्डकः
तदर्धं मुष्टिकायामो दण्डत्र्यंशेन लम्बना ५०
चतुरश्रं समं कान्तं मधुरं सुदृढं घनम्

वेश्मनां छाद्यकं कार्यं भूतं नाम्ना सुपूजितम् ५१
तस्यैवाष्टादशो भागो यदा स्यादुच्छ्रयेऽधिकः
उदयस्तिलको नाम शस्तः स गृहकर्मणि ५२
द्वाभ्यामुच्चतरः पूर्वो मण्डलः कुमुदस्त्रिभिः
अभित्तिस्थे भवेच्छाद्ये चन्द्ररेखाविभूषितम् ५३
गुणरागान्विता भित्तिर्यद्वा घनचयात्मिका
तत्रच्छाद्यं भवेच्चान्यदवधारणसंज्ञितम् ५४
सिंहकर्णकपोतालीघण्टाकर्णार्धपक्षगाः
ध्वजच्छत्रकुमारांश्च गृहेषु परिवर्जयेत् ५५
न पक्षराजिध्वजसिंहकर्णकुमारघण्टाः समरालपल्लीः
न प्रस्खलार्धानि नचैव पत्राण्ययोजयेद्वेश्मसु मङ्गलार्थी ५६
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे गृहद्रव्यप्रमाणानि नामाष्टाविंशोऽध्यायः

अथ शयनासनलक्षणं नाम एकोनत्रिंशोऽध्यायः

इदानीमभिधास्यामः शयनासनलक्षणम्
शुभाशुभपरिज्ञानं येन सम्यक्प्रजायते १
मूत्रे मुहूर्ते पुष्यस्थे शीतरश्मौ शुभेऽहनि
सम्पूज्य देवताः सम्यक्कर्मारम्भं समाचरेत् २
वृक्षास्तत्र प्रशस्यन्ते चन्दनस्तिनिशोऽर्जुनः
तिन्दुकः सालशाकौ च शिरीषासनधन्वनाः ३
हरिद्रुर्देवदारुश्च स्यन्दनोकौ सपद्मकौ

श्रीपर्णी दधिपर्णश्च शिंशपान्येऽपि ये शुभाः ४
गृहकर्मणि ये नेष्टा वृक्षास्तेऽत्रापि निन्दिताः
हेम्ना रूयेण चानद्धा गजदन्तेन वा शुभा ५
आरकूटेन वा नद्धा शय्या कार्या विचक्षणैः
पूर्वच्छिन्नं यदा दारु शयनासनहेतवे ६
आदीयते तदारम्भे निमित्तान्युपलक्षयेत्
दध्यक्षतान् पूर्णकुम्भं रत्नानि कुसुमानि वा ७
सुगन्धद्रव्यवस्त्राद्यान् मत्स्याश्वयुगलं तथा
मत्तवारणमन्यांश्च शुभान् वीक्ष्यादिशेच्छुभम् ८
कर्माङ्गुलं समुद्दिष्टं वितुषैरष्टभिर्यवैः
अष्टोत्तरशतं तेषां शय्या ज्येष्ठा महीभुजाम् ९
मध्या महीभुजां शय्या शतं स्याच्चतुरुत्तरम्
शतं कनीयसी प्रोक्ता नृपाणां विजयावहा १०
नवतिर्नृपपुत्रस्य मन्त्रिणः सा षडुज्झिता
द्वादशोना बलपतेस्त्रिषट्कोना पुरोधसः ११
आयामार्धेन विस्तारं सर्वं शय्यासु कल्पयेत्
यद्वा निजाष्टभागेन षड्भागेनाथवाधिकम् १२
विप्राणां शस्यते शय्या दैर्घ्येणाङ्गुलसप्ततिः
द्वाभ्यां द्वाभ्यामङ्गुलाभ्यां हीना स्याच्छेषवर्णिनाम् १३
बाहल्यमुत्पलस्य स्यादुत्तमस्याङ्गुलत्रयम्
अङ्गुलद्वितयं साधं मध्यस्य द्वे कनीयसः १४
बाहल्यमीशादण्डस्य कुर्यादुत्पलसम्मितम्

सार्धं सपादं सत्र्यंशं तस्य विस्तारमुत्पलात् १५
विस्तारार्धेन शय्यायाः सकुष्यस्य विधीयते
तत्पादस्योदयो मध्यहीनौ द्विचतुरुज्झितौ १६
अर्धेन मध्यविस्तारान्मध्ये बाहल्यमिष्यते
त्रिभागहीनमिच्छन्ति पादोनमपि केचन १७
स्थौल्येन पादोऽधः शीर्षादुत्पलेन समो भवेत्
मध्ये सपादः सार्धश्च तले वृद्धिः क्रमेण सा १८
षड्भागोऽस्याधिको यद्वा मध्ये त्र्यंशाधिकस्तले
तत्कुष्यमुत्पलत्र्यंशो मूले तस्यार्धमग्रतः १९
उत्सेधतुल्यो विस्तारः कार्यो वा द्व्यङ्गुलाधिकः
सपत्रकलिकापत्रपुटग्रासविभूषितः २०
कुर्यात्प्रदक्षिणाग्राणि शय्याङ्गानि समन्ततः
ऊर्ध्वाग्रा निखिलाः पादाः स्वामिनो वृद्धिहेतवे २१
श्रेष्ठैकद्रव्यजा शय्या मिश्रद्रव्या न शस्यते
एकदारुं प्रशंसन्ति द्विदारुर्भयमावहेत् २२
त्रिदारुघटितायां तु स्वामिनो नियतो वधः
शय्यायां जायते यस्मात् तस्मात्तां परिवर्जयेत् २३
मूलमग्रेण संयुक्तमपसव्यं विगर्हितम्
मूलं मूलेन वा विद्धमेकाग्रे द्वे च दारुणी २४
मध्ये व्रणो मृत्युकरस्त्रिभागे व्याधिकारकः
क्लेशावहश्चतुर्भागे शिरस्थो द्रव्यहानिकृत् २५
निर्दोषगात्रे पर्यङ्के पापस्वप्नो न दृश्यते

ग्रन्थिकोटरवत्कुर्यात्तस्मान्न शयनासनम् २६
आसनं शयनीयं च ग्रन्थिकोटरवर्जितम्
बहुपुत्रकरं प्राहुर्धर्मकामार्थसाधनम् २७
आरोहणे प्रचलति शयने कम्पते तथा
विदेशयानकलहौ ते क्रमेण प्रयच्छतः २८
सुश्लिष्टां तामतः कुर्यान्निर्दोषां वर्णशालिनीम्
दृढां स्थिरां च स्थपतिः पत्युः कामविवृद्धये २९
निष्कुटं कोलदृक् क्रोडनयनं वत्सनाभकम्
कालकं बन्धकं चेति छिद्रसंक्षेप ईरितः ३०
घटवत् सुषिरं मध्ये सङ्कटास्यं च निष्कुटम्
कोलाक्षं नीडमिच्छन्ति माषनिष्पावमात्रकम् ३१
अध्यर्धपर्वदीर्घं च विवर्णं विषमं तथा
तदिह क्रोडनयनं छिद्रमाहुर्महर्षयः ३२
भिन्नं पर्वमितं वामावर्तं स्याद्वत्सनाभकम्
कालकं कृष्णकान्ति स्याद्विनिर्भिन्नं तु बन्धकम् ३३
छिद्रं दारुसवर्णं यत्तन्नो शुभकरं तथा
निष्कुटेऽर्थक्षयः कोललोचने कुलविद्रवः ३४
शस्त्राद्धीः क्रोडनयने वत्सनाभे रुजो भयम्
कालके बन्धकाख्ये च कीटविद्धे च नो शुभम् ३५
सर्वत्र प्रचुरग्रन्थि दारु सर्वमनिष्टदम्
शय्यार्थे कथितैः क्लृप्तं दारुभिः शस्तमासनम् ३६
उपवेशसुखं मानं प्रशस्ताय प्रकल्पितम्

पुष्करः सूदहस्तश्च वृत्तोऽङ्गुलचतुष्टयात् ३७
आरभ्य विस्तरात्कार्यस्तावद्यावन्नवाङ्गुलम्
पुष्करव्यासतो दण्डस्तस्य कार्यश्चतुर्गुणः ३८
फलकः पुष्करार्धेन तत्तुल्यश्चास्य भूलकः
स्थूलः स्याच्चतुरंशेन दण्डपुष्करविस्तरात् ३९
खातं च पुष्करस्यान्तस्तावद्गाम्भीर्यमिष्यते
प्रशस्तसारदारूत्थः कर्तव्योऽस्य प्रयोजनम् ४०
परिवेषणमन्यच्च पच्यमानानघट्टकम्
कार्यः कङ्कतकः श्लक्ष्णः प्रशस्तमृदुदारुजः ४१
आरभ्य दैर्घ्येणाष्टभ्यः स्याद्यावद्द्वादशाङ्गुलम्
सार्धाङ्गुलं चतुर्भागं विस्तारेण च दैर्घ्यतः ४२
मध्ये च तस्य बाहल्यं विस्ताराष्टांशतो भवेत्
एकतः स्थूलविस्तारा भवेयुस्तस्य दन्तकाः ४३
अन्यतस्तु घनाः सूक्ष्मास्तीक्ष्णाः कार्यास्तथाग्रतः
मध्ये त्रिभागमुत्सृज्य दन्तका भागयोर्द्वयोः ४४
त्रिभिर्भागे हृते तेषां शेषस्तान् विवर्जयेत्
गजदन्तमयः श्रेष्ठस्तथा शाखोटवृक्षजः ४५
मध्यमो दारुभिः शेषैर्जघन्योऽसारदारुजः
रूपकैः स्वस्तिकाद्यैर्वा स मध्ये स्यादलङ्कृतः ४६
यूकाद्यपनये केशविवेके चोपयुज्यते
अङ्गुलेनाधिके पादात्कार्ये दैर्घ्येण पादुके ४७
कृतायां पञ्चधा तस्यां कुर्याद्भागत्रयं पुरः

पञ्चाङ्गागद्वयं तत्र सङ्ग्रहोऽस्या विधीयते ४८
अङ्गुलत्रयमुत्सेधो विस्तारोऽङ्घ्रयनुसारतः
अङ्गुल्यङ्गुष्ठयोर्मध्यभागे मत्स्याद्यलङ्कृतौ ४९
कर्तव्यौ कीलकौ काष्ठदन्तशृङ्गादिसम्भवौ
गजेन्द्रदन्तः श्रीखण्डश्रीपर्ण्यौ मेषशृङ्गिका ५०
शस्ताः पादुकयोः शाकक्षीरिणीचिरबिल्विकाः
इदमिह शयनानामासनानां च लक्ष्म
प्रकटितमनु दर्व्याः कङ्कतस्यापि सम्यक्
शुभमथ विपरीतं पादुकानां च विद्वान्
सकलमिति विदित्वा पूज्यतामेति लोके ५१

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे शयनासनलक्षणं नाम एकोनत्रिंशोऽध्यायः

अथ राजगृहं नाम त्रिंशोऽध्यायः

अष्टोत्तरशतं ज्येष्ठं मध्यं स्यान्नवतिं करान्
जघन्यं सप्ततिकरान् राजवेश्म प्रशस्यते १
अतो हीनं न कर्तव्यं महतीं श्रियमिच्छता
चतुरश्रीकृते क्षेत्रे दशधा प्रविभाजिते २
भागार्धं शस्यते भित्तिरादिकोणसमाश्रिता
चतुष्को भागिको मध्ये चतुःस्तम्भसमन्वितः ३
अलिन्दस्तद्बहिः कार्यः स्तम्भैर्द्वादशभिर्वृतः
विंशत्या स्याद्वरैर्युक्तो द्वितीयोऽलिन्दकस्ततः ४

स्यादष्टाविंशतिस्तम्भस्तृतीयश्चाप्यलिन्दकः
षट्त्रिंशता चतुर्थश्च स्तम्भानां परिकीर्तितः ५
एवं स्तम्भशतं मध्ये प्रोक्तं पृथ्वीजये बुधैः
द्वाराणि चास्य चत्वारि पञ्चशाखानि जायते ६
चत्वारो निर्गमास्तस्य प्रोक्ताः सर्वे विभागिकाः
दिक्षु सर्वासु कर्तव्यमेवं भद्रनिवेशनम् ७
अर्धेन मध्यभित्तेस्तु भित्तिर्भद्रस्त्रये भवेत्
भद्रे भद्रे धराणां स्याद् विंशतिश्चाष्टभिर्युता ८
मुखभद्रं भवेत्युक्तं वेदिकामत्तवारणैः
क्षेत्रभागोदयाद्या भूराभूमिफलकान्तरम् ९
आदिभूम्युदयार्धेन पीठं चास्य प्रकल्पयेत्
भागान्नवोदयं कृत्वा भागेनैकेन कुम्भिका १०
कर्तव्याष्टांशयुक्तेन स्तम्भो भागचतुष्टये
पादयुक्तं विधातव्यो भागेनोत्कलकं तथा ११
हीरग्रहणकं कार्यं भागं पादविवर्जितः
सपादभागिकः पट्टः स्तम्भकेन समन्वितः १२
पट्टार्धेन जयन्त्यः स्युर्भूमौभूमावयं क्रमः
क्लृप्तभागोदयादर्धं भूमिष्वन्यासु हीयते १३
पञ्चभागप्रमाणं तु सच्छाद्यं नवमं तलम्
वेदिकाया अधश्छाद्यं सार्धभागत्रयोन्मितम् १४
कण्ठेन युक्तं कर्तव्यं वेदिका पिहिता यथा
तस्याः कण्ठे विधातव्यस्तन्मध्ये सार्धभागिकः १५

वेदिकाविस्तरः कार्यो भागांस्तत्रार्धसप्तमान्
वेदिकोपरि घरटा च सार्धभागाश्चतुर्दश १६
भागद्वयं सपादं तु करठः पट्टं तु पञ्चभिः
चतुर्भिश्च द्वितीयं च तृतीयं च त्रिभिस्ततः १७
सद्मशीर्षश्च दातव्यो यथाशोभं यथारुचि
क्षेत्रभागसमः कार्यः कलशश्शूलिकावधेः १८
उदयार्धेन भूमेः स्युरन्तराणि तलानि च
यथाशोभं तु कर्तव्यं पीठं तस्य सुशोभितम् १९
सार्धभागद्वयं चास्य कार्या खुरघरण्डिका
जङ्घा भागचतुष्कं च ततश्छाद्यं प्रयोजयेत् २०
भागद्वयं च पादोनं छाद्यपिण्डः प्रकीर्तितः
निर्गमोऽस्य चतुर्भागो हंसाख्यस्तस्य चोपरि २१
पादोनभागं कर्तव्यं ततश्छाद्यं द्वितीयकम्
जङ्घा भूमिचतुष्केण प्रासादस्य प्रकल्पयेत् २२
चतुर्थभूमिकामूर्ध्नि ततो मुण्डा निवेशयेत्
क्षणक्षणप्रवेशेन कार्याः शेषास्तु भूमिकाः २३
वेदिका च यथोक्ता स्यात्सघरटा कलशान्विता
रेखाशुद्ध्या च कर्तव्या मुण्डाः सर्वे यथायथम् २४
अर्धोदयं त्रिधा कृत्वा तृतीयं दशधा भजेत्
वामनश्चातपत्रश्च कुबेरो भ्रमरावली २५
हंसपृष्ठो महाभोगी नारदः शम्बुको जयः
अनन्तो दशमस्तेषां विधायकवशादमी २६

विधातव्याः स्थपतिभिर्मुण्डरेखाप्रसिद्धये
तमङ्गवेदिकाजालमत्तवारणशोभितम् २७
वितर्दिनिर्यूहयुतं चन्द्रशालाविभूषितम्
कर्माढ्यं बहुचित्रं च कुर्वीत पृथिवीजयम् २८
प्रासादाश्च महान्तो ये विधेयास्ते समोदयाः
अर्धोदयेन लघवो ह्यवाकोणादयं क्रमः २९
भूम्यष्टकादभ्युदयः क्षेत्रविस्तारसम्मितः
यतस्तव वधे प्रोक्तः प्रासादोऽन्यद्विभूषणम् ३०
बहवो निकरा येषु प्राङ्गणं तेषु दीयते
रेखायां प्रथमायां वा द्वितीयायामथापि वा ३१
तृतीयायां वा रेखायां तत्र संवरणाः स्मृताः
अयं भूम्युदयः कार्यः क्षेत्रे दशविभागिके ३२
न्यूनाधिकविभक्ते तु कार्यः स्यादनुसारतः
मुक्तकोणस्य लक्ष्मथ प्रक्रमागतमुच्यते ३३
चतुरश्रीकृते क्षेत्रे भागद्वादशकाङ्किते
भागश्चतुष्टो मध्येऽस्य चतुर्द्वारविभूषितः ३४
भागेन च ततोऽलिन्दो धरद्वादशकान्वितः
तद्वद् द्वितीयालिन्दोऽपि विंशत्या धारितो धरैः ३५
तृतीयश्च धरैरष्टाविंशत्यालिन्दको भवेत्
षट्त्रिंशता धरैर्युक्तः कार्योऽलिन्दश्चतुर्थकः ३६
चतुश्चत्वारिंशता स्याद् धरैर्युक्तश्च पञ्चमः
भागार्धं कारयेद् गित्तिं सार्धं भागं विमुच्य तु ३७

भागत्रयं ततः कुर्यात्प्राग्ग्रीवं दैर्घ्यविस्तृतौ
विस्तृतौ निर्गमे चैषां भद्रं भागेन कल्पयेत् ३८
भागिकं निर्गतं तस्मान्मध्येऽन्यद्भद्रमस्य हि
भागनिर्गमविस्तारं दिक्षु सर्वास्वयं विधिः ३९
चतुःपञ्चाशता स्तम्भैरेकैकं भद्रमन्वितम्
मध्ये वास्य चतुश्चत्वारिंशं स्तम्भशतं भवेत् ४०
षोडशाभ्यधिका च स्याद्भद्रस्तम्भशतद्वयी
एवं धराणां सर्वेषां भवेत् षष्ठं शतत्रयम् ४१
पृथ्वीजयवदत्रापि शेषनिर्माणमिष्यते
तृतीयभूमिकामूर्ध्नि निर्गमेष्वखिलेष्वपि ४२
प्राङ्गणानि विधेयानि विशेषोऽत्रैष कीर्तितः
सर्वतोभद्रसंज्ञेऽथ शत्रुमर्दननामपि ४३
अयमेव विधिः कार्यो मुण्डरेखाप्रसिद्धये
श्रीवत्सस्यापि मध्ये स्यात् स्तम्भाद्यं मुक्तकोणवत् ४४
सार्धं भागं परित्यज्य भागत्रितयविस्तृतम्
कर्णप्राग्ग्रीवमेतस्य भगेन च विनिर्गतम् ४५
भद्रं तस्यापि कर्तव्यं भागविस्तारनिर्गमम्
मुक्तकोणवदस्यापि मध्यभद्रं विधीयते ४६
अयं विधिः समग्रासु दिक्षु शेषं तु पूर्ववत्
प्रतिभद्रं धरास्त्रिंशद्भवन्त्यस्य दृढाः शुभाः ४७
शतं विंशमिदं सर्वधराणामिह कीर्तितम्
एवं समस्तस्तम्भानां चतुःषष्ठं शतद्वयम् ४८

सर्वतोधद्रसंज्ञस्य लक्ष्मेदानीं प्रचक्ष्महे
चतुरश्रीकृते क्षेत्रे चतुर्दशविभाजिते ४९
भागिकः स्याच्चतुष्कोऽस्य चतुःस्तम्भविभूषितः
स्तम्भैर्द्वादशभिर्युक्तः प्रथमः स्यादलिन्दकः ५०
स्तम्भविंशतिसंयुक्तो द्वितीयः स्यादलिन्दकः
स्यादष्टाविंशतिस्तम्भस्तृतीयः स्याप्यलिन्दकः ५१
षट्त्रिंशता चतुर्थः स्यादलिन्दो भूषितो धरैः
पञ्चमः स्याच्चतुश्चत्वारिंशता भूषितो धरैः ५२
द्वापञ्चाशद्धरः षष्ठः सर्वेऽप्येतेऽस्य भागिकाः
भागार्धं शस्यते भित्तिः सर्वतः सुदृढा घना ५३
सार्धभागं परित्यज्य भागत्रितयविस्तृतः
कर्णप्राग्ग्रीवकश्च स्याद्भागमेकं च निर्गमः ५४
भद्रमस्यापि कर्तव्यं भागनिर्गमविस्तृतम्
मध्ये भद्रं विधातव्यं भागद्वयविनिर्गतम् ५५
अस्यापि भद्रं मध्ये स्याद्भागत्रितयविस्तृतम्
भागिको निर्गमश्चास्य तदन्तर्भागनिर्गतम् ५६
भागविस्तारसंयुक्तं भद्रमन्यत्प्रकल्पयेत्
दिक्षु सर्वास्वयं प्रोक्तो विधिर्भद्रप्रकल्पने ५७
स्तम्भानामस्य कर्तव्यं मध्ये षण्णवतं शतम्
भद्रेष्वेषु च सर्वेषु भवेत् षष्टयधिकं शतम् ५८
समेन प्रविभागेन स्तम्भानामेकसङ्ख्यया
इत्थं समस्तस्तम्भानां षट्पञ्चाशं शतत्रयम् ५९

किन्तु जङ्घा भवेदस्य भूमिकात्रितयोन्मिता
शत्रुमर्दनसंज्ञस्य भाग्नो लक्ष्माथ कथ्यते ६०
पृथ्वीजयसमं मध्ये भित्तिश्चापि तथाविधा
सार्धं भागं परित्यज्य भागेनायतविस्तृतम् ६१
भद्रं विदध्यात्तन्मध्ये भगत्रितयविस्तृतम्
भद्रमेव विधातव्यं भागत्रितयनिर्गतम् ६२
पार्श्वयोर्भागिकं भद्रमायत्यां विस्तरेण च
भागत्रितयविस्तारं भागेनैकेन निर्गमम् ६३
मध्यभद्रं ततोऽपि स्याद्भागेनायतविस्तृतम्
क्रमोऽयं दिक्षु सर्वासु विधातव्योऽस्य सिद्धये ६४
ऊर्ध्वपृथ्वीजयस्येव कार्यमस्यापरं पुनः
प्रतिभद्रं चतुश्चत्वारिंशत्स्तम्भसमन्वितम् ६५
मध्ये स्तम्भशतं चास्य विधेयं सुदृढं शुभम्
षट्सप्ततिस्तम्भशतद्वयमस्य भवेदिति ६६
पञ्चानामपि चैतेषां हस्ताष्टशतमुत्तमम्
मानमुत्सेधविस्तारात्कर्तव्यं श्रियमिच्छता ६७
मध्यमाधमयोर्मानं कीर्तितं पृथिवीजये
राज्ञः क्रीडार्थमन्यच्च कथ्यते गृहपञ्चकम् ६८
क्षोणीवि भूषणं त्वाद्यं पृथिवीतिलकं परम्
प्रतापवर्धनं चान्यच्छ्रीनिवासं ततोऽपि च ६९
लक्ष्मीविलाससंज्ञं च पञ्चमं परिकीर्तितम्
चतुरश्रीकृते क्षेत्रे दशभागैर्विभाजिते ७०

चतुष्को भागविस्तीर्णो मध्ये कार्यश्चतुर्धरः
बहिश्च भागिकोऽलिन्दस्तदन्तेंऽशत्रयायताः ७१
कर्णप्रासादकाः कार्या भागत्रितयविस्तृताः
तेषां षड्दारुकं मध्ये भित्तिर्भागार्धसम्मिता ७२
तद्बहिर्भागनिष्क्रान्तो भद्रे भागं च विस्तृतः
प्राग्ग्रीवत्रयसंयुक्तो भागिकालिन्दवेष्टितः ७३
अर्ध भागिकभित्त्या च चतुष्को वेष्टितो भवेत्
प्रासादोऽयं मनोहारी भवेदवनिशेखरः ७४
चतुरश्रीकृते क्षेत्रे भागद्वादशभाजिते
चतुष्को भागिको मध्ये बाह्यालिन्दौ च भागिकौ ७५
नवकोष्ठांश्च कर्णेषु प्रासादान् विनिवेशयेत्
षड्दारुकं च कर्तव्यं तेषामन्तरसंश्रयम् ७६
ततोऽर्धभागिकी भित्तिः कर्तव्या सर्वतो बहिः
भद्रे भागायतो भागविनिष्क्रान्तश्चतुर्दिशम् ७७
चतुष्को भागिकाऽलिन्दवेष्टितश्च विधीयते
अस्य भद्रत्रयं कार्यं भागविस्तारनिर्गमम् ७८
अर्धभागिकभित्त्या च वेष्टितं तद्विधीयते
कर्णे कर्णेऽस्य विस्तीर्णे द्वे भद्रे भागनिर्गते ७९
प्रासादमेवं भुवनतिलकं परिचक्षते
चतुरश्रीकृते क्षेत्रे भागद्वादशभाजिते ८०
चतुष्को भागिको मध्ये चतुःस्तम्भो विधीयते
तद्बहिर्भागिकोऽलिन्दो द्वितीयोऽपि अ भागिकः ८१

नवकोष्ठांश्च कर्णेषु प्रासादान् विनिवेशयेत्
षड्दारुकं च कर्तव्यं तेषामन्तरसंश्रयम् ८२
ततोऽर्धभागिकी भित्तिः कर्तव्या सर्वतो बहिः
भद्रे भागायतो भद्रविनिष्क्रान्तश्चतुर्धरः ८३
चतुष्को भागिकालिन्दद्वयेन परिवेष्टितः
त्रिभागविस्तृतं भद्रं तद्बहिर्भागनिर्गतम् ८४
भागिकं प्रतिभद्रं च कुर्यादुभयतः समम्
भागार्धं बाह्यतो भित्तिर्भद्रस्य परितो भवेत् ८५
विधिरेष विधातव्यो दिक्ष्वेवं चतसृष्वपि
विलासस्तबको नाम प्रासादोऽयं प्रकीर्तितः ८६
कर्णप्राग्ग्रीवकौ द्वौ द्वौ शालाप्राग्ग्रीवकौ यदा
स्यातामस्य तदा कीर्त्तिपताकः परिकीर्तितः ८७
अस्यैव पीठे निर्मुक्तशालाभिः परितोऽष्टभिः
अन्योन्यशालासंबद्धे यदासाबेव दीयते ८८
कर्णप्रासादकोपेतः कोणैः शालोज्झितैर्युतः
प्रासादसुन्दरो ज्ञेयस्तदा भुवनमण्डनः ८९
एते प्रोक्तास्तलच्छन्दा जङ्घासंवरणादिकम्
भूमिमानादिकं यच्च तत्पृथ्वीजयवद्भवेत् ९०
इदानीं कथ्यते लक्ष्म त्रोणीभूषणवेश्मनः
पञ्चपञ्चाशता हस्तैः कल्पिते चतुरश्रके ९१
विभक्ते चाष्टभिर्भागैश्चतुष्को भागिकः स्मृतः
चतुर्भिरन्वितः स्तम्भैरलिन्दश्चास्य भागिकः ९२

युक्तो द्वादशभिः स्तम्भैर्विंशत्या च द्वितीयकः
स्यादष्टाविंशतिधरस्तृतीयश्चाप्यलिन्दकः ९३
भित्तेरप्यर्धभागेन सार्धं भागं विमुच्यते
भागपञ्चकविस्तीर्णं भद्रं भागेन निर्गतम् ९४
तन्मध्यभद्रमन्यच्च भागत्रितयविस्तृतम्
भागेन निर्गतं कार्यं भद्रमन्यत्ततोऽपि च ९५
भागेन विस्तृतं कार्यं भागेनापि च निर्गतम्
दिक्षु सर्वासु कर्तव्यो विधिरेषोऽस्य सिद्धये ९६
मध्यस्तम्भैश्चतुःषष्ट्या संयुक्तं सारदारुजैः
प्रतिभद्रं धरैः कार्यमष्टादशभिरन्वितम् ९७
षट्त्रिंशं शतमेवं स्यात्स्तम्भानामिह सर्वतः
चतुर्द्वारमिदं कार्यं यशःश्रीकीर्तिवर्धनम् ९८
पृथिवीतिलकस्याथ लक्षणं परिकीर्त्यते
चत्वारिंशत्करे क्षेत्रे भागैर्भक्तेऽर्धषष्ठकैः ९९
भागिकः स्याच्चतुष्कोऽन्तश्चतुःस्तम्भविभूषितः
अलिन्दोऽपि च भागेन स्तम्भैर्द्वादशभिर्युतः १००
विंशत्या च द्वितीयोऽपि भित्तिः स्यादस्य पादिका
कर्णे प्रासादको भागैस्त्रिभिः स्यान्निर्गतायतः १०१
अस्य भद्रद्वयं कार्यं भागनिर्गतविस्तृतम्
कर्णप्रासादयोर्मध्ये भागपञ्चकविस्तृतम् १०२
भागेन निर्गतं कार्यं भद्रं तस्यापि मध्यतः
भागत्रितयविस्तीर्णं भागेनैकेन निर्गतम् १०३

भद्रमस्यापि मध्येऽन्यद्भागेनायतनिर्गतम्
स्तम्भाः षट्त्रिंशदन्तः स्युर्भद्रेष्वष्टौ शतद्वयम् १०४
अथातः श्रीनिवासस्य लक्षणं सम्प्रचक्ष्महे
पृथ्वीतिलकबन्मध्यमेतस्य परिकीर्त्यते १०५
सपादं भागमुत्सृज्य भागत्रितयविस्तृतम्
भागेन निर्गतं चास्य भद्रमाद्यं प्रकल्पयेत् १०६
तस्यापि मध्यवर्तन्यद्भागनिर्गतविस्तृतम्
अन्वितं दशभिः स्तम्भैः सुदृढैस्तद्विधीयते १०७
सर्वास्वपि च दिक्ष्वेवं विधेया भद्रकल्पना
अस्य षट्सप्ततिः स्तम्भाः भवन्त्येकत्र सङ्चयया १०८
प्रतापवर्धनस्याथ लक्ष्म साम्प्रतमुच्यते
पञ्चविंशतिहस्ताङ्के सार्धभागत्रयाङ्किते १०९
मध्ये चतुष्को भागेन चतुर्भिः सम्भृतो धरैः
अलिन्दो भागिकश्चास्य स्तम्भद्वादशकान्वितः ११०
पादिका भित्तिरेतस्य भद्रं चास्य प्रकल्पयेत्
भागनिर्गमविस्तारं चतुःस्तम्भविभूषितम् १११
विधिरेष समग्रासु दिक्षु कार्योऽस्य सिद्धये
स्तम्भैर्द्वात्रिंशता युक्तो बहिरन्तरयं भवेत् ११२
धराणां चैव सर्वेषां चतुःषष्टिः प्रकल्पना
अथ लक्ष्मीविलासस्य सम्यग्लक्ष्माधुनोच्यते ११३
प्रतापवर्धनस्येव मध्यमस्य प्रकल्पयेत्
प्रतापवर्धनसमं सर्वतोऽप्येतदीरितम् ११४

किन्त्वस्य पार्श्वभद्राणि भद्राणामेव कारयेत्
कोणेष्वपि च भद्राणि पार्श्वयोरुभयोस्तथा ११५
भागस्य निर्गमोऽप्येषां विशेषोऽस्मादयं मतः
भद्रमस्य दशस्तम्भैर्मध्यं षोडशभिर्धरैः ११६
चतुर्द्वारं भवेदेतदिच्छया क्षणमध्यगम्
द्वारमन्यद्विधातव्यं स्वपदे स्यात्सुशोभितम् ११७
भूमिभिः सार्धषष्ठीभिर्विधेयः क्षोणिभूषणः
अर्धाष्टमीभिश्च भवेत्पृथ्वीतिलकसंज्ञकः ११८
स्यात्सार्धपञ्चमीभिस्तु श्रीनिवासोऽत्र भूमिभिः
लक्ष्मीविलाससंज्ञोऽर्धपञ्चमीभिर्विधीयते ११९
प्रतापवर्धनाख्योऽर्धचतुर्थीभिर्विधीयते
राज्ञां पृथ्वीजयादीनि निवासभवनानि च १२०
क्षोणीविभूषणादीनि विलासभवनानि च
यान्युक्तानि निवासाय विलासाय च भूभृताम् १२१
तेषां पृथ्वीजयादीनां द्वारमानमथोच्यते
चतुःपञ्चाशदंशो यो विस्तृतः सकरत्रयः १२२
स द्वारस्योदयः प्रोक्तस्तदर्धेनास्य विस्तृतिः
स्वोदयस्य त्रिभागेन पिण्डः स्तम्भेषु शस्यते १२३
स्यात्सप्तविंशतितमः सपादः सचतुष्करः
गृहभागो भवेद्भूमिः प्रथमा राजवेश्मनाम् १२४
भूच्छ्राये नवधा भक्ते तदंशकचतुष्टयम्
निर्गमश्छाद्यकस्यांशद्वयं पादोनमुच्छ्रयः १२५

तथान्तरावणी कार्या छाद्यकोच्छ्रायनिर्गता
हीरग्रहणपिण्डार्धबाहल्या सा प्रशस्यते १२६
तस्याः स्वमेव बाहल्यं पादोनं विस्तृतिः स्मृता
अन्तरावणिकातुल्यो मदलाया विनिर्गमः १२७
स्वनिर्गमात्तथा चास्याः सपादः स्यात्समुच्छ्रयः
भूम्युच्छ्रयनवांशस्य पादोऽस्याः पिण्डमिष्यते १२८
भूनवांशस्त्रिभागोनो मदलायाश्च विस्तृतिः
लुमामूलस्य स्तम्भार्धं विस्तारः परिकीर्तितः १२९
तत्र्यंशादग्रविस्तीर्णा मूले साष्टांशयुग्भवेत्
तुम्बिनी लम्बिनी हेला शान्ता कोला मनोरमा १३०
आध्माता चेत्यभू प्रोक्ता लुमाः सप्त मनीषिभिः
ऋजुः सा लम्बिनी तासामाध्माता कर्णगा स्मृता १३१
अन्तराले क्रमेण स्युः पञ्चान्याः परिकीर्तिताः
स्तम्भे निदध्यान्मदलां छाद्यं धर्तुं दृढां शुभाम् १३२
स्तम्भाभावे पुनर्न्यस्येत्कुड्यपट्टेऽपि तां सुधीः
सप्त पञ्चाथवा तिस्रो मल्लच्छाद्ये लुमाः स्मृताः १३३
कोणेष्वेता इमाभ्योऽन्याः कर्तव्याः प्राञ्जलाः समाः
छाद्ये कर्णात्क्वचित्कार्या मकराननभूषिताः १३४
तेऽपि विद्याधरोपेताः क्वचित्सगजतुण्डिकाः
सकुम्भिकस्य स्तम्भस्य प्रविभज्योदयं त्रिधा १३५
तत्र भागद्वयं कुर्याद्भागानर्धचतुर्थकान्
तत्र पादोनभागेन राजितासनकं भवेत् १३६

ततः सोल्कलका वेदी साङ्घ्रिभागा विधीयते
कूटागारसमांशार्धं कार्योऽत्रासनपट्टकः १३७
स स्यादभीष्टोविस्तारो भागोच्चं मत्तवारणम्
स्वोदयस्य त्रिभागेन तिर्यक् कार्योऽस्य निर्गमः १३८
रूपकैः करणायाभिः सुपुत्रैरपि शोभितम्
वेदिकादिकमप्यस्य रूपपत्राचितं शुभम् १३९
आयसीभिः शलाकाभिः कीलकैश्च दृढीकृतम्
एतानि अप्त्रयोदशराजनिवेशनानि पृथ्वीजयप्रभृति यानि
निरूपितानि
यो लक्षणेन सहितं परिमाणमेषां जानाति तस्य नृपतिः परितोषमेति
१४०

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे राजगृहं नाम त्रिंशोऽध्यायः

अथ यन्त्रविधानं नामैकत्रिंशोऽध्यायः

भ्राम्यद्दिनेशशशिमण्डलचक्रशत्सं
मेतज्जगत्त्रितययन्त्रमलक्ष्यमध्यम् ।
भूतानि बीजमखिलान्यपि सम्प्रकल्प्य
यः सन्ततं भ्रमयति स्मरजित्स वोऽव्यात् १
यन्त्राध्यायमथ ब्रूमो यथावत्प्रक्रमागतम्
धर्मार्थकाममोक्षाणां यदेकमिह कारणम् २
यदृच्छया प्रवृत्तानि भूतानि स्वेन वर्त्मना

नियम्यास्मिन् नयति यत्तद्यन्त्रमिति कीर्तितम् ३
स्वरसेन प्रवृत्तानि भूतानि स्वमनीषया
कृतं यस्माद्यमयति तद्वा यन्त्रमिति स्मृतम् ४
तस्य बीजं चतुर्धा स्यात् क्षितिरापोऽनलोऽनिलः
आश्रयत्वेन चैतेषां विजयदप्युपयुज्यते ५
भिन्नः सूतश्चकैरुक्तस्ते च सम्यङ् न जानते
प्रकृत्या पार्थिवः सूतस्नायात् तत्र क्रिया भवेत् ६
पार्थिवत्वादयमतो न कदाचिद्विभिद्यते
द्रव्यत्वादग्निजत्वं हि यद्यस्य परिकल्प्यते ७
तदा विरोधो नैवास्य पावकेनोपपद्यते
गन्धाद् वह्नेर्विरोधाच्च स्थिता पार्थिवता बलात् ८
आत्मैव बीजं सर्वेषां प्रत्येकमपराण्यपि
एवं भेदा भवन्त्येषां भूयांसः सङ्करान्मिथः ९
स्वयंवाहकमेकं स्यात्सकृत्प्रेर्यं तथापरम्
अन्यदन्तरित वाह्यं वाह्यमन्यत् त्वदूरतः १०
स्वयंबाह्यमिहोत्कृष्टं हीनं स्यादितरत्त्रयम्
तेषु शंसन्ति दूरस्थमलब्ध्यं निकटस्थितम् ११
यद्युत्पन्नमलब्ध्यं यदेकं बहुषु साधकम्
तदन्यदपि शंसन्ति यस्माद्विस्मयकृन्नृणाम् १२
एका स्वीया गतिश्चित्रे वाह्येऽन्या वाहकाश्रिता
अरघट्टाश्रिते कीटे दृश्यते द्वयमप्यदः १३
इत्थं गतिद्वयवशाद्वैचित्र्यं कल्पयेत्स्वयम्

अलक्षता विचित्रत्वं यस्माद्यन्त्रेषु शस्यते १४
अन्यत्स्यादन्तरात्प्रेर्यं द्वितीयं मध्यमं त्विदम्
द्वयत्रयादियोगेन चतुर्णामपि योगतः १५
अंशांशिभावाद्भूतानां सङ्कैषामतिरिच्यते
यः सम्यगेतज्जानाति स पुमान्भवति प्रियः १६
प्रमदानां नृपाणां च प्रज्ञानां च मतस्य च
लाभं ख्यातिं च पूजां च यशो मानं धनानि च १७
प्राप्नोति किं किं न पुमान् य इदं वेत्ति तत्त्वतः
गृहमेकं विलासानामाश्चर्यस्य परं पदम् १८
रतेरावासभवनं विस्मयस्यैकमास्पदम्
यथावद्देवतादीनां रूपचेष्टादिदर्शनात् १९
तास्तुष्यन्त्यथ तत्तुष्टिः पूर्वैर्धर्मः प्रकीर्तितः
नृपादितोषादर्थः स्यादर्थे कामः प्रतिष्ठितः २०
वित्तैक्यादस्य निष्पत्तिर्मोक्षश्चास्मान्न दुर्लभः
पार्थिवं पार्थिवैर्बीजैः पार्थिवं जलजन्मभिः २१
तदेव तेजोजनितैस्तदेव मरुदुद्भवैः
आप्यमाप्यैस्तथा बीजैरानलैरानिलैरपि २२
वह्निजैश्च मरुज्जातैः पार्थिवैर्वारुणैरपि
मारुतं मारुतैराप्यैः पार्थिवैरानलैस्तथा २३
वह्निजातेऽपि बीजं स्यात्सूतः सोऽपि च वानले
पार्थिवानां भवेद्बीजमाप्यानामपि वारणे २४
इति बीजानि सर्वेषां कीर्तितान्यखिलान्यपि

कुडयंकरणसूत्राणि भारगोलकपीडनम् २५
लम्बनं लम्बकारे च चक्राणि विविधान्यपि
अयस्ताम्रं च तारं च त्रपु संवित्प्रमर्दने २६
काष्ठं च चर्म वस्त्रं च स्वबीजेषु प्रयुज्यते
उर्दकः कर्तरो यष्टिश्चक्रं भ्रमरकस्तथा २७
शृङ्गावली च नाराचः स्वबीजान्यौर्वरे विदुः
ताप उत्तेजनं स्तोभः क्षोभश्च जलसङ्गजः २८
एवमाद्यग्निबीजानि पार्थिवस्य प्रचक्षते
धारा च जलभारश्च पयसो भ्रमणं तथा २९
एवमादीनि भूजस्य जलजानि प्रचक्षते
यथोच्छ्रायो यथाधिक्यं यथा नीरन्ध्रतापि च ३०
अत्यन्तमूर्ध्वगामित्वं स्वबीजान्ययसस्तथा
मरुत्स्वभावजो गाढैर्ग्राहकैश्च प्रतीप्सितः ३१
दृत्याद्यैर्वीजनाद्यैश्च गजकर्णादिभिः कृतः
चाणितो गालितश्चायं बीजं भवति भूभवे ३२
काष्टंभृत्तिश्च लोहं च जलजे पार्थिवं भवेत्
अन्यदम्भस्तदप्यस्तु तिर्यगूर्ध्वमधस्तथा ३३
बीजं स्वकीयं भवति यन्त्रेषु जलजन्मसु
तापाद्यं पूर्वकथितं वह्निजं जलजे भवेत् ३४
सङ्गृहीतश्च दत्तश्च पूरितः प्रतिनोदितः
मरुद्बीजत्वमायाति यन्त्रेषु जलजन्मसु ३५
वह्निजातेषु मृत्ताम्रलोहरुक्मादि तद्ग्रहे

पार्थिवं कथयन्तीह बीजं बीजविचक्षणाः ३६
वह्नेर्वह्निर्भवेद्बीजमाप आपस्तथा भवेत्
आद्यैर्दृत्यादिभिः प्रोक्तैर्मरुद् गच्छति बीजताम् ३७
प्रत्येषकं च जनकं प्रेरकं ग्राहकं तथा
सङ्ग्राहकं च भूजातं बीजं स्यादनिलोद्भवैः ३८
प्रेरणं चाभिघाटश्च विवर्तो भ्रमणं तथा
जलजं मारुतोत्थेषु बीजं स्यादिति सम्मतम् ३९
सङ्गृहीतस्य तापाद्यैर्यानि पावकजन्मनि
प्रकीर्तितानि तान्येव भवन्ति पवनोद्भवैः ४०
प्रेरितः सङ्गृहीतश्च जनितश्च समीरणः
आत्मनो बीजतां गच्छत्येवमन्यत् प्रकल्पयेत् ४१
भूतमेकमिहोद्रिक्तमन्यद्धीनं ततोऽधिकम्
अन्यद्धीनतरं चान्यदेवंप्रायैर्विकल्पितैः ४२
नाना भेदा भवन्त्येषां कस्तान् कात्स्न्र्येन वक्ष्यति
निष्क्रिया भूः क्रिया त्वंशे शेषेषु सहजा त्रिषु ४३
अतः प्रायेण सा जन्या क्षितावेव जयव्रतः
साध्यस्य रूपवशतः सन्निवेशो यत्क्षे भवेत् ४४
यन्त्राणामाकृतिस्तेन निर्णेतुं नैव शक्यते
यथावद्बीजसंयोगः सौश्लिष्ट्यं श्लक्ष्णतापि च ४५
अलक्षाता निर्वहणं लघुत्वं शब्दहीनता
शब्दे साध्ये तदाधिक्यमशैथिल्यमगाढता ४६
वहनीषु समस्तासु सौश्लिष्ट्यं चास्खलद्गति

यथाभीष्टार्थकारित्वं लयतालानुगामिता ४७
इष्टकालेऽर्धदर्शित्वं पुनः सम्यक्त्वसंवृतिः
अनुल्बणत्वं ताद्रूप्यं दाढर्ये मसृणता तथा ४८
चिरकालसहत्वं च यन्त्रस्यैते गुणः स्मृताः
एकं बहूनि चलयेद्बहुभिश्चाल्यतेऽपरम् ४९
सुश्लिष्टत्वमलक्षत्वं यन्त्राणां परमो गुणः
अथ कर्माणि यन्त्राणां विचित्राणि यथाविधि ५०
न विस्तरान्न सङ्क्षेपात्साम्प्रतं संप्रचक्ष्महे
कस्यचित्सा क्रिया साध्या कालः कस्यापि कस्यचित् ५१
शब्दः कस्यापि चोच्छ्रायो रूपस्पर्शौ च कस्यचित्
क्रियास्तु कार्यस्य वशादनन्ताः परिकीर्तिताः ५२
तीर्यंगूर्ध्वमधः पृष्ठे पुरतः पार्श्वयोरपि
गमनं सरणं पात इति भेदाः क्रियोद्भवाः ५३
कालो मुहूर्तकाष्ठाद्यैर्भिन्नो भेदैरनेकधा
शब्दो विचित्रः सुखदो रतिकृद्भीषणस्तथा ५४
उच्छ्रायस्तु जलस्य स्यात्क्वचिद्भूजेऽपि शस्यते
गीतं नृत्यं च वाद्यं च पटहो वंश एव च ५५
वीणा च कांस्यतालश्च तृमिला करटापि च
यत्किञ्चिदन्यदप्यत्र वादित्रादि विभाव्यते ५६
समस्तमपि तद्यन्त्राज्जायते कल्प्लनावशात्
नृत्ये तु नाटकं चोक्षस्ताण्डवं लास्यमेव च ५७
राजमार्गश्च देशी च यन्त्रात् सर्वं प्रसिध्यति

तथा जात्यनुगाश्चेष्टा विरुद्धा यास्तु जातितः ५८
ताः सर्वा अपि सिध्यन्ति सम्यग्यन्त्रस्य साधनात्
भूचराणां गतिर्व्योम्नि भूमौ व्योमचरागमः ५९
चेष्टितान्यपि मर्त्यानां तथा भूमिस्पृशामिव
जायन्ते यन्त्रनिर्माणाद्विविधानीप्सितानि च ६०
यथासुरा जिता देवैर्यथा निर्मथितोऽम्बुधिः
हिरण्यकशिपुर्दैत्यो नृसिंहेन हतो यथा ६१
धावनं हस्तियुद्धं च गजानामगडोऽपि च
नानाप्रकार या चेष्टा नानाधारागृहाणि च ६२
दोलाकेल्यो विचित्राश्च तथा रतिगृहाणि च
चित्रा सेन च कुटयश्च स्वयंवाहकसेवकाः ६३
सभाश्च विविधाकाराः सत्या मायाः प्रकल्पिताः
एवंप्रायाणि चान्यानि यन्त्रात्सिध्यन्ति कल्पनात् ६४
विधाय भूमिकाः पञ्च शय्या त्वादिभुवि स्थिता
प्रतिप्रहरमन्यासु सर्पन्ती याति पञ्चमीम् ६५
एवंप्रायाणि चित्राणि सम्यक् सिध्यन्ति यन्त्रतः
क्रमेण त्रिशतावर्तं स्थाले दन्ता भ्रमन्त्यसौ ६६
तन्मध्ये पुत्रिका क्लृप्ता प्रति नाडिं प्रबोधयेत्
वह्नेश्च दर्शनं तोये वह्निमध्याज्जलोद्गतिः ६७
अवस्तुतोऽपि वस्तुत्वं वस्तुतोऽपि तथान्यथा
निःश्वासेन वियद् याति श्वासेनायाति मेदिनीम् ६८
क्षीरोदमध्यगा शय्या प्रतीष्टाधः फणाभृता

गोलश्च सूतिविहितः सूर्यादीनां प्रदक्षिणम् ६९
परिभ्राम्यत्यहोरात्रं ग्रहाणां दर्शयन् गतिम्
गजादिरूपे रथिकरूपतां गमितः पुमान् ७०
भ्रान्त्वा नादिकया तस्याः पर्यन्ते हन्ति भोजनम्
दीपिकापुत्रिका क्लृप्ता क्षीणं क्षीणं प्रयच्छति ७१
दीपे तैलं प्रनृत्यन्ती तालगत्या प्रदक्षिणम्
यावत्प्रदीयते वारि तावत्पिबति सन्ततम् ७२
यन्त्रेण कल्पितो हस्ती न तद्वच्छत्प्रतीयते
शुकाद्याः पक्षिणः क्लृप्तास्तालस्यानुगमान्मुहुः ७३
जनस्य विस्मयकृतो नृत्यन्ति च पठन्ति च
पुत्रिका वा गजेन्द्रो वा तुरगो मर्कटोऽपि वा ७४
वलनैर्वर्तनैर्नृत्यंस्तालेन हरते मनः
येनैव वर्त्मना क्षेत्रं ध्रियते तेन तत्पयः ७५
यात्यायाति पुनस्तद्वद्वर्तात्पुष्करिणीष्वपि
फलके कानि तिष्ठन्ति धावन्त्यनुमतानि च ७६
धातां ददति युध्यन्ते निर्यान्त्यश्रमनावृतम्
नृत्यन्ति गायन्ति तथा वंशादीन् वादयन्ति च ७७
निरुद्धमुक्तस्य वशान्मरुतो यन्त्रभङ्गिभिः
याश्चेष्टा दिव्यमानुष्यस्ता एवात्र न केवलम् ७८
दुष्करं यद्यदन्यच्च तत्तद्यन्त्रात्प्रसिध्यति
यन्त्राणां घटना नोक्ता गुप्तयर्थं नाज्ञतावशात् ७९
तत्र हेतुरयं ज्ञेयो व्यक्ता नैते फलप्रदाः

कथितान्यत्र बीजानि यन्त्राणां घटना न यत् ८०
तस्माद्व्यक्तीकृतेष्वेषु न स्यात्स्वार्थो न कौतुकम्
वस्तुतः कथितं सर्वं बीजानामिह कीर्तनात् ८१
अभ्यूह्यं स्वधिया प्राज्ञैर्यन्त्राणां कर्म यद्यथा
यन्त्राणि यानि दृष्टानि कीर्तितान्यत्र तान्यपि ८२
नन्द्यानि यस्मात्तान्यातो विज्ञेयान्युपदेशतः
एतत्स्वबुद्ध्यैवास्माभिः समग्रमपि कल्पितम् ८३
अग्रतश्च पुनर्ब्रूमः कथितं यत्पुरातनैः
बीजं चतुर्विधमिह प्रवदन्ति यन्त्रे-
ष्वम्भोग्निभूमिपवनैर्निहितैर्यथावत् ।
प्रत्येकतो बहुविधं हि विभागतः स्या-
न्मिश्रैर्गुणैः पुनरिदं गणनामपास्येत् ८४
किमेतस्मादन्यद्भवति भुवने चित्रमपरं
किमन्यद्वा तुष्टयै भवति किमु वा कौतुककरम् ।
किमन्यद् वा कीर्त्तेर्भवनमपरं कामसदनं
किमस्मात्पुण्यं वा किमिव च परीतापशमनम् ८५
एतेऽत्यर्थं प्रीतिदा बीजयोगाः संजायन्ते योजिताः सूत्रधारैः
भ्रान्त्या नान्यश्चित्रकृद्दारुक्लृप्तं चक्रं दोलाद्यं पुनः पञ्चमं तत् ८६
पारम्पर्यं कौशलं सोपदेशं शास्त्राभ्यासो वास्तुकर्मोद्यमो धीः
सामग्रीयं निर्मला यस्य सोऽस्मिंश्चित्राण्येवं वेत्ति यन्त्राणि कर्तुम्
८७
चित्रैर्युक्तं ये गुणैः पञ्चरूपं जानन्त्येनं यन्त्रशास्त्राधिकारम्

ये वा कृत्स्नं योजयन्तेऽत्र सम्यक्तेषां कीर्त्तिर्द्यां भुवं चावृणोति ८८
अङ्गुलेन मितमङ्गुलपादेनोच्छ्रितं द्विपुटकं तनुवृत्तम्
संविधेयमृजु मध्यगरन्ध्रं श्लिष्टसन्धि दृढताम्रमयं तत् ८९
दारवेषु विहगेषु तदन्तः क्षिप्तमुद्गतसमीरवशेन
आतनोति विचलन्मृदुशब्दं शृण्वतां भवति चित्रकरं च ९०
सुश्लिष्टखण्डद्वितयेन कृत्वा सरन्ध्रमन्तर्मुरजानुकारम्
ग्रस्तं तथा कुण्डलयोर्युगेन मध्ये पुटं तस्य मृदु प्रदेयम् ९१
पूर्वोक्तयन्त्रे विधिनोदरेऽस्य क्षिप्तेऽथ शय्यातलसंस्थमेतत्
ध्वनिं ततः सञ्चलनादनङ्गक्रीडारसोल्लासकरं करोति ९२
अस्मिञ् शय्यातलविनिहिते मुञ्चति व्यक्तरागं
चित्राञ्शब्दान् मृगशिशुदृशां यान्ति भीत्येव मानः ।
किञ्चैतासां दयितमभितो निर्भरप्रेमभाजां
प्रौढिं गच्छन्त्यधिकमधिकं मन्मथक्रीडितानि ९३
पटहमुरजे वेणुः शङ्खो विपञ्चयथ काहला
डमरुटिविले वाद्यातोद्यान्यमून्यखिलान्यपि
मधुरमधिकं यच्चित्रं च ध्वनिं विदधात्यलं
तदिह विधिना रुद्धोन्मुक्तानिलस्य विजृम्भितम् ९४
लघुदारुमयं महाविहङ्गं दृढसुश्लिष्टतनुं विधाय तस्य
उदरे रसयन्त्रमादधीत ज्वलनाधारमधोऽस्य चातिपूर्णम् ९५
तत्रारूढः पूरुषस्तस्य पक्षद्वन्द्वोच्चालप्रोज्झितेनानिलेन
सुप्तस्वान्तः पारदस्यास्य शक्त्या चित्रं कुर्वन्नम्बरे याति दूरम् ९६
इत्थमेव सुरमन्दिरतुल्यं सञ्चलत्यलघु दारुविमानम्

आदधीत विधिना चतुरोऽन्तस्तस्य पारदभृतान् दृढकुम्भान् ९७
अयःकपालाहितमन्दवह्निप्रतप्ततत्कुम्भभुवा गुणेन
व्योम्नो भृगित्याभरणत्वमेति सन्तप्तगर्जद्रसराजशक्त्या ९८
वृत्तसन्धितमथायसयन्त्रं तद्विधाय रसपूरितमन्तः
उच्चदेशविनिधापिततप्तं सिंहनादमुरजं विदधाति ९९
स कोऽप्यस्य स्फारः स्फुरति नरसिंहस्य महिमा
पुरस्ताद्यस्यैता मदजलमुचोऽपि द्विपघटाः
मुहुः श्रुत्वा श्रुत्वा निनदमपि गम्भीरविषमं
पलायन्ते भीतास्त्वरितमवधूयाङ्कुशमपि १००
दृग्ग्रीवातलहस्तप्रकोष्ठबाहूरुहस्तशाखादि
सच्छिद्रं वपुरखिलं तत्सन्धिषु खरडशो घटयेत् १०१
श्लिष्टं कीलकविधिना दारुमयं सृष्टचर्मणा गुप्तम्
पुंसोऽथवा युवत्या रूपं कृत्वातिरमणीयम् १०२
रन्ध्रगतैः प्रत्यङ्गं विधिना नाराचसङ्गतैः सूत्रैः
ग्रीवाचलनप्रसरणविकुञ्चनादीनि विदधाति १०३
करग्रहणताम्बूलप्रदानजलसेचनप्रमाणादि
आदर्शप्रतिलोकनवीणावाद्यादि च करोति १०४
एवमन्यदपि चेदृशमेतत्कर्म विस्मयविधायि विधत्ते
जृम्भितेन विधिना निजबुद्धेः कृष्टमुक्तगुणचक्रवशेन १०५
पुंसो दारुजमूर्ध्वं रूपं कृत्वा निकेतनद्वारि
तत्करयोजितदरडं निरुणद्धि प्रविशतां वर्त्म १०६
खड्गहस्तमथ मुद्गरहस्तं कुन्तहस्तमथवा यदि तत्स्यात्

तन्निहन्ति विशतो निशि चौरान् द्वारि संवृतमुखं प्रसभेन १०७
ये चापाद्या ये शतघ्न्यादयोऽस्मिन्नुष्ट्रग्रीवाद्याश्च दुर्गस्य गुप्तयै
ये क्रीडाद्याः क्रीडनार्थं च राज्ञां सर्वेऽपि स्युर्योगतस्ते गुणानाम्
१०८
इदानीं प्रक्रमायातं वारियन्त्रं प्रचक्ष्महे
क्रीडार्थं कार्यसिद्धयै च चतुर्धा तद्गतिं विदुः १०९
निम्नगं भवति द्रोणीदेशादूर्ध्वस्थिताज्जलम्
यत्र तत्पातयन्त्रः स्याद्घाटिकादिप्रयोजनम् ११०
उच्छ्रायसमपाताख्यं यत्रोर्ध्वा नाडिका पयः
जलाधारगुणान्मुञ्चेदधस्तात्समनाडिका १११
यत्र पातसमुच्छ्रायं पतित्वोच्छ्रायतो जलम्
तिर्यग्गत्वा प्रयात्यूर्ध्वं सच्छिद्रस्तम्भयोगतः ११२
पतित्वोच्छ्रायतस्तोयं तिर्यगूर्ध्वोर्ध्वमेत्यथ
सच्छिद्रस्तम्भयोगेन तत्स्यात्पातसमोच्छ्रयम् ११३
वाप्यां वापि च कूपे विधानतो दीर्घिकादिका विहिता
यत्रोर्ध्वमम्बु गमयति तदिहोच्छ्रयसंज्ञितं कथितम् ११४
दारुजमिभस्य रूपं यत्सलिलं पात्रसंस्थितं पिबति
तन्माहात्म्यं निगदितमेतस्योच्छ्रायतुल्यस्य ११५
सलिलं सुरङ्गदेशानीतं निम्नेन वर्त्मना दूरे
अद्भुतमम्भस्थानं तदिह समोच्छ्रायतः कुरुते ११६
धारागृहमेकं स्यात्प्रवर्षणाख्यं ततो द्वितीयं च
प्राणालं जलमग्नं नन्द्यावर्तं तथान्यदपि ११७

प्राकृतजनार्थमेतन्न विधेयं योग्यमेतदवनिभुजाम्
मङ्गल्यानां सदनं दिव्यमिदं तुष्टिपुष्टिकरम् ११८
सलिलाशयस्य सविधे कस्याप्याश्रित्य शोभनं देशम्
यन्त्रोत्सेधाद्द्विगुणा त्रिगुणा वा नाडिका कार्या ११९
जलनिर्वाहसहासावन्तर्मसृणा बहिश्च नीरन्ध्रा
निर्व्यूढाम्भसि तस्यां शुभे मुहूर्ते गृहं कार्यम् १२०
सर्वाभिरोषधीभिर्युक्तं सहिरण्यपूर्णकुम्भैश्च
सुविचित्रगन्धमाल्यं विनादितं भ्रमघोषेण १२१
रत्नोद्भवैर्विचित्रैः स्तम्भैर्युक्तं हिरण्यघटितैर्वा
रजतोद्भवैः कदाचित्सुरदारुसमुद्भवैरथवा १२२
श्रीखण्डोत्थैरथवा सालकमुख्यप्रशस्तवृक्षोत्थैः
शतसङ्ख्यैर्द्वात्रिंशत्सङ्ख्यैर्यदि वापि षोडशभिः १२३
अथवा चतुस्समन्वितविंशतिसङ्ख्यैर्दिनेशसङ्ख्यैर्वा
भूषितमतिरमणीयैश्चतुर्भिरपि वा विधातव्यम् १२४
प्राग्ग्रीवैरतिचित्रैः शालैर्जालैर्विभूषितं विविधैः
वेदीभिः परिकरितं कपोतपालीभिरभिरामम् १२५
रमणीयसालभञ्जिकमनेकविधयन्त्रशकुनिकृतशोभम्
मिथुनैश्च वानराणां जम्भकनिवहैश्च नैकविधैः १२६
विद्याधरसिद्धभुजङ्गकिन्नरैश्चारणैश्च रमणीयम्
नृत्यद्भिः परमगुणैः शिखण्डिभिर्मण्डितोद्देशम् १२७
कल्पतरुभिर्विचित्रैश्चित्रलतावल्लिगुल्मसंछन्नम्
परपुष्टषट्पदालीमरालमालामनोहारि १२८

प्रवहत्सकलस्रोतःसुश्लिष्टनिविष्टनाडिकं मध्ये
सच्छिद्रनाडिकयुतं नानाविधरूपरमणीयम् १२९
सुश्लिष्टनाडिकाग्रे स्तम्भतुलाभित्तिसंश्रिते परितः
सम्यक्कृत्वा दृढतरविलेपनं वज्रलेपाद्यैः १३०
लाक्षासर्जरसदृषन्मेषविषाणोत्थचूर्णसंमिश्रम्
अतसीकरञ्जतैलप्रविगाढो वज्रलेपः स्यात् १३१
दृढसन्धिबन्धहेतोः स तत्र देयो द्विशः कदाचिद्वा
शणवल्कश्लेष्मातकसिक्थकतैलैः प्रलेपश्च १३२
उच्छ्रययन्त्रेणैतद् भ्रान्तजलेनाथ तदभितः कृत्वा
चित्रानुपातयुक्तं प्रदर्शयेन्नृपतये स्थपतिः १३३
कार्याणयस्मिन् करिणां मिथुनान्यभितोऽम्बुकेलियुक्तानि
अन्योन्यपुष्करोज्झितसीकरभयपिहितनयनानि १३४
वर्षानुकृतं चास्मिन् प्रीतिमति प्रतिमङ्गजो वीक्ष्य
दृक्कटमेहनहस्तैर्मदमिव मुञ्चञ्जलं कार्यः १३५
स्तनयोर्युगेन सृजती जलधारे तत्र कापि कार्या स्त्री
आनन्दाश्रुलवानिव सलिलकणान् पद्मभिः काचित् १३६
नाभिह्रदनदिकामिव विनिर्गतां कापि बिभ्रती धाराम्
काप्यङ्गुलीनखांशुभिरिव योषित्सिञ्चती कार्या १३७
एवम्प्रायांश्चित्रान् स्वभावचेष्टान् बहूंश्च रमणीयान्
क्षोभान् विधाय कुर्यादाश्चर्यं नरपतेः स्थपतिः १३८
मध्ये तस्य विधेयं सिंहासनममलहेममणिघटितम्
तत्रासीदेन्नरपतिरवनिपतिः श्रीपतिर्देवः १३९

स्नायात्कदाचिदस्मिन् मङ्गलगीतैर्विवर्धितानन्दः
वादित्रनाट्यनिपुणैर्निषेव्यमाणः सुरेन्द्र इव १४०
य एतस्मिन् गाढग्लपितघनघर्मव्यतिकरे
शुचौ धाराधाम्नि स्फुटसलिलधारे नरपतिः ।
सुखेनास्ते पश्यन् विविधजलशिल्पानि स भवे-
न्न मर्त्यः कन्त्वेष क्षितिकृतनिवासः सुरपतिः १४१
जलदकुलाष्टकयुक्तं पूर्ववदन्यद्गृहं समारचयेत्
वर्षद्धारानिकरैः प्रवर्षणाख्यां तदाप्नोति १४२
प्रतिकुलमस्मिन् कार्या दिव्यालङ्कारधारिणः पुरुषाः
विधिना त्रयः सुरूपाश्चत्वारः सप्त वा सुदृढाः १४३
यन्त्रेण समोच्छ्रायेण तांश्चतुर्थेन वा ततः पुरुषान्
कृत्वा सवक्रनालानम्भोभिः पूरयेद् विमलैः १४४
सलिलप्रवेशरन्ध्राण्यखिलानि पिधाय तत्र पुरुषाणाम्
अङ्गानि वारिमोक्षाण्यखिलान्यथ मोचयेत् तेषाम् १४५
सलिलं सवक्रनालं द्वारप्रतिरोधमोचनैः पुरुषाः
मुञ्चन्ति स्वेच्छममी विचित्रपातेन चित्रकरम् १४६
इत्थमिमान् वारिधरान् सामस्याद् द्वयन्तरेण वा सलिलम्
त्र्यन्तरतो वा स्वेच्छं प्रवर्षयेदतिमहच्चित्रम् १४७
इदं नानाकारं कुलभवनमाद्यं रतिपते-
र्निवासश्चित्राणामनुकरणमेकं जलमुचाम् ।
पयःपातैर्ग्रीष्मे रविकरपरीतापशमनं
न केषामत्यर्थं भवति नयनानन्दजननम् १४८

एकेनाथ चतुर्भिः स्तम्भैरष्टभिरथार्कसङ्ख्यैर्वा
षोडशभिर्वा कुर्यान्मनोहरं गृहमिह द्वितलम् १४९
भद्रैर्युतं चतुर्भिश्चतुरश्रं सर्वभित्तिसंयुक्तम्
ईलीतोरणयुक्तं कर्तव्यं पुष्पकाकारम् १५०
तस्योपरि मध्यगता प्राङ्गणवापी दृढा विधातव्या
शतपत्रविहितभूषा तन्मध्ये कर्णिका कार्या १५१
तत्कोणेषु चतुर्ष्वपि रमणीया दारुदारिकाः कार्याः
मध्याम्बुजनिहितदृशः सालङ्काराः सशृङ्गाराः १५२
पूर्वोक्तयन्त्रयोगात्पद्मासीने वसुन्धराधिपतौ
भृङ्गारामलवारिभिरङ्गणवापीं भ्रियाच्च ततः १५३
तामिति भृत्वा वापीं तत्सलिलं तदनुपट्टगर्भगतम्
छाद्यस्तु गन्धरोध्रेष्वति रोहति सर्वतो नियतम् १५४
मुखपट्टसमुत्कीर्णै रूपैश्चित्रैर्मनोरमैरखिलैः
अङ्गैर्वारि विमुञ्चति नासास्यश्रवणनेत्राद्यैः १५५
प्रणालाख्यं धाराभवनमिदमत्यद्भुततरं
स्थितिं धत्ते यस्य क्षितिपतिलकस्याङ्गणभुवि
करोत्येतद्वेत्थं स्थपतिरपि बुद्ध्या चतुरया
जगत्येतौ द्वावप्यधिकमहनीयौ कृतधियाम् १५६
चतुरश्रातिगभीरा वापी कार्या मनोरमा सुदृढा
गर्भगतं गृहमस्याः कर्तव्यं लिप्तसन्धि ततः १५७
विहितप्रवेशनिर्गति सुरङ्गयाधो निवेशितद्वारम्
विदधीत चारुरूपैः प्रवर्षकैर्व्याप्तमुपरिष्टात् १५८

चित्राध्यायोदितवर्त्मना ततोऽलङ्कृतं च चित्रेण
तस्य विधेयं मध्यं सलिलाधिपवाससङ्काशम् १५९
ऊर्ध्वविनिर्गमिताब्जैर्नालैस्तत्पट्टकन्दकोद्भूतैः
सच्छिद्रकर्णिकागतदिनकरकरनिर्मितोद्द्योतम् १६०
आपूरयेत्ततोऽनु च पाताम्बुभिरमलकमलपर्यन्तम्
विधिनामुनैव सम्यक् प्रविधाय मनोरमं भवनम् १६१
नानारूपकयुक्त्याउपरचिततमङ्गतोरणद्वारम्
शालाभिरायताभिश्चतसृष्वपि दिक्षु कृतशोभम् १६२
कृत्रिमशफरीमकरीपद्मिभिरपि चाम्बुसम्भवैर्युक्ताम्
कुर्यादम्भोजवतीं वापीमाहार्ययोगेन १६३
सामन्तमुख्यपुरुषा राजाज्ञालब्धसंश्रयास्तत्र
परराष्ट्रागतदूतास्तिष्टेयुर्निहितमिह निभृताः १६४
अथ स यथाविधि सलिलक्रीडां पूर्वोक्तमार्गरूपाणाम्
दृष्ट्वा मुदितः कुर्यात्पर्यङ्कारोहणं नृपतिः १६५
तत्र स्थितस्य नृपतेः परिवारितस्य
वाराङ्गनाभिरभितो जलमग्नधाम्नि ।
पातालसद्मनि यथा भुजगेश्वरस्य
निस्सीमसम्भृतरतिर्भवति प्रमोदः १६६
पूर्वोक्तवापिकायां मध्ये स्तम्भैश्चतुर्भिरूपरचितम्
मुक्ताप्रवालयुक्तं पुष्पकमथ कारयेल्लटभम् १६७
वापीं परितः पुष्पकमापूर्य सुनिर्गमाभिरथ सुदृढम्
गर्भस्वस्तिकभित्तिभिरूपहितशोभं समन्ततः कुर्यात् १६८

पूर्वोक्तवारियोगात्पूर्णामाकर्णतो विधायैताम्
जलकलिषु सोत्कण्ठो महीपतिः पुष्पकं यायात् १६९
कुर्वीत नर्मसचिवैर्विलासिनीभिश्च सार्धमवनिपतिः
तद्भित्त्यन्तरवर्ती निमज्जनोन्मज्जनैः क्रीडाम् १७०
एकत्र मग्नैरपत्र दृष्टैरन्यत्र हत्वा सलिलेन नष्टैः
क्रीडत्यलं केलिकरैः सहायैनृपः सुखं मज्जनपुष्करिण्याम् १७१
वापीतलस्थितमथ त्रपयावनम्र-
माच्छादितस्तनभरं करपल्लवेन ।
गाढावसक्तवसनं जलरोधमुक्ता-
वालोकते प्रणयिनीजनमत्र धन्यः १७२
रथदोलादिविधानं दारवमभिदध्महे वयं सम्यक्
यन्त्रभ्रमणककर्म प्रकीर्तितं पञ्चमं यत्तत् १७३
तत्र वसन्तः प्रथमो मदननिवासो वसन्ततिलकश्च
विभ्रमकस्त्रिपुराख्यः पञ्चैते दोलकाः कथिताः १७४
निखनेच्चतुरः स्तम्भान् समैकसूत्रोपगान् ऋजून् सुदृढान्
सदृशान्तरान् धरित्रीवशतः सुश्लिष्टपीठगतान् १७५
प्रासादस्योक्तदिशि प्रविदध्याद्विरचिताष्टकरदैर्घ्यम्
भूमिगृहं रमणीयं तदर्धतो विहितगाम्भीर्यम् १७६
तद्गर्भतले स्तम्भो लोहमयाधारसंस्थितः कार्यः
भ्रमसहितः पीठयुतो ग्रस्तश्चच्छादकतुलाभिः १७७
संस्थाप्योपरि पीठस्य कुम्भिकामतिदृढां विभक्तां च
धनुरुच्छ्रितैस्ततोऽमूमष्टभिरावृष्टयेद् भद्रैः १७८

स्वेच्छमथ भूमिकोच्छ्रयमस्योर्ध्वे कल्प्लयेन्नितान्तमृजुम्
निदधीत वेष्टनोर्ध्वे पट्टयुतं स्तम्भशीर्षं च १७९
हीरग्रहपर्यन्तं मदला गजशीर्षिका विधातव्या
सुदृढा प्रयत्नरचिता मनोभिरामा यथाशोभम् १८०
पट्टस्योपरि काया चतुष्किका क्षेत्रमानतोऽभीष्टात्
तस्यामुपरि विधेयस्तलबन्धो दृढतरन्यासः १८१
स्तम्भैर्द्वादशभिरथ क्षेत्रे युक्त्या समुच्छ्रितैर्भव्यैः
रूपवतीकोणस्थितिरधिका भूः प्रथमिका कार्या १८२
मध्ये भ्रमश्च तस्या गर्भस्तम्भप्रतिष्ठितः कार्यः
क्षेत्रप्रमाणवशतस्तां पश्चाच्छादयेत्पट्टैः १८३
रथिकाशिखाग्रकेषु च फलकामरणस्य तद्वदुपरिष्टात्
भ्रमचक्राणि न्यस्येन्मध्ये स्तम्भे च पञ्चैव १८४
अत उपरि यथाशोभं हि भूमिका पुष्पकाकृतिः कार्या
मध्यस्तम्भाधारा कृतकलशविभूषणा शिरसि १८५
स्तम्भेऽवस्ताद् भ्रमि ते भृशं भ्रमत्यर्थभूमिका तत्र
रथिकाभ्रमरकयुक्ता परस्परं चक्रयन्त्रेण १८६
वसन्तरथिकाभ्रमे समधिरूढवाराङ्गना-
परिभ्रमणसम्भृताभ्यधिकविभ्रमं भूपतिः
करोति नयनोत्सवस्त्रिदशधाम्नि यत्कीर्तनं
वसन्तसमये भवत्यमलकीर्त्तिधामैव सः १८७
आरोप्य स्थिरमेकं स्तम्भं भूमीगृहादिरहितमथ
हस्तचतुष्कोच्छ्राया कार्योपरि भूमिका चास्य १८८

मध्ये भ्रमरकयुक्तं शेषं पूर्ववदिहाचरेदखिलम्
पुष्पकमपि च स्तम्भे शिथिलं कलशोच्छ्रितं कुर्यात् १८९
तस्योपरि च ग्रीवा चतुरासनसंयुता विधातव्या
घण्टास्तम्भौ कार्यौ स्तम्भेन महाबलौ तत्र १९०
एवं पुष्पकभूमिकान्तरलस्थायी निगूढो जनो
यावद् भ्रामकयन्त्रचक्रनिकरं सम्यक् क्रमाचालयेत्
तावत्ता रथिकासना मृगदृशस्तत्र स्थिताः पुष्पके
कामावासकुतूहलार्पितदृशो भ्राम्यन्ति सर्वा अपि १९१
अथ कोणगतान् स्तम्भांश्चतुरो विनिवेशयद् क्रजून् सुदृढान्
सुश्लिष्टपीठसंस्थान् समान्तरान् मेदिनीवशतः १९२
तेषामुपरि लतान्तरसंयुक्ता भूमिका विधातव्या
रथिकास्तत्र चतस्रो जायन्ते पूर्ववद्दिक्स्थाः १९३
तदुपरि तथार्धभूमिः कार्या सुश्लिष्टदारुसन्धाना
मध्यभ्रमरकयुक्ता सरूपका मत्तवारणयुता च १९४
नानाविधकर्मवती वसन्ततो बाह्यरेखा स्यात्
अन्योन्ययन्त्रपरिघट्टनदोल्यमान-
निश्शेषचक्ररथिकाभ्रमणाभिरामम्
दृष्ट्वा वसन्ततिलकं सुरमन्दिराणां
भूषायमाणमुपयाति न विस्मयत्वं १९५
प्रविधाय रङ्गभूमिं प्रथमां शास्त्रान्तराधरस्यार्थे
चतुरश्रा रूपवती सचतुर्भद्रा विधेया भूः १९६
प्रतिकोणमागतस्या भद्रेषु भवन्ति संयता भ्रमराः

अत उपरिष्टाद्भूम्या भ्रमराश्चाष्टासनाः कार्याः १९७
रेखाः शुद्धाः कार्या बहिरन्तश्चित्रिताश्चान्याः
पीठेषु मध्यगस्थास्ततोऽपरा भूमिकाः कार्याः १९८
पीठस्य मध्यसंस्थैरन्योन्यारालियोजितैश्चक्रैः
सर्वे वेगाद् भ्राम्यन्ति सान्तना विभ्रमे भ्रमराः १९९
दोलासनो विहितवारवधूकृताति-
चित्रेण यस्त्रिदशधामसु विभ्रमेण ।
पृथ्वीपतिमुदमुपैति समुल्लसन्ती
कीर्त्तिर्न माति भुवनत्रितयेऽपि तस्य २००
चतुरश्रमथ क्षेत्रं कृत्वांशैर्भाजितं ततोऽष्टाभिः
कार्णैः शेषैस्तस्मिंश्चतुरश्रं कल्पयेद्भद्रम् २०१
तद्द्विगुणमूर्ध्वमेतस्य भूमिकाभागसङ्ख्यया कार्यम्
तत्राद्यंशचतुष्केण भूमिका स्यात्समुच्छ्रयतः २०२
तत्राष्टषट्चतुर्भागवर्जिता भूमिका उपर्युपरि
क्रमशो भवन्त्यथैवं ताः स्युस्तिस्रोऽर्धसंयुक्ताः २०३
शेषांशोच्छ्रययुक्ता घरटा चतुरश्रकायता कार्या
त्रिचतुर्भूम्यौ कार्ये सषट्चतुर्भागविस्तारे २०४
रङ्गः स्यादाद्यभुवि द्वितीयभुवि कोणगास्तथा रथिकाः
स्युर्भद्राकृतियुक्ता दोला अपि तत्र रमणीयाः २०५
रथिकास्तृतीयभूमौ कार्या भद्रेषु चातिरमणीयाः
कोणेष्वथासनान्यर्धवास्तुकेऽपि भ्रमः कार्यः २०६
दोलारथिके चतुरासने भ्रमोऽष्टासनो भवेत् तत्र

आसनमिह तत्कथितं युवतेः स्थानं यदेकं स्यात् २०७
निखिलान्यपि भ्रमणसंमुखं तानि बिभ्रति भ्रमणम्
यत्रासनानि स इह भ्रम इत्युक्तोऽपराधिका २०८
यष्टेरूर्ध्वमधस्ताद् भ्रमस्य चक्रं योजयेदेकम्
लघुचक्राणि च तद्वन्नियोजयेदासनेष्वत्र २०९
लघुचक्रारकवृत्ते संलग्नाः कीलका दृढाः कार्याः
तुल्यान्तराः समस्ताः प्रलघुचक्रारवृन्तगताः २१०
रथिकाशिखाग्रचक्रं भ्रमचक्रारकनियोजितं कार्यम्
यष्टिचतुष्टयमसिंस्तिर्यक् चक्रद्वयोपेतम् २११
ऊर्ध्वं द्वितीयभूमेस्तृतीयभूमेरथान्तरे कुर्यात्
नियतं रथिकायष्टिभ्रमसंलग्नानि यन्त्राणि २१२
आसनाधारयष्टीनां रथिकाचक्रयोजितान्
अधः समान्तरान्कुर्याच्चतुरः परिवर्तकान् २१३
तद् द्वितीयभूमीदोलागर्भे समान्तरे यष्टी
लग्ने तथैकचक्रे याम्योत्तरचक्रयोर्न्यस्येत् २१४
तद्वदधो भूकोणगरथिकाचूडाग्रचक्रसंसक्ताः
यष्टीस्ततश्चतस्त्रो द्विचक्रका इतरचक्रयोर्न्यस्येत् २१५
प्रान्तचक्रद्वये कोणरथिकाचक्रयोजिता
दोलागर्भगता यष्टिस्तिर्यक् कार्यापरापरा २१६
पूर्वे भद्रे द्वारं कुर्यात्सोपानराजितमधस्तात्
गर्भात्पश्चिमभागे निवेशयेद्देवतादोलाम् २१७
अन्योन्यं चक्रभ्रममिच्छामुक्तिं विधानतः सम्यक्

ज्ञात्वा प्रयोजनीयं शीघ्रवहं मन्दवहनं वा २१८
एष समासेन यथा भ्रममागः कीर्तितः स्फुटोऽस्माभिः
अन्येष्वपि कर्तव्यः सम्यग् भ्रमहेतवे तद्वत् २१९
स्तम्भादिद्रव्याणां विन्यासैः कल्पितं दृढैः श्लक्ष्णैः
सुश्लिष्टसन्धिबन्धं धृतं तथा दीर्घमुख्यधरैः २२०
परिवारितमथ तिलकैः समन्ततः सिंहकर्णसम्युक्तम्
त्रिपुरं सम्यक् कुर्याद् विचित्ररूपं कैश्चित्रैः २२१
बुद्ध्या क्लृप्तैः पूर्वयन्त्रैश्च युक्तं यन्त्राध्यायं वेत्ति यः सम्यगेतम्
प्राप्नोत्यर्थान् वाञ्छितान् कीर्त्तियुक्तान् स क्ष्मापालैरन्वहं पूज्यते च
२२२
एतद्ब्राडशराजचक्रमखिलं क्ष्मापालचूडामणे-
र्दोःस्तम्भप्रतिबद्धवृत्ति परितो यस्येच्छया भ्राम्यति ।
स श्रीमान् भुवनैकरामनृपतिर्देवो व्यधत्त द्रुतं
यन्त्राध्यायमिमं स्वबुद्धिरचितैर्यन्त्रप्रपञ्चैः सह २२३
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वासुशास्त्रे यन्त्रधिघानं नामैकत्रिंशोऽध्यायः

अथ गजशाला नाम द्वात्रिंशोऽध्यायः

लक्षणं गजशालानामिदानीमभिदध्महे
चतुरश्रीकृते क्षेत्रे भागैर्भक्ते ततोऽष्टभिः १
मध्ये द्विभागविस्तारं स्थानं कुर्वीत हस्तिनः
कल्प्याः प्रासादवद्भागा ज्येष्ठमध्याधमाः क्रमात् २

तद्बहिर्भागिकोऽलिन्दो बहिस्तस्यापि चापरः
भागेनैकेन भित्तिः स्याद् द्वितीयालिन्दकाद्बहिः ३
तस्या द्वारप्रदेशे तु कर्तव्यौ कूर्परावुभौ
कर्णप्रासादिका कार्या द्वितीयालिन्दसंश्रिता ४
द्वे द्वे वातायने कुर्याद्भित्तौ दिक्षु तिसृष्वपि
प्राग्ग्रीवोऽग्रे भवेच्छाला सुभद्रेयमुदाहृता ५
अस्या एव यदा पक्षप्राग्ग्रीवौ भवतो मुखे
नन्दिनी नामतः शाला तदा स्याद्जगवृद्धये ६
अस्या एव यदा स्यातां प्राग्ग्रीवौ पार्श्वयोर्द्वयोः
तदा सुभोगदा नाम तृतीया परिकीर्तिता ७
अस्या एव यदा पृष्ठे प्राग्ग्रीवः क्रियतेऽपरः
भद्रिका नाम शाला स्यात्तदा द्विरदपुष्टिदा ८
पञ्चमी चतुरश्रा स्याद्धर्षणी नाम पूजिता
प्राग्ग्रीवालिन्दनिर्यूहहीना षष्ठी तथापरा ९
शाला प्रमारिका धान्यधनजीवितहारिणी
तदेतां वर्जयेत्कुर्यादन्याः सर्वार्थसिद्धये १०
प्रमारिकेति प्रथितेह शाला सा प्राणसस्यद्रविणच्छिदे स्यात्
कुर्यादतस्तां न यथोदितास्तु कार्याः परा जीवितवित्तवृद्धयै ११

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे गजशाला नाम द्वात्रिंशोऽध्यायः

अथाश्वशाला नाम त्रयस्त्रिंशोऽध्यायः

अथ लक्ष्माश्वशालायाः प्रोच्यते विस्तरादिह
स्ववेश्मवास्तोः कर्तव्यं पदे गन्धर्वसंज्ञके १
अथवा पुष्पदन्ताख्ये स्थानं वासाय वाजिनाम्
अरत्निशतमात्रं यज्ञचेष्ठं तत् परिकीर्तितम् २
अशीत्यरत्निकं मध्यं षष्ठ्यरत्न्यधमं भवेत्
स्थलप्रदेशे विपुले गुप्ते रम्ये शुचौ तथा ३
समे च चतुरश्रे च स्थिते मङ्गल्यमेव च
स्थानं हयानां कर्तव्यं प्रदेशे सुपरिक्रमे ४
निम्नगुल्मद्रुमस्थाणुचैत्यायतनवेश्मभिः
वल्मीकशर्कराभिश्च वर्जिते तत् समाचरेत् ५
निःसङ्गे शल्यहीने च प्रागुदक्प्रवणे तथा
प्रदेशे तद्विधातव्यमालोक्य सुसमाहितैः ६
ब्राह्मणानुमते शस्ते दिने स्थपतिभिः सह
भूमेर्विभागमालोक्य सुभगानानयेद्द्रुमान् ७
न जाता ये श्मशानेषु देवतायनेषु वा
अन्येष्वपि निषिद्धेषु जातान् वृक्षान् विवर्जयेत् ८
वृक्षान् प्रशस्तानानीय समीपे भर्तृवेश्मनः
ततो भूमिं परीक्षेत प्रशस्तामथ नन्दिताम् ९
चितायतनवल्मीकग्रामधान्यखलेषु च
विहारेषु च कर्तव्यमश्वानां न निवेशनम् १०
भवन्ति स्वामिनः पीडा ग्रामधान्यखलेषु च
श्मशाने वेश्मकरणान्नराणां मृत्युमादिशेत् ११

स्थानं विहारवल्मीकविहितं स्यादनर्थकम्
तन्नित्यसन्तापकरं क्षयकृच्च तपस्विनाम् १२
दैवोपघातजननं स्त्रीणां च क्षयकारकम्
विहितं पादपैश्चैत्यैर्गृहं स्याद्भूतभीतिदम् १३
भवेद्रोगकरं भर्तुर्विहितं करटकिद्रुमैः
दीर्णायामुन्नतायां च कृतं भूमौ क्षयावहम् १४
नतायां क्षुद्भयकरं कृतं भवति मन्दिरम्
तस्मात्कार्यं प्रशस्तायां भूमौ तद्वाजिवृद्धये १५
मङ्गल्यरमणीये चतुरश्रे मनोनुगे
शुभे च विहितं सद्म भवेत्कल्याणकारकम् १६
निर्गच्छतो यथा वामे पार्श्वे भर्तृस्तुरङ्गमाः
भवन्ति कुर्यात्स्थपतिस्तथा वाजिनिवेशनम् १७
अन्तःपुरप्रदेशस्य कार्यं दक्षिणतश्च तत्
प्रवेशे दक्षिणं तेषां हेषितं जायते यथा १८
तथा भर्तुर्हितार्थाय कर्तव्यं सद्म वाजिनाम्
प्रागुदग्वा मुखं तस्य विधातव्यं सतोरणम् १९
प्राग्ग्रीवकेण संयुक्तं चतुःशालमसङ्कटम्
दशारत्निसमुच्छ्रायमष्टारत्निप्रविस्तृतम् २०
नागदन्तकसंशोभि पुरः कुड्यार्धसंयुतम्
पृष्ठे समग्रकुड्यं वा तत्र स्थानानि कल्पयेत् २१
तानि तु प्राङ्मुखानि स्युस्तथैवोदङ्मुखानि च
आयामे किष्कुमात्राणि त्रिकिष्कूणि च विस्तरात् २२

प्रांशून्नतोर्ध्वभागानि चतुरश्राणि कारयेत्
अग्रोच्चां सुखसञ्चारां तेषु भूमिं प्रकल्पयेत् २३
स्थानं सूत्रस्य मध्ये तु हस्तमात्रं समन्ततः
आस्तीर्णं च समश्लक्ष्णनीरन्ध्रैः फलकैर्दृढैः २४
धातक्यर्जुनपुन्नागककुभादिविनिर्मितैः
अष्टाङ्गुलसमुच्छ्रायैरध्यर्धारत्निविस्तृतैः २५
अच्छिद्रैः संहतैर्बद्धैरयसा पार्श्वयोर्द्वयोः
अजन्तुसङ्कुलैः काष्टै रुचकाभिर्भिषङ्गतैः २६
यवसस्य भवेत्स्थानं निर्यूहैः स्वास्तृतं शुभैः
किष्कुत्रयोच्छ्रितं तत्स्यादेकान्ते सुसमाहितम् २७
हस्तद्वयप्रमाणं च कुर्यात् खादनकोष्ठकम्
सूपलिप्तमदुर्गन्धि विस्तारोच्छ्राययोः समम् २८
स्थाने स्थाने त्रयः कीलाः सुदृढाः कपिशीर्षकाः
पञ्चाङ्गीनिग्रहार्थं तौ पुरतः कल्पयेदुभौ २९
पश्चाद्बन्धार्थमेकं च सुगुप्तं परिकल्पयेत्
चतुर्हस्तायतं त्यक्त्वा शालाकोणचतुष्टयम् ३०
स्थानेष्वेतेषु गुरगान् सर्वेष्वपि निवेशयेत्
तत्र कुर्याद्बलिं होमं स्वस्तिवाचनकं जपम् ३१
ग्रीष्मे कार्यं सुसंमृष्टं सिक्तं तत्र महीतलम्
वर्षास्वनम्बुपङ्कं च शिशिरे संवृतं शुभम् ३२
तिष्ठेयुस्तत्र तुरगा नातिसङ्कीर्णशङ्किनः
अस्पृशन्तो मिथः कार्याः सर्वाबाधविवर्जिताः ३३

स्थानं दक्षिणपूर्वस्यां दिशि वह्नेः प्रकल्पयेत्
निदध्यादुदकुम्भं च किञ्चिदैन्द्रीसमाश्रितम् ३४
ब्राह्मयां दिशि प्रकर्तव्यं स्थानकं यवसस्य च
वायव्यां तु प्रकर्तव्यं स्थानमौदूखलं दिशि ३५
निःश्रेणयः कुशाः कूपाः कार्याश्च फलकावृताः
कुद्दालोद्दालगुडकाः शुक्तयोगाः खुरस्तथा ३६
कचग्रहणयः शृङ्गं च तथा परशवोऽपि च
नाद्याः प्रदीपाश्च भवन्त्यश्वागारोपयोगिनः ३७
सङ्ग्रहः सुखसञ्चारवस्तूनां नैर्ऋते भवेत्
अग्न्युपद्रवरक्षार्थं बन्धच्छेदोपयोगिनः ३८
पदार्थान् सन्निधौ कुर्याज्जलदीपादिकान् बुधः
भाण्डानि कुर्याच्च पृथग् जन्द्रापनयनेच्छया ३९
हस्तवासीं शिलां दीपं दर्वीं फालमुपानहौ
पिटकानि विचित्राणि वस्तीन् नानाविधानपि ४०
एवंविधानि चान्यानि संनिदध्यात्प्रयत्नतः
पुरःस्तम्भाश्रितं भाण्डं सन्नाहादेर्विधीयते ४१
प्राङ्मुखे तुरगं गेहे वारुण्यां स्थापयेद्दिशि
पूर्वामुखे पदे वापि मित्रस्य वरुणस्य च ४२
भवन्ति तेन बहवः पुष्टिं च प्राप्नुवन्ति ते
सा हि दिक्पूजनीया च स्तोतव्या च प्रकीर्तिता ४३
होमशान्तिकदानेषु धर्म्या याश्च पराः क्रियाः
तासु प्रशस्यते पूर्वा शकेणाधिष्ठिता स्वयम् ४४

तस्यामुदेति दिनकृदनुलोमं ततः पुनः
अश्वानां पृष्ठतो याति स प्रतीचीमनुक्रमात् ४५
स्नानाधिवासने पूजा माङ्गल्यानि पराणि च
प्राङ्मुखानां तुरङ्गाणां कर्तव्यानि शुभार्थिभिः ४६
एवं कृते भूमिबलमित्राणां यशसोऽपि च
वृद्धिर्भवति भूपस्य तस्मात्प्राची प्रशस्यते ४७
भर्तृवृद्धिप्रदं स्थानमग्रग्रासस्य तद्भवेत्
दक्षिणाभिमुखायां तु शालायां वाञ्छिताथदम् ४८
स्थानं भवति वाहानां पदे क्लृप्तं विभावसोः
वह्निनाध्यासिता सा दिगात्मा वह्निश्च वाजिनाम् ४९
अजरो बहुभोक्ता च तत्र बद्धो भवेद्धयः
उदङ्मुखेऽपि भवने प्राप्नुवन्ति शुभं हयाः ५०
तथास्थितानामश्वानां दक्षिणेन दिवाकरः
उदेत्यनन्तरं याति तान् विधाय प्रदक्षिणम् ५१
प्रयाति वामतोऽश्वं च स्थाप्यास्तेनोत्तरामुखाः
चन्द्रार्कौ प्रतिहर्षन्ते तथा बध्नीत वाजिनः ५२
नृपतिश्च जयं सिद्धिं पुत्रानायुश्च विन्दति
अरोगाश्च भवन्त्यश्वा वर्धयन्ति च सन्ततिम् ५३
दक्षिणाभिमुखान्कुर्यान्न सन्नाह्यान्न चाग्रगान्
पितृकार्याद्यतोऽन्यत्र दक्षिणा वर्जितैव दिक् ५४
अस्यामेव दिशि प्रेता यतः सर्वे प्रतिष्ठिताः
उदेति वामतो याति चास्तं दक्षिणतो रविः ५५

सोमश्च पृष्ठे भवति तेनाश्वा दैवपीडिताः
ग्रहैर्विकारैर्विविधैः पीड्यन्तेऽरातिविह्वलाः ५६
भयेन व्याधिभिश्चार्ता ग्रासं नेच्छन्ति खादितुम्
पराजयमतुष्टिं च स्वामिनोऽनर्थसङ्गतिम् ५७
कुर्वन्त्यतो न बध्नीयात्कथञ्चिद् दक्षिणामुखान्
पश्चिमाभिमुखानां च बद्धानां वाजिनां सदा ५८
उदेति पृष्ठतो भानुः पुरतोऽस्तं प्रयाति च
न भवेद्विजयस्तेन भर्तुस्तत्पृष्ठवर्तिनः ५९
शक्रस्य पृष्ठवर्तित्वात्प्रातिलोम्याच्च भास्वतः
कुप्यन्ति व्याधयस्तेषां तूर्णं देहविनाशनाः ६०
तैस्ते ध्यायन्ति वेपन्ते जले त्रासं प्रयान्ति च
यवसं नाभिनन्दन्ति क्षमां मुञ्चन्ति सर्वथा ६१
दिशोऽभिमुखमाग्नेय्या बध्यन्ते यदि वाजिनः
व्यथन्ते रक्तपित्तोत्थैस्तदा रोगैरनेकधा ६२
जायन्ते स्वामिनो बन्धवधहृच्छोषादायिनः
वाजिनां च भवेत्तत्र वह्निदाहकृतं भयम् ६३
भर्तुः पराजयो विघ्नः स्याच्च देहस्य संशयः
नैर्ऋत्याः ककुभो वाहा बध्यन्ते संमुखं यदि ६४
तदा न तेऽभिनन्दन्ति खादनं पानभोजने
यथा यथा क्षितिं पादैर्दारयन्ति पुनः पुनः ६५
हेषन्ते वीक्ष्य बहुशो मनुष्यान् पक्षिणः पशून्
भ्रमयन्ति च गात्राणि नैर्ऋतीं चाभितः स्थिताः ६६

तथा तथैषां कुपिता नाशं कुर्वन्ति राक्षसाः
बध्यन्ते यदि वाज्ञानाद्वायव्याभिमुखं हयाः ६७
तदा ते वातिकै रोगैः पीडयन्ते प्रतिवासरम्
चलः कायो भवेद्भर्तुः क्लेशश्चाश्वोपजीविनाम् ६८
नराणां च भवेन्मृत्युर्दुर्भिक्षप्रभवं भयम्
ऐशान्यभिमुखं बद्धाः प्रणश्यन्ति तुरङ्गमाः ६९
सूर्योदयस्याभिमुखं बद्धानां चेदमादिशेत्
निबध्यन्ते यदा वाहा ब्राह्मीं दिशमुपाश्रिताः ७०
बध्यन्ते ते ग्रहैर्दिव्यैर्व्याधिभिश्च विचिन्तनाः
कव्यहव्यक्रियास्तत्र भर्तुर्न विजयावहाः ७१
द्विजानामुपतापाय जायन्ते तत्र वाजिनः
अनुवंशं च शालायां स्थानमश्वस्य नेष्यते ७२
स्वामिनस्तदजीर्णाय स्यान्नाशाय च वाजिनाम्
स्थाने प्रशस्ते तुरगान् सर्वथा वासयेदतः ७३
न च धार्याः क्षणमपि रोगिणः कल्यसन्निधौ
कल्यानामपि रोगाः स्युर्यतो रोगिसमाश्रयात् ७४
हयागारस्य पूर्वेण कार्यं भेषजमन्दिरम्
तस्यैव वामतः सर्वसंभारान् परिकल्पयेत् ७५
वाजिनां भेषजार्थाय भाण्डानि च विनिक्षिपेत्
अगदानोषधीः स्नेहान् वर्तीश्च लवणानि च ७६
भेषजागारसविधे कुर्याच्चारिष्टमन्दिरम्
भवनं व्याधितानां च कार्यं वासाय वाजिनाम् ७७

सुगुप्तं तच्च कर्तव्यं पूर्वनिर्दिष्टवेश्मवत्
संबद्धं च विधातव्यमेतद्वेश्मचतुष्टयम् ७८
सुधाबन्धदृढैः कुडचैः सप्राग्ग्रीवोच्चतोरणम्
चत्वार्यपि विशालानि सुगमानि च कारयेत्
वेश्मस्वेवंविधेष्वश्वान् स्थापितान् परिपालयेत् ७९
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे अश्वशाला नाम त्रयस्त्रिंशोऽध्यायः

अथाप्रयोज्यप्रयोज्यं नाम चतुस्त्रिंशोऽध्यायः

राज्ञां सेनापतीनां च वर्णिनामपि वेश्मसु
यदि वा वास्तुकक्षासु सभाडेवकुलेषु च १
शयनासनयानेषु भाजनाभरणेषु च
छत्रध्वजपताकासु सर्वोपकरणेषु च २
अप्रयोज्यानि यानि स्युः प्रयोक्तव्यानि यानि च
विस्तरात्तानि कथ्यन्ते हितार्थमथ देहिनाम् ३
पूर्वोक्तानां नृपादीनां यानि वेश्मसु केवलम्
अप्रयोज्यानि तान्येव पूर्वमत्राभिदध्महे ४
तेषु नैव प्रयोक्तव्याः समस्ता अपि देवताः
दैत्या ग्रहास्तथा तारा यक्षगन्धर्वराक्षसाः ५
पिशाचाः पितरः प्रेताः सिद्धविद्याधरोरगाः
चारणा भूतसङ्घाश्च तेषां योषाः सुतास्तथा ६
प्रतीहाराः प्रतीहार्यस्तेषामधिकृताश्च ये

आयुधानि तदीयानि सर्वे चाप्सरसां गणाः ७
दीक्षितव्रतिपाषण्डिनास्तिकाः क्षुत्प्रपीडिताः
व्याधिबन्धनशस्त्राग्नितैलासृक्पङ्कपांसुभिः ८
शूलज्वरादिभिश्चार्ता येऽन्येऽप्येवंविधा नराः
मत्तोन्मत्तजडक्लीबनग्नान्धबधिरादयः ९
दोलाक्रीडाश्च नेष्यन्ते ग्रहणानि च दन्तिनाम्
देवासुराद्याः सङ्ग्रामा विग्रहाच महीक्षिताम् १०
प्राणियुद्धविमर्दाश्च मृगया च न शस्यते
रौद्रदीनाद्भुतत्रासबीभत्सकरुणा रसाः ११
न प्राणिषु प्रयोक्तव्या हास्यशृङ्गारवर्जिताः
हस्त्यश्वरथयानानि विमानायतनानि च १२
चण्डानलप्रदीप्तानि भवनानि वनानि च
वृक्षाः पुष्पफलैर्हीना विहङ्गावासदूषिताः १३
एकद्विशाखा रूक्षाश्च भग्नाः शुष्काः सकोटराः
कदम्बशाल्मलीशेलुतारक्षारलुकादयः १४
भूतालयत्वान्नेष्यन्ते कटुकण्टकिनश्च ये
गृध्रोलूका विहङ्गेषु कपोतश्येनवायसाः १५
कङ्कश्चेति न शस्यन्ते खगा रात्रिचराश्च ये
गजाश्वमहिषाश्चोष्ट्रा मार्जारखरवानराः १६
सिंहो व्याघ्रस्तरक्षुश्च वराहमृगजम्बुकाः
तथा वनचरा ये च क्रव्यादा मृगपक्षिणः १७
गृहेष्वेते न कर्तव्याः शैलाटव्याश्रिताश्च ये

अमीषां करणादर्थैराचार्यो विप्रमुच्यते १८
व्याधिं घोरमवाप्नोति व्यसनं बन्धमेव च
यत्र तत्र गृहस्वामी धनहानिं पराजयम् १९
प्रवासं बन्धनं नाशं मृत्युं वा क्षिप्रमाप्नुयात्
इत्युक्तान्यप्रशस्तानि गृहेषु गृहमेधिनाम् २०
तत्र यानि प्रयोज्यानि कथ्यन्ते तान्यतः परम्
यस्य यत्र भवेद्भक्तिर्या चास्य कुलदेवता २१
हस्तक्लृप्तप्रमाणेन तान् कुर्वन् स्यान्न दोषभाक्
तद्द्वारपार्श्वयोः कार्यौ प्रतीहारौ खलङ्कृतौ २२
वेत्रदण्डव्यग्रकरौ खड्गकोशपरिच्छदौ
रूपयौवनसम्पन्नौ विचित्राम्बरभूषणौ २३
धात्री वामनिका कुब्जा सखीभिः परिवारिता
विदूषकैः कञ्चुकिभिस्तुष्टैरनुगतास्तथा २२४
द्वारस्योभयतः कार्याः प्रतीहार्यो मनोरमाः
निधयश्चानुरूपाश्च शङ्खाब्जोज्ज्वललक्षणाः २५
रत्नद्नीनारराशींश्च वहन्तो वदनोद्गतान्
पद्मस्था पूर्णकुम्भा वा रत्नवस्त्रविभूषिता २६
वक्त्रैरूर्ध्वस्थितैः पुष्पफलपल्लवसम्भृतैः
पूर्णकुम्भाङ्कुशच्छत्रश्रीवृक्षादर्शचामरैः २७
कार्याष्टमङ्गला द्वारे दामभिः शङ्खमत्स्ययोः
द्वारमण्डलमध्यस्था स्नाप्यमाना गजोत्तमैः २८
पद्मासना पद्महस्ता श्रीश्च कार्या स्वलङ्कृता

वृषः सवत्सा धेनुर्वा सच्छत्रस्त्रग्विभूषणा २९
फलभक्तैर्बहुविधैराहारार्थं निवेदितैः
नानापुष्पफलैर्नम्रैः शालैस्तिर्यगवस्थितैः ३०
चित्रा पत्रलता लेख्या बाह्याभ्यन्तरभित्तिषु
हंसकारण्डचक्राह्वैर्बिसिनीपत्रवर्तिभिः ३१
कुमारकैश्च क्रीडद्भिर्युक्ता ललितबाहुभिः
वासधाम्नि निवेश्यन्ते विचित्राभरणाम्बराः ३२
रतिक्रीडापरा नार्यो नायकस्तु यदृच्छया
आपाण्डुदेहच्छवयः स्वल्पचारुविभूषणाः ३३
किञ्चित्प्रतनुभिर्गात्रैः कार्याः सुरतलालसाः
प्रवृद्धशाखाविटपैः प्रचलारुणपल्लवैः ३४
चम्पकाशोकपुन्नागनानाम्रतिलकादिभिः
छायापुष्पफलोपेतैः वृक्षैरन्यैश्च भूषिताः ३५
उद्यानभूमयः कार्याः कूजत्पिकमधुव्रताः
ऋतवः फलपुष्पाद्यैः स्वैः स्वैश्चिह्नैरलङ्कृताः ३६
मनोरमैर्विशेषैश्च खगैश्च समयोचितैः
कादम्बकुररक्रौञ्चहंससारसमेखलाः ३७
तीरान्तोद्गतवानीरकेतकीषण्डमण्डिताः
जलान्तलीनमत्स्यैश्च सञ्छन्ना नलिनीवनैः ३८
लेख्याश्च गृहभित्तीनामधोभागेषु दीर्घिकाः
फलैः समं सभक्षेत्तुमणिकाञ्चनभाजनाः ३९
विन्यस्तपद्मिनीपत्राः सोत्पलाः पानभूमयः

विचित्रातोद्यहस्ताश्च नृत्यगीतविचक्षणाः ४०
मुदिता ललना लेख्याः प्रेक्षासङ्गीतभूमिषु
प्रकल्प्याः पञ्जरस्थाश्च चकोरशुकसारिकाः ४१
प्रहृष्टाः परपुष्टाश्च मयूराश्च सकुक्कुटाः
इति यानि प्रदिष्टानि प्रयोक्तव्यानि वेश्मनि ४२
तानि सर्वाणि शस्तानि सर्वोपकरणेष्वपि
देवयोनिगणास्तद्वत्पुरुषाश्च विनिन्दिताः ४३
साक्रन्दाश्च न शस्यन्ते पीठशय्यासनादिषु
पुरस्तात्कीर्तितान्यत्र प्रयोक्तव्यानि यानि च ४४
तानि शस्तानि कक्षासु सभादेवकुलेषु च
दिव्यमानुषसम्बद्धान्याख्यानाख्यायिकादिषु ४५
प्रोक्तानि तानि तावन्ति शुभान्यालेख्यकादिषु
इति कथितमयोज्यं योजनीयं च बुद्ध्या
भवनशयनकक्षादेवधिष्ण्यादिकेषु
विरचयति यथोक्तं निन्दितं वर्जयेद्यः
स भवति नृपतीनां शिल्पिनां चार्चनीयः ४६

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे अप्रयोज्यप्रयोज्यं नाम चतुस्त्रिंशोऽध्यायः

अथ शिलान्यासविधिर्नाम पञ्चत्रिंशोऽध्यायः

अथ ब्रूमः शिलान्यासविधिमत्र यथागमम्
तत्रोदगयन्ते पुण्ये शुक्लपक्षे शुभेऽहनि १

स्थिरग्रहस्य दिवसे करणे च गुणान्विते
तिष्येऽश्विनीषु रोहिण्यामुत्तरेष्वपि च त्रिषु २
रेवत्यां श्रवणे हस्ते शिलाविन्यासमाचरेत्
स्थिरस्य राशेरुदये सौम्यमित्रावलोकिते ३
सम्यङ्निमित्तशकुनस्वस्तिपुण्याहवाचिते
हर्षोदये च मनसः कुर्याद्वास्तोर्निवेशनम् ४
भद्रः प्रकृत्या शास्त्रज्ञः शुचिः स्नातः समाहितः
कर्मारभेत स्थपतिः कृतदेवार्चनक्रियः ५
पूर्णां समामविकलां चतुरश्रामनिन्दिताम्
शिलामाद्यां चये साध्वीं परीक्षेत विचक्षणः ६
कुम्भाङ्कुशध्वजच्छत्रमत्स्यचामरतोरणैः
दूर्वानागफलोष्णीषपुष्पस्वस्तिकवेदिभिः ७
नन्द्यावर्तैः सचमरैः कूर्मपद्मनिशाकरैः
वज्रैः प्रशस्तैः प्राकारैर्भूषिताः कर्मणो हिताः ८
दीर्घा ह्रस्वाल्पविषमाछाभाध्मातापरीक्षिता
दिङ्मूढा चाङ्गहीना च सास्थ्यङ्गारा सशर्करा ९
खण्डा दुःपक्वनिर्भिन्ना कृष्णा दोषभयावहा
नृणां पशुतुरङ्गाणां पदाङ्काः स्वस्तिवृद्धये १०
कव्यान्मृगविहङ्गानां पादैः स्पृष्टास्तु वर्जयेत्
नन्दाभद्राजयापूर्णाश्चतस्रः स्युरिमाः शिलाः ११
वासिष्ठी काश्यपी तद्वद्भार्गव्याङ्गिरसीति ताः
तत्र प्रागुत्तरे देशे संनिवेशस्य वास्तुनः १२

नैर्ऋत्यां वा सकुसुमां समां गोचर्मसम्मिताम्
वेदीं सगन्धकलशां चतुरश्रां प्रकल्पयेत् १३
आग्नेय्यामादितो नन्दां स्थापयेत्क्रमशः शिलाम्
अकालमूलैरव्यङ्गैः सपद्मोत्पलपल्लवैः १४
सर्वौषधिहिरण्याद्यैर्हेमराजतमृन्मयैः
कुम्भैस्ताम्रमयैश्चापि मन्त्रैस्तामभिषेचयेत् १५
तीर्थप्रस्रवणाम्भोभिः सरत्नाक्षतपङ्कजैः
सुगन्धिभिः सपुण्याहमभिषेकं प्रयोजयेत् १६
जाह्नवीयमुनारेवासरस्वत्यादिसम्भवैः
महानदीजलं शस्तं शुभतीर्थभवं तथा १७
तथाद्रिवनवेशन्तदेवायतनजानि च
अभिषेकाथमम्भांसि यथालाभमुपाहरेत् १८
मन्त्रेणानेन चैतासामभिषेकं समाचरेत्
हिरण्यवर्णाः पावन्यः शुचयो दुरितच्छिदः १९
पुनन्तु शान्ताःश्रीमत्य आपो युष्मान्मधुच्युतः
मन्त्रपूतेन पयसा स्नापयित्वा ततः शिलाम् २०
स्थपतिर्गन्धकल्केन मङ्गल्येनानुलेपयेत्
हिमचन्दनपूर्णेन व्यवकीर्य सुगन्धिना २१
तरसा छादयेदेनां सलाजैः पुष्पदामभिः
धूपमाल्योपहारैश्च दधिमांसान्नतादिभिः २२
पूजयेदिष्टकां देवीं वस्त्रयुग्मैश्च पुष्कलैः
निवेशनान्ते नैर्ऋत्यां तदा विप्रानवस्थितान् २३

समसङ्ख्याञ्शुचीन्प्राज्ञानर्चयेद्दक्षिणाफलैः
ओङ्कारस्वस्तिपुण्याहगीतवादित्रनिस्वनैः २४
कर्ता जनितरोमाश्चस्तेभ्यः कुर्यान्नमस्क्रियाम्
निवेद्य वास्तोष्पतये भूतेभ्यश्च ततो बलिम् २५
तासां चतसृणामन्याः कुर्यादुपशिलाः पृथक्
प्राकारस्वस्तिकाङ्के द्वे तथा श्रीवत्सलक्षणा २६
नन्द्यावर्तस्तु पूर्णायां भवेदेको यथाक्रमम्
कर्णे प्राग्दक्षिणे नन्दां वास्तुनः स्थापयेदधः २७
अन्याः क्रमेण भद्राद्याः कोणेष्वन्येषु च त्रिषु
प्रतिष्ठापनमन्त्राश्च तासां चतसृणामपि २८
चत्वार ऋषिभिर्गीताः शाश्वतारम्भदर्शनाः
वीर्येणादिवराहस्य वेदार्यैस्त्वभिमन्त्रिताः २९
वसिष्ठनन्दिनीं नन्दां प्राक् प्रतिष्ठापयाम्यहम्
सुमुहूर्ते सुदिवसे सा त्वं नन्दे निवेशिता ३०
आयुः कारयितुर्दीर्घं श्रियं चाग्र्यामिहावह
भद्रासि सर्वतोभद्रा भद्रे भद्रं विधीयतम् ३१
कश्यपस्य प्रियसुते श्रीरस्तु गृहमेधिनः
जये विजयतां स्वामी गृहस्यास्य महात्मनः ३२
आचन्द्रार्कं यशश्चास्य भूम्यामिह विरोहतु
त्वयि सम्पूर्णचन्द्राभे न्यस्तायां वास्तुनस्तले ३३
भवत्येष गृहस्वामी पूर्णे पूर्णमनोरथः
इति मूलचयो मन्त्रैः कुर्यात्स्वस्तिकवाचनैः ३४

ताभिर्हिरण्यवर्णाभिः शिलाभिः सममद्भुतम्
प्रागुदक्प्लवना धन्या न प्रत्यग्दक्षिणाप्लवा ३५
इष्टकाश्चैत्यभवनप्राकारपुरकर्मसु
विताने चितिविन्यासे चतुर्मुखनिकेतने ३६
पुरोधाः शान्तिवेदीषु प्रतिमास्थापनेषु च
याज्ञिकेन विधानेन क्रमशः स्थापयेच्छिलाः ३७
त्रैशोकौर्णासभासैस्ताः सामभिः स महाव्रतैः
गायत्र्युष्णिगनुष्टुब्भिर्बृहत्या च यथाक्रमम् ३८
चयान् समस्तांश्चिनुयाच्चतुरो विरमेत् ततः
ज्ञात्वा भित्तिप्रमाणं च चितेश्चयचतुष्टयम् ३९
समाप्यमादिकर्मैवं कनिष्ठं च यथोत्तरम्
प्रतिष्ठितास्ताः प्रथमं भूतले सुस्थिताः समाः ४०
न चालयेच्चालने स्याद्गृहभर्तुर्महद् भयम्
कम्पने च भयं विद्यादेतासां स्थिरतां पुनः ४१
स्थपतेर्गृहभर्तुश्च मङ्गलं परमं विदुः
प्राग्दक्षिणायां चलने गृहभर्तुर्महद्भयम् ४२
भार्याविनाशो नैर्ऋत्यां शून्यं भीतिर्मरुद्दिशि
गुरोश्च भयमैशान्यामपचारेऽपि तद्भवेत् ४३
प्रथमं स्थापितेनैवं स्तम्भानपि न चालयेत्
नोद्धरेत प्रणुद्याच्च विधिस्तुल्यो यतोऽनयोः ४४
विन्यासं प्रथमं तस्मात्कुर्यात् सम्यक् समाहितः
शिलानां स्थपतिस्तद्वत्स्तम्भानामपि सर्वथा ४५

द्वारप्राकारशालानां नगराणां च वेश्मनाम्
तत्प्रमाणो विधिर्यस्मात्तस्मात्तत्रादृतो भवेत् ४६
एवं शिलान्यासविधानमेतद्यथावदस्माभिरिहोपदिष्टम्
अस्मिन् कृते वेश्मसुरालयादि निष्पत्तिमभ्येति विनैव विघ्नम्
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे शिलान्यासविधिर्नाम पञ्चत्रिंशोऽध्यायः

अथ बलिदानविधिर्नाम षट्त्रिंशोऽध्यायः

इदानीमभिधास्यामो बलिरूपविधेः क्रमम्
येन येनार्चिता देवास्तुष्यन्ति समहेश्वराः १
मण्डलं वास्तुनो मध्ये गोमयेन प्रकल्पयेत्
कलशं तत्र विन्यस्येत् सप्रसूनं सकाञ्चनम् २
वास्तुदेवास्ततः कल्प्या यथास्थाननियोगतः
सधुपेर्विविधैर्माल्यैरर्घ्यं पश्चान्निवेदयेत् ३
अर्चयेद्विश्वकर्माणं माल्यैर्धूपैर्विलेपनैः
भक्षैः फलैर्बहुविधैः पूजयेत्सुसमाहितः ४
आज्येन पयसा दध्ना पूजयेच्छिखिनं पुनः
शालिगोधूममुद्ग्राद्यैर्धान्यैः पर्जन्यमर्चयेत् ५
जयन्तं पूजयेदाम्रद्राक्षाखर्जूरिकादिभिः
मालतीमल्लिकाभिश्च पूजयेत्त्रिदशाधिपम् ६
पुष्पै रक्तैस्तथा धूपै रक्तचन्दनलेपनैः
ततः सूर्यं जगन्नाथं पूजयेल्लोकचक्षुषम् ७

जम्बीरैर्बीजपूरैश्च नारङ्गैः पीतकैः फलैः
पूजयेत्सत्यनामानं देवं तेन स तुष्यति ८
मत्स्यमांसैश्च तुष्यन्ति सर्वे रक्षःपुरोगमाः
सितैः फलैर्नारिकेलैर्भृशश्च परितुष्यति ९
गन्धधूपप्रयोगैश्च नभोनामानमर्चयेत्
पुष्पैः सुगन्धिभिः शुक्लैर्मारुतः परितुष्यति १०
कृसरं मधुसंयुक्तं पूष्णे भक्त्या निवेदयेत्
वितथं तु शुभैरन्यैर्मद्यमांसविवर्जितैः ११
पूजितस्तुष्टिमायाति विवस्वांश्च महामुनिः
पुष्पैः सपुष्पकैस्तुष्टिमवाप्नोति गृहक्षतः १२
मत्स्यमांसयुतैर्भव्यैर्यमतुष्टिः सदा भवेत्
पुन्नागागरुधूपेन गन्धर्वानर्चयेद्बुधः १३
मृगमांसयुतैर्भक्षैर्भृङ्गराजं च तर्पयेत्
राजजम्बूफलैर्बिल्वैर्देवमभ्यर्चयेन्मृगम् १४
पायसैर्मधुसंयुक्तैर्मांसैर्भक्तैश्च शोभनैः
कर्पूरसुरभिद्रव्यगर्भैः संपूजयेत्पितॄन् १५
सपुष्पैर्मोदकैर्लाजैः पललैश्च विमिश्रितैः
दौवारिकं प्रयत्नेन पूजयेद्विघ्नकारकम् १६
अपूर्वैः शोभनैर्गन्धैर्धूपैर्माल्यैरनुत्तमैः
पुष्पैः करटकजातीनां सुग्रीवं पूजयेत्सदा १७
सपुष्पैर्लापकैर्भक्ष्यैर्दधियुक्तान्नपायसैः
अर्चयत्पुष्पदन्तं तु यशोवीर्यान्वितं सुरम् १८

मांसैश्च सूकरादीनां वैनतेयं सदार्चयेत्
वरुणं च महासत्त्वं पूजयेद्धूपचन्दनैः १९
राहुं च मांससंयुक्तैस्तर्पयेद्भक्ष्यभोजनैः
रुधिरेण प्रदत्तेन तुष्टिमेति शनैश्चरः २०
मांसेन तु क्षयस्तुष्टिं रोगाणामधिपो व्रजेत्
मेदसा पूजयेद्रोगं सर्वलोकभयङ्करम् २१
वासुकिं क्षीरदानेन पूजयेत् सततं नरः
पूर्ववत्पूजयेद्देवं विश्वकर्माणमीश्वरम् २२
सितप्रसूनविन्यासैर्भल्लाटं पूजयेद्बुधः
दधियुक्तेन चान्नेन सोमं सर्वत्र पूजयेत् २३
कुबेरं धूपदानेन पूजयेत् सततं नरः
अदितिं च सुवर्णेन पद्मैरपि च पूजयेत् २४
अर्कमन्दारमालाभिर्वृषभं च समर्चयेत्
अन्येषामपि देवानामर्चनं धूपसाम्प्रतैः २५
सर्वपुष्पफलैश्चैषां कार्यं बुद्धिमता सदा
इत्येते बलयः सर्वे शान्त्यर्थं परिकल्पिताः २६
शोधने कर्षणे भूमेः साधने रूपकल्पने
गृहे प्रवेशने रम्ये तिथिमभ्युदयेषु च २७
स्कन्धावारनिवेशेषु पुरग्रामनिवेशने
देवालयक्षितिपवेश्मनिवेशनेषु
प्रोक्तान् बलीन् प्रवितरेत्प्रयतः सुरेभ्यः
प्रारम्भमन्यमपि वास्तुगतं चिकीर्षुः

कुर्वन्निमं विधिमभीप्सितभाजनं स्यात् २८

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे बलिदानविधिर्नाम षट्त्रिंशोऽध्यायः

अथ कीलकसूत्रपातो नाम सप्तत्रिंशोऽध्यायः

वर्णानां यानि दारूणि कीलकार्यं नियोजयेत्
इदानीं तानि वक्ष्यामि श्रेयःकीर्त्तिहिताय च १
खदिरोदुम्बराश्वत्थशालशाकधवार्जुनाः
अञ्जनः कदराशोकतिनिशारुणचन्दनाः २
शिरीषसर्जन्यग्रोधवेणवः कीलकर्मणि
पुन्नामानो द्रुमाः शस्ताः स्त्रीनामानो विगर्हिताः ३
अश्वत्थः खदिरश्चैतौ विप्राणां वृद्धिकारकौ
रक्तचन्दनवेणूत्थकीलौ क्षत्रस्य पूजितौ ४
शाकश्च खदिरश्चेति सामन्तानां हिताविमौ
कीलौ शालशिरीषोत्थौ वैश्यानां कीर्तितौ शुभौ ५
शूद्रजाटेस्तु तिनिशधवार्जुनसमुद्भवाः
वैश्यवेश्मसु सौभाग्यकार्ये च स्युरशोकजाः ६
न्यग्रोधो वणिजां धाम्नि भूमिकर्मणयुदुम्बरः
महामात्रश्चवैद्यानां कीलाः सर्जार्जुना गृहे ७
विप्राणां सर्ववर्णोत्थाः क्षत्रियाणां त्रिवर्णजाः
वर्णद्वयोक्ता वैश्यानां शूद्राणां स्वानुलोमतः ८
प्रतिलोमा न कर्तव्याः कीलका भूतिमिच्छता

प्रमाणान्यथ कीलानां निगद्यन्ते पृथक्पृथक् ९
द्वात्रिंशदङ्गुलाः कीला विप्राणां स्युः शुभावहाः
क्षत्रियाणां पुनश्चाष्टाविंशत्यङ्गुलसम्मिताः १०
चतुर्विंशत्यङ्गुलाश्च वैश्यानां शुभदायिनः
विंशत्याद्यङ्गुलैः कीलाः शूद्रजातेस्तु ते हिताः ११
षडङ्गुलपरीणाहाः सर्वेष्वेते शुभावहाः
ब्राह्मणक्षात्रियविशां वेदाष्टाश्रषडश्रयः १२
षडश्रयस्तु शूद्रस्य प्रकृतेस्तु यदृच्छया
दार्भमौञ्जौर्णकार्पासं विप्रादीनां यथाक्रमम् १३
अर्धपर्वपरीणाहं दृढं सूत्रं तु वर्तितम्
अलाभे स्वस्य सूत्रस्य प्रोक्तादन्यतमं बुधः १४
गृह्णीयात्सूत्रमन्ये तु गृह्णीयुः स्वेच्छयैव ते
इत्थं संभृत्य सम्भारान् गृहभर्ता शुभेऽहनि १५
शुक्लपक्षे शुचिः स्नातः स्थपतिश्च सिताम्बरः
गृहस्थाननिमित्तात्तु देवस्थानानि लक्षयेत् १६
कुसुमाक्षतमय्यश्च कर्तव्या गृहदेवताः
आदौ स्थानानि शङ्कूनां परीक्षेत समन्ततः १७
तेषु सर्वेषु कर्तव्यमर्चनं तु यथाविधि
गृहस्य मध्ये सिक्त्वा तु निरूप्य ब्रह्मणः पदे १८
गोमयेन समालिप्तां कुर्याद्वेदीं सुलक्षणाम्
चतुरश्रां चतुर्द्वारामक्षतैः सुप्रतिष्ठिताम् १९
तस्या मध्ये प्रतिष्ठाप्यः कुम्भो हैमोऽथ राजतः

ताम्रको मृन्मयो वापि पूर्वालाभे परः परः २०
अकालमूलः सोऽव्यङ्गो जलपूर्णः स्वलङ्कृतः
मणिरत्नप्रवालैश्च स्वर्णरूप्येण गर्भितः २१
प्रतिष्ठाप्याम्रतैः पुष्पफलबीजसमन्वितः
श्वेतेन चन्दनेनैनं चर्चयित्वा समन्ततः २२
तस्योपरिष्टाद् विन्यस्येत् क्षीरवृक्षस्य पल्लवम्
सुगन्धिनाथ धूपेन धूपयित्वा चतुर्दिशम् २३
वेष्टयेदहतेनैनं शुक्लवस्त्रेण सर्वतः
वासुमध्ये यतो ब्रह्मा कुम्भरूपं स तिष्ठति २४
कुम्भस्योत्तरभागे तु कीलकान् स्थापयेद्बुधः
कीलानष्टौ परीक्षेत स्थापयेच्च यथाविधि २५
श्वेतचन्दनलिप्तांस्ताञ्श्वेतपुष्पैर्विभूषयेत्
सालक्तकान् सुरभिणा धूपेन च सुधूपितान् २६
ऊर्णामयेन सूत्रेण त्रिवर्णेनाभिवेष्टयेत्
मधुसर्पिर्दधिक्षीरैर्मूलभागेषु लेपयेत् २७
अर्चयेत्परशुं सूत्रमष्ठीलादीनि सर्वतः
अथोपकरणान्यत्र धूपपुष्पाक्षतादिभिः २८
ततः पूर्वोत्तरे वास्तोर्भागे सप्तार्चिषः पदे
गोमयेन समालिप्ते कुशास्तरणमास्थितः २९
अग्निकार्यं प्रकुर्वीत पुरोधाः शान्तिमेव च
सांवत्सरः शुचिः स्नातः कृतस्नानः समाहितः ३०
शङ्कुना साधयेल्लग्नं सम्यक् तद्घटिकाथवा

रात्रिलग्नं तु नक्षत्रैर्मध्यास्तोदयसंश्रितैः ३१
एवं संसाधयेल्लग्नं यदीच्छेत्सिद्धिमात्मनः
पूजया तुष्टिकारिण्या पूजयेच्च पुरोहितम् ३२
अभ्यर्चिते यतस्तस्मिन् ब्रह्मा भवति पूजितः
सांवत्सरस्य कर्तव्या ततः पूजा यथाविधि ३३
सांवत्सरेऽर्चिते यस्मात्पूजितः स्याद्बृहस्पतिः
स्थपतिं पूजयेत्पश्चात्त्वष्टृतुष्टिचिकीर्षया ३४
तदधीनं यतः कर्म शुभं वा यदि वाशुभम्
श्वेतचन्दनदिग्धांस्ताञ्श्वेतपुष्पैश्च पूजितान् ३५
सदशैरहतैर्वस्त्रैरङ्गुलीयैः प्रपूजयेत्
परिकर्मकरा ये च तान् यथाशक्ति पूजयेत् ३६
हेम्ना वस्त्रादिदानैश्च वाग्भिर्वा परितोषयेत्
यथा सुमनसस्ते स्युस्तथा कर्तव्यमादरात् ३७
ततः स्थपतिराचम्य बलिकर्म समाचरेत्
सूत्रपाते बलिं धीमान् सार्वभौतिकमाचरेत् ३८
तस्यालाभे बलिः कार्यो यो भवेत्सोऽभिधीयते
विदधीत चरून्श्वेतरक्तपीतासितान्पृथक् ३९
पायसं कृसरं क्षीरं निष्पावाञ्श्वेतमोदनम्
पाविकादधिरूपांश्च पललोल्लापिकाघृतम् ४०
दध्योदनं च संमिश्रं देवताभ्यो निवेदयेत्
तिलैर्घृतेन सहितैर्देवमग्निं च पूजयेत् ४१
ततश्च पायसं दध्ना ब्रह्मस्थाने निवेदयेत्

ततश्चानुक्रमेणैव देवताभ्यो बलिं हरेत् ४२
बलिकर्म यथान्यायं कृत्वा च द्विजवाचनम्
स्वशाखीयाञ्शुचीन् प्राज्ञान् पूजयेद्दक्षिणाफलैः ४३
ओङ्कारस्वस्तिपुण्याहैर्गीतवादित्रनिस्वनैः
ततो विप्रैः सह स्वामी कुर्यात्तस्य प्रदक्षिणम् ४४
अक्षतान् प्रथमं कुम्भे दापयित्वा द्विजोत्तमैः
ततो दक्षिणपूर्वेण गत्वा पुण्याहवाचकैः ४५
अहताम्बरसंवीतः शुचिः स्थपतिरासने
निषद्य प्राङ्मुखः शङ्कुं धृत्वा दक्षिणपाणिना ४६
पश्चादादाय वामेन प्रतिष्ठाप्य च भूतले
मन्त्रानभूञ्जपन् वीरो हन्यात् परशुना ततः ४७
विशन्तु ते तलं नागा लोकपालास्तथैव च
प्रतिष्ठन्तु गृहं चास्मिन्नायुर्बलकरं भवेत् ४८
प्रहारान्सुस्थिरानष्टौ दद्यात्कीलस्य मूर्धनि
हन्यमाने ततः कीले निमित्तान्युपलक्षयेत् ४९
गोविप्ररथनागाढ्याः कन्या नृपवरस्त्रियः
शङ्खदुन्दुभिवंशानां तथा गीतस्य च ध्वनिः ५०
आविर्भवति यद्यस्मिन् हन्यमाने प्रभुस्तदा
सततं सुखमाप्नोति शान्त्यैश्वर्यैश्च वर्धते ५१
हतं च्युतं विपन्नं वा निषेधः सूत्रकीलयोः
पाषण्डिनां च सर्वेषां दर्शनं न सुखावहम् ५२
दृष्ट्वा शुभनिमित्तानि ततः शङ्कुं निवेशयेत्

हन्यमानो यदा कीलो विशेद्भूमौ शनैः शनैः ५३
कर्मसिद्धिभवेत् तत्र गृहं रत्नपरिच्छदम्
हन्यमानोऽपि न विशेद्धरित्रीं कीलको यदा ५४
न तत्र कर्मसिद्धिः स्यादनिमित्तं च लक्षयेत्
एकेनापि प्रहारेण यत्र कीलो विशेन्महीम् ५५
न सिद्धिं याति तत्रौकः कृतं वा नोपभुज्यते
आयस्याष्ठीलया हन्यान्न काष्ठेन कथञ्चन ५६
काष्ठेन ताडितः कीलो वह्निदोषकरो भवेत्
अश्मना यदि ताड्येत तदा व्याधिं प्रयच्छति ५७
ऐन्द्रीं प्रति नतः कीलो धनसम्मानकारकः
आग्नेय्यां प्रणते कीले भवत्यग्निभयं महत् ५८
याम्यायां मरणं राज्ञां दिशि रात्नसतो भयम्
धननाशस्तु वारुण्यां वायव्यां रोगतो भयम् ५९
सौम्यं सौम्यानते राजप्रसादायेशतो गतः
कीलके कूर्चके जाते पुत्रपौत्रान्वयैर्गृहे ६०
परमामृद्धिमाप्नोति धनधान्यैश्च वर्धते
हन्यमानो यदा यत्नात्कीलः कश्चिदपि स्फुटेत् ६१
नाशं विद्यात् तस्य पत्न्या ज्येष्ठस्य तनयस्य वा
यदि भज्येत कीलः स्वात् स्वामिनो जायते वधः ७२
यदा कीलः पतेद्धस्ताद् भ्रंशः स्यात् स्थपतेस्तदा
हस्तभ्रष्टश्च स भवेदष्ठीले हस्तविच्युते ६३
सुखेन हन्यमानश्चेत्कीलः स्वस्थो न जायते

अष्टौ प्रहारानपरांस्तस्य दद्यात्तदा पुनः ६४
स्रग्गन्धधूपोपहारैः कुर्याच्च परिषेचनम्
इदं साम महापुरुषं परिचिन्त्य समासतः ६५
त्रैशोकं तु जपेद्विद्वान् यावच्छङ्क्वभिषेचनम्
गत्वाथ नैर्ऋतीमाशां ततः शङ्कुं निवेशयेत् ६६
ऊर्णायवेन साम्नास्य सम्यक् स्नपनमाचरेत्
वायोर्दिशं ततो गत्वा तत्र शङ्कुं निवेशयेत् ६७
अभिषेकं महारत्नसाम्ना तस्य समाचरेत्
अथैशानीं दिशं गत्वा शङ्कुं तस्यां निवेशयेत् ६८
भाग्रेण साम्ना कुर्वीत प्राग्वत्तस्याभिषेचनम्
ततोऽनु सूत्रं बध्नीयात्सव्यं द्विगुणवेष्टितम् ६९
प्रदक्षिणं प्रसार्यैतदुक्तः शङ्कुक्रमो यथा
मध्यमानं यदा सूत्रं शङ्कुः किमपि मुञ्चति ७०
तदा पुत्रवधं विद्याच्छिन्नं स्वस्वामिमृत्यवे
तस्माद्यत्नः प्रकर्तव्यो यावत्सूत्रं प्रसार्यते ७१
चतुर्णामपि बाहूनां पोषं छिन्नं न दुष्यति
सूत्रं प्रसार्य वितरेच्चरून्पूर्वं प्रकल्पितान् ७२
स्वेषु स्वेषु ततः स्थानेष्वनेन विधिना बुधः
शङ्कुस्थानेषु दातव्याः सिताद्याश्चरवः क्रमात् ७३
प्राग्दक्षिणस्या विदिशो मन्त्रं चेमं हृदा जपेत्
मारुतानां च सर्वेषां मानवानां तथैव च ७४
बलिं तेषु प्रयच्छामि मन्त्रेण परिमन्त्रितम्

रक्तं बलिमुपादाय नैर्ऋत्यभिमुखस्तथा ७५
नैर्ऋत्यधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः
बलिं तेषु प्रयच्छामि रक्तमोदनमुत्तमम् ७६
कृष्णं बलिमुपादाय गत्वा च दिशमानिलीम्
नमस्ते नागराजाय ये चान्ये तं समाश्रिताः ७७
बलिं तेषु प्रयच्छामि कृष्णमोदनमुत्तमम्
बलिमुद्धृत्य हारिद्रमैशानीमाश्रयन् दिशम् ७८
नमो रुद्रेषेउ सर्वेषु ये चान्ये तान्समाश्रिताः
प्रयच्छामि वलिं तेषां हारिद्रौदनमुत्तमम् ७९
एवमेतान्बलीन् सर्वान् यथावत्प्रतिपादयेत्
ततः कुम्भोदकं पुण्यं साम्ना दिव्येन मन्त्रयेत् ८०
वामदेव्येन कुर्वीत प्रोक्षाणं तेन वास्तुनः
द्रुमा विप्रादीनामिति निगदिताः शङ्कुघटने
फलं यच्छङ्कोश्च स्फुटमिह निमित्तानि बहुशः
तथा सूत्राताने विधिरनु च मन्त्रैः प्रतिदिशं
बलिः कीलेषूक्तस्त्रिदशपरितोषाय विधिवत् ८१

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे कीलकसूत्रपातो नाम सप्तत्रिंशोऽध्यायः

अथ वास्तुसंस्थानमातृका नामाष्टात्रिंशोऽध्यायः

इदानीमभिधास्यामो वास्तुसंस्थानमातृकाम्
निवासहेतवे सम्यक्सर्वकर्मोपजीविनाम् १

चतुरश्रं समं साचि दीर्घं वृत्तं च शम्बुकम्
शकटाक्षभगादर्शवज्रकन्थाकृतीनि च २
छिन्नकर्णं विकर्णं च शङ्खाभं क्षुरसन्निभम्
शक्त्याननं कूर्मपृष्ठं सदंशं व्यजनाकृति ३
शरावस्वस्तिकाकारं मृदङ्गपणवोपमम्
विशर्करं कबन्धाभं यवमध्यसमाकृति ४
उत्सङ्गराजदन्ताभे तथा परशुसन्निभम्
विस्रावितं च श्वभ्रं च प्रलम्बं च विवाहिकम् ५
त्रिकुष्टं पञ्चकुष्टं च परिच्छिन्नं तथापरम्
दिक्स्वस्तिकाभं श्रीवृक्षं वर्धमानसमाननम् ६
एणीपदं नरपदं चत्वारिंशत्समासतः
क्षेत्रान्युक्तान्यथामीषां विनियोगो विधीयते ७
चतुरश्रे समे राजा शय्याकारे पुरोहिताः
दीर्घे कुमारकाः सेनापतिर्वृत्तायते वसेत् ८
वसेयुः शम्बुकाकारे सर्वे वाहाः सुखार्थिनः
अन्तःपुरं सद्म समे वाणिजाः शकटाकृतौ ९
वेश्यास्तु भगसंस्थाने दर्पणाभे सुवर्णकृत्
संस्थानतो वज्रसमे जना नगरगोष्ठिकाः १०
वसेयुः शङ्खसंस्थाने क्षेत्रे पुत्राभिलाषिणः
छिन्नकर्णे महामात्रा विकर्णे मृगलब्धकाः ११
शङ्खाभे चैकदृश्वानो गणाचार्याः क्षुरोपमे
व्रताध्यक्षः शक्तिमुखे कूर्मपृष्ठे तु मालिकाः १२

सदंशे सौचिका वाजिपोषिका व्यजनोपमे
तक्षाणश्च शरावाभे स्वस्तिके वन्दिमागधाः १३
पणवाभे मृदङ्गाभे वेणुतूर्यादिवादकाः
विशर्करे तु रथिनः कबन्धप्रतिमे पुनः १४
नीचाः श्वपाकाश्च यवप्रतिमे धान्यजीविनः
उत्सङ्गे श्रमणा हस्त्यारोहिणो राजदन्तके १५
परशुप्रतिमे क्षेत्रे बन्धनागारिणो जनाः
विस्तावियि सुराकाराः श्वभ्रामे कर्मकारिणः १६
युगले नापिताः स्वाविवाहव्ये कोशरक्षिणः
त्रिकुष्टे पञ्चकुष्टे च वसेयुर्वह्निजीविनः १७
समन्ततः परिच्छन्ने सर्वे मानोपजीविनः
दिक्स्वस्तिके तु चैत्यानि कुर्याद्वासांश्च सर्वशः १८
श्रीवृक्षप्रतिमे वृक्षान् यज्ञवाटांश्च कारयेत्
वर्धमानाकृतिमुखेऽप्येतानेव प्रकल्पयेत् १९
एणीपदे तु गणिकाश्चौरान् नरपदोपमे
इत्युक्ताः शुभदा वासाः सर्वकर्मोपजीविनाम् २०
कर्मोपजीविजनवासनिमित्तमेताः
क्षेत्राकृतीरभिहिताः प्रविमृश्य तेषाम्
वेश्मानि कारयति यः स्थपतिर्यथाव-
न्मान्यः स कस्य न भवेदिह भूमिपृष्ठे २१

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे वास्तुसंस्थानमातृकानामाष्टात्रिंशोऽध्यायः

अथ द्वारगुणदोषो नामैकोनचत्वारिंशोऽध्यायः

गृहाणयुक्तानि सर्वेषामेवं कर्मोपजीविनाम्
वर्णिनां च गृहस्थानां कथ्यन्तेऽतः परं यथा १
भल्लाटे धनदे यद्वा चरके पृथिवीधरे
ब्राह्मणस्य भवेद्वेश्म माहेन्द्रद्वारमुत्तमम् २
माहेन्द्रेऽर्केऽथ सत्ये वा आर्यके वा निकेतनम्
कार्यं गृहक्षतद्वारं क्षत्रियस्य शुभावहम् ३
याम्ये वैवस्वते वापि गान्धर्वेऽथ गृहक्षते
वैश्यस्य भवनं कार्यं द्वारं पुष्पाह्वये शुभम् ४
वारुणे पौष्पदन्ते वा यद्वा मैत्रेऽथवासुरे
शूद्रस्य सदनं कार्यं भल्लाटद्वारमुत्तमम् ५
विप्राणां प्राङ्मुखं वास्तु गृहं स्याद्दक्षिणामुखम्
वर्धते धनधान्येन पुत्रपौत्रैश्च नित्यशः ६
दक्षिणाभिमुखं वास्तु भवनं पश्चिमामुखम्
क्षत्रियस्य धनं धान्यं विक्रमश्चेह वर्धते ७
वास्तुनः पश्चिमं द्वारं भवनस्योत्तरामुखम्
तत्रैधते धनैर्धान्यैः पुत्रपश्वादिभिश्च विट् ८
वास्तु स्यादुत्तरद्वारं गृहं पूर्वामुखं तथा
शूद्रस्य कर्मवृत्तिस्तु धनधान्यैर्विवर्धते ९
एकस्यामपि शालायां चत्वारः संप्रकीर्तिताः

निवेश्यद्वारभागाश्च कथ्यन्ते च शुभाशुभाः १०
उत्सङ्गो हीनबाहुश्च पूर्णबाहुस्तथापरः
प्रत्यक्षायश्चतुर्थश्च निवेशः परिकीर्तितः ११
उत्सङ्ग एवदीक्षाभ्यां द्वाराणां वास्तुवेश्मनोः
स सौभाग्यप्रजावृद्धिधनधान्यजयप्रदः १२
यत्र प्रवेशतो वास्तु गृहं भवति वामतः
तद्धीनबाहुकं वास्तु निन्दितं वास्तुचिन्तकैः १३
तस्मिन् वसन्नल्पवित्तः स्वल्पमित्रोऽल्पबान्धवः
स्त्रीजितश्च भवेन्नित्यं विविधव्याधिपीडितः १४
वास्तुप्रवेशतो यत्तु गृहं दक्षिणतो भवेत्
प्रदक्षिणप्रवेशत्वात्तद् विद्यात्पूर्णबाहुकम् १५
तत्र पुत्रांश्च पौत्रांश्च धनधान्यसुखानि च
प्राप्नुवन्ति नरा नित्यं वसन्तो वास्तुनि ध्रुवम् १६
गृहपृष्टं समाश्रित्य वास्तुद्वारं यदा भवेत्
प्रत्यक्षायस्त्वसौ निन्द्यो वामावर्तप्रवेशवत् १७
ब्राह्मणो निवसेन्मुख्ये द्विनाम्नि क्षत्रियो वसेत्
वितथे निवसेद्वैश्यः शूद्रः सुग्रीवनामनि १८
एते वैशेषिकाः सर्वे वर्णानामनुपूर्वशः
वास्तुद्वारनिवेशाश्च वासैः सह निरूपिताः १९
यथोत्तरमथोच्यन्ते वर्णानां गृहकल्पनाः
शूद्रविट्क्षत्रियाणां च राज्ञां च जयकाङ्क्षिणाम् २०
सार्धत्रिभूमि शूद्राणां वेश्म कुर्याद्विभूतये

अतोऽधिकतरं यत् स्यात्तत् करोति कुलक्षयम् २१
वैश्यस्य वर्धयेद्गेहमर्धपञ्चमभूमिकम्
अतिप्रमाणे तत्रास्य धनबन्धुपरिक्षयः २२
क्षत्रियस्य गृहं कुर्यादर्धषष्ठतलं परम्
सम्पद्बलसमृद्ध्यै तदतिरिक्तं तु तच्छिदे २३
परं विप्रस्य भवनमर्धसप्तमभूमिकम्
स्वाध्यायाचारभोगार्थमत्युच्चं तु भयावहम् २४
यजन्ते राजसूयाद्यैः क्रतुभिर्येऽवनीश्वराः
तलैरर्धाष्टमैस्तेषां कारयेद् भवनोत्तमम् २५
आहर्तानेकयज्ञानां राजा राजाधिपश्च यः
तस्याप्यर्धाष्टामतलं भवनं सन्निवेशयेत् २६
वाजपेयेन वा यष्टा यो द्विजः स्यात्समाहितः
गवां कोटिप्रदो यो वा सोऽपि तस्मिन् भवेद्युभीः २७
यथाप्रमाणनिर्दिष्टे वसन्तस्ते नृपादयः
प्राप्नुवन्ति परामृद्धिमवृद्धिं तु विपर्यये २८
सपीठतलकं वेश्म मानतः संप्रकीर्तितम्
साधारणेन हस्तेन परं शूद्रस्य विंशतिः २९
चत्वारिंशद्विशः षष्टिः क्षत्रियस्य प्रशस्यते
अशीतिर्द्विजमुख्यस्य शतहस्ता महीपतेः ३०
नातः परं नृणामूर्ध्वप्रमाणं शस्तमुच्यते
देवदानवदैत्यानां पिशाचोरगरक्षसाम् ३१
सिद्धगन्धर्वयक्षाणां विधातव्यमतोऽधिकम्

एकभौमादधो नैव गृहं शूद्रस्य विद्यते ३२
वैश्यस्य भवनं कार्यमधो नान्यर्धभूमिकात्
द्विभूमिकादधः कार्यं क्षत्रियस्य न मन्दिरम् ३३
सार्धद्विभौमाद् विप्रस्य त्रितलादपि भूपतेः
हीनप्रमाणादमुतो गृहं यत्कुशिल्पिना स्याद्विहितं कथञ्चित्
भर्तुर्भिये सिद्धिविनाशनं तत्प्रशस्तशीलादिविपर्ययाय ३४
गुणदोषान् प्रवक्ष्यामि द्वाराणां सर्ववास्तुषु
सुस्थितं चतुरश्रं च कान्तं स्वद्रव्ययोजितम् ३५
ऋजु स्वकीयदिग्भागे न ह्रस्वं न तथोच्चकैः
नाल्पं न कुब्जं नाप्यनि पिण्डितं न बहिर्गतम् ३६
नाध्मातं न कृशं मध्ये गतं नान्तरकुक्षिषु
न विद्रुतं न संक्षिप्तं यत्तत्स्याद्द्वारमृद्धिदम् ३७
पदस्य द्वादशे भागे पदमध्यात्प्रदक्षिणम्
स्थापितं वृद्धिमायाति द्वारं पुष्टिं करोति च ३८
रथ्याचत्वरशृङ्गाटवापीकूपाह कुम्भकैः
कुड्यकोणतरुस्तम्भैर्भवनस्यन्दनादिभिः ३९
यद्विद्धं भवनद्वारं तच्छुभाय न जायते
द्वारं द्वारे प्रविष्टं च कर्तव्यं वितनेतन ४०
पेद्यां प्रवेशयेन्नैकामन्यद्वारे कदाचन
द्वारं प्रवेशयेत् पेद्यां नारोहणगवाक्षयोः ४१
पक्षद्वारस्य वा नैकां कथञ्चिदपि बुद्धिमान्
न बाह्यगान्तरे द्वारे प्रविष्टं कारयेत् क्वचित् ४२

विहितं हि तथा तत्स्याद्बहुदोषकरं सदा
तोरणं गोपुरद्वारमट्टो येषां गृहे भवेत् ४३
गृहाणां मौलिकद्वारं श्रोत्रे चैतान् प्रवेशयेत्
द्वारं द्वारस्य कर्तव्यमुपर्युपरि भूमिषु ४४
प्रदक्षिणेन वा कार्यं कार्यं नापरथा पुनः ४५
उपर्युपरि भूमीनां मुखं कुर्यात्प्रदक्षिणम्
नापसव्येन कुर्वीत द्वारमारोहणानि च ४६
यस्यां भित्तौ कृतं पूर्वं तस्यामुपरि कारयेत्
तथान्यभित्तौ तद्द्वारं विधातव्यं प्रदक्षिणम् ४७
न मध्ये सद्मनो द्वारं कुर्यादेव पदस्य च
न स्थूले न पदे नापि सिरापाते तदिष्यते ४८
निरंशावस्थितैर्द्रव्यैस्तिर्यक्क्रान्तैश्च मन्दिरे
मर्मवेधो न दोषाय द्वारवेधोऽथवा क्वचित् ४९
यवनाट्टालकच्छाया पुरदैवकुलस्य च
न प्रवेश्या गृहद्वारे रश्मयः सोमसूर्ययोः ५०
न प्राकारेण कुड्येन न विटङ्केन वा पुनः
अन्तर्हितानि दुष्यन्ति द्वारमर्माणी कुत्रचित् ५१
अत्युच्चे स्याद्भयं राज्ञो निम्ने तस्करतो भयम्
कुलपीडा भवेत्कुब्जे बहिर्याते पराभवः ५२
आध्मातेऽत्यन्तदारिद्र्यं कृशमध्ये क्षयो नृणाम्
रथ्याविद्धे भवेद्रोगो मरणं चत्वरेण च ५३
शृङ्गाटकेन वैधव्यं दुहितॄणां प्रजायते

वाप्या कूपेन वा विद्धे स्यादतीसारतो भयम् ५४
कोणान्मृत्युभयं दद्याद्वृद्धौ रोगभयं भवेत्
स्तम्भेन म्रियते स्वामी भ्रमेणार्थो न तिष्ठति ५५
प्रणालेन महद्दुःखं महाभीतिर्महाकलिः
तस्मात्सर्वप्रयत्नेन द्वारवेधं विवर्जयेत् ५६
यस्याग्रतः पृष्ठतश्च द्वारे भित्त्योर्द्वयोरपि
अन्योन्यं भिद्यते यस्मिन्नैकगत्याश्रिते उभे ५७
वास्तु तद्भिन्नदेहाख्यं भिन्नस्वामिविधायकम्
न तत्र जायते वृद्धिः स्थापितस्य न कस्यचित् ५८
गृहकुक्षौ कृतं द्वारं सर्वरोगभयङ्करम्
पूर्वद्वारं तु माहेन्द्रं प्रशस्तं सर्वकामदम् ५९
गृहक्षतं तु विहितं दक्षिणेन शुभावहम्
गन्धर्वमथवा तत्र कर्तव्यं श्रेयसे तदा ६०
पश्चमेन प्रशस्तं स्यात्पुष्पदन्तं जयावहम्
भल्लाटमुत्तरे द्वारं प्रशस्तं स्याद्गृहेशितुः ६१
एकाशीतिपदे तस्मिंश्चतुरश्रपदेऽपि वा
द्वारोऽप्यदगास्तासां ब्रूमो वह्न्यादितः फलम् ६२
हुताशभीतिः स्त्रीजन्म भूत्यर्थः प्रियता नृपे
क्रोधे चानृतता पुंसः क्रौर्यं स्यात्पूर्ववत्क्रमात् ६३
सुतापि प्रैष्यनीचत्वे भक्षयानसुतर्द्धिकृत्
रौद्रं कृतघ्नमवसं याम्यतः सुतवीर्यहृत् ६४
सुतोपपीडा रिपुवृद्धिरर्थसुतानवाप्तिस्तनयार्थसम्पत्

स्वाग्निर्नृशंसाद्भयमर्थनाश उक्तः क्रमादित्यपरोन्मुखेषु ६५
बन्धव्यसत्वे रिपुवृद्धिरर्थसुताग्निरग्र्या गुणसम्पदश्च
सुतार्थलब्धिर्द्विषयात्मजेन दोषास्त्रिया नैर्ऋतदिङ्मुखेषु ६६
गुणाश्च दोषाश्चयथावदेते निरूपिता द्वारसमाश्रिता ये
ताञ्शिल्पविच्छास्त्रविदां वरिष्ठो विज्ञाय पूज्यत्वमुपैति लोके ६७
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे द्वारगुणदोषो नाम एकोनचत्वारिंशोऽध्यायः

अथ पीठमानं नाम चत्वारिंशोऽध्यायः

देवानां मनुजानां च पीठमानमथोच्यते
पीठं कनीयो भागं च सार्धभागं तु मध्यमम् १
द्विभागमुत्तमं तत् स्याडेषा पीठसमुच्छ्रितिः
महेश्वरस्य विष्णोश्च ब्रह्मणश्चोत्तमं भवेत् २
इतरेषां च देवानां कर्तव्यं तन्न धीमता
ईश्वरस्य यथाकामं पीठं कार्यं विचक्षणैः ३
यस्मिन्स्थाने विधातव्यो ब्रह्मा विष्णुस्तथैव च
ईश्वरः सर्वतः कार्यो न दोषस्तत्र विद्यते ४
इतरेषां तु देवानां पीठं भागं समुच्छ्रितम्
यस्य येन विभागेन वास्तुमानं विधीयते ५
तस्य तेनैव भागेन पीठोच्छ्रायो विधीयते
मनुजानां च पीठानि वेश्मनां देवपीठकैः ६
तुल्यानि कुर्यादुपरि कृता वृद्धिकराः सुराः

पुरमध्ये तु कर्तव्यं ब्रह्मणो गृहमुत्तमम् ७
चतुर्मुखं च तत्कार्यं यथा पश्यति तत्पुरम्
अधिकं सर्ववेश्मभ्यस्तथा राजगृहादपि ८
राजवेश्माधिकमपि शस्यतेऽन्यसुरालयात्
पञ्चमो लोकपालनां राजा श्रेष्ठतमो यतः ९
एवमेतानि देवानां पीठान्युक्तान्यशेषतः
चातुर्वर्ण्यस्य पीठानि ब्रूमो विप्राद्यनुक्रमात् १०
षट्त्रिंशदङ्गुलोत्सेधं पीठं विप्रस्य शस्यते
इतरेषां तु वर्णानां ह्रस्वं स्याच्चतुरङ्गुलम् ११
चातुर्वर्ण्यस्य पीठानि भुङ्क्ते विप्रो गृहाणि च
त्रयाणां क्षत्रियो वैश्यो द्वयोः शूद्रः क्रमात्स्वकम् १२
एवं विभागं पीठानां स्थपतिः परिकल्पयेत्
हितं कारयितुर्वाञ्छन् नृपतेश्च समृद्धये १३
प्रमाणे स्थापिता देवाः पूजार्हाश्च भवन्ति हि
प्रमाणं पीठानामिदमभिहितं ब्रह्ममुरजि-
त्पुरारीणामत्रापरदिविषदां यच्च नियतम् ।
ततो विप्रादीनामपि निगदितं यत्तदखिलं
यथौचित्यायोज्यं श्रियमभिलषद्भिः स्थपतिभिः १४

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे पीठमानं नाम चत्वारिंशोऽध्यायः

अथ चयविधिर्नामैकचत्वारिंशोऽध्यायः

इदानीमभिधीयन्ते चयस्येह गुणागुणाः
सुविभक्तः समश्चारुश्चतुरश्रश्चयः शुभः १
असंभ्रान्तमसन्दिग्धमविनाश्यन्यबर्हितम्
अनुत्तममनुद्वृत्तमकुब्जं न च पीडितम् २
समानखण्डमृज्वन्तमन्तरङ्गं तथैव च
सुपार्श्वं सन्धिसुश्लिष्टं सुप्रतिष्ठं सुसन्धि च ३
अजिह्मं चेति चेयस्य गुणा विंशतिरित्यमी
एतेषां वैपरीत्येन दोषाणामपि विंशतिः ४
दक्षिणां तु यदा कुड्यं विचिनोति बहिर्मुखम्
तदा व्याधिभयं विद्यान्मृत्युदण्डं च निर्दिशेत् ५
पश्चिमं तु यदा कुड्यं विचिन्वन्ति बहिर्मुखम्
धनहानिं तदा विद्याद्दस्युभ्यश्च भयं भवेत् ६
उत्तरं तु यदा कुड्यं विचिनोति बहिर्मुखम्
कर्तारं स्वामिनं वापि व्यसनं प्रापयेत्तदा ७
प्राच्यं बहिर्मुखं कुड्यं चिनोति स्थपतिर्यदा
राजदण्डभयं तत्र निर्देष्टव्यं विचक्षणैः ८
एतदेव फलं ब्रूयात्पतिते दलिते तथा
यस्य प्राग्दक्षिणः कर्णः प्रवर्तेत बहिर्मुखः ९
स्यात्तत्राग्निभयं घोरं गृहभर्तुश्च संशयः
गच्छेद्बहिर्मुखः कर्णो यदा दक्षिणपश्चिमः १०
कलहोपद्रवस्तत्र स्याद्भार्यायाश्च संशयः
पश्चिमोत्तरकर्णे तु सम्प्रयाते बहिर्मुखे ११

पशुवाहनपुत्राणां संशयस्तत्र जायते
प्रागुत्तरो यदा कर्णः प्रचीयेत बहिर्मुखः १२
गुरूणां संशयस्तत्र गोवृषादेश्च जायते
विशालं यदि जायेत सर्वबाहुषु चिन्वतः १३
कर्णिकासमसंस्थानं तद्भवेन्मल्लिकाकृति
न तादृशो भवेदायस्तत्र यादृग्व्ययो भवेत् १४
चयस्य तस्य दोषेण गृहक्षीणः पलायते
चिन्वतो यदि संक्षिप्तमत्यर्थं तत्र जायते १५
ब्रह्मसंज्ञं तदुद्दिष्टं तत्र राजभयं भवेत्
विस्तृतं यदि बाह्येषु संक्षिप्तं चैव मध्यतः १६
तनुमध्यं तदुद्दिष्टं तत्र विद्यात्क्षुधो भयम्
उच्छ्रितं यदि कर्णेषु परिहीणं च मध्यतः १७
निर्णतं नाम तद्विद्यात्तत्र चौरभयं भवेत्
कर्णेषु परिहीणं चेदुच्छ्रितं चापि मध्यतः १८
कूर्मोन्नतमिति ज्ञेयं सर्वदोषभयावहम्
विषमोन्नतकर्णेषु निर्दिशेद् द्रविणक्षयम् १९
प्राज्यान्नपानं तद्विद्यात्समेषु विहितेषु च
इत्येते चीयमानस्य गुणदोषाः प्रकीर्तिताः २०
तस्मात्सर्वप्रयत्नेन चयकर्म प्रयोजयेत्
उदकेन समं नीत्वा सम्यङ्निश्चयकारणम् २१
तत्रा दृते न चान्यत् स्यान्निश्चयार्थं चयस्य च
तस्माज्जलेन वलयं गृह्णीयात्पूर्वमादृतः २२

ततः सुताडिते सूत्रे चयं कुर्याद्विचक्षणः
द्विगुणां क्षेत्रमानस्य रज्जुं कृत्वा तदन्तयोः २३
योऽसौ कार्यौ ततस्तस्यां पादोनक्षेत्रमानतः
दद्यान्निञ्छिनं कीलौ क्षेत्रगर्भान्तगामिनौ २४
निधायायाः सकौ तस्याः प्रान्तस्थौ योजयेत्तयोः
निरञ्छनाभिकृष्टायां पादोनक्षेत्रसंमितम् २५
भुजगत्या भवेद्रज्जुस्तस्यामिष्टानुमानतः
चिह्नं दद्यात्स कर्णः स्यादेवं दोषान्प्रसाधयेत् २६
भूरि नाच्छादनं दद्यान्न भिन्द्यात्तत्र चेष्टकाः
विषमस्थाः कुठारेण च्छित्त्वा ताः कल्पयेत्समाः २७
यथा न च स्पृशेत्सूत्रं विचिन्वीत तथा बुधः
कुडये च सादिमध्यान्ते दृष्टिमेकां निपातयेत् २८
यदा सर्वपरिक्रान्तं तलं चोद्धाटितं भवेत्
तदा नैकत्र कुर्वीत पर्यायेण विचक्षणः २९
उद्धाटनं स्तराणां तु यदीच्छेत्सिद्धिमात्मनः
तत्र तत्र चयं कुर्याद्यदि संविद्धकं हितम् ३०
दुर्वहं हि भवेत्तेन तस्मात्तत्परिवर्जयेत्
उपरिष्टात्समं पार्श्वे भुजं कुर्याद्विचक्षणः ३१
समन्ताद्रुचकच्छिन्नश्चयो भित्तिषु पूजितः
तस्मात्प्रयत्नः कर्तव्यश्चयकर्मणि नित्यशः ३२
इति भाषितरूपितमाचरतश्चयकर्म यथाविधि शिल्पिकृतम्
भवतीह यशो भुवने विततं गृहभर्तृरपि प्रचुरो विभवः ३३

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे चयविधिर्नामैकचत्वारिंशोऽध्यायः

अथ शान्तिकर्मविधिर्नाम द्विचत्वारिंशोऽध्यायः

इदानीमभिधास्यामो विधानं शान्तिकर्मणः
यथावदिष्ट्वा दिक्पालान् हुत्वा शान्तीर्यथाक्रमम् १
स्नपयेत्कर्णिकां कुम्भैः सहिरण्यैर्विचक्षणः
सर्वगन्धानुलिप्तां च माल्यदामविभूषिताम् २
कृतमाल्यानिवसितां मूले च मधुलेपिताम्
दोषप्रशमनार्थाय तां मूलेषु निखातयेत् ३
मधुकुम्भमरिष्टं च शेवालं च विधानवित्
वाचयित्वा तु विप्रेन्द्रान् कृतपुण्याहमङ्गलान् ४
स्थापयेत् कर्णिकाः सर्वाः स्थपतिः प्रयतः शुचिः
एतेन विधिना कर्म चातुर्वर्ण्यस्य कारयेत् ५
कर्णिका रोपिता यत्र पुनरुत्पाट्य रोप्यते
न तन्निष्पद्यते वेश्म स्वामी चात्र विनश्यति ६
निखातं तु यदा दारु च्छिद्यते ताड्यते पुनः
तन्नाशो धनधान्यस्य स्वामिनश्चात्र सर्वथा ७
वल्लीनिपीडितं दारु प्रवेशे चेन्निखन्यते
आशीविषभयं घोरं तस्मिन्नुत्पातलक्षणम् ८
उत्थाने कर्णिका रुद्ध्या सर्वसत्त्वाभिधर्षणात्
नवे कर्मण्यशकुना मृगव्यालसरीसृपाः ९

कर्णिकामधिरोहन्ति दोषांस्तत्र वदेदमून्
कृतापीडां परिहृतां यद्यारोहन्ति वायसाः १०
गृहिणस्तत्प्रवासः स्यादन्नं पानं च हीयते
मयूरे तद्गृहं राजा हरेत्पञ्चाब्दतः परम् ११
वराङ्गे जायते व्याधिः कोकिलैर्द्वर्यब्दतः परम्
काकोलैस्त्रीणि वर्षाणि जायते सुमहद्भयम् १२
शुके स्युः कलहाद्यानि न च निष्पद्यते गृहम्
कुक्कुटेऽग्निभयं विद्याद्राजतो वा महद्भयम् १३
सारिकायां तु दौःशील्यं स्त्रीणां गृहपतेस्तथा
सर्परूपेत विघ्नेन गृहं निष्ठां न गच्छति १४
स्त्रीपुंसयोः कुलिङ्गे तु जायते पापकारिता
पारावते तु जायेते स्त्रीपुंसौ गुरुतल्पगौ १५
विडाले तु कुलं दासैः सह रोगैर्निपीडयते
ज्वलनो वा जलं वापि हस्ती वा हन्ति तद्गृहम् १६
आरण्यैः शकुनैरेतत्स्याद्वर्षाद्धर्षणे फलम्
यूनां च जायते मृत्युर्मध्वासङ्गे धनक्षयः १७
दुःखप्रदर्शनं घूके बालानां मरणं तथा
त्रस्तभीते निलीने तु राजा शून्यं हरेद्गृहम् १८
यदा त्वग्रे प्रदृश्येत धूम्रः कर्णगतोऽपि वा
अग्निर्दहति तत्क्षिप्रं विद्युद्वा हन्ति मन्दिरम् १९
यत्रारोहति गृध्रस्तद्द्विजाङ्घ्रिस्पृष्टमाचरेत्
कृत्वा हलशतैः कृष्टं ततो बीजानि वापयेत् २०

गावश्चात्र प्रदुह्येरञ्शान्तिकानि च कारयेत्
मेघेऽभिवृष्टे भूयोऽपि तत्र कुर्वीत् मन्दिरम् २१
येषु येषु गृहाङ्गेषु मधुनः सञ्चयो भवेत्
तस्याङ्गस्य वधं ब्रूयात्प्रेषिरणयां चाप्युपद्रवम् २२
तस्माद्धेतोः शिखाग्रेषु मुकुटान् प्रणिधापयेत्
यावन्न रोपयेत्सौम्यं तावद्रक्षेत्समन्ततः २३
अभिलीनं तु शकुनैर्नहि किञ्चित्प्रशस्यते
तस्मात्प्रयत्नतो रक्षेदुत्पातात्प्रागुदीरितात् २४
भङ्गे गृहाणां दारूणां शान्तिहोमोऽथ कथ्यते
इन्द्रकीलो महाकूटः पृष्ठवंशोत्तरौ धरौ २५
प्रग्रहोऽलिन्दपादौ वा स्वामिनं घ्नन्त्युपद्रवाः
तुलास्थपत्यः कूटं वा वेदिका कर्णपालिका २६
नेत्रं कपोतपालिश्च हनप्रविष्टं कुटुम्बिनी
अम्वग्राः पक्षिवंशाश्च मल्लकाः सकुमारकाः २७
गोपानस्यो मृगाल्यश्च स्थपिताः स्वकुमारिकाः
परिघा द्वारपक्षाश्च भ्रातरं घ्नन्त्युपद्रवाः २८
संयुक्तं सङ्ग्रहो हन्ति निकृष्टांश्चाधरो धरः
स्थौरणयानि प्रतिमोको वा हन्युरिष्टान् परिच्छदान् २९
उदधिर्भगिनीं हन्यादथवा परिचारकान्
पुंसां पुन्नामभिर्द्रव्यैः स्त्रीणां स्त्रीनभिर्भवेत् ३०
उपघातो हतैर्नित्यं द्रव्याणां तु नपुंसकैः
भूलिका स्त्रीविनाशाय गृहनाशाय वेधनम् ३१

कीला वा सन्धिपालिर्वा मित्रनाशाय दुष्यति
नवे गृहे नवं दारु क्रियमाणमथो कृतम् ३२
आयोज्यमानं युक्तं वा न्यूनसंवत्सरं स्थितम्
भज्यते देहनाशाय स्फुटत्यथ विभज्यते ३३
गृहं ब्राह्मणसात्कृत्वा रत्नैरालिख्य चापरम्
नवैर्वस्त्रैः परिच्छाद्य पुनर्भिद्यानि कारयेत् ३४
दग्धे भिन्ने प्रचलिते विनते विद्युता हते
विरूढे दलिते सन्ने सर्वत्रौषधिभिः स्मृताः ३५
शान्तयो विविधं हुत्वा ब्राह्मणान्स्वस्ति वाच्य वा
स्थूणिका भज्यते यस्य कीर्त्तिस्तस्योपहन्यते ३६
चन्द्रसूर्यौ यजेत्तत्र ततः शाम्यति पातकम्
तद्विधं वृत्तमानीय पुनस्तां प्रति कारयेत् ३७
एवं कृते सुखी स स्यात्कीर्त्तिश्चायुर्ध्रुवा भवेत्
मल्लको भज्यते यस्य पौरुषं तस्य हन्यते ३८
इष्टानभसनक्षत्रं प्रायश्चित्तं समाचरेत्
तद्विधं वृत्तामानीय प्रति कुर्वीत मल्लकम् ३९
एवं कृत्वा सुखी स स्याद्बलं चास्याभिवर्धते
पृष्ठवंशस्य भङ्गेन गृही बन्धमवाप्नुयात् ४०
राजराजं यजेत्तत्र प्रायश्चित्तं तथाचरेत्
सुखी भवति तत्कृत्वा सर्वतश्चाभिवर्धते ४१
सर्वेषु स्वस्ति वाच्याश्च ब्राह्मणा दक्षिणाक्षतैः
वारणो भज्यते यस्तु ज्येष्ठं पुत्रं स वाज्यते ४२

पृथ्वीधरं यजेत्तत्र प्रायश्चित्तं तथाचरेत्
तद्विधं वृक्षमानीय पुनस्तं प्रति कारयेत् ४३
सुखी भवति कृत्वैवं पुत्रैश्चापि विवर्धते
संग्रहो भज्यते यस्तु कुलज्येष्ठं स वार्धते ४४
पितॄन्देवान्यजेत्तत्र प्रायश्चित्तं तथाचरेत्
सुखी भवति कृत्वैवं प्रीयन्ते पितरस्तथा ४५
स्थूणयं तु भज्यते यस्य तनयस्तस्य बाध्यते
देवानेव यजेत्तत्र प्रायश्चित्तं तथाचरेत् ४६
तद्विधं वृक्षमानीय तत्स्थौणयं प्रति कारयेत्
सुखी भवति कृत्वैवं पुत्रैश्चापि विवर्धने ४७
उपधी व्यथते यत्र तत्रामात्यो विनश्यति
यजेत वासवं तत्र प्रायश्चित्तं तथाचरेत् ४८
आनीय तद्विधं वृक्षमुपधिं प्रति कारयेत्
एवं कृते भवेत्सौख्यममात्यैश्च विवर्धते ४९
कायस्तु व्यथते यस्य प्रेष्यस्तस्योपहन्यते
यक्षं तत्र यजेद्देवं प्रायश्चित्तं तथाचरेत् ५०
तद्विधं काष्ठमानीय कायं तं प्रति कारयेत्
एवं कृते सुखी स स्यात्प्रेष्यैरपि विवर्धते ५१
तुला तु व्यथते यस्य व्यथतेऽस्य कुटुम्बिनी
यजेत मेदिनीं तत्र प्रायश्चित्तं तथाचरेत् ५२
तद्विधं वृक्षमानीय स्थापयेत् तां स्वलङ्कृताम्
ततस्त्वन्याः क्रियाः पश्यन् कारयेन्मतिमान्नरः ५३

वधूमिव नवैर्वस्त्रैः प्रतिच्छाद्य स्वलङ्कृताम्
ब्राह्मणान्वाचयेत्स्वस्ति ततस्तां प्रति कारयेत् ५४
सुखी भवति कृत्वैवं धनैर्नित्यं विवर्धते
कर्णिकास्वान्तरस्थूणामालापादोऽथ भज्यते ५५
तद्गृही दुःखमाप्नोति तस्मिन्नुत्पातलक्षणे
आनीय स्थपतिं तत्र प्रज्ञावन्तं बहुश्रुतम् ५६
तत्र वास्तुविभागेन यो देवः स्याद्विनिश्चितः
तस्मै देवाय जुहुयात्प्रायश्चित्तं च कारयेत् ५७
सुखी भवति कृत्वैवं सर्वतश्चाभिवर्धते
युगं तु व्यथते यत्र तत्र स्यात्पशुपीडनम् ५८
यजेत तस्मिन्नीशानं प्रायश्चित्तं च कारयेत्
तद्विधं वृक्षमानीय युगं तत्प्रति कारयेत् ५९
एवं कृते सुखं तस्य पशुवृद्धिश्च जायते
तुलयो अगयोर्वापि पादो यस्य प्रभज्यते ६०
आयुर्हानिर्भवेत्तत्र बलदेवं प्रपूजयेत्
प्रायश्चित्तं ततः कृत्वा पुनस्तं प्रति कारयेत् ६१
सुखी भवति कृत्वैवं कुटुम्बी शान्तिकं च तत्
द्वाराङ्गं यस्य माहेन्द्रं हिंस्यते नवकर्मणि ६२
इन्द्रं तत्र यजेद्देवं प्रायश्चित्तं तथाचरेत्
गृहक्षतस्य द्वाराङ्गे पूजयेद्यममेव तत् ६३
पुष्पदन्तस्य द्वाराङ्गे वरुणं तत्र पूजयेत्
द्वाराङ्गं यस्य भल्लाटं हिंस्यते नवकर्मणि ६४

सोमं तत्र यजेद्देवं प्रायश्चित्तं समाचरेत्
सुखी भवति कृत्वैवं कुटुम्बी शान्तिकं च तत् ६५
स्थूणाराजस्य यस्याग्रं वक्रं दक्षिणतो भवेत्
शरीरं व्यथते तत्र प्रतिसंवत्सरं स्थिरम् ६६
पृष्ठतो दीर्घशोकः स्यादुत्तरेण धनक्षयः
पूर्वतो राजदण्डः स्यात्तस्मात्तद् ऋजु शस्यते ६७
चत्वार्यङ्ग हिंस्यन्ते शरीरा ये च वेश्मनः
तुला वा पृष्ठवंशो वा धारणयां चोत्तराम्बरः ६८
उक्तांस्तत्र बलीन्कुर्यात्प्रायश्चित्तं तथाचरेत्
एवं धन्यं शिवं पुष्टिप्रजावृद्धिकरं भवेत् ६९
इत्थं निमित्तानि गृहाश्रितानि
ज्ञात्वा प्रदृष्टाञ्शकुनांश्च सर्वान्
शान्तिं प्रकुर्वन्पृथगुक्तरूपां
प्राप्नोति कीर्त्तिं सुखमर्थमायुः ७०

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे शान्तिकर्मविधिर्नाम द्विचत्वारिंशोऽध्यायः

अथ द्वारभङ्गफलं नाम त्रिचत्वारिंशोऽध्यायः

यदत्र नवकर्मोक्तं तद्यज्ञेषु गृहेषु च
ज्ञेयं ग्रामे पुरे वापि नगरे पत्तने तथा १
संस्थानमाकृतिर्मानं ह्रासवृद्धी च बाहुषु
एकमेव विजानीयात्सर्वत्रैव विचक्षणः २

यूपस्यैव निमित्तानि दारुकर्मणि निर्दिशेत्
पातं पते विजानीयात्तद्गणं तद्गणेन च ३
यूपोच्छ्रायमिव ब्रूयाद्दारूणामपि चोच्छ्रयम्
भङ्गेन भङ्गो निर्दिश्यः समाधिश्च समाधिना ४
नवकर्मणि यत्स्निग्धं सुगन्धि प्रियदर्शनम्
गम्येहरं मनुष्याणां धन्यं तदभिनिर्दिशेत् ५
पुरं वा यदि वा ग्रामो गृहं वा यदि निष्प्रभम्
आयासबहुलं तद्धि तादृशैर्लक्षणैर्भवेत् ६
परिध्वस्तोपमं रूक्षं नवकर्मणि यद् भवेत्
भ्रमं रोगं च शोकं च तस्मिन् वेश्मनि निर्दिशेत् ७
जनेन च यदाकीर्णं निश्छायमिव लक्षते
कुटुम्बी तत्र षण्मासान्नात्र जीवेन्न संशयः ८
यच्छून्यमप्यशून्याभं वेश्म वा यदि वा पुरम्
सर्वकामगुणैर्युक्तं धनं तदभिनिर्दिशेत् ९
पूर्वो नगरभागश्चेद्रम्यः स्यात् प्रियदर्शनः
प्रियभार्या मनःस्वास्थ्यं धनं धान्यं च भूपतेः १०
पूर्वदक्षिणभागश्चेत्पुरस्य प्रियदर्शनः
महद् यशस्तदाप्नोति राजा हेम च पुष्कलम् ११
पुरस्य दक्षिणो भागो यदा रम्यस्तदा भवेत्
राज्ञः सेनापतिप्राप्तिर्धनं धान्यं च पुष्कलम् १२
रमणीयो यदा भागः पुरदक्षिणपश्चिमः
अर्थसंपत्तदा राज्ञः प्रजावृद्धिश्च जायते १३

पुरपश्चिमभागेन रमणीयेन पार्थिवः
पुत्रबान्धवधान्याढ्यः संप्राप्नोत्युन्नतिं पराम् १४
पश्चिमोत्तरभागे तु रमणीये नराधिपः
प्रेष्यैः पुत्रैर्वाहनैश्च वृद्धिमेत्युत्तरोत्तराम् १५
उत्तरे रमणीये तु पुरभागे नरेश्वरः
शत्रून् विजयते सर्वान् वर्धते च पुरोहितः १६
यदि पूर्वोत्तरो भागः पुरस्य प्रियदर्शनः
यत्राभ्युत्तरमानन्दं क्षिप्रं राज्ञो विनिर्दिशेत् १७
निष्पन्नस्य पुरादेर्यो भागो न स्यान्मनोरमः
तस्य तस्यैव भागस्य परिहाणिं विनिर्दिशेत् १८
नवे यदि पुरद्वारे कपाटं प्रविशीर्यते
स्त्रीनामधेयमन्यद्वा स्त्रीनाशं तद्विनिर्दिशेत् १९
देवागारे पुरद्वारे प्राकाराट्टालकेषु च
हस्तिशालाश्वशालासु रथशालास्तथापि वा २०
कोष्ठागारायुधागारे निमित्तं तु शुभाशुभम्
यदि किञ्चित्प्रदृश्येत राज्ञस्तदभिनिर्दिशेत् २१
भङ्गो यत्रोर्ध्ववंशस्य तत्र राजा विनश्यति
अर्गलापीलिकाकुञ्चीभङ्गे च नवकर्मणि २२
ग्रामे नश्यन्ति चैतानि तदा ग्रामो विनश्यति
द्विगुत्थितं तु राष्ट्राणां गृहार्थेषु कुटुम्बिनाम् २३
नवकर्मणि यत्किञ्चिद्भज्यते यदि वा नमेत्
विस्ते वा स्फुटे वापि कुटुम्बिमरणं ध्रुवम् २४

फलं सर्वनिमित्तेषु शुभं वा यदि वाशुभम्
संवत्सरं परं ग्राह्यं नवकर्मकृते गृहे २५
परिसंवत्सरान्ते च पुराणमिति निर्दिशेत्
तुम्बिका भज्यते यत्र नवकर्मणि निष्टिते २६
श्रेष्ठा तु महिला तत्र षड्भिर्मासैर्विनश्यति
एवमेव नवं यस्य सदनं तु विनश्यति २७
प्रेष्यदासादिविश्वासात्तद्विनाशयति ध्रुवम्
पृष्ठवंशो नवो यस्य नवकर्मणि भिद्यते २८
कुटुम्बी म्रियते तत्र गृहं संवत्सरात्परम्
प्रेष्याश्चात्र विनश्यन्ति दीर्यमाणे विशेषतः २९
लुमासु भिद्यमानासु कन्यामरणमादिशेत्
मुण्डकेषु विनष्टेषु सुहृदस्य विनश्यति ३०
अनुपूर्वेषु भिन्नेषु पुत्राणां मरणं ध्रुवम्
विपत्तौ मुण्डगोधानां माता तस्य विनश्यति ३१
नागपाशकभङ्गे तु भृत्यानां मरणं भवेत्
कपाटे भ्रातृमरणमर्गलायां स्त्रिया वधः ३२
सुतस्य चार्गलापार्श्वे विनष्टे मरणं भवेत्
द्वारबन्धे विनष्टे तु शीघ्रं कुर्यात्कुलक्षयम् ३३
इन्द्रकीलो दृढो यस्य भङ्गमायाति मूलतः
सपुत्रपशुवर्गस्य तस्य ब्रूयात्कुलक्षतिम् ३४
तोरणं भज्यते यस्य द्रव्यं तस्य विनश्यति
गृहभर्तुश्च मरणं त्रिदशैरवधारयेत् ३५

वास्तुमध्ये विनष्टे तु कुवृद्धो विनश्यति
सोपानं भिद्यते यत्र नवकर्मणि निष्ठिते ३६
तस्य प्रेष्याश्च गावश्च हिरण्यं च विनश्यति
वेदिका भज्यते यस्य भार्या तस्य विनश्यति ३७
गवाक्षस्तु विनश्येत पट्टस्तम्भोऽपि वा दृढः
गजशुण्डाथ भिन्नोऽश्वः कपोताल्यथवा नवा ३८
स्थपनीपट्टिकाश्चैव स्त्रीविनाशं तदादिशेत्
विटङ्कस्य तुलाया वा भङ्गे जाते कथञ्चन ३९
शालास्तम्भस्य वा नाशे भार्या तस्य विनश्यति
स्तम्भशीर्षं यदि भ्रश्येत् स्फुटेत्स्तम्भोऽपि वा दृढः ४०
भज्यते प्रतिमोको वा स्वामिनस्तु वधो भवेत्
भङ्गे तु भङ्गवाहिन्याः कुलवृद्धवधो भवेत् ४१
आकाशतलके पुत्राः प्रतिच्छिन्ने कुटुम्बिनः
विनष्टे च विनश्यन्ति षड्भिर्मासैर्न संशयः ४२
प्रासादमण्डले भग्ने भग्नासु वलभीषु च
भार्या कुटुम्बिनस्तस्य नाशमायात्यसंशयः ४३
प्रलीनो वा विलीनो वा प्रासादो यस्य भज्यते
प्रलीने भृत्यमृत्युः स्याद्विलीने तु धनक्षयः ४४
मिश्रे विनष्टे प्रासादे हीयन्ते सर्ववृद्धयः
मरणं वा भवेत्तत्र कुष्ठव्याधिं च निर्दिशेत् ४५
येषु स्थानेषु भङ्गो वा विनतिर्वा प्रकीर्तिता
उपद्रुतिर्विघातो वा तेषां फलमपीरितम् ४६

स्निग्धानि अय्दि दृश्यन्ते तानि दाढर्यान्वितानि च
धनमायुश्च हर्षं च पूर्वोक्तानां तदादिशेत् ४७
कर्णिकाभ्यन्तरी स्थूणा शालापादोऽथ हीयते
यदि तद्दुःखमाप्नोति गृहभर्ता न संशयः ४८
संप्रधार्य च मेधावी बलाबलमतन्द्रितः
निर्दिशन् बलमाप्नोति धनमायुर्यशस्तथा ४९
एवमादिकनिमित्तसूचितं संप्रधार्य मतिमान् बलाबलम्
स्पष्टमादिशति योऽत्र शास्त्रवित्कीर्त्तिवित्तधनानि सोऽश्नुते
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे द्वारभङ्गफलं नाम त्रिचत्वारिंशोऽध्यायः

अथ स्थपतिलक्षणं नाम चतुश्चत्वारिंशोऽध्यायः

स्थापत्यमुच्यतेऽस्माभिरिदानीं प्रक्रमागतम्
ज्ञातेन येन ज्ञायन्ते स्थपतीनां गुणागुणाः १
शास्त्रं कर्म तथा प्रज्ञा शीलं च क्रियया न्वितम्
लक्ष्यलक्षणयुक्तार्थशास्त्रनिष्ठो नरो भवेत् २
सामुद्रं गणितं चैव ज्योतिषं छन्द एव च
सिराज्ञानं तथा शिल्पं यन्त्रकर्मविधिस्तथा ३
एतान्यङ्गानि जानीयाद्वास्तुशास्त्रस्य बुद्धिमान्
शास्त्रानुसारेणाभ्युद्य लक्षणानि च लक्षयेत् ४
प्रसिद्धशास्त्रदृष्टान्तैर्वास्तुज्ञानं प्रसाधयेत्
वास्तुनः ससिरावंशैर्मर्मवेधैः सुनिश्चितैः ५

वास्तुद्वारक्षणान् भूयः सर्वान् जानाति शास्त्रतः
यस्तु शास्त्रमविज्ञाय प्रयोक्ता स्थपतिर्भवेत् ६
हन्तव्यः स स्वयं राज्ञा मृत्युवद्राजहिंसकः
मिथ्याज्ञानादहङ्कारी शास्त्रे चैवाकृतश्रमः ७
अकालमृत्युर्लोकस्य विचरेद्भसुधातले
यस्तु केवलशास्त्रज्ञः कर्मस्वपरिनिष्ठितः ८
स मुह्यति क्रियाकाले दृष्ट्वा भीरुरिवाहवम्
केवलं कर्म यो वेत्ति शास्त्रार्थं नाधिगच्छति ९
सोऽचक्षुरिव नीयेत विवशोऽन्येन वर्त्मसु
कर्म वास्तुविधेः स्थानं मानमुन्मानमेव च १०
क्षेत्रजाति च कर्माणि लुमालेखाचतुर्दश
चत्वारो गण्डिकाच्छेदान्वृत्तच्छेदेषु सप्तसु ११
सुश्लिष्टं सन्धिसन्धानैरधरोत्तरसंयुतम्
बाह्यरेखान्वितं शुद्धं यो जानाति स कर्मवित् १२
शास्त्रकर्मसमर्थोऽपि स्थपतिः प्रज्ञया विना
फलेयुः कर्मभिरन्याभिः स्यान्निर्मद इव द्विपः १३
प्रत्युत्पन्नमतिर्यः स्याद्वाहतः स्थपतिस्तथा
कर्मकाले न मुह्येत्स प्रज्ञानेनोपबृंहितः १४
अप्रज्ञेयं दुरालोकं गूढार्थं बहुविस्तरम्
प्रज्ञापोतं समारुह्य प्राज्ञो वास्तुनिरं तरेत् १५
ज्ञानवांश्च तथा वाग्मी कर्मस्वपि च निष्ठितः
एवं युक्तोऽपि न श्रेयान् यदि शीलविवर्जितः १६

रोषाद् द्वेषात्तथा लोभान्मोहाद्रागात्तथैव च
अन्यचिन्त्यत्वमायाति दुःशीलानामविद्धयात् १७
शीलवान् पूजितो लोके शीलवान् साधुसम्मतः
शीलवान् सर्वकर्मार्हः शीलवान् प्रियदर्शनः १८
शीलाधाने परं यत्नमाधितिष्ठेत्स्थपतिः सदा
ततः कर्माणि सिध्यन्ति जनयन्ति शुभानि च १९
तथाचाष्टविधं कर्म ज्ञेयं स्थपतिना सदा
आलेख्यं लेख्यजातं च दारुकर्म चयस्तथा २०
पाषाणसिद्धहेम्नां च शिल्पं कर्म तथैव च
एभिर्गुणैः समायुक्तः स्थपतिर्याति पूज्यताम् २१
स्थापत्यमङ्गैरिदमष्टभिर्यश्चतुर्विधं वेत्ति विशुद्धबुद्धिः
स शिल्पिनां संसदि लब्धपूजः परां प्रतिष्ठां लभते चिरायुः २२
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे स्थपति लक्षणं नाम चतुश्चत्वारिंशोऽध्यायः

अष्टङ्गलक्षणं नाम पञ्चचत्वारिंशोऽध्यायः

प्रोक्तं चतुर्धा स्थापत्यं वास्तुतत्त्वस्य सिद्धये
ब्रूमस्तदेव चेदानीमङ्गैः संयुक्तमष्टभिः १
तेष्वङ्गं प्रथमं प्रोक्तं वास्तुपुंसो विकल्पना
पुरस्य विनिवेशस्तु द्वितीयं द्वारकर्म च २
रथ्याविभागः प्राकारनिवेशोऽट्टालकस्य च
विनिवेशः प्रतोलीनां विभागस्थानकानि च ३

प्रासादश्च तृतीयं स्याच्चतुर्थं तु ध्वजोच्छ्रितिः
पञ्चमं नृपतेर्वेश्म स्थानान्तरविभक्ति च ४
चातुर्वर्ण्यविभागश्च गृहभागश्च षष्ठकम्
सप्तमं यजमानस्य शालायां मानमीरितम् ५
यज्ञवेदीप्रमाणं च कोटिहोमविधिस्तथा
अष्टमं राजशिबिरनिवेशो दुर्गकर्म च ६
यो वेत्त्यङ्गान्यमून्यष्टौ सोऽत्र स्थपतिसत्तमः
यशो मानं स लभते पूज्यते च नराधिपैः ७
अशास्त्रज्ञमकर्मज्ञं स्थपतिं यः प्रयोजयेत्
न तस्य वास्तु सिध्येत सिद्धमप्यसुखावहम् ८
तस्मात्कर्म च शास्त्रं च यो वेत्ति द्वितयं नरः
अष्टाङ्गमपि यो वेत्ति स राज्ञः स्थपतिर्भवेत् ९
अङ्गानि पूर्वमुक्तानि वास्तुशास्त्रोक्तविस्तरात्
तेषु प्रासादिकं यत्तद्वक्ष्यामोऽग्रे सविस्तरम् १०
अथाङ्गं सप्तमं ब्रूमो यत्तद्यज्ञेषु युज्यते
विनिविष्ठे पुरे पूर्वं क्लृप्तेषु सुरधामसु ११
दिशि दक्षिणपूर्वस्यां यज्ञार्थं मापयेद्ध्रुवम्
निवेशं तत्र कुर्वीत चतुरश्रं समन्ततः १२
आयामेन विधातव्यो हस्ताष्टादशविस्तृतः
पूर्वद्वारं विधातव्यमादित्यस्य पदे बुधैः १३
तस्य पश्चिमभागे तु यजमानकुटी भवेत्
षोडशायामविस्तारा प्राङ्मुखी सा प्रशस्यते १४

यजमानकुटीद्वारे देवता या च कीर्तिता
ततः प्रभृति पूर्वेण प्राग्वंशं परिकल्पयेत् १५
वेदिमध्ये स्थितं तत्स्यान्मानं वेद्याश्च शस्यते
पूर्वापरेण षट्त्रिंशत्कर्तव्याः प्रक्रमा बुधैः १६
एकत्रिंशत्कुटीभागे मध्येऽष्टादश कल्पयेत्
प्रक्रमाः स्युः शिरस्थाने विंशतिश्चतुरुत्तरा १७
पुरुषस्य शिरस्तत्र प्राग्वंशे तु प्रतिष्ठितम्
तस्मात्पूर्वोत्तरं ज्ञेयं सर्वयज्ञेषु पूजितम् १८
वेद्यन्तरं तु कर्तव्यं शकटं येन गच्छति
तस्मादुत्तरवेदी या कार्या प्रत्युत्तरेण तु १९
द्विहस्तायामविस्तारो होमचेष्टः कृतोऽत्र हि
प्राग्दक्षिणेन संस्थानं यजमानस्य शस्यते २०
कटिमात्रं सदा कार्यं नाभिमात्रमथापि वा
ततोऽधिकेन दुर्भिक्षमनावृष्टिश्च जायते २१
एषा यज्ञक्रिया प्रोक्ता कोटिहोमोऽथ वक्ष्यते
पुरस्याभ्यन्तरे भागे हुताशस्य पदे तथा २२
तस्मिन्स्थाने विधातव्यः कोटिहोमः सदा पुरे
लक्षहोमश्च कर्तव्यो नित्यो नैमित्तिकोऽपि वा २३
अथ भूमिवशात्स्थानं कदाचिन्नैव लभ्यते
सर्वतो ब्रह्मणः स्थानाद्धोमस्थानं निवेशयेत् २४
ऐशानीं दिशमाश्रित्य ब्राह्मणैर्वेदपारगैः
पुरश्चरणतत्त्वज्ञैः षट्कर्मनिरतैः सदा २५

नित्यं शान्तिपरैर्विप्रै राजा तु विजयी भवेत्
नोपसर्गास्तु जायन्ते न च लक्ष्मीः पुरं त्यजेत् २६
अनावृष्टिभयं नास्ति सुभिक्षं जायते सदा
उक्तं याज्ञिकमङ्गं तु सर्वाङ्गेभ्यः प्रशस्यते २७
सर्वं स्थपतिना ज्ञेयं तत्त्वज्ञैर्ब्राह्मणैः सह
एकाशीतिपदेनैव यज्ञभूमिं तु मापयेत् २८
निवेशं शिबिरस्याथ कथयामोऽङ्गमष्टमम्
यदा तु नृपतिः स्थानात्स्वाद्यात्राभिमुखो भवेत् २९
शिबिरस्य निवेशं च तत्त्ववेत्ता परीक्षयेत्
अर्थशास्त्रविधिज्ञो वा स्थपतिर्वा प्रकल्पयेत् ३०
शिबिरं चतुरश्रं स्याद्वृत्तं वृत्तायतं क्वचित्
चतुरश्रायतं वापि विषमं वा क्वचिद्भवेत् ३१
भूमिभागवशात्कल्पं महारथ्योभयान्वितम्
शिबिरस्य तु चत्वारि कुर्याद्द्वाराणि यत्नतः ३२
रथ्या सार्धा तु सेनायाः पुररथ्याप्रमाणतः
मित्रे स्थानं नरपतेः कार्यं पृथ्वीधरेऽपि वा ३३
आर्यम्णे वा विधातव्यं पदे वैवस्वतोऽथवा
निवेशो मन्त्रिणां कार्यः पश्चिमो राजवेश्मनः ३४
पुरोहितस्योत्तरतो बलाध्यक्षस्य पूर्वतः
अन्तःपुरं दक्षिणतो भाण्डागारं तथैव च ३५
गृहं प्रविशतो राज्ञो न्यस्येद्दक्षिणतो हयान्
वामे च दन्तिनो न्यस्येदेवं सैन्यं निवेशयेत् ३६

बाह्यतः परिखां तस्य कारयेद्राजवेश्मनः
हस्तांस्त्रींश्चतुरो वापि पञ्चहस्तानथापि वा ३७
चतुष्षष्टिपदाख्येन विभाज्यं शिबिरं बुधैः
निवेशः शिबिरस्योक्तो दुर्गकर्माथ कथ्यते ३८
दुर्गं तु षड्विधं प्रोक्तं राज्ञां तु विजिगीषताम्
अब्दुर्गं पङ्कदुर्गं वा वनदुर्गैरिणे तथा ३९
पार्वतीयं महादुर्गमिति कल्प्यानि पार्थिवैः
सर्वेषामेव दुर्गाणां पार्वतीयं प्रशस्यते ४०
दुर्गस्थानविभागोऽोडशाख्येन कीर्तितः
मध्ये तु ब्रह्मणः स्थानमसम्बाधं विधीयते ४१
ब्रह्मस्थानं समारभ्य हर्म्यं पञ्चशयाः स्मृताः
उपरथ्या त्रिहस्ता तु शेषास्तु द्विशयाः स्मृताः ४२
सन्निकृष्टा विधातव्या दुर्गारथ्या समन्ततः
द्वारं रथ्याप्रमाणेन कार्यं नात्यन्तमुच्छ्रितम् ४३
परचक्रसमं बाधं सुरङ्गं तत्सदा भवेत्
दुर्गेश्वरगृहस्थानं ब्रह्मणः परितो भवेत् ४४
वैवस्वतेऽथवार्यम्णे मैत्रे पृथ्वीधरेऽपि वा
यथा पुरे पुरा प्रोक्तं स्थानं दुर्गेऽपि तत्तथा ४५
वीराः शुभा ह्यदोषाश्च भूमिपालस्य संमताः
धनुर्वेदविधिज्ञाश्च कृतास्त्राः शास्त्रपारगाः ४६
दुर्गे स्थाप्याः सुरूपाश्च बहवश्च वरस्त्रियः
अन्तःपुरं च कोशं च कुमारांश्चात्र वासयेत् ४७

एवं दुर्गविधानस्य समासोऽयमुदाहृतः
इत्यष्टाङ्गो वास्तुशास्त्रस्य सारः संक्षेपेण स्पष्टमस्माभिरुक्तः
यत्र ज्ञाते शिल्पिवद्वास्तुविद्यापाथोनाथं सन्तरन्त्यप्रयासात् ४८
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे अष्टाङ्गलक्षणं नाम पञ्चचत्वारिंशोऽध्यायः

अथ तोरणभङ्गादिशान्तिको नाम षट्चत्वारिंशोऽध्यायः
पुरातनं नवं वापि कृतं वाथार्धनिर्मितम्
देवतानां नृपाणां च तोरणं निपतेद्यदि १
भज्यते दह्यते वाथ नमते सज्जतेऽथवा
दवविद्युज्जलाद्यैर्वा हन्यते तत्कदाचन २
तत्र दोषान् प्रवक्ष्यामो दोषप्रशमनानि च
तोरणं निपतेत्सर्वं शिरो वास्य कथञ्चन ३
राज्ञां सेनापतीनां च प्रतीहारपुरोधसाम्
प्रधानाश्वगजानां च विप्रपौरजनस्य च ४
तत्र मृत्युभयं विद्याद्दुर्भिक्षं चापि निर्दिशेत्
तस्मात्प्रशमहेत्वर्थं विधिं कुर्यादिमं बुधः ५
ऋत्विग्भिर्ब्राह्मणैर्धीरः स्थपतिः सपुरोहितैः
रात्रौ होमबलिं कुर्यान्नगरे तु चतुर्दिशम् ६
कर्णचत्वरशृङ्गाटेष्ववनीपालवेश्मनि
स्थानेष्वेतेषु विप्राद्यैर्वेदिं निष्पाद्य साक्षताम् ७
कलशैर्द्रव्यगन्धैश्च श्वेतमाल्याम्बरैर्वृताम्

तत्र होमं प्रकुर्वीत शान्तिकं बलिमेव च ८
एवं प्रशमयेत्सर्वं यत्किञ्चिद्दुरितोत्थितम्
तोरणं भज्यते चेत्तद्राष्ट्रभङ्गं विनिर्दिशेत् ९
अस्य प्रशमहेत्वर्थं पूर्वोक्तं कारयेद्विधिम्
तदेवैकं प्रदह्येत तोरणं नगरेर्यदि १०
तदा वह्निभयं ब्रूयाद्राष्ट्रस्य नगरस्य च
सबाह्याभ्यन्तरं विप्रैर्विधिमेनं प्रयोजयेत् ११
नते वा शीर्णभग्ने वा व्याधिपीडां विनिर्दिशेत्
होमं बलिं च कुर्वीत पुनःसंस्कारमस्य च १२
वातेन विद्युता वापि तोरणं यदि भज्यते
तस्मिन्रोगाः प्रवर्तन्ते कुलपीडाधनक्षयाः १३
शान्तिकर्म प्रकुर्वीत ततः शान्तिकरं भवेत्
एवमादौ कृते पश्चात्पुनः संस्कारयेद्बुधः १४
पूर्वावयवनिर्माणाद्विशिष्टं रचयेत्पुनः
दृढसन्धिनिगूढं च दृढद्रव्यसमन्वितम् १५
विविधं रूपकर्माढ्यं सुसंस्थानं मनोरमम्
अकुब्जमनतं चैव पूर्वोत्कृष्टतरं तथा १६
नियुक्ते तु पुनः शान्तिं ब्राह्मणान् वाचयेत्ततः
पुराणे वा नवे वाथ कृते वार्धकृतेऽथवा १७
प्रासादे वा गृहे वापि कपोतः प्रविशेद्यदि
तत्र दोषाः प्रपद्यन्ते शान्तिकर्म तथैव च १८
कालमूर्तिः कपोतश्च पापमूलकरण्डकम्

विहङ्गापशदो हीनः कृष्णचारी विहिङ्गमः १९
चतुर्विधः समाख्यातो मुनिभिः स तपोधनैः
श्वेतो विचित्रकरठश्च विचित्रोऽन्योऽथ कृष्णकः २०
कपोतो भवने यस्य श्वेतवर्णो विशेत् क्वचित्
कीर्त्तिविद्याधनं पुरयं शीघ्रं च नयते क्षयम् २१
नित्यं रोगाः प्रवर्धन्ते शिशुपीडा च जायते
चित्रकरठो हरेज्जायां पुत्रान्सर्वान् विचित्रकः २२
सर्वाः सिद्धीश्च कृष्णाङ्गः प्रदुष्य च कुलं हरेत्
रोगाः सर्वेऽपि वर्धन्ते विपदो व्यसनानि च २३
बन्धनानि च जायन्ते प्रविष्टे तु कपोतके
तस्माद्यत्नपरो भूत्वा प्रायश्चित्तं समाचरेत् २४
स्नातस्त्रिकालशुद्धात्मा सोपवासो जितेन्द्रियः
देवपूजाचनरतो नित्यं दानपरः शुचिः २५
यवान्नप्रायभोजी च नित्यं होमपरायणः
गुरुविप्ररतश्चैव श्वेतमाल्याम्बरस्तथा २६
गृही सगृहिणीकस्तु व्रतमेतत्समाचरेत्
श्वेतके पञ्चरात्रं च चित्रकरठे दशैव तत् २७
चित्रे पञ्चदशाहानि कृष्णे दिवसविंशतिः
व्रतस्थेन तु कर्तव्यमग्निकार्यं मनोरमम् २८
यथालाभं समादाय तस्य देहं सपिच्छकम्
निकृन्तेत् खरडखरडानि विभागाष्टशतानि तम् २९
घृतप्लुतानि पुरयानि मधुलाजान्वितानि च

पञ्चवारुणसंज्ञेन वह्निकार्ये कृतेऽद्भतैः ३०
ततश्च मांसं जुहुयाद्धव्यमात्रेण मन्त्रवित्
हुते क्रव्ये ततः क्षीरं दधिमध्वाज्यमेव च ३१
संपूजयेद्ग्रहान् सर्वान् ब्राह्मणान्वाचयेत् ततः
स्ववित्तपादं श्वेते तु विप्रेभ्यः प्रतिपादयेत् ३२
वित्ताधं चित्रकण्ठे तु पादोनं सर्वचित्रके
कृष्णे सर्वधनत्यागः कर्तव्यो ब्राह्मणात्पुनः ३३
एवं शान्तिर्भवेद्गेहे सर्वदोषक्षयावहा
महतीं श्रियमाप्नोति धनलाभश्च जायते ३४
पुत्रैः पौत्रैर्वृद्धिमाप्नोत्यनन्तामायुर्दीर्घं प्राप्नुयात्संयतात्मा
एतत्कृत्वा मुच्यते सर्वपापैर्मेघैर्यद्वच्छारदः शीतरश्मिः ३५

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे तोरणभङ्गकपोतप्रवेशशान्तिका नाम
षट्चत्वारिंशोऽध्यायः

अथ वेदीलक्षणं नाम सप्तचत्वारिंशोऽध्यायः

वेद्यश्चतस्रो विज्ञेया या पुरा ब्रह्मणोदिताः
वयं ताः संप्रवक्ष्यामो नामसंस्थानमानतः १
प्रथमा चतुरश्रा स्यात्सभद्रा च द्वितीयका
तृतीया श्रीधरी नाम चतुर्थी पद्मिनी स्मृता २
यज्ञकाले तथोद्वाहे देवतास्थापनेषु च
नीराजनेषु सर्वेषु वह्निहोमे च नित्यशः ३

नृपाभिषेचने चैव शक्रध्वजनिवेशने
नृपयोग्या भवन्त्येता वर्णानामनुपूर्वशः ४
चतुरश्रा तु या वेदि नवहस्ता समन्ततः
अष्टहस्ता प्रमाणेन सर्वभद्रा प्रकीर्तिता ५
श्रीधरी सप्त विज्ञेया हस्तान् मानेन वेदिका
षड्ढस्ता चैव शास्त्रज्ञैर्नलिनीह विधीयते ६
चतुरश्रा तु कर्तव्या चतुरश्रा समन्ततः
भद्रैस्तु सर्वतोभद्रा भूषणीया चतुर्दिशम् ७
श्रीधरी चापि विज्ञेया कोणविंशतिसंयुता
नलिनीति च विज्ञेया पद्मसंस्थानधारिणी ८
कर्तव्याः स्वस्वविस्तारादुच्छ्रयेण त्रिभागिकाः
कुर्यान्मन्त्रवतीभिस्ता इष्टकाभिस्तु चायताः ९
चतुरश्रा यज्ञकाले विवाहे श्रीधरी स्मृता
देवतास्थापने वेदीं सर्वभद्रां निवेशयेत् १०
नीराजने साग्निकार्ये तथा राजाभिषेचने
वेदी पद्मावती या च तथा शक्रध्वजोच्छ्रये ११
चतुर्मुखा तु कर्तव्या सोपानैश्च चतुर्दिशम्
प्रतीहारसमायुक्ता चार्धचन्द्रोपशोभिता १२
चतुःस्तम्भसमायुक्ता चतुष्कुम्भविराजिता
काञ्चनै राजतैस्ताम्रैर्मृन्मयैः कलशैस्तथा १३
कोणे कोणे तु विन्यस्तैर्वल्गुवानरभूषितैः
स्तम्भप्रमाणं वेदीनां कार्यं छाद्यवशेन च १४

एकेन द्वित्रिभिर्वापि च्छाद्यैः सामलसारिकैः
स्तम्भमूलानि चाभ्यज्य गुडेन मधुसर्पिषा १५
परमान्नेन वाभ्यज्य तान्विन्यस्येद्यथातथम्
देवताः पूजयित्वा तु ब्राह्मणान्स्वस्ति वाचयेत् १६
चतुर्विधमितीरितं यदिह वेदिकालक्षणं
समग्रमपि वर्तते मनसि यस्य तच्छिल्पिनः
स याति भुवि पूज्यतामवनिभोक्तुराप्नोति च
श्रियं स्थपतिसंसदि स्फुरति चास्य शुभ्रं यशः १७
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे वेदीलक्षणं नाम सप्तचत्वारिंशोऽध्यायः

अथ गृहदोषनिरूपणं नामाष्टचत्वारिंशोऽध्यायः

अतः परं गृहादीनामप्रशस्तसमुच्छ्रितम्
क्रियते कथितं यस्मादेकत्र सुसमं भवेत् १
रक्षोम्बुनाथकीनाशमरुद्दहनदिक्प्लवा
मध्यप्लवा च भूर्व्याधिदारिद्र्यमरकावहा २
वह्निप्लवा वह्निभिये मृतये दक्षिणप्लवा
रुजे रक्षःप्लवा प्रत्यक्प्लवा धान्यधनच्छिदे ३
कलहाय प्रवासाय रोगाय च मरुत्प्लवा
मध्यप्लवा तु भूमिर्या सर्वनाशाय सा भवेत् ४
तुषास्थिकेशकीटत्वशङ्खभस्मोषरान्विताम्
कर्पराङ्गारिणीं दुष्टसत्त्वानार्यजनां त्यजेत् ५

चैत्रे शोककरं वेश्म ज्येष्ठे मृत्युप्रदायकम्
पशुनाशनमाषाढे शून्यं भाद्रपदे कृतम् ६
आश्विने कलहाय स्यात्कार्त्तिके भृत्यनाशनम्
माघे चाग्निभयाय स्यान्मासेष्वेषु न कारयेत् ७
पावकस्य पदे पृष्ठवंशस्यापि च पश्चिमे
पुरप्रासादकर्णे च कीलादि प्राक् प्रयोजयेत् ८
पूर्वपश्चिमदिङ्मूढं वास्तु स्त्रीनाशकृद्भवेत्
उदङ्मूढं न निष्पत्तिं याति सर्वं च नाशयेत् ९
यत्तु दक्षिणदिङ्मूढं जायते मरणाय तत्
प्राग्वास्तुनि कुर्वीत प्रासादं मन्दिरं पुरे १०
वलितं चलितं भ्रान्तं विसूत्रं च समुत्सृजेत्
यत्स्यान्मुखविनिष्क्रान्तं वलितं तत्प्रकीर्तितम् ११
चलितं पृष्ठनिष्क्रान्तं दिङ्मूढं भ्रान्तमुच्यते
विसूत्रं कर्णहीनं स्यात्फलमेषां प्रचक्ष्महे १२
वलिते चलति स्थानं चलिते विग्रहो भवेत्
भ्रान्तं योषिद्विनाशाय विसूत्रं भूरिशत्रुकृत् १३
मूषकोत्करवल्मीकप्रान्ता वक्रा भुजङ्गवत्
छिन्ना भिन्ना विकर्णा च न वास्तुनि शुभा क्षितिः १४
मूषकोत्करवत्यर्थं हन्ति वल्मीकिनी सुतम्
विकर्णा कुरुे कर्णरोगं छिन्ना विनाशिनी
भिन्ना भेदं करोत्युर्वी कुटिला मतिवक्रताम् १५
सपादं सत्रिभागं वा सार्धं द्विगुणमेव च

यत्स्यान्मुखायतं वेश्म तदनिष्टफलप्रदम् १६
यद् द्विशालं त्रिशालं वा चतुःशालमथापि वा
मूषया रहितं वेश्म तदनिष्ठफलप्रदम् १७
पुरतः पृष्ठतः पार्श्वे यदि वालिन्दवर्जिता
गृहे न शस्यते शाला देवागारे तु शस्यते १८
अन्यपृष्ठस्थितद्वारं वेश्म खादकमुच्यते
परस्परविरोधाय तद्वेश्म गृहिणोस्तयोः १९
सशल्यं पादहीनं च समसन्धि शिरोगुरु
वेश्मनामिदमुद्दिष्टं मर्मदोषचतुष्टयम् २०
वास्तुक्षेत्रस्य यत्राङ्गे यस्य वर्त्म प्रवर्तते
तदङ्गं वास्तुनस्तस्य च्छिन्नं तेनेति निर्दिशेत् २१
छिन्नाङ्गं विकलं तत्स्याद्भीतिदं सर्वदोषकृत्
तद्भर्तुर्भज्यतेऽङ्गं तद्वेधस्तस्याफलोऽन्यथा २२
स्वगृहद्वयमध्येन निर्वाहो यदि वर्त्मनः
द्वारवेधोदितान्दोषांस्तदा प्राप्नोति निश्चितम् २३
मार्गश्चैको यदा गच्छेदुभयोर्गृहपार्श्वयोः
मार्गवेधस्तदा स स्याच्छोकसन्तापकारकः २४
उत्सङ्गः पूर्णबाहुश्च हीनबाहुस्तथापरः
प्रत्यक्षाय इति प्रोक्तं प्रवेशानां चतुष्टयम् २५
गृहस्य सम्मुखं यत्र द्वारं भवति वास्तुनः
उतसङ्ग इति स प्रोक्तः पूर्णबाहुः प्रदक्षिणः २६
वामतो हीनबाहुः स्यात्प्रत्यक्षो वास्तु पृष्ठतः

चतुर्थोऽयं समुद्दिष्टः प्रवेशो वास्तुनो बुधैः २७
उत्सङ्गाख्ये प्रवेशे स्यात्प्रजाहानिः कुटुम्बिनः
धनधान्यक्षयो वास्य मरणं ध्रुवं भवेत् २८
पूर्णबाहौ पुत्रपौत्रा धनधान्यसुखानि च
भवन्ति वसतो नित्यं गृहिणस्तत्र वास्तुनि २९
अल्पमित्रो गृही हीनबाहावत्यल्पबान्धवः
स्याद्वाल्पवित्तो जीयेत स्त्रीभिः पीड्येत वामयैः ३०
प्रत्यक्षाय प्रवेशस्तु विहितो यत्र वेश्मनि
तस्मिन्निवसतां पुंसां निश्चितः स्याद्धनक्षयः ३१
मूषास्वस्थानयुक्तासु शालाभेद इति स्मृतः
प्राप्नोति तत्र निवसन्मृत्युं दुःखं सरोगताम् ३२
उदग्दक्षिणशालासु पूर्वापरगतासु च
अन्यथा वा स्थितं द्वारं वधबन्धनकारकम् ३३
मूषागतान् भ्रमान्कुर्यान्न शालां प्रतिभेदयेत्
भ्रमभग्नासु शालासु विपद्यन्ते कुटुम्बिनः ३४
शालाभेदो भवेद्यत्र पृष्ठतः पार्श्वतोऽपि वा
धनधान्यक्षयस्तत्र गृहिणो जायते ध्रुवम् ३५
यत्र प्रत्यङ्मुखे शाले गृहं तत्स्याद्विकोकिलम्
आयुश्चतुष्पदं धान्यं वसतां तत्र नश्यति ३६
सीमाशालाप्रभिन्नस्य प्रासादस्य गृहस्य च
अस्थिरा जायते ऋद्धिः स्थितिश्च न भवेच्चिरम् ३७
सर्वदोषकरि ज्ञेया गर्भे चन्द्रावलोकिता

मूषां विना विनाशाय कामोच्छित्त्यै गवाक्षकः ३८
यदा गण्डोऽथवा कुक्षिः पृष्ठं कक्षाथ भिद्यते
दायद्रव्यं जायते भर्तुस्तदानीमदुस्सहम् ३९
गर्भादुभयतो गण्डौ कक्षे स्तः कर्णभित्तिगे
दक्षिणोत्तरयोः कुक्षी पृष्ठतः पृष्ठमादिशेत् ४०
स्थापितद्वारसंरोधे गृहिणो जायतेऽश्मरी
द्वारे तु विहिते तस्मिन्ननर्थस्तस्य जायते ४१
पूर्वद्वारनिरोधं तु नवमागं कदाचन
श्रोत्ररोधेऽश्मरीदोषः कृत्तश्रोत्रेह्यनम्यता ४२
कृत्तानि यत्र चीयन्ते गवाक्षालोकनानि च
तत्र प्रसूतिर्न भवेन्निष्पन्नापि विनश्यति ४३
चीयमाना यदा भित्तिर्दक्षिणा स्याद्बहिर्मुखी
तदा व्याधिभयं विद्यान्नृपदण्डभयं तथा ४४
यदा तु पश्चिमं कुड्यं प्रयाति बहिरग्रतः
धनहानिं विजानीयाच्चौरेभ्यश्च भयं तदा ४५
उत्तरं तु यदा कुड्यं चीयमानं बहिर्व्रजेत्
गृहभर्तुश्च कर्तुश्च व्यसनं स्यात्तदा महत् ४६
यदाग्रं चीयमानायाः पूर्वभित्तेर्बहिर्व्रजेत्
तदा गृहपतेस्तीव्रं राजदण्डभयं भवेत् ४७
प्राग्दक्षिणो यदा कर्णश्चीयमानो बहिर्व्रजेत्
तत्राग्निभीतिरतुला संशयश्च प्रभोर्भवेत् ४८
बहिर्मुखो यदा गच्छेत्कर्णौ दक्षिणपश्चिमः

कलहोपद्रवस्तत्र स्याद् भार्यायाश्च संशयः ४९
यत्रोत्तरापरः कर्णश्चीयमानो व्रजेद्बहिः
पुत्रवाहनभृत्यानां भवेत्तस्मिन्नुपद्रवः ५०
यदा प्रागुत्तरः कर्णो बहिर्गच्छति वेश्मनः
तदा गवां वृषाणां च गुरूणां च क्षयो भवेत् ५१
चतस्रो भित्तयो यस्य बहिर्निर्यान्ति वेश्मनः
चीयमानास्तदत्रोक्तं मन्दिरं मल्लिकाकृति ५२
तादृग् गृहे न तत्रायो व्ययो भवति यादृशः
कर्शितोऽस्यैव दोषेण तस्य भर्त्ता पलायते ५३
संक्षिप्यते तु यद्वेश्म चीयमानं समन्ततः
संक्षिप्तमिति तज्ज्ञेयं तत्र राजभयं भवेत् ५४
यत्स्यादन्तेषु संक्षिप्तं विस्तृतं चापि मध्यतः
मृदङ्गाकृतिसंस्थानं तत्र व्याधिभयं भवेत् ५५
आद्यन्तविस्तृतं यत्स्यात्संक्षिप्तं चापि मध्यतः
मृदुमध्यं तदुद्दिष्टं क्षुद्भयं तत्र जायते ५६
विषमैरुन्नतैः कर्णैर्धनक्षयकरं गृहम्
भित्तिवच्चापि कर्णेषु प्रागुक्तं फलमादिशेत् ५७
मध्ये द्वारं न कर्तव्यं मनुजानां कथञ्चन
मध्ये द्वारे कृते तत्र कुलनाशः प्रजायते ५८
द्वारं द्वारेण वा विद्धमशुभायोपपद्यते
अनिष्टद्रव्यसंयुक्तं धनधान्यबिनाशनम् ५९
नवं पुराणसंयुक्तमन्यं स्वामिनमिच्छति

अधोग्रं राजदण्डाय विद्धं द्वारं विगर्हितम् ६०
नवं पुराणसंयुक्तं द्रव्यं तु कलिकारकम्
न मिश्रजातिद्रव्योत्थं द्वारं वा वेश्म वा शुभम् ६१
गृहस्थानेषु यद्द्रव्यमधिवास्य प्रतिष्ठितम्
तच्चालनेन चलनं गृहभर्तुः प्रजायते ६२
अन्यवास्तुच्युतं द्रव्यमन्यवास्तौ न योजयेत्
प्रासादे न भवेत्पूजा गृहे च न वसेद्गृही ६३
द्रव्येण देवदग्धेन भवनं यद्विधीयते
न तत्र वसति स्वामी वसन्नपि विनश्यति ६४
सूर्योद्भवा द्रुमच्छाया ध्वजच्छाया च गर्हिता
द्वारातिक्रमणादेताः द्वुद्व्याधिकलिकारकाः ६५
प्रासादशिखरच्छाया ध्वजच्छायेति कीर्तिता
त्रिपञ्चसप्तमी भर्तुर्गृहतारा न शोभना ६६
निम्नोन्नतं करालं च सम्मुखं पृष्ठदेशगम्
वामावर्तं च न शुभं द्वारमग्रतरं गृहे ६७
निम्ने स्यात्स्त्रीजितो भर्ता दुर्जनस्थितिरुन्नते
सम्मुखे सुतपीडा स्यात्पृष्ठगे चपलाः स्त्रियः ६८
वामे वित्तक्षयो द्वारि भवत्यग्रतरे प्रभोः
द्वारं तस्मान्न कर्तव्यमीदृग्रूपं विचक्षणैः ६९
नागदन्ततुलास्तम्भभित्तिमूषागवाक्षकाः
द्वारमध्ये न दातव्या न चैते विषमस्थिताः ७०
इतिहासपुराणोक्तं वृत्तान्तप्रतिरूपकम्

निन्दितं च गृहे नेष्टं शस्तं देवकुलेषु तत् ७१
यानीन्द्रजालतुल्यानि यानि मिथ्याकृतानि च
भीषणानी च यानि स्युर्न कुर्यात्तानि वेश्मसु ७२
स्वयमुद्घाटितं द्वारमुच्चाटनकरं भवेत्
धनहृद् बन्धुवैरं स्यादथवा कलिकारकम् ७३
स्वयं यत्पिहितं द्वारं तद्भवेद्बहुदुःखदम्
सशब्दं भयकृत्पादशीतलं गर्भपातनम् ७४
द्रव्यं नाधोमुखं कार्यं प्रत्यग्याम्याननं न च
पश्चिमाग्रे परिक्लेशो दक्षिणाग्रे तु शून्यता ७५
स्तम्भद्वारं च भित्तिं च विपरीतं न कारयेत्
अमीषां वैपरीत्येन दोषाः स्युर्बहवो नृणाम् ७६
मूलसूत्रानुसारेण कर्तव्या भूमिकोपरि
उपर्युपरि यद्वेश्मसमं संतापकारकम् ७७
अधोभूमौ क्षणा ये स्युस्तत्समांश्चोर्ध्वभूमिषु
परित्यजन्नपहिता न कुर्वीत यथोत्तरम् ७८
शाला निम्ना भवेद्यस्मिन्नलिन्दस्त्वधिको भवेत्
निधनं जायते तत्र सदा शोकभयानि च ७९
मूलद्वारानुसारेण द्वाराण्युपरिभूमिषु
कुर्याद्भयप्रदानि स्युर्विहितान्यन्यथा पुनः ८०
क्षुद्भयप्रदमाध्मानं कुब्जं कुलविनाशनम्
अत्यर्थं पीडितं पीडां करोत्यन्तनतं क्षयम् ८१
प्रवासो बाह्यविनते दिग्भ्रान्ते दस्युतो भयम्

मूलद्वारं क्षयं कुर्याद्विद्धं द्वारान्तरेण यत् ८२
प्रवासो भृत्यजो द्वेषो विद्धे चत्वररथ्यया
नाशं द्रव्यं ध्वजाविद्धं वृक्षेण शिशुदूषकम् ८३
पङ्कविद्धे भवेच्छोकः सलिलस्राविणि व्ययः
कूपेन विद्धेऽपस्मारो विनाशो दैवतेन च ८४
स्तम्भेन दूषणं स्त्रीणां ब्रह्मणा तु कुलक्षयः
मानादभ्यधिके द्वारे राजतो जायते भयम् ८५
व्यसनं मानतो हीने चौरेभ्यश्च भयं भवेत्
व्याधयः श्वभ्रविद्धेन धनस्य च परिक्षयः ८६
देवध्वजेन बन्धः स्यात्सभयैश्वर्यसंक्षयः
सन्निपातभयं वाप्या तुल्या दृष्टत्वमाकृते ८७
ह्रदुक्कुलालचक्रेण दारिद्र्यं वारिणा भवेत्
व्याधिरुक्कचकूटेन ग्रापाकेन सुतक्षयः ८८
निश्चतोदूखलेन स्याच्छिलया चाश्मरी भवेत्
तोयभाण्डेन दुर्मन्त्री भस्मना चार्शसो गृही ८९
दारिद्र्यं छायया विद्धे भवेद्द्वारे कुटुम्बिनः
स्थलस्यन्दनवल्मीकैर्विदेशगमनं भवेत् ९०
कृशं विकृतमत्युच्चं करालं शिथिलं पृथु
वक्रं विशालमुत्तानं शूलाग्रं ह्रस्वकुक्षिकम् ९१
स्वपादचलितं ह्रस्वं हीनकर्णं मुखानतम्
पार्श्वगं सूत्रमार्गाच्च भ्रष्टं द्वारं न शोभनम् ९२
तत्करोति क्षयं घोरं विनाशं स्वामिसम्पदः

वसतां कलहं नित्यमतस्तत्परिवर्जयेत् ९३
अन्तर्द्वाराद्बहिर्द्वारं नोच्चं कुर्यान्न सङ्कटम्
उच्चं विसङ्कटं वापि तच्छिवाय न जायते ९४
पट्टसन्धिर्यदा मध्ये द्वारस्य स्यात्कथञ्चन
कर्तुस्तदा विनाशः स्यात्कुलस्य च परिक्षयः ९५
तुला उपतुला वा स्युर्द्वारि तिर्यग्यदा कृताः
दारिद्र्यव्याधिसन्तापा भवन्ति स्वामिनस्तदा ९६
अनुवंशमनुप्राप्ता जयन्त्यो यदि मन्दिरे
वित्तायुषोस्तदाल्पत्वमनारोग्यं च जायते ९७
उदुम्बरे निहितालललाटी नाम सा तुला
दूषणं मरणं वापि कन्यानां विदधाति सा ९८
उत्तराङ्गोदरे न्यस्ता ललाटेन समा यदि
तुला ललाटिका सापि कुलक्षयकरी भवेत् ९९
तुलापिण्डेन विन्यस्ता ज्ञेया यज्ञोपवीतिनी
वसतो व्यसनं कुर्यात्कुटुम्बस्यासुखं च सा १००
यदि भारतुलैकापि मध्ये विद्धा कथञ्चन
तदा वराङ्गं भज्येत धनं च परिहीयते १०१
भित्तिभेदो न कर्तव्यस्तुलाग्रैरखिलैरपि
कुर्याद् ब्रह्मपदन्यस्तो भारपट्टः कुलक्षयम् १०२
अयुक्तयोर्युक्तयोर्वा सन्धिश्चेद्द्वारपट्टगे
सन्धौ स्यात्तत्सुतो ज्येष्ठः कर्तुश्चापि विनश्यति १०३
अनुवंशं न भुञ्जीत न शयीत कदाचन

भुञ्जानस्यार्थनाशः स्याच्छयानस्य महारुजः १०४
नाशोऽनुवंशं रोगाः स्युस्तिर्यक्स्थे रक्षसो भयम्
शयनागारविन्यस्ते मरणं नागदन्तके १०५
कर्णावात्पक्षिराङ्क्षगटाध्वजच्छत्रकुमारकान्
सिंहकर्णकपोतालिं गृहेषु परिवर्जयेत् १०६
इन्द्रकीलं शुक्रं तुम्बीमर्धवंशं च वेश्मनि
न कुर्यात्तत्र विहिताः सर्वदोषावहा यतः १०७
अतिक्षिप्रचिरोत्पन्नं कृशद्रव्यमपाहितम्
अप्रतिष्ठितसंस्थानं गृहं नमति पञ्चधा १०८
अतिस्थूलेन ह्रस्वेन शरीरेण यथा नरः
विरूपो दुवलश्चव तथा द्रव्येण मन्दिरम् १०९
जीर्णं घुणकृतं मिश्रं हीनं वक्रं विधिच्युतम्
चण्डं तुण्डं वक्रकोणं सन्धिविद्धाल्पमूलके ११०
वज्रमध्यं स्थूलमूलं कुक्षिभिन्नं च दारु यत्
भिन्नमूलं कूर्मपृष्ठं पक्षहीनं च वर्जयेत् १११
पातितान्वर्जयेद्वृक्षान् द्विपाश्चाग्निजलानिलैः
प्रभूतपक्षिनिलयान् काककौशिकसेवितान् ११२
मधुग्रहपिशाचाहिदुष्टांश्चैत्यश्मशानजान्
चतुष्पथत्रिकमहानदीसङ्गममार्गजान् ११३
देवतायतनेजातानूर्ध्वशुष्कान् क्षतच्छदान्
वल्लीपिनद्धान्सुषिरकोटरग्रन्थिसङ्कुलान् ११४
याम्यापराशापतितांस्त्यजेत्कण्टकिनोऽपि च

कपित्थोदुम्बराश्वत्थशिरीषवटचम्पकान् ११५
कोविदारधवारिष्टश्लेष्मातकविभीतकान्
किञ्च सप्तच्छदक्षीरिफलदांश्च द्रुमांस्त्यजेत् ११६
मर्माणि यत्र पीडयन्ते द्वारैर्भित्तिमिरेव वा
दारिद्र्यं कुलहानिं वा गृहिणस्तत्र निर्दिशेत् ११७
स्तम्भैर्विनश्यति स्वामी तुलाभिः स्त्रीवधो ध्रुवम्
सङ्घ्रैर्बन्धुनाशः स्याज्जयन्तीभिः स्नुषावधः ११८
मर्मस्थानस्थितैः कायैर्भर्तुः कायो निपीडयते
मर्मस्थैः सन्धिपालैस्तु सुहृद्विश्लेषमादिशेत् ११९
गृहपीडा नागदन्तैर्नागपाशैर्धनक्षयः
कापिच्छकैस्तु प्रेष्याणां क्षयं मर्मस्थितैर्वदेत् १२०
षड्दारुकान्यनुसरागवाक्षालोकनानि च
मर्मस्थाननिविष्टानि जनयन्ति महाभयम् १२१
स्तम्भैर्वा द्वारमध्यैर्वा तुलाभिर्नागपाशकैः
वातायनैर्नागदन्तैर्द्वारमध्ये निपीडिते १२२
व्याधयः संप्रवर्धन्ते धननाशः कुलक्षयः
राजदण्डभयं च स्यादपत्यानां च पीडनम् १२३
षड्दारुकाणां मध्येषु द्वारमध्येषु वा पुनः
कर्णद्रव्यादिभिर्विद्धेष्वेतदेवादिशेत् फलम् १२४
संविद्धा नागदन्तैर्या स्तम्भैर्वातायनैस्तथा
शय्या शस्त्राद्भयं भर्तुः कुर्यात्तस्करतोऽपि वा १२५
गृहमध्ये कृत द्वारं द्रव्यकोशविनाशनम्

आवहेत्कलहं भर्तुर्भार्यां वास्य प्रदूषयेत् १२६
द्रव्येणैकोत्तरेणापि महामर्मणि पीडिते
सर्वस्वनाशो गृहिणो मरणं वा ध्रुवं भवेत् १२७
द्वाररम्भतुलालिन्दश्च यदोषैः समीरितैः
विसूत्रे नागदन्तेऽपि तच्छून्यं जायते गृहम् १२८
विभागपदहीनेषु रूपस्थानेषु वास्तुषु
यक्ष्मातृक्रियाद्येषु रोगान्मृत्युर्न संशयः १२९
कटुकण्टकिदुर्गन्धिगुह्यकाद्याश्रयान् द्रुमान्
न धारयेत् समीपस्थान् पुरप्रासादवेश्मनाम् १३०
बदरी कदली चैव दाडिमी बीजपूरिका
प्ररोहन्ति गृहे यत्र तद्गृहं न प्ररोहति १३१
द्रव्यं द्रव्याधिकं हन्ति कुलमायामतोऽधिकम्
उच्छ्रयाभ्यधिकं पूजां सन्ततिं विस्तराधिकम् १३२
स्तम्भाङ्गैर्भित्तिभिः पट्टैः शीर्षकैर्भवनैस्तथा
आलोकनातोरणाद्यैश्छाद्यकैः कन्दकूटकैः १३३
हीरशाखोत्तमाङ्गैश्च तुलाभिः सन्धिपालकैः
अर्गलाग्रैर्वेदिकाभिर्व्यालैर्जालैश्च नूतनैः १३४
घातितैः पातितैर्नष्टैर्जायते गृहिणो ध्रुवम्
व्याधिदारिद्र्यदुःखार्तिर्निर्धनत्वं च जायते १३५
उच्चच्छाद्यं छिद्रगर्भं भ्रमितं वमितं मुखे
हीनमध्यं नष्टसूत्रं शल्यविद्धं शिरोगुरु १३६
भ्रष्टालिन्दकशोभं च विषमस्थं तुलातलम्

अन्योन्यद्रव्यविद्धं च कुपदप्रविभाजितम् १३७
हीनभित्त्युत्तमाङ्गं च विनष्टं स्तम्भभित्तिकम्
भिन्नशालं त्यक्तकरठं निष्कन्दं मानवर्जितम् १३८
विकृतं च गृहं भर्तुरनिष्टफलदायकम्
तस्माद्दोषानिमांस्त्यक्त्वा गृहं कुर्याच्छुभावहम् १३९
एवंविधं दोषकरं गृहं स्याद्भर्तुश्च कर्तुश्च यतस्तदेते
ज्ञेयाः सदा शिल्पिभिरप्रमत्तैस्त्याज्याश्च दोषाः शुभकीर्तिकामैः १४०

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे गृहदोषनिरूपणं नामाष्टचत्वारिंशोऽध्यायः

अथ रुचकादिप्रासादलक्षणं नामैकोनपञ्चाशोऽध्यायः

त्रिदशानां नृपाणां च वर्णिनां च विशेषतः
उत्पत्तिप्रसृतिं ब्रूमः प्रासादा यस्य ये मताः १
पुरा ब्रह्मासृजत्पञ्च विमानान्यसुरद्विषाम्
वियद्वर्त्मविचारीणि श्रीमन्ति च महान्ति च २
तानि वैराजकैलासे पुष्पकं मणिकाभिधम्
हैमानि मणिचित्राणि पञ्चमं च त्रिविष्टपम् ३
आत्मनः शूलहस्तस्य धनाध्यक्षस्य पाशिनः
सुरेशिने च विश्वेशो विमानानि यथाक्रमम् ४
बहून्यन्यानि चैवं स सूर्यादीनामकल्पयत्
विशेषाय यथोक्तैस्तान्याकारैः प्रतिदैवतम् ५
प्रासादांश्च तदाकाराञ्शिलापक्वेष्टकादिभिः

नगराणामलङ्कारहेतवे समकल्पयत् ६
वैराजं चतुरश्रं स्याद्वृत्तं कैलाससंज्ञितम्
चतुरश्रायताकारं विमानं पुष्पकं भवेत् ७
वृत्तायतं च मणिकमष्टाश्रि स्यात्त्रिविष्टपम्
तद्भेदाञ्श्रीमतोऽन्यांश्च विविधानसृजत्प्रभुः ८
ये यत्र विहिता भेदाः पूर्वं कमलयोनिना
सर्वांस्तानभिधास्यामो नामसंस्थानमानतः ९
रुचकश्चित्रकूटश्च तृतीयः सिंहपञ्जरः
भद्रः श्रीकूट उष्णीषः शालाद्यो गजयूथपः १०
नन्द्यावर्तोऽवतंसाह्वः स्वस्तिकः क्षितिभूषणः
भूजयो विजयो नन्दी श्रीतरुः प्रमदाप्रियः ११
व्यामिश्रो हस्तिजातीयः कुबेरो वसुधाधरः
सर्वभद्रो विमानाख्यो मुक्तकोणश्च नामतः १२
चतुर्विंशतिरुद्दिष्टा चतुरश्राः समासतः
वृत्तांस्तथाभिधास्यामः प्रासादानपरानपि १३
वलयो दुन्दुभिः प्रान्तः पद्मः कान्तश्चतुर्मुखः
माण्डूकाख्योऽथ कूर्मश्च तालीगृह उलूपिकः १४
इति वृत्ताः समासेन प्रासादा दश कीर्तिताः
चतुरश्रायता ये स्युः कथ्यन्ते तेऽपि नामतः १५
भवो विशालः साम्मुख्यः प्रभवः शिबिरागृहः
मुखशालो द्विशालश्च गृहराजोऽमलो विभुः १६
एवमेते समुद्दिष्टाश्चतुरश्रायता दश

अथ वृत्तायतान्ब्रूमः प्रासादानभिधानतः १७
आमोदो रैतिकस्तुङ्गश्चारुर्भूतिर्निषेवकः
सदा निषेधः सिंहाख्यः सुप्रभो लोचनोत्सवः १८
एते वृत्तायताः प्रोक्ताः प्रासादा नामतो दश
अष्टाश्रीणां च नामानि कथयामि समासतः १९
वज्रको नन्दनः शङ्कुर्मेखलो वामनो लयः
महापद्मश्च हंसश्च व्योमचन्द्रोदयाविति २०
अष्टाश्रय इमे प्रोक्ताः प्रासादा दश संख्यया
भवन्त्येवं चतुष्षष्टिर्लक्ष्मैषामधुनोच्यते २१
संस्थानमानविन्यासैर्भद्रस्तम्भादिसङ्ख्यया
एषां विशेषा वक्ष्यन्ते पृथक्पृथगनुक्रमात् २२
ज्येष्ठो भागश्चतुर्हस्तः सार्धहस्तत्रयोऽपरः
कल्पनीयः कनीयांस्तु हस्तत्रितयसम्मितः २३
ज्येष्ठमध्यकनीयोभिरेवं भागैर्विभाजिताः
भवन्ति सर्वप्रासादा ज्येष्ठमध्याधमक्रमात् २४
चतुरश्रीकृते क्षेत्रे चतुर्भागविभाजिते
कुर्यात्स्वारोहकाश्वासं पीठमंशसमुद्धृतम् २५
तथा तस्योपरि स्थाप्या हंसपृष्ठी समन्ततः
हस्तमात्रोच्छ्रिता वृत्ता जलनिर्गमभूषिता २६
ततः पीठस्य तस्यान्तर्द्विभागायमविस्तृतिः
प्रासादो रुचकः कार्यो भागत्रितयमुच्छ्रितः २७
सार्धभागेन संछा स्यात्सार्धभागस्तु योऽपरः

छायत्रयं सकरठं स्यात्तेन सामलसारकम् २८
द्वारं भागोच्छ्रितं तस्य कार्यं भागार्धविस्तृतम्
सप्राग्रीवः स कर्तव्यश्चतुर्दशधरावृतः २९
ससौधालिन्दकश्चारुरूर्ध्वच्छाद्योपकर्षवान्
क्रियतेऽत्र यदा स्तम्भाद्बाविंशत्या समावृतः ३०
सप्राग्रीवपरिष्कारो भागिकालिन्दशोभितः
मध्यप्रदेशे रुचकः प्रासादः परिकीर्तितः ३१
रुचकः
कर्णप्राग्रीवकैश्चित्रैः सप्राग्रीवश्च यो वृतः
द्वाभ्यां द्वाभ्यां गवाक्षाभ्यां चतुर्दिशमलङ्कृतः ३२
कपोतालीपरिक्षिप्तः शोभितो द्वारसम्पदा
तदानीं चित्रकुटाख्यः प्रासादः सोऽभिधीयते ३३
चित्रकूटः
अयमेव पुनः षड्भिः स्तम्भैरपि चितो यदा
प्राग्रीवकविहीनश्च स भवेज्जालरूपकः ३४
सिंहपञ्जर इत्युक्तः प्रासादः स तदा शुभः
सिंहपञ्जरः
कर्णप्राग्रीवकौ द्वौद्वावस्यैव भवतो यदा ३५
अलिन्दकगतिस्थित्या तदा भद्रः प्रकीर्तितः
भद्रः
स्याच्चित्रकूट प्राग्रीवैश्चतुर्भिर्दिक्चतुष्टये ३६
बहिरन्तश्चतुर्द्वारः श्रीकूट इति नामतः

श्रीकूटः
षड्दारुकसमायुक्तप्राग्द्वारस्त्वयमेव चेत् ३७
प्रासादस्तम्भगर्भः स्यात्तदोष्णीषोऽभिधीयते
उष्णीषः
चतुरंशकविस्तीर्णं षडंशविहितायति ३८
पीठं शालागृहस्योक्तं सशालानिर्गमं शुभम्
मध्यादपरतस्तस्य द्विभागायतविस्तृतम् ३९
विधेयं गर्भभवनमलिन्दकपरिष्कृतम्
कार्या तस्याग्रतः सीमा भागद्वितयमायता ४०
भागमेकं च विस्तीर्णा चतुःस्तम्भोपशोभिता
तदग्रतोऽपरा सीमा कार्या भागान्षडायता ४१
तिर्यक्स्था भागविस्तीर्णा प्रवेशद्वयशोभिता
एष शालागृहः स्तम्भैर्द्वाविंशत्या समावृतः ४२
प्राग्ग्रीववेदिकाजालपद्मसोपानकैः शुभैः
शालाख्यः
पञ्चभागोन्मितव्यासे क्षेत्रभागाष्टकायते ४३
पीठं कुर्यादुभयतः ससोपानं शिलाचितम्
मध्यादपरभागेऽस्य देवागारं निवेशयेत् ४४
विभागायामविस्तारं चतुरश्रं सुसंहितम्
पादोनभागविस्तारमध्यर्धं भागमुच्छ्रितम् ४५
तस्य कार्यं मुखं मध्ये पार्श्वतश्चयशोभितम्
सचया निर्गता सीमा द्वौ भागौ त्रींस्तथायथा ४६

चतुरश्रा चतुःस्तम्भा तदग्रे भागविस्तृता
पञ्चभागायता तिर्यक्कार्या सीमा तथापरा ४७
द्वात्रिंशदत्र कर्तव्याः स्तम्भाः सर्वैक्यसङ्ख्यया
बहिःपरिसरो गर्भात्ससीम्नो भागविस्तृतः ४८
एवं स्याद्वेदिकाजालरूपादिभिरलङ्कृतः
बहिर्वयोच्छ्रितश्चैष प्रासादो गजयूथपः ४९
गजयूथपः
षड्भागभाजिते क्षेत्रे चतुरश्रे समन्ततः
गर्भो द्विभागिकः कार्यो द्वारं भागसमुच्छ्रितम् ५०
भागार्धं द्वारविस्तारः प्रासादस्योच्छ्रितिं पुनः
कुर्वीत चतुरो भागाञ्छादयेच्चित्रकूटवत् ५१
कार्या द्विभागिकाः शालाः सालिन्दास्तस्य बाह्यतः
बहिर्भित्तिपरिक्षिप्ताश्चतुर्भागायताः शुभाः ५२
द्वौ द्वौ गवाक्षकौ स्तम्भाः प्रतिशालं भवन्ति षट्
चतुःस्तम्भधृतैर्युक्ताः कार्या वा धार्मिकालयैः ५३
नन्द्यावर्तोऽयमेवं स्यात्सप्राग्रीवचतुष्टयः
प्रागु द्वारक्षणोपेतः प्रासादः शुभलक्षणः ५४
नन्द्यावर्तः
क्षेत्रषड्भागविस्तारे दशभागकृतायतौ
मध्यादपरभागेऽस्य देवकोष्ठं निवेशयेत् ५५
चतुरंशप्रतिन्यासं चतुरश्रं समन्ततः
द्वारं तस्य विधातव्यं भागमध्यर्धमुच्छ्रितम् ५६

पादोनं भागविस्तारं सिंहवक्त्रविभूषितम्
सीमा तस्याग्रतः कार्या देवकोष्ठेन सम्मिता ५७
स्तम्भैः षोडशभिर्युक्ता भागद्वितयमुच्छ्रितैः
ससीम्नो देवकोष्ठस्य समन्ताद्भित्तिवेष्टितः ५८
अलिन्दो भागिकः कार्यो गवाक्षैरुपशोभितः
सीम्नोश्चाग्रतः पार्श्वे षड्दारुकयुता बहिः ५९
कार्या द्विरंशाः प्राग्ग्रीवा भागिकालिन्दवेष्टिताः
द्विद्विस्तम्भधृताः सर्वे पार्श्वतश्चयशोभिताः ६०
अलिन्दास्तु चतुःस्तम्भाः कार्याः प्राग्ग्रीवकाग्रतः
अवतंसक इत्येष सर्वलक्षणसंयुतः ६१
प्रासादः कथितः सम्यक् ।
अवतंसः ।
स्वस्तिकः प्रोच्यतेऽधुना
चतुरश्रीकृते क्षेत्रे षड्भागप्रविभाजिते ६२
प्रासादं कल्पयेन्मध्ये द्विभागायामविस्तृतम्
द्वारपाशोऽस्य भागार्धविस्तृतो भागिकोदयः ६३
गर्भवेश्म चतुःस्तम्भमलिन्दो भागिदो बहिः
तस्य स्युर्द्वादश स्तम्भा भागिकोऽलिन्दकोऽपरः ६४
विंशतिस्तम्भसंयुक्तो विधातव्यः समन्ततः
चयावृतश्च पुरतो भागो वाष्टधरान्वितः ६५
भागमेकैकमुत्सृज्य कर्णाभ्यां भागविस्तृतौ
भागिकोच्छ्रायनिष्कासौ त्रिदिशं सगवाक्षकौ

स्वस्तिकोऽयं समाख्यातः प्रासादश्चित्रलक्षणः ६७
स्वस्तिकः ।
अथाभिधीयतेऽधुना प्रासादः शुभलक्षणः
षड्भागभाजिते क्षेत्रे चतुरश्रे समन्ततः ६८
द्विभागायामविस्तारं मध्ये गर्भगृहं भवेत्
भागद्वयोच्छ्रितैः स्तम्भैर्युतं व्यक्तैः सलक्षणैः ६९
निष्क्रान्तेषु बहिर्भागे गर्भपादेषु योजयेत्
तोरणानि मनोज्ञानि ककुप्सु चतसृष्वपि ७०
गर्भस्तम्भप्रमाणेन तानि स्तम्भद्वयेन वा
समुत्क्षिप्तानि युक्तानि कलशै रविमण्डलैः ७१
पल्लवैः पत्रजात्यादिविन्यासैश्चाप्यनेकशः
भूषितास्ये पुनर्मूर्ध्नि मकराणां मुखैरपि ७२
स्तम्भयोरन्तरे दद्यादुभौ मकरपूरिमौ
अन्योन्याभिमुखे श्लिष्टे कुर्यान्मकरयोर्मुखे ७३
चतुर्णामपि निरिद्दिष्टस्तोरणानां मया विधिः
अलिन्दो भागिकश्च ान्यो बहिर्भागे प्रकीर्तितः ७४
स्युर्भागिकान्यलिन्दान्ते धार्मिकायतनानि च
वेष्टितानि बहिर्भित्त्या सम्मुखानि परस्परम् ७५
धार्मिकालयभित्तीनां भूमिर्या बाह्यतो भवेत्
तस्याः षड्दारुकाणि स्युर्भागमात्रोच्छ्रितानि च ७६
प्राग्ग्रीवकैः ससोपानैर्दिक्चक्रैस्तानि भूषयेत्
अपरस्याः पुनर्भित्तेर्भागद्वयविनिस्सृतम् ७७

मध्ये द्विभागविस्तीर्णं देवकोष्ठं निवेशयेत्
द्वारपाशं च कुर्वीत तस्योकुं भागमुच्छ्रितम् ७८
तथा भागार्धविस्तारमित्येष क्षितिभूषणः
प्रासादः कीर्तितः सम्यक् सर्वलक्षणलक्षितः ७९
क्षेत्रस्य चतुरश्रस्य भागान् द्वादश कल्पयेत्
मध्ये गर्भं चतुःस्तम्भं तस्य कुर्याद् द्विभागिकम् ८०
तद्बहिर्भागिकोऽलिन्दो द्वादशस्तम्भवान् भवेत्
मध्येऽपरस्यां यौ स्तम्भौ ताभ्यां कुर्वीत तोरणम् ८१
अलिन्दो भागिकः कार्यो भित्त्या भागिकया वृतः
प्राच्यां षड्दारुकं मध्ये गर्भव्यासोन्मितायति ८२
तृतीयो भागिकोऽलिन्दः स्याद्भित्त्या परिवेष्टितः
चतुर्भागायतं भूयस्तत्र षड्दारुकं भवेत् ८३
प्राग्रीवं भागविष्कम्भं कुर्याद्भागद्वयायतम्
अग्रतः स्तोभितं स्तम्भैर्भागान्तस्थचयावृतम् ८४
यथा प्राच्यां तथोदीच्यां याम्यायामपि कीर्तितम्
दिशि प्रतीच्यां तु पुनर्द्वितीयालिन्दकाद्बहिः ८५
द्विभागायामविष्कम्भं देवकोष्ठं निवेशयेत्
सपक्षद्वारकं श्रीमद् द्वारपाशोपशोभितम् ८६
भागिकोऽलिन्दकस्तस्माद् बहिर्भित्त्याभिवेष्टितः
बहिश्चयावृतो वा स्याद् गवाक्षैर्वा विभूषितः ८७
पृथ्वी विजयते यस्मात्तेनासौ पृथिवीजयः
भूजयः ।

यदा पृथ्वीजयस्यैव कर्णप्राग्रीवकावुभौ ८८
कोणेषु भागिकौ स्यातां विज्ञेयो विजयस्तदा
विजयः ।
अयं समन्तादुत्क्षिप्तो बाह्यालिन्दं विना यदा ८९
मध्यमालिन्दसौधस्थं कर्णप्रासादकैश्चितः
प्रथमालिन्दगर्भौ च समुत्क्षिप्ततरौ ततः ९०
स्यातां छाद्यद्वयच्छन्नौ तदा नन्दोऽभिधीयते
नन्दः ।
चतुरश्रीकृते क्षेत्रे दशभागविभाजिते ९१
चतुरश्रो भवेन्मध्ये देवकोष्ठो द्विभागिकः
द्वारबन्धोऽस्य भागोच्चः कार्यो भागार्धविस्तृतः ९२
स्याद् बहिर्द्वादशधरोऽलिन्दको देवकोष्ठतः
भागिकः स च विज्ञेयो भित्तियुक्तस्ततोऽपरः ९३
अयं द्विभागिकैर्युक्तः प्राग्रीवैर्भागनिर्गमैः
तथा तृतीयोऽलिन्दः स्यात्समन्ताद्भित्तिवेष्टितः ९४
प्राग्रीवकैश्चतुःस्तम्भैः सप्रवेशैर्विभूषितः
भागिकी स्याद्बहिर्भित्तिरितरा तु धरैः समा ९५
इत्येष श्रीतरुर्नाम प्रासादः परिकीर्तितः
श्रीतरुः ।
अस्यैव स्तम्भगर्भस्य द्वितीयालिन्दभित्तिषु ९६
षड्दारूणि विधेयानि पूर्वरूपव्यवस्थितेः
द्वौ द्वौ प्राग्रीवकौ कार्यौ तृतीयालिन्दकाद्बहिः ९७

तौ च द्विन्तरितौ सर्वतो भागनिर्गतौ
एवं पञ्चांशता स्तम्भैर्द्वाभ्यां च परिवेष्टितः ९८
चतुःस्तम्भैः सप्रवेशैः समन्तादुपनिर्गमैः
प्रासादोऽयं समाख्यातो नामतः प्रमदाप्रियः ९९
प्रमदाप्रियः ।
भागविस्तारविष्कम्भमस्य प्राग्रीवकं यदा
भिन्नालिन्दाग्रतस्तिर्यग्द्वे शाले तन्मुखं शुभम् १००
द्वितीयालिन्दकस्थाने कर्णप्रासादकैर्युतः
एवं व्यामिश्रसंज्ञोऽयं प्रासादः परिकीर्तितः १०१
व्यामिश्रः ।
विजयस्यास्य च यदा कर्णलाङ्गलकैर्युता
भवेद्भित्तिस्तदा हस्तिजातीय इति कथ्यते १०२
हस्तिजातीयः ।
सीमाप्राग्रीवभूमीषु यदा स्युः पृथिवीजये
द्विभागाश्चाभितोऽलिन्दास्तिर्यक्शालामुखेषु च १०३
अलिन्दे पश्चिमा शाला सर्वशालोकना शुभा
षड्दारुकं तथैवात्र चतुर्भागायतं भवेत् १०४
पूर्ववत्सर्वमन्यच्च कुबेरः स तदा भवेत्
कुबेरः ।
प्रासादः कथ्यतेऽन्यश्च सम्प्रतीह धराधरः १०५
कुबेरोपत्तरोच्चिप्तः कर्णप्रासादभूषितः
मध्यद्वारान्वितः श्रीमान् धराधर इति स्मृतः १०६

वसुधाधरः ।
यत्राग्रतश्चित्रकूटस्तस्माद्यः सर्वतोदिशम्
धराधरतदभ्भासः सर्वतोभद्र उच्यते १०७
सर्वतोभद्रः ।
कर्णप्राग्रीवकौ द्वौ द्वौ शालाप्राग्रीवकाभ्रपि
स्यातां यदास्य प्रोक्तोऽसौ विमानाख्यस्तदा शुभः १०८
विमानाख्यः ।
विमानपीठे निर्मुक्तः शालाभिः सर्वतो वृतः
भ्रन्योन्यशालासम्बन्धे विमानो न्यस्यते यदा १०९
कर्णप्रासादकोपेतः कोणैः शालोज्झितैर्युतः
स विमुककोणः स्यात्प्रासादोऽत्यर्थशोभितः ११०
मुक्तकोणः ।
प्रासादाश्चतुरश्राः स्वैर्विशेषैर्वर्णिनाः पृथक्
इदानीमभिधीयन्ते वृत्ताः स्वैः स्वैर्विशेषणैः १११
तत्रादौ वलयाकारो वलयः स च कथ्यते
समन्ताद्वर्तिते क्षेत्रे चतुर्भागविभाजिते ११२
कुर्यात्सारोहणं पीठं सार्धभागोच्छ्रितं शुभम्
परिक्षिप्तं गजमुखैर्मकरस्याम्बुनिर्गतम् ११३
बहिर्भागसमोपेतस्तस्मिन्कार्यः सुरालयः
पादोनविस्तृतिर्द्विघ्नद्वारोच्छ्रायविभूषितः ११४
तस्याष्टस्तम्भकोऽलिन्दो बहिर्वलय इत्यसौ
वृत्तच्छाद्यः सिंहकर्णस्तथा जालकरूपवान् ११५

भूलवयः ।

प्राग्रीवका स स्याद यद्वा स्तम्भोच्छ्रयानतः
तदैष दुन्दुभिः प्रोक्तस्त्रिभिस्तैः प्रान्त उच्यते ११६
अयमेव चतुर्भिः स्यात्पद्मः प्राग्रीवकैः शुभैः
स्तम्भैश्चतुर्भिस्तस्यैव यदा पश्चान्निवेश्यते ११७
मध्यवृत्तो गर्भकोष्ठो भित्तिश्चोभयतः स्थिता
स कान्त इति विख्यातः प्रासादो वर्तुलाकृतिः ११८
चत्वारि वलयस्यैव यत्र द्वाराण्यलिन्दकः
स्याच्चतुर्विंशतिस्तम्भैर्द्वितीयो भागसम्मितः ११९
प्राग्रीवकाश्च स्तम्भाभ्यां द्वाभ्यां द्वाभ्यां समन्विताः
चत्वारो यत्र स प्रोक्तः प्रासादोऽत्र चतुर्मुखः १२०
अस्यैवैकं यदा द्वारं प्राग्रीवोऽलिन्दवेष्टितः
एक एव तथाचान्यः प्राग्रीवस्तस्य चाग्रतः १२१
ख्यातो माण्डूक इत्येष वृत्तप्रासादसत्तमः
दिक्कोणेषु यदास्यैव भवेत्प्राग्रीवकल्पना १२२
प्रासादोऽयं तदा कूर्मसंज्ञः स्यादपराजितः
कूर्मस्यैव यदा दिक्षु स्तम्भैरष्टाभिरष्टभिः १२३
प्राग्रीवकाः प्रकल्प्यन्ते चत्वारोऽलिन्दवेष्टिताः
प्र ग्रीवकास्तिर्यगग्रे भवन्त्यन्ये तदग्रतः १२४
षोडशस्तम्भयुक्तस्य मध्यभागे यदा भवेत्
जानीयाद्दोषविज्ञेयाः प्राग्रीवहरितोत्तमः १२५
इति वृत्ताः समाख्याताः प्रासादा नामलक्षणैः

चतुरश्रायतान् ब्रूमः प्रासादानिह साम्प्रतम् १२६
अष्टभागायते क्षेत्रे चतुरंशकविस्तृते
द्विभागसार्धभागैकभागोऽयं पीठ इष्यते १२७
पश्चिमं भागमुत्सृज्य देवकोष्ठं द्विभागिकम्
तस्मिन् निवेशयेत्सीमा स्यादस्याग्रेऽष्टभिर्धरैः १२८
ससीम्नो देवकोष्ठस्य भागिकालिन्दको बहिः
युक्तो धराणां विंशत्या वेदिकाजालवेष्टितः १२९
प्राग्ग्रीवकस्य तस्याग्रे स्तम्भद्वितयभूषितः
द्विच्छाद्यच्छादितः श्रीमान् सिंहकर्णैरलङ्कृतः १३०
प्रासादोऽयं भवो नाम विशालः कथ्यतेऽधुना
यदास्यैव सनिष्क्रान्ते सीमायामे च वर्धते १३१
वलभ्यौ पार्श्वयोः स्यातां विशालाख्यस्तदा भवेत्
विशालस्य यदा गर्भे भित्तिर्भवति दिक्त्रये १३२
द्वौ द्वौ गवाक्षकौ चापि साम्मुख्यः स भवेत्तदा
प्राग्ग्रीवास्त्रिदिशं तस्य गर्भकोष्ठायता यदा १३३
हित्वा वलभ्यौ प्राग्ग्रीवौ विधीयेते तथापरौ
कर्णेषु भागमेकैकं त्यक्त्वा स्यात्प्रभवस्तदा १३४
एतस्यैव मुखे स्यातां यदा प्राग्ग्रीवकावुभौ
पार्श्वयोरपरौ द्वौ द्वौ प्राग्ग्रीवौ भवतो यदा १३५
कर्णेषु भित्तयश्च स्युस्तदा स्याच्छिबिरागृहः
यदास्यैव मुखे शाला भागद्वितयविस्तृता १३६
आयामेन च षड्भागा प्राग्ग्रीवौ द्वौ तदग्रतः

द्वौ द्वौ गवाक्षकौ स्यातां तद्भित्त्योरुभयोरपि १३७
सीमायां द्वादश स्तम्भा मुखशालस्तदा भवेत्
अलिन्दो भागिकः कार्यो विशालस्यैव बाह्यतः १३८
प्राग्रीवभूमिषु वृतो भित्त्या च सगवाक्षकः
अग्रतः सहितः स्तम्भैः षड्भिश्च क्रियते यदा १३९
द्विशाल इति विख्यातः प्रासादो जायते तदा
यदास्यैव विधीयन्ते स्तम्भाः सर्वे समन्ततः १४०
प्राग्रीवकौ चोभयतो गृहराजस्तदा भवेत्
सर्वस्यैव यदालिन्दः स्यादन्यो भागविस्तृतः १४१
सीमान्तविस्तृते स्यातां वलभ्यौ भागनिस्सृते
भित्तिर्विधीयते शेषा गवाक्षैरुपशोभिता १४२
मुखे षड्दारुकं च स्यात्तदा स्यादमलाभिधः
एकादशायते क्षेत्रे तथा षड्भागविस्तृते १४३
मुक्त्वा भागद्वयं पश्चाद्देवकोष्ठं निवेशयेत्
भागं मुक्त्वाग्रतः कुर्यात्सीमां भागचतुष्टयम् १४४
अष्टस्तम्भास्ततोऽलिन्दविंशतिस्तम्भभागिकाः
भागिकः परितोऽलिन्दोऽष्टाविंशतिधरोऽपरः १४५
द्विद्विस्तम्भयुताः कार्याः प्राग्रीवाः कोष्ठजास्त्रयः
सीमासमे वलभ्यौ च प्राग्रीवौ मध्यतस्तयोः १४६
द्विद्विस्तम्भौ पुरश्चान्यौ वेदिकाजालशोभितौ
वेदिकाजालरूपाढ्यः सिंहकर्णोपशोभितः १४७
प्रासादोऽयं विभुर्नाम कथितो भर्तृनन्दनः

एवमेते समाख्याताश्चतुरश्रायता दश १४८
चतुरश्रायतांस्तिर्यगायत्याथापरानपि
प्रासादानभिधास्यामो नवसंस्थानलक्षणैः १४९
द्वौ भानौ विस्तृतिर्गर्भे द्विगुणा तिर्यगायतिः
मध्ये भागोच्छ्रितं द्वारं तदर्धेन तु विस्तृतम् १५०
स्तम्भश्चतुर्भिः संयुक्ता सीमा द्वारस्य चाग्रतः
द्विभागायामविस्तारा तावन्मात्रसमुच्छ्रितिः १५१
तां सीमां गर्भसहितां भागेनान्येन वेष्टयेत्
भित्तिस्तत्र विधातव्या सगवाक्षा चतुर्दिशम् १५२
षड्दारुकयुतो ह्येष प्रासादो भव उच्यते
अस्यैव भागनिष्कासा शाला मुखचतुष्टये १५३
यदा षड्दारुकोपेता विशालः स तदोच्यते
स्तम्भैर्मुखैमुखे षड्भिर्बहिः साम्मुख्य इत्यसौ १५४
अस्यैव स मा कर्णस्था द्विद्विस्तम्भयुता यदा
प्राग्रीवैर्भागनिष्क्रान्ता बहिस्था प्रभवस्तदा १५५
सीम्नोऽग्रतो यदास्यैव स्तम्भद्वययुतो भवेत्
प्राग्रीवो भागनिष्क्रान्तस्तदा स्याच्छिबिरागृहः १५६
विशालसन्निवेशस्य मुखे शाला भवेद्यदा
पार्श्वयोश्चोभयोः शाले प्राग्रीवाश्च त्रयो यदा १५७
निष्क्रान्तभाग एकैकः स्तम्भद्वितयसंयुतः
प्रासादः स तदा ज्ञेयो मुखशालोऽभिधानतः १५८
मुखशालाग्रशालाया यदा स्तम्भाश्चतुर्दश

प्राग्ग्रीवो द्विविधश्चाग्रे द्विशालः स तदा भवेत् १५९
भित्तिस्तदानीं प्रासादो गृहराजः प्रजायते
गर्भायामसमावग्रपृष्ठयोर्भागविस्तृतौ १६०
चतुश्चतुर्धरौ यत्र प्राग्ग्रीवौ द्वौ च पार्श्वयोः
तौ तु द्विद्विधरौ गर्भविस्तारेण तु सम्मितौ १६१
अमलो नाम स प्रोक्तः प्रासादः शुभलक्षणः
अस्यैव चाग्रे पृष्ठे च द्विद्विस्तम्भयुतौ यदा १६२
प्राग्ग्रीवौ स तदा प्रोक्तः प्रासादो दशमो विभुः
प्रासादान् कथयामोऽन्यान् दश वृत्तायतान् पुनः १६३
अष्टभागमुखायत्या विस्तृत्या चतुरश्रकम्
वृत्तायतं प्रकुर्वीत सबाह्याभ्यन्तरं ततः १६४
गर्भं पश्चिमभागेऽस्य चतुर्भागं समन्ततः
कुर्यात्तस्याग्रतः सीमां भागद्वितयविस्तृताम् १६५
भागत्रयमितां भागेनैकेनान्तरितां च ताम्
संयुक्तामष्टभिः स्तम्भैः सुदृढैश्चारुदर्शनैः १६६
अलिन्देन परिक्षिप्तां ससीमां देवकोष्ठकम्
षोडशस्तम्भयुक्तेन कुर्यात् प्राग्ग्रीवमग्रतः १६७
छन्नाश्छाद्यद्वयेनायमामोद इति कीर्तितः
वृत्तायतेषु प्रथमः प्रासादः स्वामिनो हितः १६८
समाहितौ यदास्यैव प्राग्ग्रीवौ भागमिश्रितौ
चतुःस्तम्भै रैतिकस्तु वृत्ताभ्यां तुङ्ग उच्यते १६९
यदा सीमावधिर्भित्तिर्गवाक्षैरुपशोभिता

वृत्तप्राग्रीव एकोऽन्ये तदा चारुरुदाहृतः १७०
सीमामध्ये विधातव्यौ प्राग्रीवौ भागविस्तृतौ
विस्तारसदृशायामौ दक्षिणेति त्रिषु त्रयः १७१
कार्याः प्राग्रीवकास्ते च गर्मकोष्ठेन सम्मिताः
भूतिरित्येष प्रोक्तः प्रासादः शुभलक्षणः १७२
मुखायता स्याच्चतुरो भागान्यत्तिर्यगायतान्
क्षेत्रवृत्तं ततः कुर्यात्तन्मध्ये गर्भवेश्म च १७३
चतुर्भागायतं तत् स्याद्भागद्वितयविस्तृतम्
अलिन्दो बाह्यतस्तस्य द्वादशस्तम्भसंयुतः १७४
भागद्वितयविस्तारः प्राग्रीवश्चांशनिर्गतः
निषेध इति विख्यातः प्रासादोऽयं पुरातनैः १७५
यदा निषेधः स्यादस्य पुरः प्राग्रीवको यदि
चतुर्द्वारपरिक्षिप्तोऽलिन्देनाष्टधरेण वा १७६
अयमेवांशकेन स्याद्यदालिन्देन वेष्टितः
मुखभागत्रयं मुक्त्वा भित्त्या च परिवेष्टितः १७७
यदा च कर्णप्राग्रीवौ प्राग्रीवश्चाग्रतो भवेत्
विशेषरचना या च द्वाविंशतिधरान्वितौ १७८
गवाक्षैः शोभनैर्युक्तस्तदा सिंहः प्रकीर्तितः
द्वादशांशायते क्षेत्रे तथा षड्भागविस्तृते १७९
पञ्चादंशद्वयं त्यक्त्वा द्विभागायामविस्तृतः
देवकोष्ठो विधातव्यस्तद्द्वारं भागमुच्छ्रितम् १८०
सीमाग्रे सान्तरा द्व्यंशविस्तृता चतुरायता

अष्टस्तम्भोऽस्य गर्भो वै षोडशस्तम्भको बहिः १८१
अलिन्दस्तस्य पुरतो वृत्तप्राग्रीवकोऽपि च
सीमाप्राग्रीवकालिन्दकोष्ठान् वृत्तान् प्रकल्पयेत् १८२
प्राग्रीवौ पार्श्वयोः सीमासमौ भागविनिर्गतौ
द्वाभ्यां द्वाभ्यां युतौ ज्ञेयौ स्तम्भाभ्यां वर्तुलाकृती १८३
एतत्सर्वं विधातव्यमलिन्देनाभिवेष्टितम्
चतुर्विंशधरोऽय च भागिकोस्य प्रशस्यते १८४
द्विस्तम्भयुक्तान् प्राग्रीवान् कुर्याद्गर्भस्य दिक्त्रये
एवमेष समाख्यातः प्रासादः सुप्रभः शुभः १८५
भागद्वितयविस्ताराः प्राग्रीवा येऽस्य कीर्त्तिताः
चतुरश्रास्त एव स्युर्द्विद्विस्तम्भयुता यदि १८६
शेषा भवति भित्तिश्च गवाक्षैरुपशोभिता
प्रासादोयं तदा ज्ञेयो दशमो लोचनोत्सवः १८७
अष्टाश्रानथ वक्ष्यामः प्रासादां ल्लक्षणैः सह
चतुर्भागान्विते क्षेत्रे तथाष्टश्रीकृते पुनः १८८
द्वौ भागौ गर्भकोष्ठः स्यादलिन्दो भागिकस्तदा
स्तम्भाष्टकमलिन्दे स्यात्प्राग्रीवस्तस्य चाग्रतः १८९
द्विच्छाद्यश्छादितः श्रीमान् प्रासादो वज्रको भवेत्
अस्यैवाग्रे यदा सीमा चतुरश्रा चतुर्धरा १९०
स्याच्चतुर्विंशतिस्तम्भश्चालिन्दो भागिकोऽपरः
नन्दनोऽयं समाख्यातः शङ्कुः प्राग्रीवकैस्त्रिभिः १९१
तस्य भित्तिर्विधातव्या क्षेत्रेऽष्टाश्रियुते बुधैः

वामनश्च पुनर्द्वौद्वौ गवाक्षौ दिक्त्रये मतौ १९२
अस्यैवाग्रे यदा सीमाभागाद्भागत्रयायता
द्विभागं विस्तृता द्वयंशसमुच्छेदाष्टभिर्धरैः १९३
अलिन्दावेष्टिता युक्ता प्राग्रीवैमखला तदा
भित्तिक्षेत्रे यदास्यैव प्राग्रीवाः परिवेष्टिताः १९४
अलिन्देन धरैः षड्भिः षड्भिर्युक्तास्तदा लयः
अष्टभागमिते क्षेत्रे कृतेऽष्टाश्रिणि सर्वतः १९५
भागद्वयमितं कुर्याद्देवकोष्ठं मनोरमम्
चतुर्भिः शोभितं द्वारैर्भागिका लिन्दवेष्टितम् १९६
अलिन्दस्य विधाटव्याः स्तम्भाश्चाष्टौ ततोऽपरः
स्याच्चतुर्विंशतिस्तम्भो भागिकोऽलिन्दकः पुनः १९७
तथाविधस्तृतीयोऽपि प्राग्रीवाश्च चतुर्दिशम्
प्रासादोऽयं महापद्मो ब्रह्मणः शङ्करस्य च १९८
द्वितीयोऽलिन्दकेऽस्यैव प्राग्रीवाः स्युश्चतुर्दिशम्
अलिन्देन परिक्षिप्तो हंस एष प्रकीर्तितः १९९
प्राग्रीवोऽस्य महापद्मस्यालिन्देनावृतो यदा
कर्णप्राग्रीवकौ द्वौ द्वौ व्योमसंज्ञस्तदा भवेत् २००
हंसस्यैव वलभ्यः स्युः प्राग्रीवाणां पदे यदा
चतुःस्तम्भाः परिक्षिप्ता अलिन्देन चतुर्दिशम् २०१
तदा चन्द्रोदयो नाम प्रासादो जायते शुभः
एवमेषां चतुष्षष्टिः प्रासादानामुदाहृता २०२
इति सुरभवनानां सप्रतिदारवाणा-

मिह सदनचतुष्केणान्वितेयं प्रदिष्टा ।
जनमयमवकोशानन्दशुभ्रांशुलेखा
भवति सुविदितैषा शिल्पिनां कामधेनुः २०३

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे रुचकादिचतुष्षष्टिप्रासादलक्षणं
नामैकोनपञ्चाशोऽध्यायः

अथ प्रासादशुभाशुभलक्षणं नाम पञ्चाशोऽध्यायः

प्रासादानामथ ब्रूमो लक्षणानि भवन्ति ये
प्रशस्ताश्चाप्रशस्ताश्च तस्मिन्नवनिमण्डले १
ये समाः समकर्णाश्च समस्तम्भाः समक्षणाः
नैवोच्चा नातिह्रस्वाश्च कर्णायामादविह्वलाः २
असंमूढा विभागेन प्रमाणेन सुसंस्थिताः
ऊर्ध्वाधः कर्णपादीभिरुपेताः सलिलान्तरैः ३
असङ्कीर्णोदयैश्छाद्यैः स्वमानपरिकल्पितैः
सुविभक्ताः सुसंस्थाश्च रम्यैरविकलैः कृताः ४
समभागविभक्तैश्च युक्ताश्चालिन्दकैः समैः
स्वजातिपरिवेषाद्या नान्यजातिप्रदूषिताः ५
असङ्कीर्णाः शरीरेण संस्थानेन सुसंस्थिताः
केवला जातिशुद्धाश्च प्रासादाः शुभदा नृणाम् ६
सुदृढैर्मूलपादैश्च दृढाश्चामूलमस्तकम्
नाधरोत्तरयुक्ताश्च सुश्लिष्टद्रव्यसन्धिभिः ७

देवजातिप्रसिद्धैश्च भूषणैः सुविभूषिताः
प्रासादाः शुभदा नित्यं पूजासंस्कारवर्धनाः ८
कर्ता कारयिता चैषां परां वृद्धिमवाप्नुयात्
अधमानपि वक्ष्यामः प्रासादानवलक्षणैः ९
विषमाः कर्णहीनाश्च क्लेशबन्धभयावहाः
स्तम्भैः क्षणैश्च विषमैः स्वामिनो मृत्युहेतवः १०
अत्युच्चैः स्याद्भयं राज्ञो ह्रस्वैः सेना च मथ्यते
कर्णायामेन विकलाः प्रासादाः स्युर्भयङ्कराः ११
विभागेन विहीनास्तु दारिद्र्यभयदाः स्मृताः
नष्टाभिः कर्णपादीभिरुद्वेगजनना नृणाम् १२
छाद्यैः सङ्कीर्णकैर्हीनैः कुलक्षयकराः स्मृताः
दुर्विभक्ताः कुसंस्थाश्च द्रव्यैर्विकलसंयुतैः १३
रोगं क्लेशं च मृत्युं च क्रमशो वितरन्ति ते
विषमैर्भागहीनैश्चाप्यलिन्दैर्व्याधितो भयम् १४
पराजयं परिवृतैरन्यजातिप्रदूषितैः
ये परावृतयो येऽन्यसङ्कीर्णा येऽन्यविग्रहाः १५
कर्तुः कारयितुर्नैते नन्दका वापि चात्मनः
दुर्बला मूलपादेन विश्लिष्टैः पीठसन्धिभिः १६
अल्पायुषस्ते प्रासादा भवन्ति च भयावहाः
अधरोत्तरगैः श्लिष्टैर्विज्ञेया व्याधिकारिणः १७
आदेशैर्भूषणैर्युक्ताः प्रासादा न सुखावहाः
ये कीर्त्तिमिच्छन्ति जयन्ति भूतान् कुर्युः शुभैर्लक्ष्मभिरन्वितांस्ते

प्रासादमुख्यानितरे तु वर्ज्यास्तेजोयशःश्रीविजयादिकामैः १८

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे प्रासादशुभाशुभलक्षणं नाम पञ्चाशोऽध्यायः

अथायतननिवेशो नामैकपञ्चाशोऽध्यायः

एवं नृपस्य प्रासादे कृते क्लृप्तऽथवा भुवि
तस्यानुशीविनः कुर्युः प्रासादान् परिधौ यदि १
तदा दिग्भागविन्यासस्थानमानान्यनुक्रमात्
तेषामिहाभिधीयन्ते सर्वेषां वृद्धिहेतवे २
दशाष्टौ षट्च धनुषां शतानि क्ष्माभृतां क्रमात्
मानमायतनस्योक्तं त्रेधा श्रेष्ठादिभेदतः ३
क्षेत्रमायतनस्यैवं चतुरश्रं समन्ततः
तत्र भक्ताः प्रकुर्वीरंस्त्रिधा स्वे स्वामिवत्सलाः ४
ये चास्य सम्मताः केचित्कुले जाता हितैषिणः
द्वादशांशेन हीनानि क्रमात् तान्यनुजन्मनाम् ५
तस्यैव वामतः कुर्यादुत्सेधाद्द्विगुणान्तरे
कुर्याद्दशांशहीनानि नैर्ऋत्यां दिशि भूपतेः ६
प्रासादान्नृपपत्नीनां सर्वासामपि शास्त्रवित्
अष्टभागेन हीनानि प्रतीच्यां दिशि कारयेत् ७
देवधिष्ण्यानि तन्त्रैः स्यात् स्वसुराणां विधानतः
सौम्यायां मारुतीं यावन्नवांशापचिताः क्रमात् ८
प्रासादा मन्त्रिसेनानीप्रतीहारपुरोधसाम्

एतेषां पूर्वभागस्थं राजमातुर्निवेशनम् ९
हीनमेकादशांशेन तत्कार्यं राजकारिता
ऐशीमाश्रित्य देवानां तुल्यमैन्द्रपदावधि १०
स्वसॄणां मातुलानां च कुमाराणां तथा क्रमात्
आग्नेय्यां द्विजमुख्यानां विधातव्यं निवेशनम् ११
कार्यः पुरोधःप्रासादः तुल्यतत्पुनरेव वा
याम्यायां कुर्युरष्टांशहीनान्युर्वीशमन्दिरात् १२
सामन्तकुञ्जरारोहभटपौरजनाः क्रमात्
एतान्यायतनान्येषां यथाभागं प्रकल्पयेत् १३
मर्मवेधप्रदेशस्थान् द्वारवेधगतानपि
स्वस्थानान्तरितांश्चैतान् न कुर्याद्धितकाम्यया १४
अलिन्दैर्गर्भकोष्ठैश्च सीमास्तम्भगवाक्षकैः
द्वारद्रव्यतलोच्छ्रायैः प्राग्ग्रीवैः सिंहकर्णकैः १५
न कुर्याद्भूषणैस्तुल्यं समं वास्थंदरूपतः
समरूपं भवेद्धर्म्यं निर्युक्तं च न नन्दति १६
राजपीडा भवेत्तस्मिन्नाधिक्ये च कुलक्षयः
प्रासादाद्भूमिपालस्य निवेशं परिधौ स्थितम् १७
द्रव्येण कतरेणापि नोत्कृष्टं कारयेद्बुधः
संस्थानान्मानतश्चापि विस्तारेणोच्छ्रयेण वा १८
पूर्वोक्तेभ्यो विभागेभ्यः किञ्चिद्धीनतमः शुभः
अन्योन्यं द्विगुणच्छाद्यैरेकैकस्यान्तरं शुभम् १९
सुभोग्यं तं च कुर्वीत बहुभिर्भवनान्तरैः

कोष्ठिकाभोजनागारैर्भाण्डोपस्करधामभिः २०
शिलालूषात शालाभिः शेषं तु परिपूरयेत्
प्रशस्तान् कारयेत्सर्वाञ्शुभरूपान् मनोरमान् २१
प्रायशः स्वालयांश्चान्यान् सर्वस्यान्यगृहाणि च
नरेन्द्रायतनस्यैव निवेशात्परिकल्पयेत् २२
अन्यथात्वे महादोषा वैपरीत्ये कुलक्षयः
इति कथितदिगादिभेदयोगैः
सुरभवनानि भवन्ति यस्य राज्ञः ।
अविरतमुदितोदितप्रतापः
स्वभुजजितां स चिरं प्रशास्ति पृथ्वीम् २३
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे आयतननिवेशो नामैकपञ्चाशोऽध्यायः

अथ प्रासादजातिर्नाम द्विपञ्चाशोऽध्यायः

अवतारो निवेशानां विधानं वास्तुनो यतः
कात्स्न्र्येन तमतो ब्रूमः सभ्यस्य प्रसवोत्तमः १
कुलजातिक्रमाणां च क्रमं दीर्घाल्पजीविनाम्
संस्थानमभिधास्यामो लक्ष्यलक्षणमेव च २
शुभाशुभानां वैराजमादिं तेषां प्रचक्षते
पूर्वोक्तस्य विमानस्य तस्यातो लक्ष्म कथ्यते ३
वैराजस्य यथाकारव्यवस्थानमशेषतः
चतुरश्रं समं क्षेत्रमशीत्यंशैर्विभाजयेत् ४

संयुक्तमष्टभिर्भागैः कुर्याद्गर्भगृहं शुभम्
द्विपञ्चाशद्भिरैः सीमा गर्भकोष्ठसमन्विताः ५
द्वात्रिंशता देवकोष्ठैः सर्वैरेकान्तरैश्च तैः
बाह्यस्थाने ततः स्थानाद् द्वादशद्भोभणैर्धरैः ६
हेमरत्नमयैः स्तम्भैः शुक्लपट्टैश्च भूषितैः
शुक्लालङ्कारखचितैर्वितानैश्च विभूषणैः ७
स्फाटिकैर्विविधैर्जालैः सहरिन्मणिवेदिकैः
हंसकर्णकपोतालीतिर्यक्स्थाल्यर्धकर्णिकैः ८
पर्यन्तदेशधृतया गर्भस्योपरि घरटया
लोकनाथेन तत्सृष्टमाद्यं वैराजसंज्ञितम् ९
तस्मात्स्वस्तिकसंज्ञः प्राग्गृहच्छन्दो विजायते
चतुश्शालस्त्रिशालश्च हिरण्यौकस्त्वतोऽपि च १०
सिद्धार्थको द्विशालः स्यादेकशालस्तु कुम्भकः
सृष्टमन्यद्विमानं च वरं वीरं चतुर्मुखम् ११
गणानां देवतानां च स्कन्दस्य च यथाक्रमम्
प्रासादा द्वादशैतेऽन्ये जज्ञिरे शुभलक्षणाः १२
स्वस्तिकः श्रीतरुश्चैव तृतीयः क्षितिभूषणः
भूजयो विजयो भद्रः श्रीकूटोष्णीषसंज्ञितौ १३
नन्द्यावर्तो विमानश्च सर्वतो भद्र एव च
विमुक्तकोणप्रासाद इति वैराजसंभवाः १४
एकैकस्मात्क्रमेणैवमेकैकः समजायत
स्वस्तिकाद् रुचको ज्ञेयः श्रीतरोः हिपञ्जरः १५

द्दमाभूषणात्तशाला स्याद्भूजयाद्गूयूथपः
विजयादवतंसश्च भद्रान्नन्दी विनिर्गतः १६
श्रीकूटाच्चित्रकूटाख्य उष्णीषात्प्रमदाप्रियः
व्यामिश्रो नन्दिकावर्ताद्विमानाद्धस्तिजावकः १७
कुबेरः सर्वतोभद्रान्मुक्तकोणाद्धराधरः
एतेभ्योऽपि च संभूताः कनीयांसोऽभिधानतः १८
तद्भेदास्ते तदाकारैर्लद्दयाः स्वैः स्वैः पृथग्विधैः
भागैस्तेषूत्तमैः पूर्वान् मध्यमान्मध्यमैस्तथा १९
कनीयसः कनीयोभिः प्रासादानुपकल्पयेत्
शिखरैरपरैः श्लिष्टाः प्रासादा जज्ञिरे ततः २०
प्रथमो रुचकस्तेषु द्वितीयो वर्धमानकाः
स्रवतंसस्तृतीयस्तु चतुर्थो भद्र उच्यते २१
पञ्चमः सर्वतोभद्रः षष्ठः स्यान्मुक्तकोणकः
मेरुर्मन्दर इत्यष्टौ विज्ञेयाः शिखरोत्तमाः २२
चतुरश्राः समाख्याता देवानामालयाः शुभाः
एते ते वंशजाः सर्वे निवेश्या ब्रह्मजातयः २३
वैराजकुलसंभूताः प्रासादाः परमोत्तमाः
एतेभ्योऽन्येऽपि संभूताः पुत्रपौत्रप्रपौत्रयः २४
स्ववंशाः सुपरीवाराः परवंशविवर्जिताः
कर्तव्या भूतिकामेन तेजसा शुभलद्दणाः २५
नन्दका वर्धनाश्चैव सर्वकामफलप्रदाः
हृष्टपुष्टजनाकीर्णाः पूजासंस्कारवर्धनाः २६

यदि हीना भवन्त्येते परवंशेन दूषिताः
तदुद्वेगं नृणां नित्यमर्थनाशं कुलक्षयम् २७
पीडां च स्वामिनः कुर्युर्यदन्यदपि गर्हितम्
तस्मादेते विधातव्या दूषिता नान्यजातिभिः २८
इति वैराजजातानामुत्पत्तिः प्रकीर्तिता
वैराजजन्मसुरसद्मपरम्परेय-
मुक्तैवमत्र शुभलक्ष्मवती समासात्
आनन्दकीर्त्तिधनधान्यकरी कृता स्या-
दन्यादृशी पुनरनर्थफलैव कर्तुः २९

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे प्रासादजातिर्नाम द्विपञ्चाशोऽध्यायः

अथ जघन्यवास्तुद्वारं नाम त्रिपञ्चाशोऽध्यायः

ब्रूमो जघन्यवास्तूनां द्वारमानमतः परम्
विस्तारं सतलोच्छ्रायं द्रव्यव्यासविधिं तथा १
कथिता ये निराधाराः प्रासादास्तिर्यगायताः
तेषां भागचतुष्केण गर्भवासं विभाजयेत् २
द्वारं सार्धेन भागेन कुर्वीत स्वार्धविस्तृतम्
द्वारविस्तारपादेन पेद्याया विस्तृतिर्भवेत् ३
विस्तारार्धेन पिण्डः स्यात्तत्समः स्यादुदुम्बरः
सार्धमूलादुम्बरकः शाखा व्यासवशाद्भवेत् ४
चतुर्विधश्च कर्तव्यः पेद्यापिण्डः प्रमाणतः

शाखा तु पेद्यापिण्डश्च विस्तारेण विधीयते ५
शाखाविस्तारतो रूपशाखा स्यात्सार्धविस्तृतिः
अर्धेन पेद्यापिण्डस्य खल्वशाखा विधीयते ६
रूपशाखासमाः कार्या विस्तारात्तुङ्गशाखिकाः
तुङ्गाया बाह्यतः शाखाः क्रियन्ते यास्तु काश्चन ७
अष्टांशाभ्यधिकाः सर्वाः कर्तव्या विस्तरेण ताः
द्वारस्यायामविस्तारयोगात् सङ्ख्या भवेत्तु या ८
तलोदयस्य तन्मानं गर्भमण्डपयोः समम्
यदि भिन्नतलं कर्तुं मण्डपः कश्चि हीयते ९
द्वारोच्छ्रिते तदुणानां मण्डपे स्यात्तलोच्छ्रितिः
प्रासादेषु कनीयस्सु तलमानमुदाहृतम् १०
षड्भागाभ्यधिकं ज्येष्ठे मध्येऽष्टांशाधिकं ततः
बलविधिः समपदः प्रासादस्य विधीयते ११
नाधस्तात् स प्रयोक्तव्यो नोर्ध्वतश्चाप्युदुम्बरात्
कुम्भिकाभरणपट्टजयन्तीशीर्षकायफलकेषु तुला
उक्तमिह यत्प्रथमं तन्नाधिकं प्रविदधीत न हीनम् १२

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे जघन्यवास्तुद्वारं नाम त्रिपञ्चाशोऽध्यायः

अथ प्रासादद्वारमानादि नाम चतुष्पञ्चाशोऽध्यायः

इदानीमभिधास्यामः प्रासादानां यथाक्रमम्
द्रव्येषूदयविस्तारं बाहल्यं परिधिं तथा १

प्रासादभागिकोत्सेधं प्रासादद्वारमिष्यते
सत्र्यं शोच्छ्रितं वापि साधांशोच्छ्रयमेव वा २
स्वीयस्वीयोदयादर्धविस्तारं च तदिष्यते
विस्तृतिर्भागतुर्यांशात् पेद्यायाः स्थौल्यमर्धतः ३
पेद्याबाहल्यविस्तीर्णा शाखा भवति मानतः
उत्तराङ्गानि कुर्वीत पेद्याशाखासमानि तु ४
सपादपेद्याविस्तारा रूपशाखा विधीयते
रूपशाखान्वितः कार्यः पीठबन्धस्तथोपरि ५
वृत्तं कार्यमधोवृत्ते पत्रकैश्च निरन्तरम्
स्तम्भाच्च द्विगुणव्यासं भरणं भूषणान्वितम् ६
रूपशाखासमं तच्च कर्तव्यमतिसुन्दरम्
ऊर्ध्वे समन्ताच्चाष्टांशमात्रे तच्चतुरश्रकम् ७
तदूर्ध्वं भरणोच्छ्रायः स्यात्पादोनसमुच्छ्रितिः
कपोतश्चाप्यधश्शीर्षगर्भः स च विधीयते ८
सरथालयपत्रो वा स्वोदयार्धविनिर्गमः
तस्योपरिष्टात्कर्तव्यं स्यादुच्छालयपत्रकम् ९
रथिका विधातव्या द्वयोरप्युच्छ्रितिस्तयोः
सार्धप्रमाणभरणाद्भूषा स्यात्पुष्पकादिभिः १०
रूपकैर्वा यथाशोभं स्तभिकाभिश्च सर्वतः
करटकोयत्रिभागोन कूटाकारं भवेदतः ११
विभूषितं सिंहचक्रैर्हस्तितुरगैरथापि वा
कपोतादि विधातव्यमन्तरे रूपशाखयोः १२

कार्यं विषमसंख्यं च सर्वमेतद्विचक्षणैः
तस्माद्बहिर्विधातव्या सर्वतः परिमण्डली १३
अन्त्यशाखासमा सा च प्रमाणेन विधीयते
तस्यां सअद्वारशाखायां यशः पद्मपत्रिकाः १४
कार्यात्रा वाचशाखायास्तद्विस्तारसमुच्छ्रिताः
भवेदधस्तादर्धेन ग्रीवाया रसना तथा १५
ग्रीवया सार्धया तुल्यमन्तरं पत्रकारयधः
भागद्वयं प्रकुर्वीत जङ्घा त्र्यंशा ततोऽप्यधः १६
पेद्यापिण्डप्रमाणेन खल्वशाखा विधीयते
पेद्यापिण्डसमो बाह्यशाखान्यासः प्रकीर्तितः १७
क्रमेणानेन कर्तव्याः शाखाः स्वल्पा यदृच्छया
न नवभ्यः परं कार्या द्वारशाखाः कथञ्चन १८
निर्गमो वा प्रवेशो वा विस्तारेण समन्वितः
पेद्याया यदि वार्धेन शाखानां स विधीयते १९
सार्धपेद्यापिण्डसमः पिण्डस्योदुम्बरो भवेत्
तलन्यासस्तदर्धेन भूमिरङ्घ्रा च तत्समाः २०
उदुम्बरकपिण्डस्य मानात्सिंहमुखानि च
उदुम्बरात्पादहीनस्तुल्यो वाभ्यधिकोऽथवा २१
पट्टस्य पिण्डस्त्रिविधो विस्तारात्स्तम्भतोऽधिकः
भागपादसमस्तम्भो द्वादशांशं प्रपीडितः २२
भागद्वये च कर्तव्यो रूपलक्षणसंयुतः
चतुष्षष्टिप्रकारोऽयं नानारूपप्रपञ्चतः २३

स्तम्भविस्तारविस्तीर्णं पिण्डे तत्पादवर्जितम्
विस्तारात्त्रिगुणं दैर्घ्याद्धीरग्रहणमिष्यते २४
प्रविष्टौ स्तम्भमाने स्तः कुम्भिकोत्कालकौ सदा
तलपट्टसमं पट्टमुत्तरं परिकल्पयेत् २५
तीरं तस्य त्रिभागेन समुत्सेधाद्विधीयते
किञ्चिद्विनिर्गतं पट्टाद्यथाशोभं प्रकल्पयेत् २६
अत ऊर्ध्वं यथाशोभं करठकेनासनेन च
रथकैश्चित्ररूपैश्च कूटागारैः सतोरणैः २७
अलिन्दे मण्डपे वापि चतुष्के वलभीषु वा
वितानानि विचित्राणि समुत्क्षिप्ततलानि च २८
लक्षणेन च युक्तानि विदधीत यथोचितम्
लुमाः फलकवर्तीभिः कृताः समभिदध्महे २९
उत्क्षिप्तानां च ये भेदा जायन्ते सर्ववास्तुषु
तुम्बिनी लम्बिनी हेला शान्ता कोला मनोरमा ३०
आध्माता चेति सप्तैता नामतः कथिता लुमाः
चतुरश्रीकृते क्षेत्रे कान्ते भूमितले शुभे ३१
सूत्रं क्षेत्रसमं कृत्वा कर्णात्कर्णं विभाजयेत्
विन्यस्येद्गर्भसूत्राणि तयोर्मध्यगतानि च ३२
भूयश्चान्यानि मध्येषु सूत्राणि विनिवेशयेत्
मध्ये वृत्तं समालिख्य तुम्बिका कमलोपमा ३३
कार्या भागीकृतं तत्र वृत्तं क्षेत्रे प्रवर्तयेत्
सूत्रे सूत्रे तु पिण्डस्थां लुमां सूत्रेण वालिखेत् ३४

लुमान्तरेषु सर्वेषु वैकटयेन घुषीकृतम्
तयोरन्तरयोर्मध्ये लुमामूले विकर्करम् ३५
द्विगुणं त्रिगुणं वा स्यात्ततश्च वलिनीं लिखेत्
व्यासार्धेनोदयश्चेह कर्तव्यस्तत्र मण्डले ३६
सम्पातात्तलसूत्राणां तुम्बिका च्चोर्ध्वसूत्रिता
उदयस्तलसूत्रस्य तुम्बिकायास्तथान्तरम् ३७
पूर्वसूत्रे लुमाग्रेषु कण्टकान् कल्पयेद् ऋजून्
बहिस्थानेषु चान्तेषु लक्षं कुर्यात्सुनिश्चितम् ३८
लक्षं गृहीत्वाधःसूत्र ऊर्ध्वसूत्राणि लक्षयेत्
उदये कण्टकस्यान्ते तद्वदेवानुसन्ततम् ३९
दापयेदुत्तरं सूत्रं लुमानां खल्वकानि च
पिण्डव्यासं वलीनां चाप्येषु क्षोभणविस्तृती ४०
लुमा कर्णगता या स्यादाध्माता सा प्रकीर्तिता
छेदे प्रवर्तितान्या स्यात्किञ्चिदूना मनोरमा ४१
कोला तृतीया शान्तेति चतुर्थी परिकीर्तिता
हेलाख्या पञ्चमी षष्ठी लम्बिनी नामतो लुमा ४२
सप्तमी तुम्बिनीत्येता मागसूत्रविनिर्गताः
एताभिः कारयेत्कोलं वितानं नयनोत्सवम् ४३
कोलाविलं हस्तितालु चाष्टपत्रं शरावकम्
नागवीथीवितानं च पुष्पकं भ्रमरावली ४४
हंसपक्षं करालं च विकटं शङ्खकुट्टिमम्
शङ्खनाभिः सपुष्पं च शुक्तिवृत्तकमेव च ४५

मन्दारं कुमुदं पद्मं विकासं गरुडप्रभम्
पुरोहतं पुरारोहं विद्युन्मन्दारकं तथा ४६
एतान्येवं वितानानि सङ्ख्यया पञ्चविंशतिः
एतेषां रूपनिर्माणमधुना संप्रचक्ष्महे ४७
समन्ताच्चतुरश्रे च चतुरश्रायतेऽथवा
क्षेत्रे वृत्तीकृते नाभ्यैकया तत्कोलमुच्यते ४८
चतुरश्रे यदा क्षेत्रे कर्णस्थानेषु कृत्स्नशः
चतुरश्रनिबन्धेन चतुरश्रनिबन्धने ४९
वलिनी विकटाकारा पूर्वं वृत्तान्यधस्तथा
भ्रमवृत्तं च यन्मध्ये परं तत्रापरा लुमाः ५०
क्रियन्ते तुम्बिकाः पञ्च यत्र सुस्थाः सुसंवृताः
मार्ग्र स्तलेऽधःसूत्रस्य तद्भवेन्नयनोत्सवम् ५१
कोलाविलं समे क्षेत्र भागाष्टकविभाजिते
मध्ये द्विभागे विलिखेद्वृत्तं तुम्बिकयान्विते ५२
तत्र भ्रमान्ते च सूत्रे भ्रमान् षोडश कारयेत्
ऋजूनि यानि सूत्राणि लुमास्ताः परिकल्पयेत् ५३
यानि शेषाणि सूत्राणि वलिनीस्ताः प्रकल्पयेत्
तुम्बिन्यां कारयेद्वृत्तं गजतालुकमुच्यते ५४
अष्टपत्रे चतुष्षष्टिभागं क्षेत्रं प्रकल्पयेत्
लुमास्थानेषु पत्राणि खण्डितान्यन्तरैस्तथा ५५
सम्पाटेषु समस्तेषु तुम्बिकाः सन्निवेशयेत्
वृत्ताकारं शरावं स्याद्विन्यासं च धरैश्च तत् ५६

चतुरश्रेऽथवा वृत्ते भागत्रयविभाजिते
निवेशयेन्नागबन्धं सम्पाते वलिसूत्रयोः ५७
वितानमेतत्कथितं यश्चिकीर्षति मानवः
ऊर्ध्वतिर्यग्गतैर्नालैः क्रियते यन्निरन्तरम् ५८
पुष्पमालाकुलं श्रीमत्पुष्पकं तदुदाहृतम्
अशोकपल्लवाकीर्णलुमाभ्रमनिबन्धनम् ५९
चतुरश्रक्रियायुक्तं सा प्रोक्ता भ्रमरावली
आध्माता कर्णमायाता तुम्बिकास्थानसंश्रया ६०
तुम्बिनी यत्र मध्ये तु हंसपद्मं तदुच्यते
अस्यैव पद्मे तु यदा सम्बध्येत मनोरमा ६१
तुम्बिनी च विपद्मेषु करालं तदुदाहृतम्
कोला लुमा स्याद्विकटे शङ्खे शान्ता प्रकीर्तिता ६२
शङ्खनाभिसमं सूत्रं तुम्बिकायाः प्रवर्तते
सर्वेष्वपि लुमास्थानेष्वेकरेखान्वितं भवेत् ६३
शङ्खनाभिरिति प्रोक्तं वितानमिदमुत्तमम्
एतस्यैव लुमास्थाने तुम्बिका पद्मकावृता ६४
वलयैर्भूषिता यत्स्यात्सपुष्पमिति तद्विदुः
क्षेत्रे वृत्तायताकारे कारयेच्छुक्तिसंज्ञकम् ६५
वृत्ताकारे भवेत्क्षेत्रे वृत्तं वलयकर्मणा
चतुरश्रे समे क्षेत्रे यल्लुमार्धलुमर्धते ६६
वृत्तक्षोभणभङ्गानि तन्मन्दारकमुच्यते
कुमुदं कुमुदस्येव लुमाक्षेपादिहार्धतः ६७

पद्मके स्यादधःक्षिप्ता विकासे मध्यमा लुमा
गरुडे गरुडो मध्ये नागाभरणशोभितः ६८
पुरोगतं तद्यदधो गत्वा स्यादूर्ध्वगं पुनः
अधो गत्वा पुरारोहमूर्ध्वमूर्ध्वं ततोप्यधः ६९
विचित्रक्षोभणाकीर्णमन्ते वृत्तं मुहुर्मुहुः
अष्टभिश्चाश्रिभिर्मध्ये विद्युन्मन्दारकं भवेत् ७०
मानोन्मानमथ ब्रूमः प्रासादच्छाद्यसंश्रयम्
अर्धेनच्छाद्यविस्तारस्योर्ध्वे वंशं प्रकल्पयेत् ७१
अयमर्धोदयः प्रोक्त आवन्त्यो नामतः परः
त्र्यंशेनच्छाद्यविस्तारस्योदयो वामनो भवेत् ७२
वामनावन्त्ययोर्मध्ये नवधा प्रविभाजयेत्
भागोत्तरोदयात्तेऽष्टौ वामनादुदयाः स्मृताः ७३
वातपत्रोऽथ कौबेरः शमनाख्यस्तथावली
हंसपृष्ठो महाभोगी नारदः शम्बुकस्तथा ७४
वामनः प्रथमस्तेषामावन्त्योते दशेत्यमी
छाद्यानामथ वृत्तानामुदयः प्रोच्यतेऽधुना ७५
तलसूत्रसमं कृत्वा कुर्याद्द्वादशधोदयम्
षष्ठादारभ्य भागात्स्युः सप्त भागोत्तरोदयाः ७६
कुबेरशेखरी चन्द्री नागश्चातु गणाधिपः
मुख्यश्चाच्छः सुभद्रश्च वृत्ते सप्तोदयाः स्मृताः ७७
कृत्वा त्रिकर्करपदं लुमापृष्ठं लिखेत्ततः
भागार्धमधिकं क्षेत्रे भवेच्छाद्यकवर्तना ७८

भागार्धवर्धिते क्षेत्रे तलसूत्रक्रमान्विते
लुमामाद्यां लिखेद्भूयः षट्क्रमेणातुसन्ततम् ७९
रिक्षा यथाद्विहस्ताय लुमायाः स्यादनन्तरम्
लुमा त्रिभागहीनेन परिवृद्धाङ्गुलेन सा ८०
तस्याश्चानन्तरा लक्ष्म्या साधं वृद्धाङ्गुलत्रयम्
त्र्यंशोनैः षड्भिरपरा त्र्यंशोनैर्दशभिः परा ८१
चतुर्दशभिरन्या स्यात्सार्धैर्वृद्धा ततोऽङ्गुलैः
विंशत्यङ्गुलवृद्धा तु सप्तमी कोणसंश्रिता ८२
क्रमेणानेन मानानि लुमानां वृद्धिह्रासयोः
अनुपातेन कार्याणि च्छाद्यक्षेत्रानुसारतः ८३
कुबेरवल्लरीचन्द्रीपन्नगा गणनायकः
मुग्धा सुभद्रेत्येताः स्युर्लुमाकर्मार्धमादितः ८४
एतासां गणिडकाछेदाश्चत्वारः परिकीर्तिताः
ऊर्ध्वस्तिर्यग्गतिस्त्र्यंशस्तथार्धत्र्यंश एव च ८५
छाद्यकोदयविस्तारं तन्निर्गमसमायति
कृत्वा षोढा भजेत्क्षेत्रं विस्तारायामतः समम् ८६
तत्रोर्ध्वद्रव्यमानेनच्छिन्द्यात्प्रागेव गणिडकाम्
तस्यां छेदानुसारेण दापयेदेव लम्बकम् ८७
अधस्ताद्गणिडकायाश्च करटकानि प्रकल्पयेत्
अवपातोच्छ्रयौ ज्ञात्वा त्रीणि स्थानानि चिह्नयेत् ८८
गर्भे तथोर्ध्वे प्रान्ते च तृतीयं मध्यतस्तयोः
यत्र स्थाने स्थितं सूत्रं स्पृशति स्थानकत्रये ८९

तस्मात्प्रसार्य तत्सूत्रं भ्रमयेत्कर्कटं ततः
लुमार्धस्यैवमुपरि संस्थानमुपजायते ९०
उपरि स्थितेन सूत्रेण तत्तुल्येनैव कर्कटम्
प्रान्तावलम्बकस्थाने भ्रमयेत्खल्वसिद्धये ९१
प्रागग्रे भागयुगलावच्छिन्नं फलके पुनः
कल्पयेत्सममेवैषा लुमापार्ष्णिर्निगद्यते ९२
शेषां लुमां तु दीर्घांशैश्चतुर्भिः प्रविभाजयेत्
चतुर्धातः परं तस्याः कर्तव्यं वृत्तवर्तनम् ९३
अर्धोदये लुमोच्छ्रायो विस्तारांशद्वयोन्मितः
मूलेऽग्रतश्च भागार्धमुदयोऽस्या विधीयते ९४
अधःक्षेत्रे स विस्तारात्सूत्रमालम्ब्य तद्यथा
विस्तारात्सदृशे क्षेत्रे सार्धतद्भागमाश्रितः ९५
लुमाग्रभागत्र्यंशं च तयोर्मध्यं च यत्स्थितम्
सूत्रं स्पृशेत्तत्र धृत्वा कर्कटं भ्रमयेद्बुधः ९६
भागभागोत्तरक्षेत्रापेक्षया चतसृष्वपि
गण्डिकासु विधातव्यं विधिवद्वृत्तवर्तनम् ९७
मूलाल्लुमायाः क्षेत्रस्य पञ्चमांशत्रयेऽथवा
पृथुत्वार्धे लुमापृष्ठलेखावृत्तद्वयं यथा ९८
संपतत्येवमालिख्य शेषं पूर्ववदाचरेत्
लुमाया मूलतः क्षेत्रसप्तमांशचतुष्टये ९९
पृथुत्वार्धे लुमापृष्ठलेखावृत्तद्वयं यथा
संपतत्येवमालिख्य षड्भागैः शेषमाचरेत् १००

नवांशपञ्चके यद्वा क्षेत्रस्यैव लुमादितः
पृथुत्वार्धे लुमापृष्ठद्वयलेखां निवेशयेत् १०१
शेषैः षड्भिस्ततो भागैरन्यत्तु प्राग्वदाचरेत्
भागार्धं निर्गमः कार्यः प्रासादानां कनीयसाम् १०२
छाद्यकस्यैव भागैस्तु ज्यायसां निर्गमो यतः
तदन्तरे ये प्रासादास्तेषां क्षेत्रानुसारतः १०३
छाद्यस्य निर्गमः कार्यो विद्वद्भिरनुपाततः
निर्गमस्य त्रिभागेन कनीयाञ्छाद्यकोदयः १०४
अर्धभागेन परमो भाज्यं षड्भिस्तदन्तरम्
अन्ये भागोत्तराः पञ्च सप्तैव मुदया मताः १०५
इदानीमभिधास्यामः सिंहकर्णस्य लक्षणम्
छाद्योदयोदयः स स्याद्दशभिस्तं विभाजयेत् १०६
तैः स्यात् षोडशभिर्भागैस्तस्यैव तलविस्तृतिः
ऊर्ध्वतश्चतुरो भागांस्त्यक्त्वा शङ्कुं निवेशयेत् १०७
चतुरश्रीकृते क्षेत्रे कर्णेनारभ्य शङ्कुतः
ततो वृत्तं लिखेत्पश्चाच्छङ्कुं समधिरोपयेत् १०८
ऊर्ध्वदेशात्तु भागेन स स्याद्भागचतुष्टये
लिखेद्वृत्तं त्रिभागोनद्वयंशकर्कटकोद्भवम् १०९
तस्योपरिष्टात्तदनु ग्रीवा कार्यैकभागिनी
गर्भे शृङ्गाग्रयोर्मध्ये तिर्यग्भागद्वयं भवेत् ११०
मध्ये कर्णाग्रयोस्तिर्यक्कार्यं भागत्रयं बुधैः
ग्रीवाया उपरिष्टाच्च भागमेकं शिखा भवेत् १११

शिखाग्रमुपरिष्टाच्च कर्तव्यं गर्भसङ्गतम्
शिखाग्रमूर्ध्वतस्तद्वदर्धभागावलम्बितम् ११२
भागावलम्बि कर्णाग्रं स्कन्धाग्रं तावदेव तु
स्यात्कर्णखण्डयोर्मूलं स्कन्धदेशस्य सङ्गतम् ११३
स्वस्तिको द्व्यंशविस्तारायामः प्राग्वृत्तमध्यतः
एवं शङ्कुमधःसूत्रादूर्ध्वं भागो निवेशयेत् ११४
भागे निवेशितं कुर्यात्पूर्ववृत्ताद्यशेषतः
स्वस्तिकान्तं च पूर्वोक्तं पूर्ववत्सर्वमाचरेत् ११५
तलसूत्रादुपर्यंशैश्चतुर्भिर्गर्भतः समः
द्वाभ्यां द्वाभ्यामुभयतो भागाभ्यां तिर्यगेव च ११६
भागेन तद्वदेवाधःसूत्रादुपरि गर्भतः
चतुर्भिश्च चतुर्भिश्च भागैरुभयतः समम् ११७
वृत्ताधार्धानि लिखेदेककर्णयुक्तानि पूर्ववत्
एकशृङ्गाणि च ग्रीवास्वस्तिकार्धयुतानि च ११८
तलसूत्रबहिर्देशाद्बाह्यवृत्तसमुद्भवः
पदत्रयप्रविष्टः स्यात्पार्ष्णिरत्र परिस्फुटः ११९
त्रिवलीललितो नाम सिंहकर्णोऽयमीरितः
दशभागीकृते प्राग्वदुदये तत्प्रमाणतः १२०
चतुर्दशांशविस्तीर्णे कर्णे सार्धे वलिर्भवेत्
दशभागोच्छ्रिते प्राग्वत्स्यात्त्रयोदशविस्तृतः १२१
क्षेत्र एकवलिर्नाम सिंहकर्णस्तथापरः
एते शोभान्विताः कार्यास्त्र्यश्रसंवरणास्त्रयः १२२

प्रासादानामिति निगदितं द्वारमानं निवेशः
स्तम्भानां च स्फुटमिह वितानानि तेषां लुमाश्च
वृत्तच्छाद्योच्छ्रितिरभिहिता छाद्यसंस्था लुमाश्च
प्रोक्ताः सप्त प्रथितमपरं सिंहकर्णप्रमाणम् १२३

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
प्रासादद्वारस्तम्भनिवेशवितानलुमालक्षणवृत्तच्छाद्यलुमा-
सिंहंकर्णप्रमाणं नाम चतुष्पञ्चाशोऽध्यायः

अथ मेर्वादिषोडशप्रासादादिलक्षणं नाम पञ्चपञ्चाशोऽध्यायः

प्रामादानामतो लक्ष्म षोडशानां विशेषतः
ज्येष्ठमध्यकनिष्ठानां यथावदभिदध्महे १
विभज्यते यथा येन प्रागश्नोर्ध्वं विधीयते
यावद्यस्य प्रमाणं तु तथा तत्तस्य कथ्यते २
मेरुः प्रासादराजश्च कैलासश्च हरप्रियः
सर्वतोभद्रकश्चैव विमानच्छदनन्दनौ ३
स्वस्तिको मुक्तकोणश्च श्रीवत्सो हंससंज्ञितः
रुचक्रो वर्धमानश्च गरुडश्च गजस्तथा ४
मृगराजश्च पद्मश्च वलभी चेति ते स्मृताः
न त्रयस्त्रिंशतोऽधस्तान्नापि पञ्चाशतः परा ५
सङ्ख्या भवति हस्तानां मेरोरिति पुराविदः
विभज्य दशधा क्षेत्रं शृङ्गं कुर्याद् द्विभागिकम् ६

कृत्वा षड्भागिकं मध्यं निर्गमस्तत्र दीयते
भागस्य षोडशांशेन विधेयं सलिलान्तरम् ७
पदैः षोडशभिर्गर्भे विधेया चास्य विस्तृतिः
प्रासादभित्ति पदिका पदविस्तृतमन्तरम् ८
पदिका बाह्यभित्तिः स्यादित्येष स तदा स्मृतः
द्विपदो वेदिकाबन्धो जङ्घा पञ्चपदोदया ९
पदार्धेन पदार्धेन मेखलान्तरपत्रके
शृङ्गोच्छ्रितिस्त्रिभिर्भागैर्नवभिः शिखरोच्छ्रितिः १०
शिखरस्यास्य कर्तव्यास्तज्ज्ञैः षोडश भूमिकाः
स्कन्धोंऽशैर्विस्तृतः षड्भिरंशेनोच्छ्रितमण्डकम् ११
ग्रीवा वंशोच्छ्रिता कार्या शिखरस्यादिविस्तृतौ
षड्गुणेनैव सूत्रेण वेणुकोशं समालिखेत् १२
विस्तृतेरपि भद्रायाः कुर्यादिद्वगुणमुच्छ्रयम्
कुम्भं भागेन कुर्वीत प्रासादेष्वखिलेष्वपि १३
एवमेष चतुःशृङ्गश्चतुर्द्वारोपशोभितः
मेरुर्मेरूपमः कार्यो वाञ्छता शुभमात्मनः १४
सर्वस्वर्णमयं मेरुं यद्दत्त्वा पुण्यमाप्नुयात्
तमिष्टकाशैलमयं कृत्वा तदधिकं भजेत् १५
मेरुः
चतुरश्रीकृते क्षेत्रे सप्तविंशतिपाणिकम्
दशधा विभजेत्स स्यात्कैलासः पुण्यवर्धनः १६
ब्रह्मकोष्ठगतो गर्भः शेषं भित्त्यन्धकारिका

चतुर्भागं भवेद्भद्रं मूलकर्णौ त्रिभागिकौ १७
सप्तभागोच्छ्रिता जङ्घा मेखला चार्धभागिका
भागेनान्तरपत्रं स्याद्भागेनाण्डकमुच्छ्रितम् १८
ग्रीवाग्रभागमुत्सेधाच्छिखरं दशकोच्छ्रितम्
अर्धषष्ठांशविस्तारः स्कन्धः कैलाससंज्ञिते १९
अस्मिन्नन्तरपत्रे तु सूत्रं दत्त्वा सुताडितम्
त्रिगुणेन लिखेत्तेन वेणुकोशं मनोरमम् २०
अष्टभूम्युच्छ्रयः श्रीमान् मञ्जर्या च विराजितः
उच्छ्रयश्चास्य कर्तव्यो द्विगुणः श्रियमिच्छता २१
कार्यं षड्भूमिकं चास्य भद्रं भागार्धनिर्गतम्
पाकः सिंहकर्णस्युः समाप्तिर्नायकेन च २२
कैलास एष कथितो विशेषेण हरप्रियः
कैलासः
इदानीं सर्वतोभद्रः प्रासादः परिकीर्त्यते २३
स स्यात् षड्विंशतिं हस्तान् परमः परिमाणतः
जठरं बाह्यसीमा च भित्तयो ह्यन्धकारिकाः २४
जङ्घोत्सेधश्च कर्णौ च यथा मेरोस्तथा स्मृताः
तथैव भद्रविस्तारैः कार्यो भागार्धनिर्गतः २५
रथिकैका चतुर्भागा ततः सार्धद्विभागिका
तासां परस्परं ज्ञेयो भागभागं विधीयते २६
षड्भागात् विस्तृतं कार्यं शिखरं सप्तमोच्छ्रितम्
षड्भिर्दशभिर्भागैः स्यान्मूलजा स्कन्धविस्तृतिः २७

ग्रीवार्धभागमुत्सेधादण्डकं भागमुच्छ्रितम्
मूलसूत्रानुसारेण च्छेदः संयुज्यते यथा २८
अस्य रेखा तथा कार्या सर्वश्रेयःप्रसाधनी
मेरोरस्य च शृङ्गाणि सिंहकर्णैर्विभूषयेत् २९
मञ्जरीं पद्मकोशाग्रतुल्यां सर्वत्र कारयेत्
जयं लक्ष्मीं यशः कीर्त्तिं सर्वाणीष्टफलानि च ३०
करोति सर्वतो भद्रं सर्वतोभद्रकः कृतः
सर्वतोभद्रः
चतुरश्रीकृते क्षेत्रे विभागशतभाजिते ३१
विमानं विभजेत् प्राज्ञः श्रेयःपुष्टिसुखावहम्
भद्रैश्चतुर्भिस्तत्कुर्यात्कर्णप्राग्ग्रीवकैस्तथा ३२
पञ्चभूमिर्भवत्येष यदि वा त्रिविधा भवेत्
हस्तास्त्रिंशद्भवेज्ज्येष्ठो मध्यमः पञ्चविंशतिः ३३
स्याडेकविंशतिर्हस्तात्कनीयान् षोडशाथवा
जातिशुद्धो भवेदेको मञ्जर्या वै परो भवेत् ३४
मिश्रकोऽन्यो विमानानामिति संख्या त्रिधोदिता
ज्येष्ठो मिश्रकनिर्माणः स च कौलाशभद्रकृत् ३५
मध्यमो जातिशुद्धः स्यात्कनीयान् मञ्जरीयुतः
पञ्चभागयुतं भद्रं विस्तरेण प्रकीर्तितम् ३६
कर्णप्राग्ग्रीवविस्तारः कर्तव्यो भागसंमितः
भागार्धं क्षोभणे कार्यं तलिपं तन्नलान्तरं ३७
गुप्तकर्णं तु कर्तव्यं यदिच्छेल्ललक्षणान्वितम्

तस्माद्भद्रस्य निष्कंशं भागेनैकेन कारयेत् ३८
मिश्रकस्य चतुर्भागं भद्रं कुर्याद्विचक्षणः
पञ्चभागोच्छ्रिता जङ्घा खुरपिण्डकया सह ३९
द्विभा रथिका कार्या भूमिः स्याच्चतुरंशका
द्वितीयार्धांशहीना च तृतीया भूमिरिष्यते ४०
चतुर्थे तु त्रिभिर्भागैरर्धहीना तु पञ्चमी
उदयो भूमिकाया यः कूटं कुर्यात्तदर्धतः ४१
अर्धेन कुम्भिकां कुर्यादुच्छालकसमन्विताम्
ऊर्ध्वभवस्तु पञ्चम्या वेदिका भागमुच्छ्रिता ४२
घण्टा षड्भागविस्तारा कार्या भागद्वयोच्छ्रिता
घण्टोत्सेधं त्रिभिर्भागैर्विभजेत्तदनन्तरम् ४३
भागिकानि प्रकुर्वीत कण्ठग्रीवाण्डकानि च
भागं कण्ठप्रदेशः स्याद्दण्डिकायाः समुच्छ्रितिः ४४
घण्टार्धेन विधातव्या द्विभागा कलशोच्छ्रितिः
सूरसेनादिकं सर्वं कर्तव्यं पूर्ववत्तथा ४५
भद्रं मनोरमैश्चेह सिंहकर्णैर्विभूषयेत्
पञ्चव्यासेन सूत्रेण पद्मकोशं समालिखेत् ४६
लतातयो भवेदेषां लताभिस्तं प्रकल्पयेत्
मिश्रको मिश्रितैरङ्गैः शुद्ध स्याद्भूमिकान्वितः ४७
विमानः
नन्दनस्य भवेत्सीमा द्वात्रिंशद्धस्तनिर्मितः
अष्टाष्टकविभागेन चतुःषष्टिपदो हि सः ४८

भागैश्चतुर्भिर्गर्भोऽस्य शेषं भित्त्यन्धकारिका
भद्रं गर्भसमं कार्यं तदूर्ध्वेनास्य निर्गमः ४९
द्वौ रथौ पार्श्वतो भूयः सर्वतः कर्णसूत्रतः
पञ्चभागोच्छ्रिता जङ्घा मेखला भागसंमिता ५०
षड्भमिरेष भूमिः स्यादेकैका द्वादशांशका
रेखास्कन्धाण्डकादीनां कैलासे समाकृतिः ५१
नन्दनो नन्दयत्येष समृद्धा हन्ति चापदः
नन्दनः
चतुरश्रीकृते क्षेत्रे पञ्चविंशति हस्तके ५२
सूत्रपातं ततः कुर्यात्कर्मायतमुखायतम्
ततः सीमार्धसूत्रेण सम्यग्वृत्तं समालिखेत् ५३
ततस्तदष्टाविंशत्या भजेद्भागैर्यथापदम्
निर्मापये शालार्धेन दिक्सूत्रसंश्रिताः ५४
तासां तु मध्यगाः कार्या एकैकस्य रथास्त्रयः
अन्ये चार्धरथाः कार्याः शालाकर्णसमाश्रिताः ५५
भागषट्कोच्छ्रिता जङ्घा भागार्धेन तु मेखलाः
भागेनान्तरपत्रं स्याद्भागं चोद्वृत्तमण्डकम् ५६
अर्धभागोच्छ्रिता जीवा विष्कम्भेन चतुष्पदाम्
शिखरस्योच्छ्रयो भागैरेकादशभिरिष्यते ५७
सर्वेषामेव लतिना मात्रिधा द्विगुणो हि सः
विस्तारादि्द्वगुणं सूत्रं स्कन्धाद्यं चापि षड्गुणम् ५८
सुत्तानितं समाकृष्य पद्मकोशं समालिखेत्

स पञ्चविंशतिर्हस्ता ज्येष्ठः षोडश मध्यमः ५९
कनीयान् द्वादशकरच्छस्यो विजानता
ज्येष्ठस्य भागसंख्येयमेतदर्धेन मध्यमः ६०
मध्यमस्य तथार्धेन कनीयान् भागसंख्यया
भागषट्कमिता जङ्घा ज्येष्ठस्य परिकीर्तिता ६१
सप्तभागोच्छ्रिता सा स्यान्मध्यमे सकनीयसि
सर्वेषां लतिनामेष क्षेत्रेण विधिरीरितः ६२
स्वस्तिकोऽयं समाख्यातः स्वस्तिश्रेयस्करो नृणाम्
स्वस्तिकः
इदानीं मुक्ताकोणस्य सूक्ष्म ब्रूमः स तु त्रिधा ६३
षोडश द्वादशाष्टौ च हस्तसंख्या परस्य च
ज्येष्ठः षोडशभिर्भागैर्मध्यो द्वादशभिर्भवेत् ६४
कनीयानष्टभिः प्रोक्तः प्रासादो मुक्तकोणकः
मुक्तकोणस्वस्तिकयोरिदमेवान्तरं भवेत् ६५
स्वस्तिको वर्तुलस्तत्र चतुरश्रोऽपरः स्मृतः
पञ्चभागोन्नता जङ्घा द्वौ भागौ रथिका भवेत् ६६
भागैश्चतुर्भिः कर्तव्या द्वितीया तस्य भूमिका
येषास्त्वर्धार्धभागेन विधेयास्तस्य भूमिकाः ६७
विधाय नवधा गर्भैस्तैस्त्र्योदशभिर्भवेत्
जङ्घापादोनपञ्चाशैराद्यैकःष्पणिका भवेत् ६८
मुक्तकोणः
विस्तारं दशधा कृत्वा षड्भागं मध्यमालिखेत्

कर्णा द्विर्भागिको मध्यं चतुर्धा विभजेत्पुनः ६९
तद्वन्मध्ये कृतौ द्व्यंशौ भागिकौ वामदक्षिणौ
अङ्गुलीकरसंख्यातैर्विधेयो रथनिर्गमः ७०
प्राग्ग्रीवैर्विकटैः स्वष्टैः स्तम्भैः सद्रूपकर्मभिः
एवं गुणसमायुक्तः श्रीवत्सः सुखदो भवेत् ७१
द्व्यङ्गुलं त्र्यङ्गुलं वापि चतुरङ्गुलमेव च
उदकान्तरकं कार्यं श्रीवत्सो नन्दनोपि च ७२
श्रीवत्सः
विस्तारैर्दशधा भक्तैः षड्भामञ्जरी भवेत्
सर्वतोभद्रवन्मूलकर्णावस्य द्विभागिकौ ७३
उदकान्तरमन्यस्य श्रीवत्सस्येव कल्पयेत्
हंसोऽयं कीर्तितः सम्यक् शुभदो लक्षणान्वितः ७४
हंसः
रुचकोऽप्येवमेव स्यादुदकान्तरवर्जिताम्
भित्तयश्चतुरंशेन गर्भो व्यासार्धसंमतः ७५
रुचकः
चतुरश्रीकृते क्षेत्रे विभजेद्दशभिः पदैः
विदध्यादर्धमानाख्यं तत्र भ्रान्तमनुक्रमात् ७६
भद्रस्य च भवेद्भागैश्चतुर्भिः परिविस्तृतम्
एकेनैकेन भागेन द्वौ रथौ वामदक्षिणौ ७७
द्विभागविस्तृतौ कर्णौ निर्गमः स्यात्कराङ्गुलैः
वर्धमानः क्रियायुक्तो यशोलक्ष्मीं विवर्धयेत् ७८

रचको वर्धमानो वा श्रीवत्सो हंस एव च
य एको रोचते तेषु न्यसेत्तं गरुडे सुधीः ७९
पत्तावेतस्य कर्तव्यौ प्रासादार्धविनिर्गमौ
नासिकां वैनतेयस्य त्रिगर्भां कारयेदपि ८०
गरुडः
चतुःषष्टिपदे क्षेत्रे प्रासादं विभजेच्छुभम्
क्षेत्रार्धेन च सूत्रेण पृष्ठतो वृत्तमालिखेत् ८१
भागैश्चतुर्भिर्जंङ्घास्य मेखलाचार्धभागिका
पुरतः सूरसोयं पृष्ठतश्च गजाकृतिः ८२
गजः
चतुःषष्टिपदः सिंहो भद्रं भागचतुष्टयम्
द्व्यंशकौ मूलकर्णौ च गर्भः षोडशभिः पदैः ८३
विस्तारार्धे भवेज्जङ्घा मेखला पदिका भवेत्
एकैका रथिका चास्य भवेद्भागत्रयोच्छ्रिता ८४
सर्वतोभद्रवच्चास्या रेखाग्रीवाण्डकादिकम्
सिंहाक्रान्तैस्तथा भद्रैः प्रासादः सिंह उच्यते ८५
विक्रमार्जवशीलानां प्रासादोऽयं शुभावहः
सिंहः
पद्मस्य हस्तसंख्या स्यात् षोडश द्वादशाथवा ८६
वर्तुलः स च कर्तव्यः सूत्रं तु स्वस्तिके यथा
सर्वे रथाः स्मृताः पद्मपत्राकृतिमनोरमाः ८७
उदकान्तरकं कुर्याच्छ्रेयसे नन्दने यथा

पद्मकः

स्वस्तिकस्य यथा पूर्वं कथितं मानलक्षणम् ८८
तेनैव लक्षलितः सर्वो विदधीत विचक्षणः
यथामूलविभक्तस्तु लतिषु स्वस्तिकादिषु ८९
यथास्कन्धविभागोऽपि रेखामध्यविभागतः
स्वस्तिकाङ्को विधातव्यः शुकनाशोच्छयाच्छुभः ९०
प्रासादानां स भागैः स्यात्सप्तभिर्विहितः श्रिये
विमाने स धरात्र्यंशन्यूनः कार्यो विपश्चिता ९१
कैलासो च तुरंशोना विधेना शुकनासिका
सर्वतोभद्रसिंहाख्यौ मेरूणां तु विशेषतः ९२
षड्भिर्भागैर्विना कार्या शुकनासा विजानता
प्रासादोच्चेन सन्धारो विमानाद्याः प्रकीर्तिताः ९३
विस्तारार्धेन तद्गर्भो यच्छेषं तेन भित्तयः
प्रासादजङ्घोच्छ्रेयेण तुल्यो गर्भतुलोदयः ९४
सभित्तिर्गर्भतुल्यः स्यात्सन्धारेषु तुलोदयः
स विधेयः पुनर्व्यासाद्यदि वा किञ्चिदुन्नतः ९५
मूलसूत्रं तु दशधा --- समालिखेत्
गर्भसूत्रं प्रतिष्टाप्य सिंहकर्णं प्रकल्पयेत् ९६
सार्धभागेन सूत्रेण मध्यमस्य समालिखेत्
उरो द्विभागतुल्यं तु मस्तकं भागमुच्छ्रितम् ९७
अर्धेन वोच्छ्रयस्तस्याः पद्मोच्छ्राया द्विभागिकाः
उरो च सीमान्ते सूत्रेणच्छन्दमादिशेत् ९८

नवधा दशधा चैव सिंहकर्मावुभौ स्मृतौ
एकषड्विस्तृतो भागा उदयात् पञ्चभागिकः ९९
सूरसेनो द्वितीयस्तु स्वात्समोदयविस्तृतिः
उदयात्सार्धविस्तीर्णं सिंहकर्णस्त्रिसंकुला १००
कामलान् मल्लकांश्चान्यान् सिंहकर्णात् प्रलोपयेत्
प्रासादानां हि सर्वेषां सर्वमेतद्विभूषणम् १०१
यस्य यत्रोचितं स्थानं तत्तत्र विनिवेशयेत्
निर्मितौ वलभेस्तिर्यक्सूत्रं कुर्वीत सप्तधा १०२
पञ्चभागांश्च मुखतस्तेनैवांशेन कल्पयेत्
मेखलान्तरपत्रे च जम्भाकुम्भकमेव च १०३
पञ्चभागोच्छ्रितं कुर्यात्तद्वच्छिखरमुच्छ्रितम्
कीर्तितानि विमानानियान्येव सुरवर्त्मनि १०४
तान्येव स्थावरत्वेन प्रासादा इति विश्रुताः
महेश्वरस्य कैलासो विष्णोस्तु गरुडाभिधः १०५
कार्यः प्रजापतेः पद्मो गणनाथस्य च द्विपः
न खल्वेतेऽन्यदेवानां विधातुमुचिताः स्मृताः १०६
यस्तु त्रिविष्टपः स स्यात्सर्वदेवनिकेतनः
अस्मात्तु येऽन्ये प्रासादाः स्मृतास्तेऽनेकरूपिणः १०७
सर्वेषामेव देवानामभेदेन भवन्ति ते
जगत्यां विस्तरः कार्यः प्रासादोच्छ्रयसंमितः १०८
गर्भोर्धेनोच्छ्रयस्तस्याः शुभदः परिकीर्तितः
मण्डपस्य षडंशार्धो पञ्चमांशादथ स्मृतः १०९

कर्णप्रासादकाः कार्याः प्रासादस्य त्रिभागतः
पूर्वापरमुखाः कार्या एते याम्योत्तराननाः ११०
ऐन्द्रे याम्ये वारुणे च कौबेरे च यथाक्रमम्
दिग्भागेषु चतुर्ष्वेषु वलभीं विनिवेशयेत् १११
गर्भविस्तारविस्तीर्णां द्वौ त्रिभागौ मुखायताम्
इति बाह्यपरीवारे जङ्घा प्रासादमानतः ११२
तीर्यंगायतमारोप्य सूत्रं गर्भेण मण्डपे
गुरुकक्षोऽथ कर्तव्या गवाक्षस्तम्भसंयुताः ११३
प्रासादविस्तरात्कार्यो द्विगुणो मण्डपः सदा
मण्डपस्यसविस्ताराजगती द्विगुणा बहिः ११४
कर्णप्रासादकाः कार्याः प्रासादस्यार्धतोऽपि वा
तेषामध्यर्धतः कुर्याद्वलभीनां निवेशनम् ११५
अनेन क्रमयोगेन बाह्याद्बाह्यं सुसंवृतम्
यदा हि शोभते राजा केयूराङ्गदकुण्डलैः ११६
तथा प्रासादराजोऽयं शोभते भूषणैर्निजैः
ध्वास्यार्हास्यातिसौम्यस्य श्रीकीर्तिविजयावहः ११७
अनेन विधिना न्यस्तः प्रासादः स्यात्सदा नृणाम्
आदित्यं पूर्वतो न्यस्येत्कुमारं पूर्वदक्षिणे ११८
दक्षिणे मातृदेवैस्तु गजास्यं दक्षिणोपरि
विन्यसेद्वारुणे गौरी वायव्येऽपि च चण्डिकाम् ११९
विष्णुं कुबेरदिग्भागे तथैशान्यां महेश्वरम्
अन्येषामपि देवानां कथ्यते तु क्रमोऽधुना १२०

तत्रैशान्यां दिशि न्यस्येदीशानं लोकनायकम्
दानवानां निहन्तारं पूर्वस्यामपि वासवम् १२१
वैश्वानरं तथाग्नेय्यां धर्मराजं च दक्षिणे
नैर्ऋत्यां निर्ऋतिं न्यस्येत्प्रतीच्यां तु प्रचेतसम् १२२
वायुं वायव्यदिग्भागे कुबेरमपि चोत्तरे
अष्टौ ह्येते महात्मानो लोकपालाः प्रकीर्तिताः १२३
पालयन्ति जगत्सर्वं स्वस्वस्थाने प्रतिष्ठिताः
पुरकर्कटदुर्गेषु ग्रामेषु नगरेषु च १२४
क्रमेणानेन विन्यस्ताः स्युः प्रजानां सुखावहाः
न यत्र देवताबाधस्तत्र द्वारं प्रकल्पयेत् १२५
प्रासादस्यानुसारेण भवेद् द्वारं शुभावहम्
अथातः प्रोच्यते सम्यग्द्वारमानमनुक्रमात् १२६
ज्येष्ठमध्यकनिष्ठानां द्रव्यं स्तम्भानुसङ्गतम्
भवेद्द्वारां प्रासादे षोडशाङ्गुलम् १२७
द्विकरे द्विगुणं तत् स्यात्त्रिकरे द्विकरं शुभम्
चतुष्करे चतुःषष्टिरङ्गुलानि प्रशस्यते १२८
अत ऊर्ध्वं प्रतिकरं त्र्यङ्गुला वृद्धिरिष्यते
द्वारोदयकरैस्तुल्यान्यङ्गुलानि नियोजयेत् १२९
षोह्याजयवान्यालर्ध ध्रुवके चतुरङ्गुले
विस्तारो द्विगुणस्तस्य स्तम्भपिण्डं स एव हि १३०
एकद्वित्रिचतुष्पञ्चषट्सप्तककरावधि
द्वारविस्तारभागेन स्तम्भः सम्यग्विधीयते १३१

चतुर्भागेन कर्तव्या सीमास्तम्भः प्रमाणतः
तथा स्तम्भस्य बाहुल्याच्चतुर्भागविभागविना १३२
भागौ तत्र कर्तव्यौ हीरग्रहणमुच्छ्रितम्
भागत्रयेण कर्तव्यः पट्टस्य च समुच्छ्रयः १३३
भागेनैकेन नीस्यातव्यविस्तारं भत्रिभागरच्यकिम्
पट्टहस्ते विधातव्यमङ्गुलद्वयनिर्गमम् १३४
---ड---स्तारः स्तम्भतुल्यः प्रशस्यते
एकैकमङ्गुलं पट्टपार्श्वयोरधिकस्ततः १३५
पट्टदस्य विस्तारः कार्यश्चतुर्भागविभाजितः
भागेनैह्केन चोत्सेधस्तुलाधारणमिष्यते १३६
तुलाधारणकोत्सेधाच्चतुर्भागविभाजितात्
भागमेकं परित्यज्य पिण्डस्तस्य विधीयते १३७
मात्राहीना भवेन्मेढ्यां तावन्नयस्येच्छलान्तले
द्वौ भागौ मूलभागेन जयन्तीपिण्डविस्तरौ १३८
इति हीरग्रहादीनां समासाल्लक्ष्मकीर्तनम्
पञ्चांशाभ्यधिकं स्तम्भविस्तारस्थेन कुम्भिका १३९
कुर्वीत स्तम्भतः सार्धा गर्ग कुम्भस्य विस्तृतीः
अथवा स्तम्भकर्णेन स्तम्भाग्रद्विगुणा क्वचित् १४०
पादोनस्तम्भविस्तारादग्रकुम्भे समुच्छ्रितिः
स्तम्भविस्तारकर्णाद्वा यद्वा पिण्डोऽग्रकुम्भके १४१
तस्य भागान् प्रवक्ष्यामो यथाकुम्भं स युज्यते
विभक्तोऽत्र त्रिधा पिण्डो भागेनैकेन पुत्तली १४२

चतुर्भिस्तस्य मध्यस्य पद्मं समालिखेत्
उच्छाले पञ्चधा भक्ते त्रिभिरावर्तनं --- १४३
वर्तनं योषव्येत्किञ्चिन्न च खल्वं समाचरेत्
वर्तने कुम्भकुम्भौ तु सूत्रं दत्त्वा सुतानितम् १४४
पद्मानालासमा स स्यान्न भवेत्पङ्क्तिवर्जिता
नवाधोच्चाहा लके भक्ते वीरगणडस्तु भागिकः १४५
एकेनैकेन भागेन विधेया पट्टिकट्टिका
ध्वसंछाकाल कर्तव्यं भागद्वितयसंमितम् १४६
तलकुम्भकपिण्डं तु पञ्चधा प्रविभाजयेत्
भागेनैकेन पद्मं स्याद्भागेन कलशं लिखेत् १४७
द्वाभ्यां समालिखेत् कुम्भं भागेनैकेन पट्टिकाम्
वर्तमाना चत्रा कार्या शोभा स्यादस्य यावतः १४८
एष कुम्भक्रमः प्रोक्तः स्तम्भपादे व्यवस्थितः
तलपट्टस्य पिण्डस्तु भागपट्टसमो भवेत् १४९
द्रव्येष्वत्र हि सर्वेषु सम्यक्शोभा विवक्षिता
न्यूनातिरिक्तमप्यस्मान्मानेष्वङ्गुलमाचरेत् १५०
द्वारामुदयविस्तारो द्रव्यसंस्थानमेव च
पूर्वमेव यथोद्दिष्टं तथा सर्वमनुस्मरेत् १५१
पिण्डेन त मूलशाखाया द्वितीया प विधीयते
सपायते सपादन प्रत्ययदेनाथ सार्धनरूपशाखा प्रशस्यते १५२
अर्धेन मूलशाखाः समा चैव बाह्यशाखा शाखां प्रकल्पयेत्
ऊर्ध्वपञ्चमशाखाया सप्तमी नवमी च सा १५३

रूपशा --- स्यान्न न्यूना नाधिकापि च
विस्तरार्धं तु कर्तव्यः सर्वासामेव निर्गमः १५४
शाखाविस्तारविस्तीर्णात्तरङ्गानि कारयेत्
सार्धेन ध्रुवशाखानां पिण्डेनोदुम्बरोदयः १५५
उदुम्बरस्य पिण्डेन सिंहवक्त्राणि कारयेत्
तदर्धं विलसन्धिः स्यात्तत्समा भूमिरङ्घ्रिका १५६
तलन्याससमः पट्टः पिण्डपूर्वव्यवस्थितः
कूटाकारैर्विचित्रैश्च शोभनै रूपकर्मभिः १५७
पत्रजातैरनेकैश्च करण्डं कुर्याद्यथेप्सितम्
पाचकः कटुतीक्ष्णाद्यैरनुसाररसैर्यथा १५८
अन्वीक्ष्य विपचेत्तद्वत्स्थपतिः सर्वमाचरेत्
यदुक्तं यदनुक्तं च तत्समग्रमपि स्फुटम् १५९
युक्तं समालोच्य यथाशोभं समाचरेत्
आरभ्य मेरोरिति षोडशैते प्रासादमुख्याः कथिता यथावत्
संक्षेपतो लक्ष्म तथा जगत्यां द्वारादिसम्बन्धि च दारुमानम् १६०
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे मेर्वादिषोडशप्रासादलक्षण जगतीलक्षण द्वारादिकला नाम पञ्चपञ्चाशोऽध्यायः

अथ रुचकादिचतुष्षष्टिप्रासादकः षट्पञ्चाशोऽध्यायः

अथातः सम्प्रवक्ष्यामि प्रासादाञ्शिखरान्वितान्
रुचकादींश्चतुःषष्टिं नामलक्षणतः क्रमात् १

पूर्वं यानि विमानानि पञ्चोक्तान्यभवंस्ततः
तदाकारभृतः सर्वे प्रासादाः पञ्चविंशतिः २
शिखरैर्विविधाकारैरेकेनाण्डेन भूषिताः
केचिदण्डत्रयोपेताः केचित्पञ्चाण्डकान्विताः ३
ईषद्भेदेन ते ज्ञेयाः प्रासादाः सर्वकामदाः
सौवर्णा राजताश्चै व देवानां सततं प्रियाः ४
मणिमुक्ताप्रवालाद्यैर्भूषणैः सुविभूषिताः
रीतिकाताम्रभोषाद्यैः पिशाचोरगरक्षसाम् ५
देवलोका भवन्त्येते कामस्वच्छन्दचारिणः
पाताले चापि निर्दिष्टाः पाषाणैः स्फटिकैस्तथा ६
इष्टकाकाष्ठपाषाणैर्मर्त्यलोकेऽपि नन्दकाः
सुखदाश्च भवन्त्येते कर्तुः कारयितुस्तथा ७
लक्षणेनान्वितानेतान् कथयामो यथाविधि
पुराणां भूषणार्थाय भुक्तिमुक्तिप्रदा नृणाम् ८
रुचको भद्रकश्चैव हंसो हंसोद्भवस्तथा
प्रतिहंसस्तथा नन्दो नन्द्यावर्तो धराधरः ९
वर्धमानोऽद्रिकूटश्च श्रीवत्सोऽथ त्रिकूटकः
मुक्तकोणो गजश्चैव गरुडः सिंह एव च १०
भवश्च विभवश्चैव पद्मो मालाधरस्तथा
वज्रकः स्वस्तिकः शङ्खर्मलयो मकरध्वजः ११
इत्येते नामतः प्रोक्ताः प्रासादाः पञ्चविंशतिः
एतेषां रूपनिर्माणं कथयामो यथाविधि १२

रुचकाष्टादशैषां चतुरश्राः प्रकीर्तिताः
भवश्च विभवश्चैव चतुरश्रायतोऽथवा १३
पद्मो मालाधरश्चैव वृत्तावेतावुदाहृतौ
मलयो मकराख्योऽथ द्वौ तु वृत्तायताविमौ १४
वज्रकः स्वस्तिकः शङ्कुरित्थमष्टाश्रयस्त्रयः
ललिताः कथिता ह्येते ब्रूमोऽन्यान्मिश्रकानथ १५
सुभद्रो योकिटश्च सर्वतोभद्र एव च
सिंहकेसरिसंज्ञोऽन्यश्चित्रकूटो धराधरः १६
तिलकाख्यः स्वतिलकस्तथा सर्वाङ्गसुन्दरः
नवामी मिश्रकाः प्रोक्ताः कथ्यन्ते साधकारिकाः १७
केसरी सर्वतोभद्रो नन्दनो नन्दिशालकः
नन्दीशो मन्दिराख्यश्च श्रीवृक्षश्चामृतोद्भवः १८
हिमवान् हेमकूटश्च कैलासः पृथिवीजयः
इन्द्रनीलो महानीलो भूधरो रत्नकूटकः १९
वैडूर्यः पद्मरागश्च वज्रको मुकुटोत्कटः
ऐरावतो राजहंसो गरुडो वृषभस्तथा २०
मेरुः प्रासादराजश्च देवानामालयो हि सः
संयोगे तु संधारान् कथयामो यथाविधि २१
लतात्रिपुष्कराख्यौ च पञ्चवक्त्रश्चतुर्मुखः
नवात्मकश्च निर्गूढः प्रासादाः पञ्च संज्ञिताः २२
आद्यः पञ्चाण्डकः कार्यः प्रासादः केसरीति यः
सर्वतोभद्रको यस्तु विधेयः स नवाण्डकः २३

त्रयोदशाण्डकस्तु स्यान्नन्दनो नाम यो भवेत्
नन्दिशालस्तु यः प्रोक्तः स स्यात्सप्तदशाण्डकः २४
अण्डकैरेकविंशत्या नन्दीशः परिवारितः
पञ्चविंशाण्डकोपेतं मन्दरं कारयेद्बुधः २५
श्रीवृक्षः शस्यते चैतेष्वेकोनत्रिंशताण्डकैः
स्यात्त्रयस्त्रिंशताण्डैस्तु प्रासादो ह्यमृतोद्भवः २६
अण्डकैः क्रियते सप्तत्रिंशता हिमवानपि
सैकया हेमकूटस्तु स्याच्चत्वारिंशताण्डकैः २७
पञ्चचत्वारिंशताण्डैः कैलासो नाम नामतः
भवत्येकोनपञ्चाशदण्डकः पृथिवीजयः २८
इन्द्रनीलश्च यः प्रोकारः पञ्चशताण्डकैः
सप्तपञ्चाशता युक्तो महानीलस्तथाण्डकैः २९
एकषष्ट्यण्डकोपेतः प्रासादो भूधरो भवेत्
पञ्चषष्ट्यण्डकैर्युक्तो रत्नकूटः प्रशस्यते ३०
नवषष्ट्यण्डकः कार्यो वैदूर्यः शुभलक्षणः
त्रिसप्तत्यण्डकयुतः पद्मरागो विधीयते ३१
अण्डकैः सप्तसप्तत्या प्रासादो विजयाभिधः
एकाशीत्यण्डकोपेतो विधेयो मुकुटोत्कटः ३२
ऐरावतस्तु पञ्चाशीत्यण्डकः परिकीर्तितः
नवाशीत्यण्डकैर्युक्तो राजहंसः प्रशस्यते ३३
नवत्या सप्तयुतया प्रासादो वृषभोऽण्डकैः
शतेनैकोत्तरेणाण्डैर्मेरुः प्रासादराट्स्मृतः ३४

हरेर्हिरण्यगर्भस्य --- भास्करस्य च
मेरुरेष विधातव्यो नान्यस्य त्रिदिवौकसः ३५
मेरोः प्रासादराजस्य देवानामालयस्य च
कर्ता क्षत्रिय एवास्य वैश्यस्य स्थपतिर्भवेत् ३६
एवं विधीयमानेऽस्मिन् मेरौ द्वावपि नन्दतः
वास्तुशास्त्रविधिज्ञोऽपि क्षत्रियः स्थपतिर्यदि ३७
तदास्य सत्यं शौचं च विक्रमश्च विनश्यति
ईश्वरोऽपि यदा विप्रो मेरुप्रासादकृद्भवत् ३८
कर्तुः कारयितुः पीडा पूजा चास्य न तादृशी
ब्राह्मणः स्थपतिश्चास्य वास्तुशास्त्रे विशारदः ३९
वणिक्कर्मणि वर्तेत धनवानपि यद्यसौ
सर्वविप्रेषु निर्दिष्टः कर्ता स्थपतिरेव सः ४०
तत्रस्था देवताः सर्वास्तस्य वृद्धिः कथञ्चन
वास्तुशास्त्रविधिज्ञोऽपि तत्तत्कारयिता यदि ४१
राजापि क्षत्रियः कर्ता मेरुर्भवेत् तदा
राष्ट्रभङ्गो भवेत्तस्य प्रजा यान्ति दिशो दश ४२
क्षत्रियेण नरेन्द्रेण कर्ता स्थपतिना यदि
मेरोः पूजा भवेत्तत्र क्षत्रियोऽप्यक्षयं पदम् ४३
एकैकस्य च यन्मानं सकर्णस्य च यद्वशम्
प्रासादानां च सर्वेषां तत्सम्यगभिधीयते ४४
चतुरश्रीकृते क्षेत्रे चतुर्भागविवर्जिते
भागिका सर्वतो भित्तिः शेषं गर्भगृहं भवेत् ४५

तस्याग्रतः पुनः कार्यो भागद्वयविनिर्गतः
विस्तारेण त्रिभागश्च प्राग्ग्रीवः स्तम्भभूषितः ४६
पीठोत्सेधस्य भागेन भवेज्जङ्घा द्विभागिका
भागार्ध---तरं पत्रं पादेन स्याद्वरण्डिका ४७
सपादांश्चतुरो भागान् शिखरस्योच्छ्रयः स्मृतः
त्रिगुणेन च सूत्रेण पद्मकोशं समालिखेत् ४८
स्कन्धकोशान्तरं चास्य भागैः प्रविभजेत्त्रिभिः
भवेद्ग्रीवार्धभागेन भागेनामलसारकम् ४९
पद्मशीर्षं च भागार्धाद्भागेन स्मृतः
इत्युक्तो रुचकाख्योऽयं
रुचकः ।
भद्रकाख्योऽथ कथ्यते ५०
---५१
भद्रक ।
भद्रं तु कर्णयोर्मध्ये कारयेदुदकान्तरम्
तदा हंसो विजानीयात्प्रासादो देवतालयः ५२
हंसः
हंसस्येव यदा कुर्याद्भद्रस्यान्ते जलान्तरम्
तदा हंसोद्भवो नाम प्रासादः परिकीर्तितः ५३
हंसोद्भवः
रथान्तकर्णयोश्चैवं यदा स्यादुदकान्तरम्
प्रतिहंसस्तदा प्रोक्तः प्रासादोऽयं मनोरमः ५४

प्रतिहंसः

प्राग्ग्रीवा रुचकस्यैव सीमाविस्तारविस्तृताः
निर्गता भद्रमानेन तदा नन्दः स उच्यते ५५

नन्दः

प्राग्ग्रीवैर्भद्रमानेन नन्दो यदि विभूष्यते
निर्गतैर्भागमानेन चतुरश्रैः समन्ततः ५६

प्राग्ग्रीवः पुरतः कार्यः स्तम्भद्वयविभूषितः
नन्द्यावर्तस्तदा प्रोक्तः प्रासादो विजयावहः ५७

नन्द्यावर्तः

नन्द्यावर्ते यदा कुर्याद्भद्रान्ते जलनिर्गमम्
धराधरस्तदा ज्ञेयः प्रासादो भुवनोत्तमः ५८

धराधरः

दशधा भाजिते क्षेत्रे चतुरश्रे समन्ततः
भागद्वयेन कर्णः स्याद्भजेच्छेषं च सप्तधा ५९
भागत्रयेण रथको मध्यमोऽस्य विधीयते
द्वाभ्यां द्वाभ्यां तु भागाभ्यां रथकौ वामदक्षिणौ ६०
भागस्यैव त्रिभागेन भवेदस्य विनिर्गमः
कथितो वर्धमानोऽयं

वर्धमानः

गिरिकूटोऽथ कथ्यते ६१
वर्धमानस्य भद्रस्थमध्यसूत्रेण योजयेत्
कर्णिसूत्रं तदग्राभ्यां न्यस्येत्सूत्रचतुष्टयम् ६२

तदुत्पन्नैस्तु भद्रस्थकर्णैः स्याच्चित्रकूटकः
गिरिकूटः ।
कर्णान्ते च रथान्ते च यदि स्यात्सलिलान्तरम् ६३
वर्धमानस्य भवति श्रीवत्सः स्यात्तदा शुभः
श्रीवत्सः ।
गिरिकूटस्य संस्थाने तद्रूपे विनिवेशिते ६४
कर्णा प्रतिरथेष्वस्य निखिलेष्वपि योजयेत्
प्राग्वत्प्रतिरथोद्भूतसूत्राभ्यां कर्णवर्त्मना ६५
त्रिकूटाख्यस्तदैव स्यात्प्रासादो देवतालयः
त्रिकूटः
त्रिकूटस्यैव संस्थाने भद्रकर्णपरिच्युते ६६
स्वरूपभद्रसंस्थाने मुक्तकोणः प्रजायते
मुक्तकोणः
चतुर्भिस्तृतैर्भागैः क्षेत्रे पञ्चभिरायते ६७
भागेन भित्तिः कर्तव्या शेषं गर्भगृहं भवेत्
अस्य क्षेत्रार्धसूत्रेण पृष्ठतो वृत्तमालिखेत् ६८
पुरतः शूरसेनोऽस्य पृष्ठतोऽपि गजाकृतिः
प्रासादोऽयं गजो नाम गणेशस्य विधीयते ६९
गजः
वर्धमानस्य संस्थाने गरुडं विनिवेशयेत्
तस्य पक्षौ विधातव्यौ प्रासादार्धेन निर्गतौ ७०
पक्षयोस्तु दशस्तस्य वर्धमानं विभाजयेत्

जातिशुद्धा रथाः कार्याः पार्श्वयोर्गरुडो भवेत् ७१
गरुडः
वर्धमानस्य संस्थाने प्राग्वत्कर्णौ नियोजयेत्
द्विभागा रथिका कार्या शेषं भद्रं प्रकल्पयेत् ७२
जङ्घास्य पञ्चभिर्भागैः पीठं चास्य तदर्धतः
विरण्डयर्धांशिकाद्विश्च भागश्चान्तरपत्रयोः ७३
तथोत्सेधत्रिभागैश्च नवभिः शिखरोच्छ्रितः
कुम्भश्चामलसारश्च सिंहेऽस्मिद्रागमागतः ७४
सिंहः ।
चतुरश्रीकृते क्षेत्रे चतुर्भिर्भाजितैः पदैः
सीमाविस्तारमानेन रथांस्तस्य प्रकल्पयेत् ७५
पादेनैकेन निर्यातान् दिक्षु सर्वास्वनुक्रमात्
प्राग्ग्रीवान् पुनरस्यैव भागद्वितयविस्तृतान् ७६
पदषड्भागनिर्यातान्विदधीत चतुर्दिशम्
चतुर्भागायतो गर्भः कार्योऽस्य द्व्यंशविस्तृतः ७७
जङ्घोत्सेधश्च पीठं च यथा भद्रे तथा भवेत्
प्रासादो भवसंज्ञोऽयं देवतात्रितयाश्रयः ७८
भवः ।
भवस्यैव यदा कुर्याद्रथान् सजलनिर्गमान्
द्विभङ्गं संश्रयोऽन्यः सा प्रासादो विभवाभिधः ७९
त्रिलिङ्गः ।
अष्टधा भाजिते क्षेत्रे चतुरश्रे समन्ततः

विदध्याद्गर्भसूत्राणि कर्णसूत्राणि च क्रमात् ८०
दिक्सूत्रेष्वखिलेष्वस्य सीमार्धं पदमेव च
पदस्याष्टादशो भागस्तद्योगाद्वृत्तमालिखेत् ८१
विस्तारार्धं भवेद् गर्भो गर्भार्धास्तस्य भित्तयः
तद्वृत्तबाह्यसूत्रेण भागान् षोडश कारयेत् ८२
दिक्सूत्रकर्णसूत्रेषु रथकान् सम्प्रकल्पयेत्
द्विभागा रथिका कार्या सलिलान्तरभूषिता ८३
सलिलान्तरमेतस्य श्रीवत्सस्येव कल्पयेत्
जङ्घोत्सेधे च पीठे च शिखर च तथा भवेत् ८४
भालाधारः स विज्ञेयः सबःह्यभ्यन्तरः समः
मालाधरः ।
मालाधरस्य संस्थाने यत्क्षेत्रं पूर्ववत्स्थितम् ८५
उदकान्तरविच्छिन्नं पद्मं तत्र निवेशयेत्
तथाग्रे कारयेत्कर्णव्यासार्धेन विनिर्गमान् ८६
पद्मपत्रनिभाकाराञ्जातिशुद्धान्सलक्षणान्
पद्मः ।
षड्भागानायते क्षेत्रे विस्तारे चतुरश्रके ८७
द्विभागाद्विपुलो गर्भश्चतुर्भागायतो भवेत्
गर्भव्यासमितं सूत्रं पदपादसमन्वितम् ८८
वृत्तार्धं भ्रमयेत्तेन दक्षिणेनोत्तरेण च
सीमाविस्तारसूत्रेण पदपादयुतेन च ८९
पुरतः पृष्ठतश्चापि तद्वृत्तमनुवर्तयेत्

वृत्तक्षेत्रमिदं तस्य भागैर्द्वादशभिर्भवेत् ९०
द्विभागो भद्रविस्तारो भागिकी भागविस्तृतिः
भद्राणां च रथान्मध्ये भागेनैकेन विस्तृता ९१
उदकान्तरकं चात्र मालाधरवदाचरेत्
वृत्तायतस्तु कर्तव्यः प्रासादो मलयाभिधः ९२
मलयः
मलयस्यैव कर्णेषु रथिकान् यदि कल्पयेत्
उदकान्तरविच्छिन्नान् पदषड्भागनिर्गतान् ९३
पीठोत्सेधश्च जङ्घा च शिखरं चात्र यद्भवेत्
एकमात्रासमायुक्तं लतिना ते प्रतीयते ९४
त्र्यंमाशाणां चतुरश्राणां कोणेष्वर्धपरिक्षयात्
अष्टाश्रं जायते यत्र वाजाग्रमपि तां नरम् ९५
अष्टाश्रं चतुरो भागान् विदध्यात्तत्र भागिकी
भित्तिर्विधेया भागाभ्यां भवेद्गर्भगृहं ततः ९६
रथिकासु विधेयोऽस्य परितो जलनिर्गमः
वज्रको नाम कथितः प्रासादः शुभलक्षणः ९७
वज्रकः ।
वज्रकस्यैव संस्थाने सलिलान्तरवर्जिते
चत्वारिंशद्भागभक्ते रथिकाः स्युस्त्रिभागिकाः ९८
अष्टासु दिक्षु कर्णाश्च भवन्त्यस्य द्विभागिकाः
कर्णैः पद्मकतुल्योऽयं स्वस्तिकः समुदाहृतः ९९
स्वस्तिकः ।

वज्रकस्यैव संस्थाने ये रथाः प्राक्प्रदर्शिताः
एकैकस्तेषु कर्तव्यश्चतुरश्चतुरोंऽशकान् १००
भागद्वयेन मध्यः स्याद्रथकोशाद्विनिर्गतः
शङ्कुर्नामायमुद्दिष्टः प्रासादोऽष्टाभिरश्रिभिः १०१
शङ्कुः ।
चतुरश्राः षोडश प्रोक्ताश्चतुरश्रायतद्वयम्
वृत्तवृत्तायतौ द्वौ द्वावुक्ताश्चाष्टाश्रयस्त्रयः १०२
पञ्चविंशतिरित्येते प्रासादा ललिताः स्मृताः
मिश्रकाणामथ ब्रूमो लक्षणानि यथाक्रमम् १०३
भद्रकस्यैव संस्थाने भद्रे शृङ्गं यदा भवेत्
सुभद्रो नाम संज्ञोऽयं कर्णकूटैः करीद्यसौ १०४
पूर्वोक्तस्य यदा शृङ्गं भद्रं केसरिणो भवेत्
लताख्योक्तं तदा स स्यात् सर्वतोभद्रसंज्ञितः १०५
भद्रे शृङ्गं परित्यज्य सिंहं तत्रैव कारयेत्
मिश्रयोगे तयोर्मिश्रः स भवेत्सिंहकेसरी १०६
श्रीवत्सस्यैव संस्थाने भद्रे कूटं निवेशयेत्
कर्णे तनैव योगेन प्रतिशृङ्गोपशोभितम् १०७
कलशैः सप्तदशभिः पद्मघण्टामलैः सह
स च त्रिकूट इत्युक्तो विचित्रशिखरान्वितः १०८
कर्णे भद्रे प्रतिस्थाने पूर्णे शृङ्गे यदा भवेत्
अण्डकैः सप्तदशभिस्तदा स्यात्स धराधरः १०९
श्रीवत्सस्यैव संस्थाने कर्णे कूटं निवेशयेत्

शृङ्गं भद्रो भद्रे च तदा तिलक उच्यते ११०
यथा कर्णे तथा भद्रे यो भवेच्चित्रकूटवत्
उत्तमाङ्गे च यस्तद्वत्स स्यात्सर्वाङ्गसुन्दरः १११
प्रतिशृङ्गेषु सर्वेषु यदा कूटं निवेश्यते
मिश्रकः स तु विज्ञेयः श्रीनाम्ना चान्तिकोऽन्तिकः ११२
सर्वे कूटावृताः कार्याः सर्वे कार्याश्चतुर्मुखाः
मिश्रका बहुशृङ्गाश्च कुटीसंज्ञास्ततोऽपरे ११३
इदं नवानां मिश्राणामिह लक्षणमीरितम्
साधारणमतः स्पष्टं ब्रूमः सम्प्रति लक्षणम् ११४
चतुरश्रीकृते क्षेत्रे भागाष्टकविभाजिते
तस्य मध्ये भवेद्गर्भो द्विभागो देवतालयः ११५
भागे निवेशयेद्भित्तिं कुर्याद्भागेन कारिकाम्
बाह्यभित्तिं पुनर्भागे विधेयास्तस्य सिद्धये ११६
तस्य कर्णेषु कर्तव्या रथिकाश्च द्विभागिकाः
शेषं भद्रं प्रकर्तव्यमुदकान्तरभूषितम् ११७
भागेन निर्गतं दिक्षु सर्वास्वेष भवेद्विधिः
चतुर्भागोच्छ्रिता जङ्घा करकश्च तदर्धकः ११८
वरण्डयन्तरपत्रं च भागेनैकेन कल्पयेत्
रथिकैकान्तरं तस्य सार्धभागत्रयोच्छ्रिताः ११९
षड्भागे शिखरं मूले शेषांशकसमुच्छ्रितम्
तस्योच्छ्रयं त्रिधा कृत्वा वेणुकोशं समालिखेत् १२०
स्कन्धकोशान्तरं तस्य चतुर्धा विभजेत्ततः

पद्मशीर्षं तथा ग्रीवां सार्धेनांशेन कारयेत् १२१
कुर्याद्भागेन भागेन कुम्भं चामलसारकम्
भागार्धेन प्रकुर्वीत तदूर्ध्वं बीजपूरकम् १२२
प्रासादः कैसरी नाम सर्वतः सन्ततिप्रियः
कैसरी ।
चतुरश्रं समं कृत्वा भूमिभागं विचक्षणः १२३
प्रासादो व्यासतः कुर्याज्जगतीं द्विगुणामिह
विदध्याज्जागतीपीठं प्रासादार्धसमुच्छ्रितम् १२४
पीठस्योपरि संस्थाप्य प्रासादं विभजेत्ततः
सर्वतोभद्रसंस्थानं हस्तसंख्या यदा भवेत् १२५
हस्तैः सप्तत्रिंशता तु ज्येष्ठः सार्धे उदाहृतः
मध्यमः सप्तविंशत्या प्रासादः स्यात्कलाधिकैः १२६
कनीयान्पञ्चदशभिः प्रासादः समुदीरितः
तलच्छन्दो यदा ह्येषां तथा चैवोर्ध्वतो गतिम् १२७
ज्येष्ठमध्यकनिष्ठानां तथा सम्यङ्निगद्यते
चतुरश्रीकृते क्षेत्रे शतमूलविभाजिते १२८
न्यसेत्तन्मध्यतो गर्भं चतुर्वर्गपदान्वितम्
गर्भपादेन भित्तिः स्यात्तद्वदेवान्धकारिका १२९
बाह्यभित्तिस्तथवा थैव स्याद्दशशास्युर्द्विभागिका
प्रतिवर्णपदांशेन षोडशेन जलान्तरम् १३०
शेषं भद्रं प्रकर्तव्यं गर्भार्धेन विनिर्गतम्
भागार्धं क्षोभयेत्पार्श्वे निर्गमं च तथाचरेत् १३१

शेषः स्याद्भद्रविस्तारः पञ्चभागायतस्तथा
पीठं तस्यैव कर्तव्यं साधद्व्यसमुच्छ्रितम् १३२
द्विगुणां च तथा जङ्घामुच्छ्रायेणास्य कल्पयेत्
मेखलामर्धभागेन भागेनान्तपत्रकम् १३३
प्रथमा रथिका तत्र कार्या भागत्रयोच्छ्रिता
द्वितीया रथिका या सा सार्धभागेन चोच्छ्रिता १३४
भागे भागेऽन्तरं कार्यमुपर्युपरि चोभयोः
षड्भागान्विस्तृतं कुर्याच्छिखरं सप्तमोच्छ्रितम् १३५
एवं भूमिभिरष्टाभिः कुर्यादेनं विचक्षणः
जलनिर्गमविच्छिन्ना रथाः प्रतिरथास्तथा १३६
चतुर्गुणैः पृथक्सूत्रं पद्मकोशं समालिखेत्
मञ्जरी ललिता कार्या नीलोत्पलदलाकृतिः १३७
ग्रीवा चैकार्धभागेन मलसारकम्
पद्मशीर्षं च कर्तव्यं ग्रीवामानेन धीमता १३८
सार्धभागेन सोष्णीषः पद्मस्योपरिकुम्भकः
सर्वतोभद्र इत्युक्तो रेषानानामेष शेखरः १३९
विधाय सर्वतोभद्रं देवानामालयं शुभम्
लभते परमं लोकं दिवि स्वच्छन्दभाषितम् १४०
सर्वतोभद्रः ।
चतुरश्रीकृते क्षेत्रे दशधा प्रविभाजिते
व्यासपादेन गर्भस्तदर्धादन्धकारिका १४१
जङ्घा स्कन्धश्च तं कर्णं भद्रं चाप्यस्य यद्भवेत्

सर्वतोभद्रवत्सर्वं तद्विधेयं चतुर्दिशम् १४२
तस्य भद्राणि सर्वाणि भित्तिभिः परिवेष्टयेत्
भद्रे भद्रे पुनश्चास्य वर्धमानं निवेशयेत् १४३
पञ्चभागास्तथा सार्धाः शिखरस्योदयो भवेत्
सर्वतोभद्रकाकारा रथिकाश्चात्र कारयेत् १४४
कुर्यात्षडंशा विस्तीर्णशिखरं प्रधोच्छ्रितम्
सर्वतोभद्रसंस्थानादेषां चास्वत्र योजयेत् १४५
ग्रीवा चामलसारं च कुम्भश्चापि तथा भवेत्
प्रासादो नन्दनो नाम कर्तव्यो देवतालयः १४६
कृतेऽस्मिन् नन्दति स्वामी दुरितानि च निर्दहेत्
नन्दनः ।
भक्ते द्वादशधा क्षेत्रे चतुरश्रीकृते ततः १४७
सप्तवर्गपदो गर्भो भित्त्या सह विधीयते
सपादपादिका भित्तिगर्भे कुर्याद्विचक्षणः १४८
बाह्यभित्तिश्च तद्वत्स्यात्तद्वच्चाप्यन्धकारिका
पीठोच्छ्रयस्तथा जङ्घा कर्णेषु रथिकाश्च याः १४९
सर्वतोभद्रकाकारान्मूलकर्णांश्च योजयेत्
एकैकां रथिकां चान्यां विन्यसेत्पक्षयोर्द्वयोः १५०
चतस्रो रथिकाश्चैवं कर्णे कर्णे निवेशयेत्
शेषो भद्रस्य विस्तारः स्वविस्तारार्धनिर्गतः १५१
भूषयेत्सिंहकर्णैश्च भद्रव्यासार्धमुन्नतैः
विन्यसेच्छिखरं तत्र भागैर्विस्तृतमष्टभिः १५२

चतुर्गुणेन सूत्रेण वेणुकोशं समालिखेत्
स्कन्धकोशान्तरं चास्य त्रिभिभागैर्विभाजयेत् १५३
ग्रीवार्धभागिकोत्सेधाभागेनामलसारकः
पद्मशीर्षं तथार्धेन भागेन कलशः स्मृतः १५४
त्रिपादा रथिकास्तिस्त्र उच्छ्रायेण प्रकीर्तिताः
सर्वतोभद्रकाकारो नन्दिशालः प्रकीर्तितः १५५
नन्दिशालः
नन्दिशालस्य संस्थाने तद्रूपे समवस्थिते
तस्य भद्राणि सर्वाणि भित्तिभिः परिवेष्टयेत् १५६
भद्रे भद्रे तस्य तस्य वर्धमानं निवेशयेत्
अर्धषष्ठांस्तथा भागान्स्याद्भद्रशिखरोच्छ्रयः १५७
पीठोच्छ्रायं च जङ्घां च तथास्य शिखरोच्छ्रयम्
नन्दिशालसमाकारं सममेव प्रकल्पयेत् १५८
कार्योऽयं सर्वदेवानां प्रासादो नन्दिवर्धनः
नन्दिवर्धनः ।
नन्दिवर्धनसंस्थानं पूर्ववत्परिकल्पयेत् १५९
उभयोः कर्णयोर्मध्ये ये तत्र रथिके स्थिते
तयोश्चोपरि कर्तव्यं शिखरं लक्षणान्वितम् १६०
षडंशविस्तृतं चैतत्साधषट्कसमुच्छ्रितम्
चतुर्गुणेन सूत्रेण वेणुकोशं समालिखेत् १६१
ग्रीवा चामलसारं च कुम्भकस्याश्रयो भवेत्
कार्यः स सर्वतोभद्रसंस्थान इति निश्चयः १६२

मन्दिरोऽयमिति ख्यातः प्रासादः क्षितिभूषणः
मन्दिरः ।
नन्दिवर्धनसंस्थाने तद्रूपसमवस्थिते १६३
दिक्सूत्रे कर्णसूत्रे च रथिकाष्टकम्
रथिका अपि चैताः स्युर्द्विभागायतविस्तृताः १६४
षड्भागविस्तृतिश्चास्य शेषं शिखरमाचरेत्
उच्छ्रयश्चास्य कर्तव्यो भागानां सार्धसप्तकम् १६५
षड्भागः स्कन्धविस्तारो ग्रीवा चास्य द्विभागिका
रेखा चामलसारं च कलशश्चात्र यो भवेत् १६६
सर्वतोभद्रवत्स स्याच्छ्रीवृक्षोऽयमुदाहृतः
श्रीवृक्षः ।
चतुरश्रीकृते क्षेत्रे चतुर्दशविभाजिते १६७
द्विभागविस्तृताः कर्णा रथिकास्तेषु कारयेत्
उदकान्तरविच्छिन्ना मूलकर्णेषु योजयेत् १६८
शेषं भद्रस्य विस्तारस्तदर्धमपि निर्गमः
सर्वतोभद्रमप्यस्य भद्रे भद्रे विभज्य च १६९
पूर्वैर्गुणैस्तु संयुक्ते चतुर्दिक्षु निवेशयेत्
तस्य गर्भस्तु कर्तव्यः विस्तृतः १७०
सार्धभागप्रमाणः स्याद्भित्तिर्गर्भस्य मध्यतः
बाह्यभित्तिस्तथैवास्य शेषं भ्रमणमाचरेत् १७१
जङ्घाषड्भागमुत्सेधात्पीठं तस्य तदर्धतः
वरण्डीनान्तरं पत्रं भागेनैकेन कारयेत् १७२

रथिकाद्वादशविस्तारानुपर्युपरि योजिता
तिस्रस्तिस्रो निवेशाः स्युः कर्णे कर्णेतथाक्रमम् १७३
प्रथमा रथिकास्तस्य कुर्याद्भागत्रयोच्छ्रिताः
कुर्यादुपर्यन्याः पादपादविवर्जिताः १७४
अष्टभिर्विस्तृतं भागैः सार्धैर्नवभिरुच्छ्रितम्
सर्वतोभद्रकाकारं शिखरं तस्य कारयेत् १७५
प्रासादोऽयं विमानाख्यः प्रख्यातश्चामृतोद्भवः
विमानः
द्विसप्तायामविस्तारं हिमवन्तं विभाजयेत् १७६
चतुर्धा रथिकास्तत्र कर्णे कर्णे निवेशयेत्
द्विभागविस्तृताः सर्वा उपर्युपरि कारयेत् १७७
प्रथमा भूमिका तस्य स्याच्च भागत्रयोच्छ्रिता
पादपादविहीनास्तु क्रमणोपरिभूमयः १७८
नन्दिशालगुणैर्युक्तं शिखरं चात्र कारयेत्
सर्वतोभद्रवन्मध्ये भूमिकाश्च समाचरेत् १७९
द्विभागा रथिकास्तस्य सर्व भागत्रयोच्छ्रिताः
द्वितीयभूमिरथिका भूम्युशयेण कारयेत् १८०
शिखरस्योच्छ्रयः कार्यः सपादव्याससंमितः
अमृतोद्भववज्जङ्घा पीठं चात्र तथा भवेत् १८१
जातिशुद्धो भवत्येष हिमवान् भुवनोत्तमः
हिमवान् ।
हिमाचलस्य संस्थाने तद्रूपे समवस्थिते १८२

तस्य भद्रेषु सर्वेषु वर्धमानं च योजयेत्
भागषट्कप्रविस्तारं तदर्धेन विनिर्गतम् १८३
भागैः सप्तभिरप्यस्य सार्धैः स्याच्छिखरोच्छ्रयः
शिखरस्याग्रतः स्तम्भः सिंहकर्णे विभूषयेत् १८४
दिक्सूत्रैरस्य सर्वेषु क्रियां प्राग्वत्प्रकल्पयेत्
जङ्घोत्सेधश्च कर्णश्च शिखरं चास्य यद्भवेत् १८५
हिमवत्सदृशं सर्वं विधेयं तद्विजानता
हेमकूट इति ख्यातः प्रासादोऽयं जगत्त्रये १८६
एष त्रिमूर्तिनिलयः कार्यो नान्यस्य कस्यचित्
हेमकूटः ।
हिमवत्तुल्यसंस्थानं प्रासादं परिकल्पयेत् १८७
तस्य मध्ये विधातव्यः सर्वतोभद्रसंज्ञितः
वर्जनीयं तु तन्मध्ये वर्धमाननिवेशनम् १८८
ततः स्थानेषु सर्वेषु खण्डरेखा निवेशयेत्
व्यासोच्छ्रितैस्ततः सिंहकर्णैर्भद्रं विभूषयेत् १८९
ऊर्ध्वं च शिखरं तस्य वर्जनीयं विचक्षणैः
द्वे द्वे च रथिके कार्ये सपादद्व्यंशकोच्छ्रिती १९०
तयोश्चोपरि विस्ताराच्छिखरं चतुरश्रकम्
उच्छ्रयः पञ्चभिः सार्धैर्विधेयः शिखरस्य च १९१
दिक्सूत्रेषु च सर्वेषु क्रियामेवं प्रकल्पयेत्
बाह्यरेखा तु जङ्घा च हिमवत्सदृशी स्मृता १९२
कैलासोऽयमिति ख्यातः कर्तव्यः शूलपाणये

कैलासः ।
एतस्यैव यदा भद्रमुच्छ्रितं सिंहकर्णकैः १९३
द्वे द्वे च रथिके तत्र दीयते सुमनोरमे
शेषः शिखरविस्तारः पञ्चभागसमुच्छ्रितः १९४
प्राग्ग्रीवकाश्च भद्रेषु भागभागविनिर्गताः
विस्तारेण चतुर्भागा दिक्षु सर्वास्वयं विधिः १९५
विमानसदृशी चास्य बाह्यलेखा विधीयते
गुणैरेभिस्तदा युक्तः प्रासादः पृथिवीजयः १९६
पृथिवीजयः
भक्ते षोडशभिः क्षेत्रे चतुरश्रे समन्ततः
गर्भोऽष्टवर्गः स्यात्तस्य मध्ये भित्तिर्द्विभागिका १९७
भ्रमणं बाह्यभित्तिश्च तत्समे एव कीर्तिते
कर्णेषु रथिका कार्या सलिलान्तरभूषिता १९८
तत्तुल्यायामविस्तारा रथिकाः स्युस्तथापराः
तद्वत्तृतीयरथिका भद्रं चतुष्पदायतम् १९९
विस्तारार्धेन निष्क्रान्तं क्षोभयेद्वर्धमानतः
वरण्डयन्तरपत्रे च सार्धे भागेन कारयेत् २००
उपर्युपरि भागान् हि हीनाः स्युः क्रमशोभवः
भद्रे रथिकयोर्मध्ये सिंहकर्णो विधीयते २०१
एतस्य चोच्छ्रयो भागैः पञ्चभिः परिकीर्तितः
पार्श्वस्थे सिंहकर्णस्थरथिके ये निवेशते २०२
तयोरुपरि षड्भागं विस्तृतं शिखरं भवेत्

विधेयमुच्छ्रयेणैतत्त्रिभागान् सप्ताथवाधिकान् २०३
पक्षयोरुभयोस्तस्य रथिके तदूर्ध्वतः
सिंहं निवेशयेद्दिक्षु निखिलास्वप्ययं विधिः २०४
मूलकर्णे ततश्चार्धं शिखरं दशविस्तृतम्
एकादशोच्छ्रितं कार्यं क्रमवृत्त्या मनोरमम् २०५
चतुर्गुणेन सूत्रेण वेणुकोशं ततो लिखेत्
पूर्वोक्ता सातरंभागेरमुष्या विभजेत्त्रिभिः २०६
ग्रीवार्धभागमुत्सेधादण्डकं भागमुच्छ्रितम्
पद्मशीर्षं तथार्धेन कलशश्चांशकोदयः २०७
देवानामालयः स स्यादिन्द्रनीलोऽयमीरितः
इन्द्रनीलः
एतस्यैव यदोर्ध्वस्थं शिखरं क्रियतेऽन्यथा २०८
चतुर्थी रथिका चास्य दीयतेऽतिमनोरमा
पूर्वोक्तेन विधानेन पादं वि---वर्जिता २०९
शिखरस्याष्टविस्तारो नव भागास्तथोच्छ्रयः
इन्द्रनीलस्य सदृशं शेषमन्यद्विधीयते २१०
महानीलोऽयमाख्यातः प्रासादस्त्रिदशालयः
महानीलः ।
इन्द्रनीलस्य संस्थाने दिक्सूत्रेषु समन्ततः २११
सर्वतोभद्रशिखरं हित्वानिवेशयेत्
विधिरेष समस्तासु ककुप्सु प्रविधीयते २१२
भद्रेषु वर्धमानस्य विन्यासं परिवर्जयेत्

व्यासोच्छ्रितैः सिंहकर्णैर्भद्रमस्य विभूषयेत् २१३
महानीलस्य सदृशं सर्वमस्य प्रकल्पयेत्
इन्द्रगोपनिभाकारः प्रासादो भूधरः स्मृतः २१४
सुरेश्वरस्य कर्तव्यो नान्येषां कथमप्यसौ
भूधरः
भूधरस्य तु संस्थाने तद्रूपे समवस्थिते २१५
भद्रे भद्रे पुनः प्राज्ञो वर्धमानं निवेशयेत्
चतुर्भागमितव्यासं सार्धचतुःसमुच्छ्रितम् २१६
रत्नकूटः समाख्यातः प्रासादः श्रीपतेरयम्
रत्नकूटः
चतुरश्रीकृते क्षेत्रे विंशत्या भाजितेंऽशकैः २१७
कुर्याद्विभागविस्तारा रथिकाः पञ्च कर्णगाः
पञ्चोपरि पुनः पञ्च दद्यादेकां तदूर्ध्वतः २१८
प्रथमा भूमिका चास्य कार्या भागत्रयोच्छ्रिता
पादपादविहीनास्तु क्रमेणापरभूमयः २१९
भद्रकर्णान्तरस्थे द्वे रथिके ये तदूर्ध्वतः
शिखरं दशविस्तारं कुर्यात्सार्धदशोच्छ्रितम् २२०
मूलकर्णानुसारेण शिखरं तत्र यद्भवेत्
तस्य द्वादशविस्तारं त्रयोदशसमुच्छ्रितम् २२१
भद्रं विभूषयेत्पत्रैः सिंहकर्णैर्मनोरमैः
पञ्चव्यासेन सूत्रेण वेत्रकोशं समालिखेत् २२२
स्कन्धकोशान्तरं चास्य त्रिभिर्भागैर्विभाजयेत्

पद्मशीर्षं तथा ग्रीवां सार्धभागेन कारयेत् २२३
कुर्याद्भागेन भागेन कुम्भं चामलसारकम्
नवभागोच्छ्रितां जङ्घां तदर्धखरपिण्डकाम् २२४
वरण्डयन्तरपत्रं च कुर्याद्भागद्वयेन च
वैदूर्योऽयं समाख्यातः प्रासादो दानवद्विषः २२५
वैडूर्यः
एतस्यैव यदा भद्रे भद्रे स्याद्वर्धमानकः
पद्मरागस्तथैव स्याद्कार्योऽयं पद्मरागतः २२६
पद्मरागः ।
पद्मरागस्य भद्रेषु वर्धमानं विवर्जयेत्
भद्रस्य पार्श्वद्वितये प्रदद्याद्रथिकाद्वयम् २२७
व्यासोच्छ्रायैश्च भद्राणि सिंहकर्णैर्विभूषयेत्
यदन्यदस्य तत्सर्वं पद्मरागसमं भवेत् २२८
वज्रकोऽयं समाखातो विधेयस्त्रिपुरद्विषः
वज्रकः ।
वज्रकस्यैव भद्रेषु पूर्ववद्रथिकास्थितौ २२९
षड्भागविस्तृतं तत्र शिखरं विनिवेशयेत्
सप्तभागसमुत्सेधं दिक्षु सर्वास्वयं विधिः २३०
मुकुटोज्ज्वल इत्युक्तः प्रासादोऽयं सुरालयः
मुकुटोज्ज्वलः ।
अस्यैव तु यदा स्थाने भद्रे भद्रे चतुर्दिशम् २३१
सिंहकर्णं परित्यज्य वर्धमानो विधीयते

ऊर्ध्वाभिवतृतीयायाः सप्तोच्छ्रायषडायताः २३२
ऐरावतोऽयं कर्तव्यः प्रासादस्त्रिदशेसतिः
ऐरावतः ।
ऐरावतस्य संस्थाने प्रासादे पूर्ववत्स्थिते २३३
वर्धमानं विहायोर्ध्वे यदा सिंहो निवेश्यते
शिखराणि च चत्वारि दिक्षु सर्वासु वर्जयेत् २३४
क्षेत्रायार्विस्तारं गर्भवेश्म निवेशयेत्
चतुर्भागायतं भद्रं निर्गमेण विभाजितम् २३५
भद्रत्रयं प्रयुञ्जीत भित्तिभागेन वेष्टितम्
द्वारोच्छ्रयं सविस्ताराद्धरार्धेन समुच्छ्रयः २३६
गवाक्षास्तत्र कर्तव्यो यथा द्वारं लङ्घ्यते
मध्ये चतुष्किका कार्या द्विभागायामविस्तृता २३७
प्रासादो राजसंसोऽयं ब्रह्मादीनां प्रशस्यते
राजहंसः ।
राजहंसस्य संस्थाने तृतीये रथिकोपरि २३८
यदारशिखरं सप्तसमुच्छ्रायं षडायतम्
स्यात्तदा गरुडो नाम गरुडध्वजवल्लभः २३९
प्रासादः सर्व --- कारयितुस्तथा
गरुडः ।
अस्यैव मूलशिखरं त्यक्त्वा भागद्वयोन्मितम् २४०
क्रियन्ते रथिकाः पूर्णे तदूर्ध्वं मूलमञ्जरी
क्रियते द्वादशोच्छ्राये दशभागायता यदा २४१

तदा स्याद्वृषभौ नाम वृषभध्वजवल्लभः
वृषभः ।
सतार्धहस्तविस्तारं ज्येष्ठं मेरुं प्रकल्पयेत् २४२
मध्यमे हस्तसंख्या स्यात् षट्द्विकालाधिकः
दशत्रिगुता संख्या प्रोक्ता कनीयसि २४३
चतुरश्रीकृते क्षेत्रे भागविंशति भाजिते
विस्तारार्धं भवेद्गर्भगृहं भित्त्या समन्वितम् २४४
भागप्रमितविस्तारा गर्भभित्तिर्विधीयते
सार्धद्विभागान्या भित्तिस्तद्वदेवान्धकारिका २४५
द्विभागा रथिका कार्या कर्णे कर्णे विजानता
चतुर्भागा रथा भद्रेष्वेतदर्धेन निर्गता २४६
भद्रकर्णान्तयोः कार्या यदाष्टांशजलान्तरम्
भद्राणां रथिकाः कार्याः पार्श्वयोरुभयोस्तथा २४७
रथिकानां च सर्वासां स्वभद्रं विस्तरार्धतः
शृङ्गं भद्रं यथैवैकं तथा सर्वाणि कारयेत् २४८
दिक्सूत्रेषु सर्वेषु वर्धमानं निवेशयेत्
अष्टभागोच्छ्रिता जङ्घा खुरपिण्डं तदर्धतः २४९
ये खलान्तरपत्रे च स्यातां भागद्वयोद्गते
प्रथमा रथिकास्तत्र त्रयोच्छ्रिताः २५०
पदपादविहीनाः स्युः क्रमेणोपरिभूमयः
दिक्सूत्रेषु सकर्णेषु क्रिया प्राग्वद्विधीयते २५१
शिखरं दशविस्तारं भागैर्द्वा दशकोच्छ्रितम्

चतुर्गुणेन सूत्रेण वेणुकोशं समालिखेत् २५२
स्कन्धकोशान्तरं चास्य त्रिभिर्भागैर्विभाजयेत्
ग्रीवा च पद्मशीर्षं च तावद्भागार्धमुच्छ्रयात् २५३
भागमामालसारं स्यात् कलशो भागमेव च
सातश्रृङ्गावृतो मेरुरयं प्रासाद ईरितः २५४
प्रदक्षिणीकृते तस्या तत्पुरयं कनकाद्रिणा
शैलेष्टकामये तत्स्यात्कृतेऽस्मिन्नधिकं ततः २५५
मेरुः ।
नन्दिशालस्य संस्थाने तद्रूपे समवस्थिते
द्वितीया रथिका कार्या भागद्वयविनिर्गता २५६
शेषो भद्रस्य विस्तारः स्वविस्तारोऽर्धनिर्गतः
अष्टांशायामविस्तारः स्वविस्तारोर्धनिर्गतः २५७
अष्टांशायामविस्तारः शाला स्यात्पुरतः पुनः
तस्या मध्ये भवेद्गर्भो द्विभागायामविस्तरः २५८
गर्भभित्तिर्भवेच्चास्य भागेनैकेन निर्गता
बाह्यभित्तिस्तथैव स्यात्तत्समा चान्धकारिका २५९
द्विभागा रथिकास्तस्य सलिलान्तरभूषिताः
शेषो भद्रस्य विस्तारो भागेनैकेन निर्गमः २६०
गङ्घोत्सेधं पीठं च विदध्यान्नन्दिसारवत्
रथिकास्तत्र कर्तव्याः कर्ण भागत्रयोच्छ्रिताः २६१
षडंशान् विस्तृतः कुर्याच्छिखरं सप्तचोच्छ्रितम्
कार्या केसरिवच्चास्य रेखा सामलसारिका २६२

एभिर्गुणैर्युतं चैनं पार्श्वयोरपि योजयेत्
प्रासादोऽयं लताख्यः स्यात्कर्तव्यो दानवद्विषः २६३
लताख्यः ।
अग्रेतनं यदा पश्चान्न्यस्येत सरिणं तदा
भवेत्त्रिपुष्कराख्योऽयं प्रासादस्त्रिदशालयः २६४
त्रिपुष्कराख्यः ।
नन्दिशालस्य सर्वासु दिक्षुयं केसरी यदा
स्यात्तदा पञ्चवक्त्रोऽसौ विधेयः पद्मजन्मनः २६५
पञ्चवक्त्रः ।
यदा च पञ्चवक्त्रस्य मध्ये गर्भा न दीयते
बाह्यलेखादिकं प्राग्वद्दिक्षु सर्वासु कल्पते २६६
चतुःस्तम्भसमा कार्या मध्ये चास्य चतुष्किका
वितानं चोपरि न्यस्येन्मध्यतस्तस्य भूषणम् २६७
हरो हिरण्यगर्भश्च हरिर्दिनकरस्तथा
एते चतुर्मुखे स्थाप्या नापरेषां भवत्ययम् २६८
चतुर्मुखः ।
चतुःषष्टिकरे कुर्यात्क्षेत्रे मानैकविंशतिः
सप्तवर्गपदो गर्भो भित्त्या सह विधीयते २६९
स्याद्गर्भभित्तिर्भागेन भागेनैवान्धकारिका
षड्भागं कर्णविस्तारं दशधा प्रविभाजयेत् २७०
षड्भिर्भागैर्भवेदस्य गर्भो भित्त्या समन्वितः
बाह्या भित्तिर्भवेद्भागाद्भागश्चैवान्धकारिका २७१

द्विभागं कर्णवैपुल्यमुदकान्तरभूषितम्
शेषो भद्रस्य विस्तारश्चतुर्थांशविनिर्गतः २७२
द्वोभयेदर्धभागे तु तदर्धेन जलान्तरम्
मत्तवारणकैर्विद्यात्स्तम्भैरुपरि शोभिताः २७३
रथिकैका त्रिभागेन पुनः सार्धद्विभागिका
तासां परस्परक्षेपो भागो भागो विधीयते २७४
शेषं शिखरविस्तारः सार्धषट्कं तदुच्छ्रयः
पृथक्सूत्रैस्त्रिगुणितैर्वेणुकोशं समालिखेत् २७५
स्कन्धकोशान्तरं भागैश्चतुर्भिस्तस्य भाजयेत्
ग्रीवार्धभागमुत्सेधो भागेनामलसारकम् २७६
पद्मशीर्षस्तथा भागं कलशो भागसंमितः
अर्धभागसमोत्सेधं कारयेद्बीजपूरकम् २७७
सर्वकर्णेषु कर्तव्याः क्रियाश्चैवं विचक्षणैः
दिक्सूत्रबाह्यभागेषु वलभीं संन्निवेशयेत् २७८
निर्गमे पञ्चभागः स्यात्तिर्यक्प्रक्षिप्तभागिकाः
अस्या द्विभागिको गर्भो मध्ये भागत्रयोच्छ्रितः २७९
भगार्धभागं भित्तिः स्यात्तत्समा चान्धकारिका
तस्याश्चाग्रे विधातव्यः षड्दारुकसमन्वितम् २८०
एकैकां रथिकां सार्धभागां कर्णेषु योजयेत्
शेषं भद्रस्य विस्तारो भागः स्यादस्य निर्गमः २८१
एवं भद्रं विभागं स्यात्स्तम्भद्वयसमन्वितम्
वलभावर्तयोर्मध्ये भागमेकं च विस्तृतम् २८२

तत्रोदकान्तरं कुर्याद्गुणद्वरविभूषितम्
नवभागोच्छ्रिता जङ्घा पीठमस्य तदर्धतः २८३
मेखलान्तरपत्रे च कुर्याद्भागद्वयोन्मिते
रथिका स्याद्द्विभागा च ततः सार्धैकभागिका २८४
शेषं शिखरविस्तारः पञ्चांशं शिखरोच्छ्रयः
उपर्युपरि कर्तव्यं सर्वतोभद्रकद्वयम् २८५
द्वे द्वे च सर्वतोभद्रे कर्णे कर्णे निवेशयेत्
दिकसूत्रेषु समस्तेषु क्रियामेवं प्रकल्पयेत् २८६
विस्तार शिखरस्याष्टौ भागात्स्यार्धसमुच्छ्रयः
पञ्चव्यासेन सूत्रेण --- २८७
वेणुकोशान्तरं चास्य त्रिभिर्भागैर्विभाजयेत्
ग्रीवा च पद्मशीर्षं च भागेन स्यादिदं द्वयम् २८८
प्रत्येकं भागिकौ कार्यौ कलशामलसारकौ
तवात्मकोऽयं कथितः प्रासादस्त्रिदशालयः २८९
नवात्मकः ।
विन्यसेद्दीशमैशान्यामाग्नेय्यां पुरुषोत्तमम्
ब्रह्माणं वायुदिग्भागे नैर्ऋते च दिवाकरम् २९०
मध्यगर्भे शिवः स्थाप्यः प्राच्यामपि पुरन्दरः
धर्मोयमां प्रतीच्यां च वरुणः सोम उत्तरे २९१
शक्तिसम्पन्नः पूर्वायतनसन्निधौ
प्रासादं कारयेद्यत्नात्तदाद्यं नैव पीडयेत् २९२
उत्कृष्टमपकृष्टं वा यत्र स्थाने निवेशयेत्

प्रासादं तत्र कर्माणि यानि तान्यभिदध्महे २९३
सम्मुखं नैव कुर्वीत हीनं वा यदि वाधिकम्
वेदभागास्तं तव सश्रितस्तंस्या स्यात्प्रासादोऽतिविगर्हितः २९४
अन्योन्यं दक्षिणे वेधो हीन इत्यभिधीयते
वेधभागामृते मृत्युं हीने हानिं विनिर्दिशेत् २९५
हरो हिरण्यगर्भश्च हरिर्दिनकरस्तथा
एते देवाः समाख्याताः परस्परविरोधिनः २९६
एता न दक्षिणापार्श्वे स्थापयेत्पुरमाश्रितान्
वामतो नान्यदेवानां नापि हीनालयेषु च २९७
नैतेषां दक्षिणे कुर्यादन्येषामपि चालयम्
हीनं वा यदि वाहीनं यदीच्छेच्छ्रिय आत्मनः २९८
तेषामुत्तरतो नूनं यदि च्छेद्देवतालयम्
प्रासादपदमानेन नवषट्त्रिंशदान्तरे २९९
प्रासादं कारयेदन्यं मर्मवेधविवर्जितान्
पुरतः पृष्ठतो वापि पार्श्वयोरुभयोरपि ३००
महामर्माणि चत्वारि कुर्याद्यत्ताघतोत्तरे
क्षणमध्येषु सर्वेषु द्रव्यमेकं न दापयेत् ३०१
तदा युग्म --- वेधमर्म विवर्जयेत्
क्षणमध्ये यदा द्रव्यमेकं मोहात्प्रदीयते ३०२
कर्तृकारकयोः पीडा भवेत्पूजा न तादृशी
तस्मात्सर्वप्रयत्नेन स्थपतिः कारकोऽपि च ३०३
मर्माणि वर्जयेद्यत्नात्प्रासादस्य समीपतः

अथ मर्मवियुक्तो यः प्रासादं कर्तुमिच्छति ३०४
प्रासादतः सदा तेन विधेयं महदन्तरम्
प्रासादां तुत्तरं कवः कार्यं फलपुष्पैर्विभूषितम् ३०५
य एतैर्लक्षणैर्युक्तं कारयेद्देवतालयम्
धनधान्यमवाप्नोति मोदते सुखमेव च ३०६
हरो हिरण्यगर्भश्च हरिर्दिनकरोऽपि च
एते देवाः समाख्याता देवनामपि पूजिताः ३०७
पृथक्त्वेन च कर्तव्या एकरूपसमन्विताः
अष्टबाहुश्चतुर्वक्त्रः कुण्डली मुकुटोज्ज्वलः ३०८
हारकेयूरसंयुक्तो रत्नमालोपशोभितः
ऋष्यागतपुरः कार्यः पद्महस्तो दिवाकरः ३०९
शङ्खचक्रधरो देवो वामे च मधुसूदनः
कण्ठाभरणसंयुक्तो मूर्धा च मुकुटोज्ज्वलः ३१०
ब्रह्मा पश्चिमतः कार्यो बृहज्जठरमण्डलः
कुण्डिकामक्षसूत्रं च दधत्कूर्चविभूषितः ३११
प्रासादा रुचकादयोऽत्र ललिताः प्राग्विंशतिः पञ्चयुक्
तावन्तश्च ततोऽनु केसरिमुखाः सन्धारकाः कीर्तिताः
मिश्राख्या नव पञ्च चानुकथितास्तद्वन्निगूढाख्यया
षष्टिः स्याच्चतुरन्वितेति विदिता सैषा भवेत्सम्पदे ३१२
इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि
वास्तुशास्त्रे रुचकादिचतुःषष्टिप्रासादको नाम षट्पञ्चाशोऽध्यायः

अथ मेर्वादिविंशिका नाम सप्तपञ्चाशोऽध्यायः

अथान्यान् कथयिष्यामः समासात्सूत्रमलक्षणान्
पञ्चाशतमिहोत्कृष्टान् प्रासादाञ्श्रीधरादिकान् १
श्रीधरो हेमकूटश्च सुभद्रो रिपुकेसरी
पुष्पो विजयभद्रश्च श्रीनिवासः सुदर्शनः २
भगवत्याः प्रिया ह्येते तथा कुसुमशेखरः
देवस्य शम्भोर्दयितः प्रासादः सुरसुन्दरः ३
नन्द्यावर्तश्च पूर्णश्च सिद्धार्थः सिरववर्धनः
त्रैलोक्यभूषणश्चेति पद्मसु ब्रह्मणः प्रियः ४
पद्मबाहुर्विशालश्च तथान्यः कमलोद्भवः
हंसध्वज इति ख्याताः प्रासादा ब्रह्मणः प्रियाः ५
लक्ष्मीधराद्मः प्रासादो वस्ततौ मधुवद्विषः
महावज्रो रतितनुः सिद्धकामस्तथापरः ६
पञ्चचामरसंज्ञश्च नन्दिघोषाख्य एव च
अनुकीर्णः सुप्रभश्च सुरानन्दोऽथ हर्षणः ७
दुर्धरो दुर्जयश्चैव त्रिकूटो नवशेखरः
पुण्डरीकः सुनाभश्च महेन्द्रः शिखिशेखरः ८
वराठः सुमुखः शुद्धश्चत्वारिंशादितीरिताः
मिश्रकास्तु दश प्रोक्ता मिथः कर्मप्रभेदतः ९
विज्ञेयो नन्दसंज्ञश्च महाघोषस्तथापरः
वृद्धिरामाभिधानश्च प्रासादोऽन्यो वसुन्धरः १०
मुद्गकोऽथ बृहच्छालस्तथैव च सुधाधरः

संवराख्यः शुकनिभस्तथा सर्वाङ्गसुन्दरः ११
पञ्चाशदेवं कथिता प्रासादानां यथाक्रमम्
इदानीं लक्ष्मतो ब्रूमः श्रीधरं सर्वकामिकम् १२
वल्लभं सर्वदेवानां पुण्यानां कारणं परम्
चतुरश्रीकृते क्षेत्रे चतुर्विंशतिभाजिते १३
द्वादशाखिलकोणेषु कर्णशृङ्गाणि योजयेत्
विस्तारं च चतुर्भागमेकैकस्य विनिर्दिशेत् १४
परस्परं च निष्कोऽसा द्विपदोऽत्र विधीयते
द्व्यंशानि कर्णिभद्राणि निर्गमश्चार्धभागिकः १५
कर्णकर्णपदेन्यस्यात्पदार्धाधेत विस्तृतः
वारिमग्नो विधातव्यो मध्यगः दशभागिकम्
निर्गमश्च त्रिभिर्भागैः समसूत्रसमाहितः १७
द्विपादा बाह्यभित्तिस्तु द्विपादा चान्धकारिका
भवेच्छतपदः कन्दो गर्भः षड्विंशदंशकः १८
द्विपदः कर्णकन्दश्च प्रत्यङ्गं पदिकं स्मृतम्
निर्गतं चार्धभागेन चतुर्दिक्षु व्यवस्थितम् १९
भागेन निर्गता कार्या शाला चास्य चतुष्पदा
अभ्यन्तरं बाह्यभित्तेः कन्दस्य च तथा बहिः २०
उभयोरन्तरं कार्यं विस्तारात्पञ्चभागिकम्
अन्तरालं च कुर्वीत शृङ्गं तच्च चतुष्पदम् २१
विभागस्तादृशोऽस्य स्याद्बाह्यशृङ्गस्य यादृशः
भित्तिकन्दान्तराले च कार्यं षड्दारुकं बुधैः २२

इतिकातोरणयुतं चतुर्दिक्षु मनोरमम्
पुरतो मण्डपं कुर्यात्सर्वलक्षणसंयुतम् २३
भागैः पञ्चाशता कुर्यादस्य मानमिहोर्ध्वगम्
एषां मध्ये सविंशत्या प्रविधेयास्तुलोदयाः २४
तेषां मध्येंऽशकैः षड्भिर्वेदीबन्धो विधीयते
नवधा भाजिते तत्र वेदीबन्धे समैः पदैः २५
कुम्भश्चतुष्पदस्तत्र द्विपदस्तु मसूरकः
भागेनान्तरपत्रं स्यान्मेखला द्विपदाः स्मृताः २६
मूलभागास्तु ये तैः स्याज्जङ्घा दशभिरुच्छ्रिताः
द्विपदा मेखला प्रोक्ता द्व्यंशे चान्तरपत्रके २७
अधस्तादूर्ध्वपद्मस्य तलपट्टस्य चोपरि
षोडशांशा विधातव्यास्तत्रैतत् कर्म वार्चयेत् २८
भागेन रूपधारा स्यात्सार्धा सार्धा च सेनकम्
वेदी भागत्रयोत्सेधा द्वेनासनपट्टकः २९
सोर्ध्वभागेन कर्तव्यमूर्ध्वचन्द्रावलोकनम्
आसनस्योर्ध्वतः स्तम्भाः सार्धपञ्चपदाः स्मृताः ३०
भागेनोच्छालकं कार्यं शीर्षं सार्धपदोन्नतम्
पट्टः स्यादिद्वपदोत्सेधस्त्रिपदश्छाद्यविस्तरः ३१
लम्बनं तु तदर्धेन यथाशोभमथापि वा
ऊर्ध्वनानतरः पत्रस्य कक्प्यतेऽप्ययथाक्रमम्
कोणेषु कूटः कर्तव्यो विविधैः कर्मसम्भ्रमैः
विस्तारः स्याच्चतुर्भागस्तेषां षड्भाग उच्छ्रयः ३३

कर्णा घण्टासमायुक्ताः कूटमानं विधीयते
तत्र मृत्युक्रमात् कुर्यादेकैकं तदूर्ध्वतः ३४
तेषां च तुल्यता कार्या विस्तारादुच्छ्रयादपि
चत्वार एककर्णे स्युरेवं सर्वेषु षोडश ३५
सिंहकर्णस्य विस्तारामानं स्यादष्टभागिकम्
षड्भागस्तु तथोत्सेधो रथिकैश्च विभूषणम् ३६
गुणद्वारसमायुक्तः शूरसेनाभिधानकः
सिंहकर्णो विधातव्यः सर्वकर्मसमाकुलः ३७
सिंहकर्णोदयादूर्ध्वमुरोमञ्जरिका भवेत्
विस्तारादष्टभागासावुच्छ्रायान्नवभागिका ३८
लतापञ्चकसंयुक्ता मञ्जरी स्यात्सुशोभिता
ग्रीवा पादोनभागा स्यादण्डकं भागमुच्छ्रितम् ३९
चन्द्रिका चार्धभागेन कलशश्चैव भागिकः
कूटमूर्ध्वे द्वितीया स्यादुरोमञ्जरिका तथा ४०
भागात्तद्वादशविस्तीर्णा तु सार्धा न त्रिदशावाच्छ्रिता
भागमेकं भवेद्ग्रीवा सार्धभागेन चाण्डकम् ४१
कपरिं चार्धभागेन कलशश्च द्विभागिकः
उरःशिखरकान्यष्टौ भवन्त्येवं चतुर्दशम् ४२
द्वितीयकूटकस्योर्ध्वे कर्तव्या मूलमञ्जरी
भागषोडशविस्तारा पदाष्टादशकोदयः ४३
स्कन्धमानं हि सर्वेषां यथोक्तं शतवास्तुनि
ग्रीवा सार्धपदांशा स्यादण्डकं द्विपदान्वितम् ४४

कङ्कतीफलतुल्यानि कुर्यात् सर्वाण्डकानि च
द्विपदं चण्डिकायुग्मं कार्यं सामलसारकम् ४५
तस्योपरि स्यात्कलशो वर्तुलस्त्रिपदोच्छ्रितः
तोरणैर्मकरैः पत्रैः साग्रैश्च सवरालकैः ४६
हस्तिमुण्डैः समाकीर्णमधरोगणभूषितम्
ईदृशं श्रीधरं कुर्यात्सर्वालङ्कारभूषितम् ४७
श्रीधरं कारयेद्यस्तु कित्त्यर्थमपि मानवः
इहैव लभते सौख्यममुत्रेन्द्रत्वमाप्नुयात् ४८
भोगान् भुक्त्वा पुमान् स्वर्गं नीयते च परे पदे
सर्वपापविनिर्मुक्तः शान्तश्च स्यान्न संशयः ४९
श्रीधरः ।
हेमकूटमथ ब्रूमः शुभलक्षणसंयुतम्
सर्वविद्याधरस्थानमाश्रयः स पिनाकिनः ५०
चतुरश्रक्षे क्षेत्रे षड्विंशत्यंशभाजिते
तत्र स्युः षड्पदाः कर्णाः शाला द्वादशभागिकाः ५१
निर्गताश्च त्रिभिर्भागैर्भवन्त्येताश्चतुर्दिशम्
अष्टभागायता भूयो निर्गमश्च त्रिभिः पदैः ५२
चतुःस्तम्भाश्चतुष्पार्श्वा दिक्षु सर्वास्वयं विधिः
कर्णशालान्तरं कार्यं पदेनैकेन विस्तृतम् ५३
प्रविष्टं तत्पदेनैकं तदेवात्र जलान्तरम्
पदेन कर्णे कोणः स्यात्प्रत्यङ्गे पदविस्तृते ५४
निर्गते चार्धभागेन सममाने मनोरमे

द्विपदा रथिका भद्रे निर्गतार्धपदेन सा ५५
चतुकर्णेषु कर्तव्यं मानषेमेवंधुनु धीमता
बाह्यभित्तेस्तु विस्तारस्त्रिपदः परिकीर्तितः ५६
चतुःषष्टिपदो गर्भस्तद्भित्तिस्त्रिपदा भवेत्
त्रिपदं कर्णमानं स्याद्वारिमार्गेण सम्युतम् ५७
पदार्धं वारिमार्गः स्यात्पदमस्य प्रवेशकः
शालाष्टपदविस्तीर्णा भागार्धेन विनिर्गता ५८
चतुर्भागायता भद्रं पुनर्भागार्धनिर्गतम्
तलन्यासौ हेमकूटे विभक्तपदनिश्चयात् ५९
अस्याग्रे मण्डपं कुर्यान्महान्तं गुणपूजितम्
ऊर्ध्वं हेमकूटस्य द्विगुणं स्यात्कलाधिकम् ६०
अधस्तादासनं तस्य सप्तभागसमुच्छ्रितम्
भागेनैकेन खुरके न मध्ये पूर्वमानयोः ६१
अत ऊर्ध्वं पुनर्ब्रूमः पादमानमनुक्रमात्
सप्तभागोन्नतं कुर्याद्वेदीबन्धे सुशोभनम् ६२
तस्यार्धं कुम्मकस्यार्धं भागेन कलशोन्नतिः
पदाधेनान्तरं पत्रं यथाशोभं विधीयते ६३
सार्धं पदं पुनः प्रोक्ता कपोताली सुशोभना
दशभागोच्छ्रिता जङ्घा कर्तव्यातिसुलक्षणा ६४
अस्योपरि विधातव्यं भरणौ द्विपदोच्छ्रितम्
मेखलान्तरपत्रे तु विधीयेते पदत्रये ६५
अधस्तान्मेखलायास्तु खुरकस्य तथोपरि

एकोनविंशतिं भागानन्तरं संप्रचक्षते ६६
कर्मप्रमाणमेतस्य पृथङ्ग्ध्येऽभिधीयते
द्विपदं राजासेनं स्याद्वेदा---चतुष्पदा ६७
भवत्यासनपट्टस्य कल्पना भागमानतः
सार्धं भागद्वयं कार्यमूर्ध्वं चन्द्रावलोकनम् ६८
स्तम्भानासनपट्टार्धेन युञ्जयादष्टभागिकान्
भरणस्तम्भशीर्षे च प्रत्येकं पदके स्मृते ६९
द्विपदश्चार्धपट्टः स्याच्छाद्यकेन सुशोभितः
त्रिपदं छाद्यकं तत्र विस्तारेण प्रकीर्तितम् ७०
एतन्मानं समाख्यातमलिन्देषु चतुर्दिशम्
ऊर्ध्वमन्तरपत्रस्य कथयामो यथाक्रमम् ७१
षट्पदे कर्णविस्तारा सप्तांशा कर्णमञ्जरी
ग्रीवामर्धपदं कुर्यात्पदमेकं तथाण्डकम् ७२
अर्धांशा चन्द्रिका च स्यादेकांशः कलशोच्छ्रयः
अस्योरोमञ्जरी कार्या विस्तारेण चतुष्पदा ७३
ग्रीवाण्डके विधातव्यं भागेनार्धेन कुम्भकः
सिंहकर्णस्तु कर्तव्यो द्विपदोऽस्यैव मध्यतः ७४
इत्थं पञ्चाण्डकाः कर्णे हेमकूटेषु कीरिताः
अष्टांशविस्तृतं कुर्यादुदयेन च षट्पदम् ७५
अलिन्दस्योर्ध्वभागस्तं सिंहकर्णं मनोरमम्
सिंहकर्णे द्विभाग्स्थो द्वादशांशकविस्तृताम् ७६
उरोमञ्जरिकां कुर्यात् त्रयोदशपदोच्छ्रिताम्

सप्तांशविस्तृतः स्कन्धो ग्रीवा च पदमुच्छ्रिता ७७
अरडकं सार्धभागेन चन्द्रिकाधपदा स्मृता
आकाशलिङ्गं कुर्वीत द्विपदं सुमनोरमम् ७८
विस्तारो मूलमञ्जर्या भागविंशतिसंमितः
उच्छायोऽस्यैकविंशत्या स्कन्धो द्वादशभागिकः ७९
पञ्चभौमस्तु कर्तव्यो यथा चारुः स जायते
प्रथमा भूमिका तत्र पञ्चभागा विधीयते ८०
परा परार्धभागेन न्यूना न्यूना विधीयते
स्कन्धमानं विधातव्यं पदेनैकेन चोन्नतम् ८१
विभज्य दशधा कुर्याल्लताः पञ्चातिसुन्दरीः
हेमकूटस्य कर्णेषु प्रत्यङ्गे नरकिन्नराः ८२
मन्ये तिलककूटाश्च कर्तव्यास्तु निरन्तराः
ईदृशी मञ्जरीहेमे विधेया कूटनिर्गता ८३
ग्रीवा सार्धपदा प्रोक्तो विस्तारादष्टभागिका
अरडकं द्विपदोत्सेधमेकादशपदायतम् ८४
दण्डिका साधभागो च्चाविस्तारा नवभागिका
त्रिपदः कलशः कार्यो विस्तारेणोच्छ्रयेण च ८५
एवंविधं विधत्ते यो हेमकूटं मनोरमम्
स क्रीडति पुमान्स्वर्गे यावत्क्रीडा पिनाकिनः ८६
हेमकूटः
सुभद्राख्यमथ ब्रूमः प्रासादं भद्रभद्रकम्
सुभद्रोऽयमतः प्रोक्तो भद्रे भद्रे यतोऽन्वितः ८७

चतुरश्रीकृते क्षेत्रे चतुर्दशविभाजिते
गर्भः षोडशभिर्भागैः स्कन्दः षट्पदविस्तृतः ८८
भित्तिः स्यात्पदविंशत्या तत्र कन्दसमाः सृताः
कर्णाः प्रत्यङ्गकोन्येषां प्रत्येकं पदविस्तरात् ८९
द्व्यंशो मध्यगविस्तार उभयोर्निर्गतः पदम्
द्व्यंशः सरसि विस्तार आक्रान्तपदनिर्गमैः ९०
द्विपदा बाह्यभित्तिः स्याद्विस्तारेण सुशोभिता
चतुष्पदायतः कर्णो भद्रं तस्य द्विभागिकम् ९१
निर्गमोऽस्यार्धभागेन स्यादेवं सुन्दरं कृम्
कर्णे कोणासु पदिका दिक्षु सर्वासु शोभनाः ९२
निगूढविस्तरः कार्यः सार्धं पञ्चपदोन्मितः
द्विपदो निर्गमस्तत्र सर्वदिक्षु विधीयते ९३
सलिलान्तरकं कुर्यादन्तरे कर्णभद्रयोः
प्रविष्टं पदमानेन पदपादेन विस्तृतम् ९४
ऊर्ध्वमानमथैतस्य यथावदभिधीयते
राजपीठं विधातव्यं भागार्धेनातिसुन्दरम् ९५
ऊर्ध्वभागेन खुरकपीठं स्याच्चतुरंशकम्
द्विपदः कुम्भकोत्सेधः पादोनं सोमसूरकम् ९६
भागार्धेनान्तरं पत्रं पादोनांशेन मेखलाः
षड्भागमुच्छ्रिता जङ्घा भागेन ग्रासपट्टिकाः ९७
मेखलान्तरपत्रे च प्रत्येकं पदके स्मृते
पट्टादधरखुरादूर्ध्वं भागा सैकां दशान्तरम् ९८

राजासनं पदं प्रोक्तमुत्सेधं नातिशोभनम्
अर्धेनात्यधिके कार्ये द्वे पदे वेदिकोच्छ्रयः ९९
पदार्धमासनं कार्यं द्व्यंशं चन्द्रावलोकनम्
ऊर्ध्वमासनपट्टस्य स्तम्भः पञ्चपदान्वितः १००
पञ्चपदान्वितः ।
भरणं स्तम्भशीर्षं च पदेन स्यात्समुच्छ्रितम्
छाद्यकेनावृतं कुर्यात्पदेनैकेन पट्टकम् १०१
द्विपदस्थः प्रश्छाद्य विस्तारः पदेनैकेन लम्बनम्
ऊर्ध्वमन्तरपत्रस्य कथायामो यथास्थितम् १०२
चतुष्पदेषु कर्णेषु ये कर्णाः पदिकाः स्थिताः
तेषु षिखरकाः कार्या विस्तारोच्छ्रायतः पदम् १०३
कलशोनं तथा ग्रीवा पदार्धेन समुच्छ्रिता
द्विपदः सिंहकर्णस्तु विस्तारोच्छ्रायतः समः १०४
शिखिरोऽध विधातव्या त्रिपदी कर्णमञ्जरी
ऊर्ध्वं च त्रिपदा स स्याद्द्विपदा स्कन्धविस्तृतिः १०५
सार्छभागेन कर्तव्यं सग्रीवं कलशाण्डकम्
सिंहप्रासादवत्कर्णा विधेयाः शुभलक्षणाः १०६
मूलमानेन विस्तीर्णा निर्गूढस्योपरि स्थिताः
द्वितीयश्च तृतीयश्च तदूर्ध्वं च समुच्छ्रितः १०७
कर्णस्थकलशादूर्ध्वं कर्तव्या मूलमञ्जरी
विस्तारो दशभागांशानुच्छ्रायो द्वादशांशकः १०८
लताभिः पञ्चभिर्युक्ता विचित्रैश्चापि कर्मभिः

षट्पदोऽस्य स्मृतः स्कन्धो ग्रीवा चास्य चतुष्पदा १०९
विस्तारेण समाख्याता पादोनं पदमुच्छ्रिता
ग्रण्डकां साङ्घ्रिभागेन षड्भागविस्तृतम् ११०
पादोनं चन्द्रिकाभागं कलशश्च द्विभागिकः
प्रासादं ये सुभद्राख्यं कारयन्ति सुलक्षणम् १११
कल्पकोटिसहस्राणि भद्रं तेषां शिवाग्रतः
सुभद्रः ।
सर्वपापक्षयकरस्त्रिषु लोकेषु कीर्तितः ११२
रिपुकेसरिसंज्ञोऽयं प्रासादः परिकीर्त्यते
चतुरश्रीकृते क्षेत्रे भागविंशतिभाजिते ११३
द्विपदा बाह्यभित्तिः स्यान्मध्यभित्तिश्च तावता
भ्रमणी द्विपदा कार्या विस्तारात्सर्वदिग्रताः ११४
गर्भोऽष्टविस्तृतः कर्णः कन्दसार्धभागिकः
चतुर्भागायतं भद्रं कुर्याद्भागेन निर्गतम् ११५
रथकोऽसौ समुद्दिष्टो विधातव्यश्चतुर्दिशम्
पार्श्वयोश्च प्रतिरथौ कार्यौ सार्धपदायतौ ११६
पदार्धेन विनिष्क्रान्तौ --- विविधेष्वपि
कर्णायामश्चतुर्भागो द्विपदं कर्णभद्रकम् ११७
पदार्धेन विनिष्क्रान्तं बाह्यकर्णे व्यवस्थितम्
पद पादेन विस्तीर्णं प्रविष्टं पदमात्रकम् ११८
कार्यं जलान्तरं मध्ये कर्णस्य तिलकस्य च
द्व्यंशस्तिलकविस्तारः पदेनैकेन निर्गमः ११९

सुवर्णिताः स्युस्तिलका भद्रकोणव्यवस्थिताः
अष्टभागं भवेद्भद्रं पदत्रयविनिर्गतम् १२०
चतसृष्वपि तद्दिक्षु कर्तव्यं स्तम्भभूषितम्
ऊर्ध्वमानमथ ब्रूमः प्रतिपत्रं सुखावहम् १२१
ऊर्ध्वप्रमाणं द्विगुणं कर्तव्यं द्विकलाधिकम्
भागैरेकोनविंशत्या मध्ये कार्यस्तलोदयः १२२
एभ्यो मध्याद्विधातव्या वेदीबन्धाः सुशोभनाः
द्विपदः कुम्भकः सार्धं पदं तु कलशो भवेत् १२३
मेखलान्तरपत्रे तु कार्ये सार्धपदोन्नते
नवभागोन्नता जङ्घा द्विपदा रूपपट्टिका १२४
मेखलान्तरपत्रे तु विदधीत पदद्वयम्
मध्यं स्यात् षोडशपदं खुरकेऽस्य च १२५
राजसेना तथा वेदी तद्वदासनपट्टकम्
पदैः पञ्चभिरेतानिन् विदध्यादूर्ध्वमानतः १२६
चन्द्रावलोकनं कुर्यादिद्वपदं भागमानतः
उपर्यासनपट्टस्य स्तम्भः स्यात्सप्तभागिकः १२७
भरणं स्तम्भशीर्षं च द्विपदं चोर्ध्वमानतः
द्विपदः पट्टपिण्डः स्यात्त्रिपदश्छाद्यविस्तरः १२८
ऊर्ध्वमन्तरपत्रस्य साम्प्रतं परिकीर्त्यते
चतुष्पदः कर्णशृङ्गमायामोच्छ्रायतः --- १२९
ग्रीवाण्डकं च भागेन चन्द्रिकार्धपदेन च
कलशश्चार्धभागेन कर्तव्योऽत्र न संशयः १३०

अस्योर्ध्वतः प्रकर्तव्या द्वितीया कर्णमञ्जरी
त्रिपदायामविस्तारा ग्रीवाण्डकलशा पदम् १३१
भद्रकर्णाश्रिते द्वयंशो विस्तारस्तिलके स्मृतः
उच्छ्रयस्त्रिपदस्तस्य द्वितीयः स्यात्तदूर्ध्वतः १३२
सार्धद्विपद उच्छ्रायो विस्तारो द्विपदः स्मृतः
सप्तभागोन्नतं तद्वद्विस्तारादष्टभागिकम् १३३
सिंहकर्णौ प्रकुर्वीत सुसूत्रमानपूर्वकम्
उरोमञ्जरिका कार्या द्वितीया तिलकोर्ध्वतः १३४
अर्धभागायता मूले नवभागमितोच्छ्रया
तस्यास्तु स्कन्धविस्तारो भागैः स्यादर्धपञ्चमैः १३५
ग्रीवार्धभागमुत्सेधाद्भागेनामूलसारकम्
चन्द्रिका चार्धभागेन कलशो भागमुच्छ्रितः १३६
द्वितीया कर्णशृङ्गस्य स्यादूर्ध्वे मूलमञ्जरी
भागाद्वादशविस्तारा कलयाभ्यधिकोर्ध्वतः १३७
स्कन्धःसप्तपदश प्रोक्तो ग्रीवा भागसमुछिता
अण्डस्य द्वयंश उत्सेधो विस्तारः सप्तभागिकः १३८
चन्द्रिकैकेन भागेन कलशस्तु द्विभागिकः
तलानागरिका कार्यानात्यन्तक्तनान्यत् कर्मात्र योजयेत्
जेस्मिन् विजयमिच्छन्ति भोगान् सुविपुलानपि
सर्वपापप्रणाशं च कार्यो वा रिपुकेसरी १४०
रिपुकेसरी
इदानीं प्रेषकं नाम प्रासादमभिदध्महे

निर्मितं धनदस्यार्थे पूर्वं विश्वकर्मणा १४१
चतुरश्रीकृते क्षेत्रे चतुर्दशविभाजिते
विभज्यस्त्रिपदाकीर्णं चत्वारोऽपि विदिग्रताः १४२
कर्णमकर्णगर्भाद्य सूत्रं तेन समानि च
रक्तानि दत्त्वा सूत्राणि तदग्रद्वितयः स्मृताः १४३
सूत्रेण चतुरः कर्णान् दिक्स्थानुत्पातयेत् ततः
चत्वारोऽन्ये पुनः कर्णाः संसिद्धाः सर्वमेव हि १४४
एवमष्टदला कर्णान् वृत्तानेवं प्रकल्पयेत्
भागप्रवेशविस्तारं कर्णान्ते च जलान्तरम् १४५
शाला स्यात् षड्पदायामा त्रिपदोऽस्याश्च निर्गमः
द्विपदा बाह्यभित्तिः स्यात् षड्पदा कन्दविस्तृतिः १४६
कन्दगर्भस्थितं तन्त्रं भ्रामयेत्कर्णकंवत
उत्पद्यते ततो वृत्तं समसूत्रं सुशोभनम् १४७
कुर्वीत तस्य मध्ये तु कन्दं षोडशपत्रकम्
भित्तिकन्दान्तराले यच्छेषं स्याद्भमन्तिका १४८
पुष्पकस्य तलन्यासः पञ्चपुष्पाकृतिर्भवत्
इदानीमूर्ध्वमस्यैव कथ्यते मानपूर्वकम् १४९
एकोनत्रिंशदन्यूर्ध्वं सा स्युः पदान् पूर्वं यथाक्रमम्
अतो बहिर्विधातव्यः पीठबन्धः पदत्रयम् १५०
जयो कुम्भः सपादांशः पादोनः स्यान्मसूरकः
अर्धेनान्तरपत्रं स्यात्कपोताली च तत्समा १५१
माला विद्याधरी काया पुष्पहस्तैरलङ्कृता

पदद्वादशकोत्सेधः स्यात्तुलोदयः १५२
अस्य मध्ये विधातव्यो वेदीबन्धस्त्रिभागिकः
पदाधं खुरकं कुर्याद्भागेनैकेन कुम्भकम् १५३
मसूरकं पदार्धेन मेखला पदमानतः
षड्भागमुच्छ्रिता जङ्घा पुष्पके परिकीर्तिता १५४
वरालग्रासमकरैः पुष्पविद्याधरैरपि
सूक्ष्मकर्णसमा कर्णा चास्य जङ्घा विधीयते १५५
भागेनैकेन भरणं भागेनैकेन पट्टिका
मेखलान्तरपत्रं च भागेनैकेन चोच्छ्रितम् १५६
ऊर्ध्वतस्तलपट्टस्य पट्टस्योर्ध्वस्य मस्तकम्
भागैकादशका तावद्विधेया कर्णचर्चिता १५७
भागेन राजसेनं स्याद्द्विभागो वेदिकोच्छ्रिताः
भवेदासनपट्टश्च भागार्धेन समुन्नतः १५८
चन्द्रावलोकनं कुर्याद्भागिकं त्र्यंशलम्बितम्
आसनस्योर्ध्वतः कुर्यात्स्तम्भं पञ्चपदं शुभम् १५९
हीरग्रहणकं शीर्षं द्वयं सार्धैकभागतः
गुलापट्टश्च भागेन मल्लकाद्यं द्विभागिकम् १६०
भागेन लम्बितं तत्स्यात्सुसृष्टं सुमनोरमम्
एतस्योपरिभागेन कर्तव्या छेदपट्टिका १६१
पदेनैकेन चास्योर्ध्वं कपोताल्यन्तरच्छदे
भागषट्केन विस्तीर्णे पञ्चभागसमुन्नतं १६२
शूरसेनं प्रकुर्वीत मध्यवर्तालितोरणम्

वरालग्रासमकरैर्वराहगजसुण्डकैः १६३
एवमादिभिराकीर्णमलिदस्योपरिस्थितम्
कोणं कुर्यात्पुष्पकूटं पुष्पकर्मनिरन्तरम् १६४
चतस्रो भूमयोऽस्य स्युताश्च न्यूनाः पुरः पुरः
प्रथमा भूमिका --- स्यात्परा परा १६५
आद्यस्य कोणकूटस्य विस्तारस्त्रिपदः स्मृतः
परेषां पुनरेषं स्यात्क्रमादूनोऽङ्घ्रिणाङ्घ्रिणा १६६
बाह्यात्परस्परं क्षेपमंशेनांशेन योजयेत्
मध्ये लतास्य कर्तव्या भागषट्केन विस्तृता १६७
स्कन्धे द्विपदविस्तारां विदध्यान्मध्यमञ्जरीम्
षड्गुणं सूत्रमादाय लतारेखां समालिखेत् १६८
आलेखं च ततः कुर्यात्सुशुद्धं भागसुन्दरम्
भागेन वेदिकोत्सेधः षड्भागः स्कन्धविस्तरैः १६९
भागेनैकेन च ग्रीवा द्वाभ्यां सामलसारकम्
विशालपद्मसदृशं विधेयं पद्मशीर्षकम् १७०
चन्द्रिका पद्मपत्राभा द्वयमेतत्पदोच्छ्रितम्
त्र्यंशः स्यात्कलशोर्मृत्या जनकैरवकुड्मलः १७१
एवंविधं विधत्ते यः पुष्पकं सुमनोरमम्
तुष्येत्तस्य धनाधीशः शुभैर्याति व्रजेच्च सः १७२
पुष्पकः ।
ब्रूमो विजयभद्रस्य सुभद्रस्य च लक्षणम्
वल्लभः षण्मुखस्यायं बहुपुण्यविधायकः १७३

चतुरश्रीकृते क्षेत्रे साष्टविंशतिभाजिते
कुर्यादष्टपदं कर्णभद्रं वास्य चतुष्पदम् १७४
पदेनैकेन निर्यातं सर्वकोणेष्वयं विधिः
उदकान्तरकं कार्यं पदक्लृप्तं पदायतम् १७५
दशभागायतं भद्रं कार्यं त्रिपदनिर्गतम्
दिक्षु विधेयः स्यान्मुखतो मुखमण्डपः १७६
त्रिपदा बाह्यतो भित्तिस्त्रिपदा चान्धकारिका
मध्ये प्रासादमानं तु कर्तव्यं षोडशांशकम् १७७
कर्णा चतुष्पदा कन्दे भद्राण्येषां पदद्वयम्
निष्क्रान्तानि पदेन स्युः कन्दकर्णाश्रितानि हि १७८
षट्पदं मध्यमङ्गं स्याद्द्विपदश्चास्य निर्गमः
कर्णशालान्तरं यत्स्यात् विधीयते १७९
द्विपदा कन्दभित्तिः स्याद्गर्भो द्वादशभागिकः
ऊर्ध्वमानमिह प्रोक्तं द्विगुणं द्विकलाधिकम् १८०
चतुर्विंशतिभागान्ते तुलोच्छ्रायस्य मध्यतः
ऊर्ध्वमानं तु यत्प्रोक्तं ग्रीवाण्डाद्यं ततो बहिः १८१
कार्यं तुलोदयं स्यांच वेदीबन्धोंऽशसप्तकम्
त्रिभागं कुम्भकः सूत्रं सार्धभागो मसूरकः १८२
भागेनान्तरपत्रं स्यात्सार्धभागेन मेखला
जङ्घा द्वादशभिर्भागैर्द्वर्यंशा वा गलपट्टिका १८३
अन्धारिका च भागार्धं सार्धभागा वरण्डिका
भागेनान्तरपत्रं स्याद्रूपकर्मसमाकुलम् १८४

ऊर्ध्वाधःपट्टयोर्मध्ये भागो भागैकविंशतिः
अतो मध्याद्विधातव्यं द्विपदं राजसेनकम् १८५
वेदी चतुष्पदा प्रोक्ता भागेनासनपट्टकः
पदद्वयेन सार्धेन कार्यं चन्द्रावलोकनम् १८६
नवभागोछ्रितः स्तम्भः पत्रकर्मसमाकुलः
भागेनैकेन भरणं शीर्षकं च द्विभागिकम् १८७
उच्छालकमुभौ भागौ हारग्रहणमासिकम्
द्वयंशा पट्टोच्छ्रितिर्भागचतुष्का बाह्यविस्तृतिः १८८
द्वयंशास्यालम्बनोर्ध्वे तु रूपकं चक पट्टिकाः
सा च भागत्रयेण स्यात्सुश्लिष्टा साधुचित्रिता १८९
कर्णकर्णेषु शृङ्गाणां विस्तृतिर्द्विपदा भवेत्
ऊर्ध्वमानं त्रिभागं स्याद्ग्रीवाण्डकलशैः सहः १९०
मध्ये चतुष्पदा कर्मादुरोमञ्जरिका भवेत्
उच्छ्रायः षट्पदस्तस्या ग्रीवाण्डं द्विपदोच्छ्रितम् १९१
भागेन कलशोत्सेधः स्यादेवं कर्णनिर्मितः
कर्णा --- पिण्डिका कार्या भद्रदेशे तथोच्छ्रितः १९२
कर्तव्यः सप्तभिर्भागैः सिंहकर्णः सुचर्चितः
कर्णद्वये तथा शृङ्गे तयोरूर्ध्वं चतुर्दिशम् १९३
उरोमञ्जरिकायामादुदया दश पञ्च च
तस्याश्चाष्टपदः कन्दो ग्रीवा भागसमुन्नता १९४
द्विभागमण्डकं कार्यं चन्द्रिका पदमुच्छ्रिता
त्रिपदाः कलशास्तेषां मध्यगान्तरमञ्जरी १९५

तला पञ्चकसंयुक्ता चरटक्रिययान्विता
भागविंशतिविस्तीर्णा कर्तव्या मूलमञ्जरी १९६
द्वाविंशतिसमुत्सेधा स्कन्धो द्वादशभागिकः
मध्या लता सू रसेनकर्मरूपसमाकुला १९७
ग्रीवा सार्धपदोत्सेधा कार्या द्विपदमण्डकम्
भागेन चण्डिकां कुर्यात्कलशं तु चतुष्पदम् १९८
एकोनत्रिंशदण्डोऽयं प्रासादः शुभलक्षणः
षट्पदं पीठमाख्यातं चरितं पूर्वकर्मवत् १९९
आरोग्यं पुत्रलाभश्च भवेद्विजयकारिणाम्
तेषां तुष्यति षड्वक्त्रो भक्त्या ये विदधत्यमुम् २००
विजयभद्रः ।
अधुना श्रीनिवासाख्यः प्रासादः सम्यगुच्यते
तृप्त्यर्थमेव क्रियते जयश्रीस्तत्र तिष्ठति २०१
चतुरश्रीकृते क्षेत्रे भक्तेऽष्टादशभिः पदैः
अन्धारिका च भित्तेश्च पदे द्वे द्वे यथाक्रमम् २०२
गर्भश्च षट्पदः कार्यः श्रीनिवासस्य सुन्दरः
कन्दे स्युर्द्विपदाः कर्णा भागेन सलिलान्तरम् २०३
भद्रं चतुष्पदं कार्यं पदेनैकेन निर्गतम्
बाह्याः स्युस्त्रिपदाः कर्णा भद्रैश्च द्विपदैर्युताः २०४
भद्रं चतुर्थकर्णेषु पदेनैकेन निर्गतम्
कोणकोणाश्च कर्तव्याः पदस्यार्धं समायताः २०५
पदेनाम्बुधरः कार्यः प्रवेशाद्विस्तृतेरपि

विस्तारात् षट्पदं भद्रं पदद्वितयनिर्गमम् २०६
नीरस्यालान्तरे कार्या तिलका द्व्यंशविस्तृताः
पदेनैकेन निष्क्रान्ताः शोभिताश्चारुकर्मणा २०७
ऊर्ध्वमानमथ ब्रूमः श्रीनिवासे यथाक्रमम्
खुरकस्योच्छ्रितिः पीठे पादोनं पदमिष्यते २०८
कुर्यात्सपादोनांशेन जाडयकुम्भ समुच्छ्रितम्
भागेनान्तरपत्रे तु भागेनैकेन मेखलाम् २०९
पीठोत्सेधश्चतुर्भागः श्रीनिवासे भवेदिति
वेदीबन्धस्य खुरको भागार्धेन समुन्नतः २१०
कुम्भकः सार्धभागेन तदर्धेन म---
---पञ्जरात्
त्रिभागेन तु भागस्य अष्टशृङ्गस्य पत्तकः
नष्टशृङ्गस्य शृङ्गस्य चान्तरे सलिलान्तरम् ॥
अन्योन्यं शृङ्गनिष्कासो भागेनैकेन शस्यते
दशभागायतं भद्रं चतुर्थांशेन निर्गम ॥
एवमेष तलच्छन्दः कथितः सुरसुन्दरे
ऊर्वमानमथ ब्रूमो भागशुद्धया यथाक्रमम् ॥
पीठादारभ्य विस्तारो द्विगुणा स्यात्समुन्नतिः
उपपीठेऽप्यलंकुर्याद्भागमेकं समुन्नतम् ॥
पदेन पादहीनेन द्वारसमुन्नतिः
उच्छ्रितिर्जाडयकुम्भस्य सार्धभागा विधीयते ॥
कलशोत्तरपत्रे च पादहीनपदोन्नते

अस्यादूर्ध्वं तु कर्तव्या पदार्धं ग्रासपट्टिका ॥
आयपीठोच्छदा प्रोक्ता मूलभूतोभिवास्तुनः
खुरकश्च पदार्धेन सार्धभागे कुम्भपूरकः ॥
भागेनैकेन कलशः समवृत्तोऽतिसुन्दरः
भागं सपादं कुर्वीत मेखलान्तरपत्रके ॥
षड्भागेनु च्छ्रिता जङ्घा भागार्धं ग्रासपट्टिका
कर्णे चैकेन भागेन भागार्धं कुणपो भवेत्
भागेन हीरकं कुर्याद्यथा शोभा प्रजायते
मेखलान्तरपत्रे च सार्धभागेन कारयेत्
ऊर्ध्वतः पदयोर्मध्ये स्यात्सार्धद्वादशांशकम्
तन्मध्ये सार्धभागं तु राजसेनं सपट्टकम् ॥
द्वौ भागौ वेदिका भागस्यार्धमासनपट्टकः
भागं चन्द्रावलोकं स्यात् स्तम्भमासनमूर्धनि ॥
निवेशयेत्पञ्चभागं भरणं भागिकं ततः
भागमेकं समुच्छ्रायां शीर्षकं द्विगुणायतम् ॥
पट्टस्य कुर्यादुत्सेधं भागमर्धसमन्वितम्
सार्धभागद्वयं बाह्यं तद्रूपं दूतावलं छिवितम् ॥
द्वौ भागौ छाद्यकस्योर्ध्वे कार्या वासनपट्टिका
विराजमाना सा कार्या रूपग्रासवरालकैः ॥
मेखलान्तरपत्रेषु तु भागाद्रूपसमन्विते
भागद्वयेन कर्तव्या द्वितीया मेखला बुधैः ॥
कूटान्यतः परं कुर्यात्कर्मयुक्तानि सर्वतः

कूटेषु कुर्यात्प्रत्येकं सिंहकुम्भसमन्वितम् ॥
उरोमञ्जरिका तानि भवत्येव यथाक्रमम्
अष्टाशडकत्रयान्तेषु षडशडं स्याच्चतुष्टयम्
चतुरशडं द्वयं कृत्वा त्वेवं कर्णे विदुर्बुधाः
नव कुशडानि तुल्यानि विस्तारेण पदद्वयम्
साधं भवति प्रत्येकं सार्धमुच्चैः पदद्वयम्
एवं निकर्त एकैकं स्यात्तत्पदं वांशदशडकम् ॥
सिंहकर्णः षडुच्छ्रायो भद्रे स्यात्प्लवविस्तृतिः
द्वितीयश्चानुदन्तश्चा शोभितश्चारुकर्मणा ॥
तृतीयो द्विपदः कार्यः सिंहकर्णो मनोरमः
विस्तारो मूलमञ्जर्याश्चतुर्दशपदो भवेत्
भागसप्तदशोच्चे तु मातृभिः पद्मकोशवत्
स्कन्धश्चाष्टपदः प्रोक्तो ग्रीवा सार्धपदोच्छ्रिता ॥
द्विपदश्चाशडकोत्सेधश्चन्द्रिकार्धपदोन्नतः
कलशं त्रिपदं प्राहुर्मातुलिङ्गस्य मुद्भवम् ॥
मध्ये तु मूलमञ्जर्याः कुर्वीत शिखरत्रयम्
सुरेखं सुप्रसन्नं च सर्वदेशिविभूषितम् ॥
षट्पञ्चाशं भवेदस्मिन्नशडकानां शतद्वयम्
एवं श्रेष्ठोऽयमाख्यातः प्रासादोऽशडकमानतः ॥
सप्तशतमेकान्नसप्तत्या युतं स्यान्मध्यमे पुनः
एकोत्तरं शतं प्राहुरशडकानां कनीयसाम् ॥
मन्दारकुसुमाकाराशयानि सुरसुन्दरे

कुर्यादेनं प्रासादमीदृशं सुरसुन्दरम् ॥
स वैरिञ्चं युगशतं सूर्यलोके महीयते
सुरसुन्दरः ।
नन्द्यावर्तमथ ब्रूमः प्रासादं नृपवृद्धिदम् ॥
भूषितं मनानागकन्याभिर्वल्लभं पृथिवीभुजाम्
चतुरश्रीकृते क्षेत्रे दशधा प्रविभाजिते ॥
पदद्वयमिदं यत्र नादाय ब्रह्मणः पदात्
वृत्तं समालिखेद्गर्भा वस्मैलं च तुलं भवेत् ॥
भागेन च तुलो भित्तिर्भागेन स्याद्भ्रमन्तिका
भागेन बाह्यभित्तिः स्यात्पदपञ्चकवर्जिता ॥
कन्दे विभागं कुर्वीत पुष्पशेखरकं ततः
द्विपदा बाह्यतः कर्णा विधातव्यास्तु वर्तुलाः ॥
यथागात्रं विधातव्याः स्वस्तिकाकृतयश्च ते
चत्वारो रथिकाकन्दो कोणे कर्णे चतुष्टयम् ॥
पञ्चभागायतं भद्रं सार्धभागविनिर्गमम्
भद्रान्तपातिनी कुर्यात्प---ङ्गे पदसंमिते ॥
शेषं भद्रं तु कर्तव्यं विस्तारेण त्रिभागिकम्
भागस्यार्धेन विस्तीर्णं तथा भागप्रवेशकम् ॥
एतत्प्रमाणं कर्तव्यमिह प्राज्ञैर्जलान्तरम्
तलच्छन्दानुगं भद्रं नन्द्यावर्त्तं यथाक्रमम् ॥
ऊर्ध्वमानमथ ब्रूमो नन्द्यावर्तं यथाक्रमम्
सार्धभागद्वयोच्छ्रायामासनं तस्य ऊर्ध्वतः ॥

कार्यतुलोदयस्य मध्ये भागैस्तथाष्टभिः
तुलोदयस्य मध्ये स्याद्वेदीबन्धो द्विभागिके ॥
भागिकः कुम्भकोसेन मेखलाकलशान्वितः
चतुर्भागा भवेज्जङ्घा भागिकं भरणं भवेत् ॥
मेखलान्तरपत्रे तु भागेनैकेन कल्पयेत्
पादेन राजसेनं स्याद्वद्वत्तच पट्टतः ॥
वेदी साष्टपदोत्सेधा भागपादेन चासनम्
भागार्धेन नतं कुर्याद्भागं पञ्चवलोकत ॥
पादोनत्रिपदः स्तम्भः पल्लवैरुपशोभितः
हीरग्रहणशीर्षं च कुर्याद्भागसमुछ्रिति ॥
पट्टमेकपदोत्सेधं छाद्यकंद्विपदायतम्
भागेन कुर्यादुपरि पट्टिकां चारुकर्मणाम् ॥
अंशांस्त्रीनुच्छ्रितः सिंहकर्णः स्याच्चतुरायतः
भूषितः स्वरसे --- न स च कार्योऽतिशोभनः ॥
विस्तारादि्द्वपदे शृङ्गे सार्धंभागद्वयोच्छ्रिते
अस्योर्ध्वमन्यशृङ्गं स्यात्सदृशोच्छपरिस्तृति
प्रत्यङ्गस्तु वङ्गेषु च कूटानि सार्धांशोच्छ्रायवन्ति च
द्वितीयः सिंहकर्णः स्यात्सिंहकर्णस्य मस्तके ॥
ततो शृङ्गं तृतीयः स्याच्चतुर्थस्तस्य चोपरि
षडभागविस्तृता कर्ण कूटस्था मूलमञ्जरी ॥
सप्तभागोच्छ्रिता च स्याट्स्कन्धस्यच्च शोच्छ्रितिः
स्यादुरोमञ्जरी मूलमञ्जर्या मध्यसंश्रया ॥

भागैश्चतुर्भिर्विस्तारः षड्भिश्चास्याः समुच्छ्रितिः
कलशाण्डकसंयुक्ता कर्णाभ्यन्तरमञ्जरी ॥
स्यादण्डकैकविंशत्या नन्द्यावर्तः सुलक्षणः
भक्त्या ये कारयन्त्येनं नद्यावर्तमनुत्तमम् ॥
विमानं शुभमारुह्य शक्रलोकं व्रजन्ति ते
नन्द्यावर्तः ।
प्रासादमथ वक्ष्यामः पूर्णं पूरितवाञ्छितम् ॥
वन्दितैः किन्नरैर्यक्षैर्मनुष्यपितृवल्लभम्
चतुरश्रीकृते क्षेत्रे दशभागविभाजिते ॥
विस्तार द्विपदो गर्भः कार्या भित्तिस्तु भागिकः
द्विपदं कन्दभद्रं च निर्गमोऽस्यार्धभागिकः ॥
शोभना दिषु सर्वासु द्विपदा च भ्रमन्तिका
पदिका बाह्यभित्तिस्तु द्विपदा कर्णविस्तृतिः ॥
आयत्या चतुरो भागावण्डभित्तेर्विनिर्गमा
भद्रं सुशोभनं तस्या द्विधातव्यं द्विभागिकम् ॥
पर्णस्तु पदिका पक्षभद्रं भागार्धनिर्गतम्
जलान्तरं तु भागार्धमायामक्षेपयोः समम् ॥
चतुर्भागो वलस्यास्य गर्भो भित्तिस्तु भागिकी
यामायुर्वित्तगोस्त्रीणां वलभी कीर्तिकारयेत् ॥
पूर्वतः कारयेद्द्वारं चतुर्गर्भेऽत्र मन्दिरे
ऊर्ध्वमानं तु वक्ष्यामः प्रासादस्यास्य सम्प्रति ॥
पीठं द्विभागिकं कार्यं वेदीबन्धो द्विभागिकः

जङ्घा पदचतुष्कं च शोभिता रूपकर्मणा ॥
पदद्वयं तु कर्तव्यं सातपत्रकम्
कलशाण्डकयुक्तानामुच्छ्रायस्त्रिपदो बुधैः ॥
कर्तव्यः कर्णशृङ्गाणां सर्वेषामपि मानतः
चतुष्पदोच्छ्रा वलभी घण्टाकलशसंयुता ॥
मल्लच्छाद्यत्रयं कुर्यात्कर्णशृङ्गस्य चोपरि
युक्तमन्तरपत्रेण भागोच्छ्रायं पृथक्पृथक् ॥
भागेनैकेन घण्टा स्याद्भद्राभ्यां कलशाण्डके
समूलकलशे कर्णे सूत्रं सम्पातयेद्बुधः ॥
मल्लच्छाद्यं विधातव्यं सूत्रेणैकेन लाञ्छितम्
प्रासादमेवं पूर्णायुर्यः कुर्याद्भक्तिमानिमम् ॥
सप्तकामः --- पुरुषः सर्वलोके महीयते
पूर्णः ।
सिद्धार्थमथ वक्ष्यामः सर्वकामार्थसिद्धिकम् ॥
कामाः सिध्यन्ति यत्कर्तुरिहलोके परत्र च
चतुरश्रे समे क्षेत्रे विभक्ते दशभिः पदैः ॥
कुर्वीत षट्पदं गर्भं --- चास्य चतुष्पदम्
भागेनैकेन रमणीं बाह्यभित्तिं च भागिकीम् ॥
कुर्वीत द्विपदान् कर्णाञ्शालां षड्भिः पदैर्बुधैः
तदूर्ध्वं कर्णशृङ्गाश्च यथाशोभं प्रकल्पयेत् ॥
त्रिपदं निर्गमं तस्याश्चतुष्कीश्च चतुर्दिशम्
मध्ये बहिश्च कुर्वीत तस्या द्वारचतुष्टयम् ॥

उन्नतं भागविंशत्या मानमस्योर्ध्वतो भवेत्
त्रिपदः पीठबन्धः स्याद् द्विगुणोच्छ्रायबाह्यतः ॥
सार्धं भागद्वयं कार्यो वेदिबन्धस्तु शोभनः
अर्धकुम्भेकमर्दे च मेखलां समसूरकः ॥
जङ्घा सार्धचतुर्भागा कार्योच्छ्रायेण शोभना
मेखलान्तरपत्रे च भागेनैकेन कारयेत् ॥
खुरका मेखला यावत्सप्तभागान्तरं भवेत्
भागाभ्यां राजसेनं च कुर्याद्विर्दीं च सासनाम् ॥
त्रिभागं स्तम्भमुत्सेधाद्भागस्यार्धेन हीरकम्
भागार्धं स्तम्भशीर्षं स्याद्भागः पट्टस्य चोन्नतिः ॥
सूर्यच्छाद्यो द्विभागः स्याद्भागेनैकेन लम्बना
शृङ्गोत्सेधस्त्रिभागश्च कलशाण्डकसंयुतम् ॥
चतुर्भागोन्नतः सिंहकर्णः षड्भागविस्तृतः
कुर्वीत शृङ्गयोरूर्ध्वं शोभनां मूलमञ्जरीम् ॥
अष्टभागप्रविस्तीर्णां नवभागसमुच्छ्रित
स्कन्धः पञ्चपदो ज्ञेयो ग्रीवा चार्धपदोच्छ्रिता ॥
अण्डकं भागमात्रं स्यादूर्ध्वं भागेन चन्द्रिका
वर्तुलः समविस्तारः कलशस्तु द्विभागिकः ॥
भद्रे वराटकाश्चेह कर्तव्या हेमकूटवत्
यः कुर्यात्कारयेद्यस्तु सिद्धाथं सर्वकामदम् ॥
स भवेत्सर्वकामाप्तिः शिवलोके च शाश्वतः
सिद्धार्थः ।

अथाभिधीयते सर्वपापघ्नः शङ्खवर्धनः ॥
आलयः सर्वदेवानां प्रासादो भूभृतां प्रियः
चतुरश्रे समे क्षेत्रे गर्भाकर्णे विशोधितम् ॥
कारयेत्पश्चात्सर्वकोणेषु लाञ्छितम्
विस्तारार्धे भवेद्गर्भो यच्छेषं तेन भर्तिवः ॥
द्विगुणं कारयेदूर्ध्वं भागविंशतिभाजिते
तुलोदयोऽष्टभागः स्याद्द्वादशांशा च मञ्जरी ॥
कुम्भकं कलशं द्वाभ्यां कपोतालीं च कल्पयेत्
पञ्चभागोच्छ्रिता जङ्घा मध्येऽस्या ग्रासपट्टिका ॥
मेखलान्तरपत्रे च भागेनैकेन कारयेत्
भागार्धं कारयेत्प्राज्ञः संख्या वर्तकमञ्जरीम् ॥
शङ्खवर्तककूटांश्च विदधीत विस्तरात्
शतवास्तुविभक्तेऽस्मिन् या मानानुसारतः ॥
स्कन्धो विधेयो ग्रीवा च भगार्धेन समुच्छ्रिता
चन्द्रिका शिरसा सार्धं कार्या सार्धपदोन्नता ॥
द्विपदः कलशोच्छ्रायः कर्तव्यः शङ्खवर्धने
गर्भश्चाच्छादनं कुर्यात्संख्या वर्तवितानकम् ॥
यः शङ्खवर्धनं कुर्यात्स भुनक्ति चिरं महीम्
वशगा चास्य सततं भवेल्लक्ष्मीजलाञ्जलिः ॥
शङ्खवर्धनः ।
त्रैलोक्यभूषणं ब्रूमो वन्दितं त्रिदशैरपि
आश्रयं सर्वदेवानां पापस्य च विनाशनम् ॥

त्रिंशद्धस्तः कनीयान् स्यान्मध्यमस्त्रिदशाधिकः
पञ्चाशद्धस्त उत्कृष्टस्त्रिविधं हस्तसंख्यया ॥
चतुरश्रे समे क्षेत्रे त्रिंशद्भक्तोपकल्पयेत्
दशभागायतं गर्भं कन्दं द्विगुणसप्तकम् ॥
चतुष्पदं कन्दकर्तं भद्रं चास्य द्विभागिकम्
कुर्वीत षट्पदां शालां भागेनैकेन निर्गताम् ॥
अन्धोऽर्धद्विपदे चास्य द्विपदाश्चात्र भित्तयः
शृङ्गमेकं भवेन्मध्ये विस्तारेण चतुष्पदम्
मध्ये शृङ्गस्य चान्तः --- षड्दारुकं भवेत्
द्व्यंशा द्वितीया रमणी बाह्यभित्तिर्द्विभागिका ॥
कर्णशृङ्गद्वयं कार्यं विस्तारेण चतुष्पदम्
द्वादशांशमिता शाला निर्गमोऽस्याः पदत्रयम् ॥
प्राक्कर्णशृङ्गमष्टांस्तिस्यादुर्जनफलोपमम्
---द्विशृङ्गभागेन विनिष्क्रान्तं चतुष्पदम् ॥
द्विपदं तस्य भद्रं च निर्गमो द्विपदं भवेत्
शृङ्गयोरुभयोर्मध्ये पदार्धं पत्तभद्रकम् ॥
पदार्धं वारिमार्गश्च प्रक्षेपः पदसंमितः
ऊर्ध्वमानमथ ब्रूमः षष्टिभागसमुच्छ्रितम् ॥
तुलोदयस्ततो विंशपञ्चसूदनुमञ्जरी
स नृप्रंसत्यदोच्छ्रायो भागेष्वेषु विधीयते ॥
तुलोदयस्य मध्ये तु वेदी पञ्चपदोदया
तदर्धं कुम्भकं कुर्यात्तद्वत्कलशमेखला ॥

एकादशपदा जङ्घा हीरकं तु पदत्रयम्
द्वौ भागौ मेखला तद्वद् द्वितीयापि सतारका ॥
ऊर्ध्वतस्तलपट्टस्य प---षोडशभिः पदैः
राजसेनं सार्धभागं वेदी कार्या द्विभागिका ॥
पदार्धमासनं सार्धपदं चन्द्रावलोकनम्
स्तम्भः सप्तपदो दैर्घ्यहार सार्धत्रिभागिकम् ॥
शीर्षं सार्धपदोत्सेधं पद्मस्तु द्विपदो भवेत्
त्रिपदं छाद्यकं कुर्याद् भागेनैकेन लम्बितम् ॥
द्विपदां छेदहारां तु द्व्यंशा वा सन्तु पट्टिकाः
तदूर्ध्वं मञ्जरीं कुर्याद्द्राविडक्रमभूषितम् ॥
सप्तोच्छ्रितं कोणकूटं सघण्टाकलशाण्डकम्
द्वितीयामेतदूर्ध्वं च तन्मानेनैव कारयेत् ॥
कर्णे कर्णं समाश्रित्य षट्पदानि तु कारयेत्
षष्ठाण्डके द्वे कुर्वीत षडण्डकचतुष्टयम् ॥
एवं कर्णाण्डकानि स्युश्चत्वारिंशत्समासतः
द्वादशांशकविस्तारमुच्छ्रायान्नवभागिकम् ॥
आद्यक्रमे विजानीयाद् द्राविडाभक्रियान्वितम्
अष्टाण्डकं समुत्सेधाद्विस्ताराद् दशभागिकम् ॥
भद्रक्रमं द्वितीयं तु विद्यात्कर्मविभूषितम्
विस्तारो मूलमञ्जर्या द्वाविंशत्यंशसंमितः ॥
त्रयोविंशतिरुच्छ्रायः स्कन्धाश्चैव त्रयोदश
ग्रीवा पट्टद्वयोत्सेधात्त्रिपदोन्नतमण्डकम् ॥

कर्परं द्विपदं भागचतुष्कं कलशोच्छ्रयः
प्रासादादे द्वादशैतस्मिन्नुरोमञ्जरिका मताः ॥
अण्डकानां तु विज्ञेयं त्रिसप्तत्यधिकं मतम्
त्रैलोक्यभूषणं कृत्वा त्रिदशानन्दकारकम् ॥
कल्पान्तं यावदध्यास्ते पुरुषस्त्रिदशालयम्
त्रैलोक्यभूषणः ।
प्रासादमथ पद्माख्यं कथयामोऽश्विनोः प्रियम् ॥
चतुरश्रीकृते क्षेत्रे सप्तभागविभाजिते
त्रीन् भागान् मध्यमे त्यक्त्वा द्वौ कोणेषु लाञ्छयेत् ॥
सा द्वयेद्वभिरष्टौ च पञ्चादपि च षोडश
विस्तारार्धेन गर्भः स्याद्विस्तारार्धं तथा बहिः ॥
ऊर्ध्वमानमथ ब्रूमः पद्माख्यस्य यथाक्रमम्
विस्ताराद् द्विगुणोत्सेधं भागविंशतिभाजितम् ॥
वेदी जङ्घा तथैतस्मिन् कार्या मालाथ मञ्जरी
ग्रीवाण्डकलशाश्चेह शङ्खवर्धनवर्त्मना ॥
पद्माख्यः कारितो येन प्रासादो दश वल्लभः
आत्मा समुद्धृतस्तेन पापपङ्कमहोदधेः ॥
पद्माख्यः ।
पक्षबाहुमथ ब्रूमः प्रासादं कुलनन्दनम्
सर्वरोगहरं पुण्यं सर्वलोकक्षणं भवं ॥
चतुरश्रीकृते क्षेत्रे द्वादशांशविभाजिते
अष्टभागायतं गर्भं कुर्याद् भित्तिर्द्विभागिका ॥

द्विपदं कारयेत्कर्णं भागार्धमुदकान्तरम्
प्रत्यङ्गं सार्धभागे सा शाला चैव चतुष्पदा ॥
निष्क्राममुभयोर्भागाद्भागार्धेन पृथक्पृथक्
कर्तव्या पक्षयोर्बाहू विस्तारेष्वष्टभागिकौ ॥
चतुष्पदस्तयोर्गर्भो द्विपदा भित्तिविस्तृतिः
चतुर्भागं भवेद्भद्रं कोणश्चैव द्विभागिकः ॥
ऊर्ध्वमानमथ ब्रूमश्चतुर्विंशतिभागिकम्
त्रिपदो वेदिकाबन्धो जङ्घा पञ्चपदोन्नता ॥
द्वौ भागौ कलशः कार्यो द्वौ भागौ चन्द्रिकाण्डकम्
मध्ये तु मञ्जरी कार्या घण्टाबध चपार्श्वयोः ॥
पक्षबाहुः कृतो येन त्रिगर्भः कर्मभूषितः
स त्रिनेत्रप्रतापः स्याच्चतुरङ्गव्रातनायकः ॥
पक्षबाहुः ।
विशालं सम्प्रवक्ष्यामि विशालैरन्वितं गुणैः
दयितं कृत्तिकासूनोः पूजितं गणकिन्नरैः ॥
क्षेत्रे दशांशं कुर्वीत षड्भागा मध्यमञ्जरी
भागिक्यो भित्तयः कार्या भ्रमन्त्यभि तथाविधाः ॥
भागद्वयं भवेत्कर्णो वारिमार्गेण संयुतः
पदेन तिलकं कुर्याद्भागार्धेन विनिर्गतम् ॥
आयामनिर्गमा चास्य चतुर्भागा चतुष्किका
चतुष्पदो मध्यगर्भः चतुर्द्वारस्य शस्यते ॥
विस्तारात् द्विगुणोच्छ्रायान्यूर्ध्वमानं विधीयते

विदध्याद्वेदिकाबन्धं सार्धभागय संमितम् ॥
सार्धैश्चतुर्भिः कुर्वीत भागैर्जङ्घोच्छ्रितिं बुधः
मालामन्तरपत्रं च भागेनैकेन कारयेत् ॥
साधद्विभागिकं शृङ्गं कलशाण्डकसंयुतम्
तस्यार्धमपरं शृङ्गं तावन्मानं विधीयते ॥
षड्भागविस्तृतां जङ्घामन्तर्या भागसप्तकम्
तद्विस्तारदशांशै स्यात् षड्भिः स्कन्धस्य विस्तृतिः ॥
ग्रीवायास्तु विधातव्या पदस्यार्धं समुन्नतिः
भागेनाण्डकमुच्छ्रायो भागेनार्धेन चन्द्रिका ॥
द्विपदं कलशं कुर्यात्समसूत्रं सुशोभनम्
प्रासादोऽयं विशालः स्यादेवं सप्तदशाण्डकम् ॥
यः करोति स लोकेऽस्मिन् नागाधिपो भवेत्
लभते च बहून् कामान् देहान्ते चोत्तमं पदम् ॥
विशालः ।
ब्रूमोऽथ लक्ष्मदयितं प्रासादं कमलोद्भवम्
सिद्धगन्धर्वसहितं स्कन्दो यत्र व्यवस्थितः ॥
चतुरश्रं समं क्षेत्रं भुवि दिक्षु विदिक्षु च
कृत्वा वृत्तं समालिख्य भागैर्द्वात्रिंशता भवेत् ॥
भागौ द्वौ द्वौ ततः कुर्यादेकैकां दलपट्टिकाम्
कर्णं षोडशभिः कार्यादम्भोजसदृशाकृतिः ॥
पञ्चभिर्भाजिते सीम्नि गर्भो भागत्रयं भवेत्
अधस्तादासमत्तस्यात्पद्मपीठं प्रकल्पयेत् ॥

कृत्वा द्विगुणमूर्ध्वानद्विंशत्या प्रविभाजयेत्
तुलोदयोऽथ भागः स्याद् द्वादशांशा च मञ्जरी ॥
वेदी जङ्घा च माला च स्याद्यथा शङ्खवर्धने
तदूर्ध्वं पद्मकूटानि चोन्नत्तं पद्मपत्रवत् ॥
भूमिका पञ्च कर्तव्या पदहीना यथोत्तरम्
देविका तस्य कर्तव्या विकासिशतपत्रवत् ॥
पादोनभागो ग्रीवा च सपादं पदमण्डकम्
चन्द्रिका चैव भागेन विकासिकमलाकृतिः ॥
द्विपदं कलशं कुर्यात्साब्जपत्रं सपल्लवम्
आरोग्यं स्यात्पुरोदेशे कारिते कमलोद्भवे ॥
आयुःश्रीवृद्धिपुत्राः स्युरपयानां च संख्यया
कमलोद्भवः ।
हंसध्वजमथ ब्रूमो हंसक्रीडाविभूषितम् ॥
सेवितं सुरसङ्घेन वल्लभं पद्मजन्मनः
विभज्य दशधा क्षेत्रमारभ्य ब्रह्मणः पदात् ॥
आदाय पार्श्वयोर्भागांस्त्रींस्त्रीन् वृत्तं प्रकल्पयेत्
एवं गर्भो विधातव्यश्छाद्यस्य जगतालुभिः ॥
द्विपदा बाह्यतो भित्तिः कर्णः कार्यो द्विभागिकः
भद्रं पञ्चपदं कार्यं पदार्घमुदकान्तरम् ॥
द्वौ भागौ निर्गतं भद्रं स्तम्भद्वयसमन्वितम्
मध्ये तु च्छादकं कुर्याद्वातोच्छ्रायं द्विविस्तृतम् ॥
कुर्याद्भागं सविस्तारं तोरणं चतुरुन्नतम्

वरालमकरैर्युक्तं स्तम्भेषु स्यात्तथेल्लिकाः ॥
पुरस्तान्मण्डपं प्राज्ञो रचयन्मानपूर्वकम्
ऊर्ध्वमानमथ ब्रूमः सूत्रं स्याद्भागविंशतिः ॥
मेखलावेदिकाजङ्घाः शङ्खवर्धनवन्मताः
कर्तव्याः कर्णरथिकास्त्रिपदाः कलशान्विताः ॥
चतुष्किका पञ्चपदा वराटीघटयान्विता
कार्या कलशसंयुक्ता विस्तारोच्छ्राययोः समा ॥
काणश्रृङ्गोर्द्वयः कुर्यादष्टांशां मूलमञ्जरीम्
उच्छ्रिता नवभिर्भागैः पञ्चभौमास्तु संवृताः ॥
प्रथमा द्विपदा भूमिर्हेमकूटक्रियोपमा
अन्यास्तु पदपादार्धहीनाः कार्या यथोत्तरम् ॥
महारत्नपुनः कार्यो भूमिकापरिवर्तने
भागेन वेदिकोच्छ्रायः स्कन्धस्तु शतवास्तुवत् ॥
ग्रीवाण्डकसमुत्सेधं विदधीत पदद्वयम्
अण्डके वर्तना कार्या कङ्कतीफलसन्निभा ॥
चन्द्रिका भागमेकं च द्वौ भागौ चेत् ---
हंसध्वजः कृतो येन वल्लभः पद्मजन्मनः ॥
स याति विविधैर्यानैर्देहान्ते वसु--- गतिम्
हंसध्वजः ।
अथ लक्ष्मीधरं ब्रूमो यं कृत्वा विजयं नरः ॥
राज्यमायुष्यपूजा च गुणानाप्नोति चैश्वरान्
चतुरश्रीकृते क्षेत्रे भक्ते षोडशभिः पदैः ॥

कर्तव्यः षट्पदः कन्दो गर्भसूत्रचतुष्पदः
चतुसृष्वपि दिक्षु स्यात्त्रिभिर्भागैर्भ्रमन्तिका ॥
द्विपदा बाह्यभित्तिः स्याच्छुभा कार्या चतुर्दिशम्
कर्णेषु शृङ्गमेकैकं द्वे द्वे शृङ्गे तु मध्यगे ॥
द्व्यंशानि तानि विस्ताराद्दशशृङ्गाणि द्विक्रयेत्
षट्शालाश्च विधातव्याः शुभा दिक्षु तिसृष्वपि ॥
याम्येन चतुर्भागा भागद्वितयनिर्गताः
तलच्छन्दोऽयमुद्दिष्टो मण्डपः पुरतो भवेत् ॥
विस्ताराद् द्विगुणा सासः प्रासादस्यास्य चोच्छ्रयः
स्यात्त्रयोदशभागोऽत्र प्रमाणेन तुलोदयः ॥
ऊर्ध्वं च विंशतिपदं वेदीबन्ध पदत्रयम्
उत्सेधात् षड्पदा जङ्घा भागेन भरणं भवेत् ॥
भागैस्त्रिभिर्मेखले द्वे शृङ्गं च कलशं त्रिभिः
उच्छ्रयेण विधातव्यः सिंहकर्णचतुष्पदः ॥
दश शृङ्गाणि कुर्वीत घण्टा च विक्रये
चतुर्दशांशविस्तारा पञ्चगा मूलमञ्जरी ॥
ऊर्ध्वं सप्तदशांशा च ग्रीवोच्छ्रायः पदद्वयम्
अण्डकं द्विपदं कार्यं भागेनैकेन कर्परम् ॥
कलशं त्रिपदं मूर्ध्नि वर्तयेत्सुमनोरमम्
लक्ष्मीधराख्यं प्रासादं यः कुर्याद्वसुधातले ॥
अक्षये स पदे तत्त्वे लीयते नात्र संशयः
लक्ष्मीधरः ।

महावज्रमथ ब्रूमः प्रत्य पापहरं शुभम् ॥
प्रासादे कारये यत्र सुरेन्द्रः परितुष्यति
अष्टौ हस्तान् कनीयान् स्यान्मध्यो द्वादश मानतः ॥
उत्तमः षोडश प्रोक्तस्त्रिधैवं करसंख्यया
स्वविस्तारस्य सूत्रेण क्षेत्र मालिख्य वर्तुलम् ॥
कोणेषु लाञ्छितं कृत्वा भागैः षट्त्रिंशता भजेत्
द्विपदाः कर्णिकाश्चेह कार्या द्वादशसंख्यया ॥
कर्णिकाद्वयमध्ये तु स्तम्भो भागे च वर्तुलः
शतपत्राकृतिः कार्या द्वौ भागौ मूर्धमानतः ॥
अधस्तान्मेखलायाश्च कमलोद्भववद्भवेत्
स्तम्भयेत्कर्णिकामध्ये तेषु कूटानि कारयेत् ॥
कुर्यादालेखमुपरि कर्णिकायाः सुशोभनम्
कर्तव्या भूमयः पञ्च क्रमेणायतयान्विता ॥
स्याद्भागार्धोदया ग्रीवा विस्तारेण चतुष्पदा
अण्डकं साधभागेन विधातव्यं सकर्परम् ॥
भागद्वयं तु कलशः शृङ्गकर्णैः सपल्लवैः
यः करोति महावज्रं प्रासादं पुरभूषणम् ॥
तुष्टोदिवि सदाम्पत्यो रमते सोऽप्सरोगणैः
महावज्रः ।
रतिदेहमथ ब्रूमः प्रासादं सुमनोरमम् ॥
अप्सरोगणसंकीर्णं कामदेवस्य मन्दिरम्
अष्टभागीकृते क्षेत्रे समभागे समायते ॥

द्विपदं कर्णकूटं स्याद्वारिमार्गसमन्वितम्
अलिन्दस्य चतुर्भागा विस्तारायामतः समाः ॥
भागिकी बाह्यभित्तिस्तु शेषं गर्भं प्रकल्पयेत्
मध्ये चतुष्किका कार्या यत्र स्तम्भाः सुशोभनाः ॥
नेकरका त्रिवक्त्रैश्च हस्ते सर्वैः सपत्रकैः
पल्लवैर्नागबन्धैश्च सालभञ्जिभिरन्विताः ॥
खेल्लिक्रा तत्र कर्तव्या मकरास्यविनिर्गता
चत्वारो बाह्यतोऽलिन्दाः स्तम्भद्वितयभूकुलम् ॥
सदृशं प्रथमं कार्यं भवनं कर्मयुक्तिमत्
द्वितीयं भवनं कार्यं बाह्यालिङ्गविवर्जितम् ॥
शेषं कर्म तथा कार्यं प्रथमायां यथा भवति
तृतीयायां पुनः कार्या चतुःस्तम्भा चतुष्किका ॥
खेलिकातोरणन्यस्ता समुखाश्च वरालकाः
स्तम्भानां कुटकान् पूर्वान् सिंहकर्णश्चमध्यतः ॥
मध्यल्लच्छाद्यानि वायार्धं भागोच्छ्रायान्यनुक्रमात्
त्रीणि कुर्वीत युक्तानि शुभैरन्तरपत्रकैः ॥
घराटां च भागिनीं कुर्यादूर्ध्वनामलसारकीम्
चन्द्रिकां भागपादेन द्विभागां कलशोच्छ्रितिम् ॥
एवंविधं यः कुरुते प्रासादं रतिवल्लभम्
सन्तोषयति कन्दर्पं स्याज्जनेषु स पुण्यभाक्
रतिदेहः ।
सिद्धिकाममथ ब्रूमः प्रमथैरुपशोभितम्

धनपुत्रकलत्राणि कृते यत्राप्नुयान्नरः ॥
चतुरश्रीकृते क्षेत्रे चतुर्भागविभाजिते
गर्भं द्विभागं कुर्वीत भित्तिर्भागेन शोभनम् ॥
भद्रं द्विभागविस्तारं भागेनैकेन निर्गतम्
कर्णमेकेन भागेन कुर्यात्प्रतिदिशं बुधः ॥
अस्योर्ध्वं द्विगुणं कुर्यात्षष्ठभागविभाजितम्
भागे च वेदिकाबन्धं जङ्घा सार्धपदोन्नता ॥
मेखलान्तरद्रत्रे च पादहीनं पदं मते
स्यादुच्छ्रितीश्चामा जङ्घा पादोनं पदपञ्चकम् ॥
त्रिभागविस्तृता ग्रीवा भागपादसमुच्छ्रिता
पदार्धमण्डकं प्राहुः पदपादेन चण्डिकाम् ॥
भागस्यार्धेन कलशसमुच्छ्रायो मतः समः
---गुणसूत्रास्या द्वितीयाः पञ्चभूतिकाः ॥
यः सिद्धिकामं कुरुते सर्वपापविमोचनम्
सर्वेऽस्य कामाः सिध्यन्ति ये केचिन्मनसि स्थिताः
सिद्धिकामः ।
अथाभिधीयतेऽस्माभिः प्रासादः पञ्चचामरः
यो भक्त्या कारयत्येनं स चिरं दिवि मोदते ॥
भक्ते द्वादशभिः क्षेत्रे चतुरश्रे समन्ततः
चतुर्भागे भवेद्गर्भो भित्तिं भागेन कल्पयेत् ॥
अन्धारिका तु भागौ द्वौ बाह्यभित्तिस्तु भागिकी
त्रिभागैर्विनिष्क्रान्तं तेषु कार्याश्चतुष्किकाः ॥

द्विगुणं कथिते चोर्ध्वमानं घण्टाण्डकान्वितम्
प्रमाणेन विधातव्यो दश भागास्तुलोदयः ॥
त्रिपदो वेदिकाबन्धो जङ्घा स्यात् षडंशकः
मेखलान्तरपत्रे च भागेनैकेन कारयेत् ॥
पदत्रयेण सादूर्ध्वं शृङ्गं कलश चाण्डकम्
शिखरा विंशतिः कार्याः सभित्ताः सर्वमण्डपैः ॥
शृङ्गादधो विधातव्या मल्लच्छाद्यं मनोहरम्
एवं सर्वचतुष्केषु मल्लच्छाद्यानि कारयेत् ॥
छाद्यकैः पञ्चभिः कार्यो मध्ये प्रासादनायकः
घटिकानां समुच्छ्रायः सपादं पदमिष्यते ॥
घण्टायाः सार्धभागेन ग्रीवायाश्च पदादिका
कर्तव्यामलसारी तु पादोनांशायबण्डिकाम् ॥
द्विपदः कलशः कार्यो बीजस्वरसमन्वितः
पञ्चघण्टावृतं कृत्वा विमाना पञ्चचामरम् ॥
अतीतविस्त्वयान्सर्वान् लोकः प्राप्नोति सम्भव
पञ्चचामरः ।
नन्दिघोषमथ ब्रूमो विपद्भयनाशनम् ॥
य एनं भक्तितः कुर्यात्स भवेदजरामरः
चतुरश्रे समे क्षेत्रे चतुर्भागविभाजिते ॥
भद्रं द्विभागविस्तारं कुर्याद्भागविनिर्गमम्
भित्तिरत्र न कर्तव्या दिशि कस्यामपि ध्रुवम् ॥
कुर्वीत राजसेनं तु वेदिचन्द्रावलोकनम्

दिक्षु क्रमोऽयं सर्वासु त्यक्त्वा मार्गचतुष्टयम् ॥
विस्तारसदृशोच्छ्राया कर्तव्या पूर्वभूमिका
वक्ष्यमाणैर्विभागैश्च विप्रभज्यासणाः --- ॥
भागेन राजसेनं स्याद्वेदिर्भागद्वयेन च
भागेन चन्द्रालोकः स्यादर्धेनासनपट्टकः ॥
स्तम्भोच्छ्रायस्त्रिभिर्भागैस्ततो भागेन शीर्षकम्
पट्टोच्छ्रायो भागमेकं स्याच्चतुर्विंशतिर्धराः ॥
नानासङ्घैः पल्लवैश्च चारुकर्मकरानैः
द्वितीया भूमिका कार्या स्तम्भैः षोडशभिर्युता ॥
एवं भूमौ द्वितीयायामपि कर्म विधीयते
स्तम्भैश्चतुर्भिः संयुक्ता तृतीयायां चतुर्थिका ॥
नन्दिघोषः कृतो येन मूयं तेजो स जायते
कर्मक्षयात्तनुं त्यक्त्वा प्राप्नोति परमं पदम् ॥
नन्दिघोषः ।
प्रासादमभिधास्यामो मनूत्कीर्णं महाद्भुतम्
विमृश्य बुद्धया निपुणं निर्मितं प्राक्स्वयम्भुवा ॥
क्षेत्रे षड्भागविस्तारे गर्भे भागचतुष्टये
कुर्वीत वृत्तं मध्ये च नवभिर्वृत्तिमालिका ॥
अष्टौ रथिकाः कार्याः क्षेत्रे दिक्षु विदिक्षु वा
ऊर्ध्वमानमथ ब्रूमो द्विगुणं द्विपदान्वितम् ॥
छाद्ययावद्विधातव्या तत्सार्धाङ्गैकपञ्चकम्
भागानष्टार्धसहितान् कुर्यादूर्ध्वं तुलोदयात् ॥

सार्धभागेन कर्तव्यो वेदीबन्धश्च शोभनः
भागद्वयं ततः सार्धं कार्या जङ्घासमुच्छ्रितिः ॥
भागार्धं हीरकं कुर्यान्मनोज्ञं कर्तिकान्वितम्
मेखलान्तरपत्रे च भागेनैकेन कारयेत् ॥
शृङ्गोच्छ्रायस्ततः कार्यः सार्धभागद्वयोन्मितः
मध्येन सर्वशृङ्गाणां मस्तके वृत्तमालिखेत् ॥
षड्भागविस्तृतं तस्य षड्भागसमुच्छ्रितम्
यावन्मात्राचरेत्प्रोक्ता तावत्कार्या च मञ्जरी ॥
त्रिभौमं पञ्चभौमं विचित्रं कारयेदिमम्
ग्रीवा स्याद्भागपादेन विस्तारादि्द्वपदायता ॥
पादहीनं पदं कुर्यादण्डकं मनुसंभवेत्
चन्द्रिका भागपादेन पादोनं कुशलः पदम् ॥
प्रासादं मनसाप्येवं मनुकीर्तणं करोति यः
स गंध्या भवनं शम्भोर्गाणपत्यमवाप्नुयात् ॥
मानकीर्णः ।
अथ सुप्रभनामानं प्रासादमभिदध्महे
यं कृत्वा प्रभयान्येषां प्रभा हन्ति रविर्यथा ॥
चतुरश्रीकृते क्षेत्रे द्वादशांशविभाजिते
कुर्याच्चतुष्पदं गर्भं विस्तारो यामतः समः ॥
प्रासादार्धं भवेत्कन्दः कन्दभद्रं पदद्वयम्
भ्रमन्ती द्विपदा दिक्षु चतसृष्वपि शोभना ॥
पदिका बाह्यभित्तिस्तु द्विपदा कर्णविस्तृतिः

चतुष्पदं मध्यभद्रं विनिष्क्रान्तं त्रिभिः पदैः ॥
अस्यैर्वात पुनः कार्या द्विपदा तु चतुष्किका
सोलायाः पार्श्वतः कुर्यादतिभद्रद्वयं बुधः ॥
तयोः पादेन निष्कासं पार्श्वयोरुभयोरपि
पार्श्वभद्रस्य कर्णस्य चान्तरं पदिके नयेत् ॥
जालैर्विचित्रितं कुर्यान्मध्ये ज्योतिर्यथा भवेत्
एवं दिक्षु समस्तासु कुर्वीतैनमनुक्रमात् ॥
प्रासादभागविधिना पुरः कुर्वीत मण्डपम्
चतसृष्वपि मञ्जर्यो दिक्षु कार्या यथाक्रमम् ॥
लीयमूलसजङ्घात्रा स्वसार्धा च यथादिमम्
उच्छ्रायो मूलविस्तारादि्द्वगुणो द्विकलाधिकः ॥
तुलोदयो दशपदो मञ्जरी षोडशांशिका
वेदीबन्धसमुत्सेधः सार्धभागद्वयोन्मितः ॥
पञ्चभागोच्छ्रिता जङ्घा हीरं भागसमुन्नतम्
सार्धभागेन कर्तव्ये मेखलान्तरपत्रके ॥
कर्णशृङ्गसमुत्सेधः कलशान्तस्त्रिभागिकः
दिङ्मञ्जरी तु कर्तव्या विस्तारेण चतुष्पदा ॥
उदयेन विधातव्या पञ्चभागा प्रमाणतः
ग्रीवा पदस्य पादेन कलशोऽर्धपदं भवेत् ॥
विस्तारो मूलमञ्जर्याः कर्तव्यो दशभागिकः
---भागत्रयोत्सेधो ग्रीवा पादेन भागिका ॥
अण्डकं सार्धभागेन द्विपदा कलशोच्छ्रितिः

देशांशषट्कतो मूलास्कन्धोरेषोऽन्तको भवेत् ॥
विस्तारो मूलमञ्जर्याः कर्तव्यो दशभागिकः
नवाण्डकोऽयं कर्तव्यः प्रासादः शुभलक्षणः ॥
यः प्रासादमिमं कुर्यात्सुप्रभं भक्तिमान्नरः
दिव्यते जारवहस्यास्य देहान्ते मुक्तिमाप्नुयात् ॥
शुभलक्षणः ।
सुरानन्दमथ ब्रूमः प्रासादमतिसुन्दरम्
चतुरश्रं समं क्षेत्रे दशधा प्रविभाजयेत् ॥
षड्भागो गर्भविस्तारो द्वौ भागौ भित्तिविस्तृतिः
कर्तव्या सार्धभागेन भागार्धेन जलाश्रयः ॥
प्रत्यङ्गस्थानकं कुर्यात्सप्रसं वृत्तभागिकम्
शालास्त्रिभिः पदैः कार्याः शुभरूपाश्चतुर्दिशम् ॥
शालायाः पार्श्वयोः कार्यो वारिमार्गः पदार्धकः
परस्परं तु निष्कासो भागं भागं विधीयते ॥
ऊर्ध्वमानं विधातव्यं विस्तारादि्द्वगुणो बुधैः
गर्भच्छाद्यं पदान्यष्टौ भागा द्वादश मञ्जरी ॥
वास्तुविस्तारपादेन वेदीबन्धो विधीयते
चतुष्पदोर्ध्वतो जङ्घा भागार्धं ग्रासपट्टिका ॥
मेखलान्तरपत्रे च विधातव्ये पदोच्छ्रिते
कोणा द्रविडकूटस्य वृत्तस्तम्भा वराटका ॥
मध्याङ्गतोरणानां स्युद्विशतिश्चतुरो भवेत्
षट्पदः स्कन्धविस्तारो ग्रीवा भवति भागिकी ॥

शिरः सार्धं पदं ज्ञेयं भागमेकं च चन्द्रिका
कलशोंऽशद्वयोच्छ्रायः कार्यः पल्लवभूषितः ॥
यः करोति सुरानन्दं वरदास्तस्य मातरः
सुरास्तस्य ह्यनिस्तार्यमपमृत्युं हरन्ति च ॥
सुरानन्दः ।
अथ हर्षं प्रवक्ष्यामि सर्वलोकप्रहर्षणम्
नित्यं वसति यत्र श्रीः स्थानं यद्विश्वकर्मणः ॥
चतुरश्रीकृते क्षेत्रे भक्तेऽष्टादशभिः पदैः
प्रतिकोणं विधातव्याः कर्णभागौ स्त्रिभिस्त्रिभिः ॥
द्विपदं कर्णभद्रं च भागेनैकेन निर्गतम्
वारिमार्गं पदं कुर्यात्प्रवेश्ययामतः समम् ॥
त्रिभागमस्य प्रत्यङ्गं पदद्वितयनिर्गमम्
वेदिचन्द्रावलोकाभ्यां प्रत्यङ्गे कर्म कल्पयेत् ॥
चतुष्पदं मध्यभागं द्विपदं चास्य भद्रकम्
विनिर्गतं च भागेन विदधीत विचक्षणः ॥
वलभ्यश्च द्विभागाः स्युः खानुरूपाश्चतुर्दिशम्
गर्भो भागैश्चतुर्भिस्तु वलभीनां विधीयते ॥
द्विपदा बाह्यतो भित्तिर्द्विपदा च भ्रमन्तिका
स्कन्धः स्याद्दशभिर्भागैर्गर्भः षट् त्रिंशता पदैः ॥
ऊर्ध्वप्रमाणमेतस्य स्याच्चत्वारिंशता पदैः
भागैः षोडशभिश्चास्य विदध्याच्छादनं शुभम् ॥
वेदीबन्धः पञ्चपदो जङ्घा चाष्टपदा भवेत्

शाला चान्तरपत्रं च कुर्याद्भागत्रयाद्बुधः ॥
ऊर्ध्वमन्तरपत्रं स्याद्विधातव्यं यथाक्रमम्
वलभीसंवृतिः प्राज्ञैरुच्छ्रायात्पञ्चभागिकी ॥
सा शृङ्गैः सिंहकर्णैश्च कार्यो भागसमुच्छ्रितिः
वर्धमानेन कर्तव्या त्रिपदा कर्णमञ्जरी ॥
ऊर्ध्वं पदेभ्यस्त्रिभ्यः स्याद्भागेन कलशाण्डकम्
विस्तारात् षोडशपदा कर्तव्या मूलमञ्जरी ॥
ऊर्ध्वं विंशतिभागास्य स्कन्धो नवपदायतः
ग्रीवा सार्धपदं कार्या ततो द्विपदमण्डकम् ॥
चन्द्रिकैकेन भागेन कलशस्त्रिपदात्ततः
हर्षणः क्रियते यत्र स देशः सुखमेधते ॥
क्षेमं गोब्राह्मणानां स्यात्पूर्णकामश्च पार्थिवः
हर्षणः ।
इदानीं दुर्धरं ब्रूमः प्रासादं शुभलक्षणम् ॥
चतुरश्रे समे क्षेत्रे चतुर्विंशतिभाजिते
कर्णाः षडापदाः कार्या प्रतिरथं च द्वू भवेत् ॥
कर्तव्याष्टपदा शाला निर्गमोऽस्य चतुष्पदः
पदद्वयं विनिष्क्रान्ता सर्वतः कर्णशोभिता ॥
द्विपदा बाह्यभित्तिः स्याच्चतुर्भागान्धकारिका
द्विपदा कन्दभित्तिस्तु गर्भश्चाष्टपदायतः ॥
षट्पदा कन्दशाला च कन्दकर्णाः पदत्रयम्
ऊर्ध्वप्रमाणं विस्तारादिद्वगुणं द्विपदाधिकम् ॥

विंशत्यम तुलोच्छ्रायाः शिखरं त्रिंशता पदैः
कुम्भः सार्धद्विभागश्च कलशो भागमुच्छ्रितिः ॥
भागार्धेनान्तरं पत्रं भागेनैकेन मेखला
दशभागोच्छ्रिता जङ्घा हीरकं भागिकं भवेत् ॥
भागैश्चतुर्भिः कर्तव्यं मेखलाद्वितयं ततः
अधस्तादूर्ध्वपट्टस्य तलपट्टस्य चोपरि ॥
भवेत् षोडशभिर्भागैरनयोरन्तरं द्वयोः
द्विपदो वेदिकाबन्धो वेदी काया चतुष्पदा ॥
आसनं चैव भागेन स्तम्भः पञ्चपदैर्भवेत्
भागेनैकेन भरणं शीर्षकं भागमुन्नतम् ॥
पट्टो भागद्वयोत्सेधश्छाद्यं च त्रिपदायतम्
मूलभरणानि चत्वारि कोणभद्राणिकं भवेत् ॥
कर्णशृङ्गाणि दश च द्वयमथस्मिंश्चतुर्दिशम्
ग्रीवां भगसन्तानां शृङ्गाणां त्रिपदोच्छ्रितिः ॥
षट्पदाः कर्णमञ्जर्यः सप्तभागसमुच्छ्रिताः
ग्रीवार्धभागिकी भागः स्यादुच्छ्रायोऽरडकस्य तत् ॥
पदत्रयोन्नता कार्या सिंहकर्णश्चतुष्पदा
मध्ये भद्रे तदुत्सेधो विस्तारादर्धभागिकः ॥
विस्तारो मूलमञ्जर्याः पदैः षोडशभिर्भवेत्
अष्टादशभिरुच्छ्रायो ग्रीवा सार्धपदोच्छ्रिता ॥
अरडकं द्विपदं कार्यं चन्द्रिका पदमुच्छ्रिता
कलशं त्रिपदं विद्यात्सर्वलक्षणसंयुतम् ॥

अरडकैः सप्तदशभिः प्रासादो दुर्धरो भवेत्
दुर्धरं यः करोतीह भागाच्छक्तिं समाप्नुयात् ॥
कालेन शिवसायुज्यं निगधिश्च प्रद्यते
दुर्धरः ।
इदानीं दुर्जयं ब्रूमः प्रासादं शत्रुमर्दनम् ॥
यं कृत्वा दुर्जयं लोके भवेत्क्रीडति च क्षितौ
चतुरश्रीकृते क्षेत्रे पञ्चभागविभाजिते ॥
गर्भं नवपदं कुर्याद्भित्तिः षोडशभागिकी
भागेन कर्णरथिका भागाभ्यां मध्यमे रथः ॥
भागेन निर्गमंस्तस्य विधिरेष चतुर्दिशम्
भद्रकर्णान्तरे कुर्याद्वारिमार्गं पदाधिकम् ॥
ऊर्ध्वमानं विधातव्यं त्वमस्मि दशभागिकम्
वेदिबन्धः सपादांशौ जङ्घांसौ पादसंयुतौ ॥
मेखलान्तरपत्रे तु पदार्धेन प्रकल्पयेत्
शिखरः सार्धं भागषट्कोछ्रितो भवेत् ॥
त्रिपदः स्कन्धविस्तारो रेखा पद्मदलाकृतिः
भूमयः पञ्च कर्तव्या न्यूनमाना यथाक्रमम् ॥
प्रथमा साधभागान्या पदपादोनिता क्रमात्
स्कन्ध पादोनभागेन स्याद् ग्रीवार्धं पदेन च ॥
अरडकं त्वेकभागेन कर्परं चार्धभागिकम्
भागोत्सेधस्तु कलशः समवृत्तः सुशोभनः ॥
दुर्जयः क्रियते यत्र पुरे वा नगरेऽथवा

न भवेत् तत्र दुर्भिक्षं न च व्याधिकृतं भयम् ॥
दुर्जयः ।
ब्रूमस्त्रिकूटं ब्रह्माद्यैः सेवितं त्रिदशैस्त्रिभिः
फलं क्रतुसहस्रस्य येन मोक्षं च विन्दति ॥
ससाध्यतुल्यन्निभजं क्षेत्रमिष्टप्रमाणतः
ततोऽस्य बाहुमेकैकं चतुर्भिर्विभजेत्पदैः ॥
द्विभागं मध्यमं भद्रं भागिकीं कर्णपक्षिकाम्
अर्धेन गर्भमर्धेन कुर्याद्भित्तित्रयं बुधः ॥
विस्तारं पञ्चधा भक्ता कुर्याद् द्विगुणमुच्छ्रयम्
वेदिबन्धो विधातव्यः सपादं भागमुच्छ्रितः ॥
जङ्घा सपादौ भागौ द्वौ कार्या तस्य समुच्छ्रितिः
मेखलान्तरपत्रे च भागस्यार्धेन कारयेत् ॥
मञ्जरी भागषट्केन पञ्चभागविभाजिता
आसप्रन्तात्स्तम्भस्कन्धः कार्यः पूर्वोक्तवर्त्मना ॥
पादभागेन तु ग्रीवामर्धभागेन चाण्डकम्
चन्द्रिका भागपादेन कलशं भागमुच्छ्रितम् ॥
त्रिकूटं कारयेद्यस्तु ब्रह्मेशानहरिप्रियम्
सिद्धा भूत्वा पुरीं तेषां यात्यसौ नात्र संशयः ॥
त्रिकूटः ।
इदानीमभिधास्यामः प्रासादं नवशेखरम्
चतुरश्रं भजेत्क्षेत्रं विंशत्यकोनया पदैः ॥
कर्णाश्चतुष्पदा कार्यास्तेषां भद्रं द्विभागिकम्

विनिर्गतं पदार्धेन जलमार्गस्त--- ॥
---भागायता कार्या सा भवेहि विचक्षणैः
शाला कर्णपदाद्वतु प्रत्यङ्गं भागमानतः ॥
त्रिपदो रथकः कार्यो मञ्जरीणां चतुष्टयम्
चतुष्पदा भवेद्भित्तिर्गर्भश्चैकादशांशकः ॥
चत्वारिंशत्पदादूर्ध्वं यावत्स्कन्धं समस्तकम्
तुलोदयः षोडशभिर्मञ्जरी चाष्टकैस्त्रिभिः ॥
चतुष्पदो वेदिबन्धो जङ्घा साष्टपदा भवेत्
भागेन भरणे त्र्यंशं मेखलान्तरपत्रकम् ॥
उच्छ्रायतः पञ्चपदा कर्तव्या कर्णमञ्जरी
ग्रीवाधभागेन भवेदण्डकं चैव भागिकम् ॥
भागेन चन्द्रिकामूर्ध्वं भागेन कलशं तथा
सपादमुदयं शाला मञ्जर्या विस्तृते विदुः ॥
ग्रीवा पादेन भागेन सपादासमताण्डकम्
भागाद्धि चन्द्रिका भागद्वयेन कलशोदयः ॥
विस्तारो मूलमञ्जर्याः कार्यः पञ्चदशांशकः
तथा सप्तदशोच्छ्रायः स्कन्धायामो नवांशकः ॥
ग्रीवा चास्यार्धभागेन सार्धद्विपदमण्डकम्
वरिडका सार्धभागेन त्रिपदः कलशोदयः ॥
एवं यः कारयत्येनं प्रासादं नवशेखरम्
नवभिः सहितां खण्डैः स भुनक्ति वसुन्दराम् ॥
नवशेखरः ।

पुरडरीकमथ ब्रूमो यशसो वर्धनं परम्
यस्मिन् कृते स्थिरा कीर्तिर्भवेद्यावद्वसुन्धरा ॥
चतुरश्रं समं क्षेत्रं विभजेत्पञ्चभिः पदैः
त्रिपदं कल्पयेद्गर्भं तस्य भित्तिं च भागिकाम् ॥
त्रिपदं तस्य भद्रं स्यात्साधभागविनिर्गमम्
भद्रेषु वर्तुलं दिक्षु रथिकानां चतुष्टयम् ॥
भागेनैकेन रथिका मूलच्छन्दोऽयमीरितः
ऊर्ध्वमानं भवेद्यस्य द्विगुणो दशभागिकम् ॥
भागेनोच्छालकं विद्याद्भागार्धेन तु मेखला
वेदिबन्धं न कुर्वीत जङ्घा सार्धद्विभागिका ॥
मेखला चार्धभागेन भवेत्सान्तरपत्रका
पदानि पञ्च साधानि मञ्जर्याः स्यात्समुच्छ्रितिः ॥
त्रिपदः स्कन्धविस्तारो ग्रीवा वा पदसादिकाः
अरडकं स्यात्पदार्धेन भागपादेन चन्द्रिका ॥
भागोच्छ्रायस्तु कलशः कर्तव्यः शुभलक्षणः
मध्येन मूलमञ्जर्यास्त्रिपदा भद्रमञ्जरी ॥
सार्धा त्रिपदोच्छ्राया ग्रीवा भागसमुच्छ्रिता
अरडकं च त्रिभागेन कलशो भागमुच्छ्रितिः ॥
पञ्चारडः पुरडरीकोऽयं कर्तव्यः शुभवर्धनः
पुरडरीकः ।
सुनाभमथ ब्रूमो वन्दितो देवदानवैः ॥
वल्लभं लोकपालानां पूरयमुत्कृष्टलक्षणम्

विभजेत् सप्तदशभिः समक्षेत्रं चतुर्भुजम् ॥
पञ्चभागायताः कोणा गर्भः कार्यस्त्रिभिः पदैः
उभयोः कोणयोर्मध्ये सप्तभागिकमन्तरम् ॥
व्यक्षेपात्कर्णयोर्मध्ये प्राञ्छयेत् पदमन्तरम्
भागप्रवेशं भागार्धे विस्तारमुदकान्तरम् ॥
द्विपदा बाह्यभित्तिः स्यात्त्रिपदाथ भ्रमन्तिका
पञ्चभागायतो मध्ये भवेत्प्रासादनायकः ॥
त्रिपदस्तस्य गर्भस्तु भित्तिर्भागं विधीयते
त्रिपदं कर्णभद्रं च भागेनैकेन निर्गतम् ॥
पदप्रमाणकोणांस्तु चत्वारोपनिवेशयेत्
यथा कन्दस्तथा कोणो विभागैः स विधीयते ॥
पञ्च गर्भास्तु कर्तव्याः सममानप्रकल्पिताः
द्विगुणं चोर्ध्वमानं स्याद् ग्रीवाण्डकविवर्जितम् ॥
त्रिभिः पदैर्वेदिबन्धो जङ्घा सप्तपदा भवेत्
पदत्रयेण कर्तव्यं मेखलाद्वितयं बुधैः ॥
ऊर्ध्वतो बाह्यच्छन्दस्या कर्तव्या कर्णमञ्जरी
षट्पदाः कर्णमञ्जर्यो द्विपदं कलशाण्डकम् ॥
द्वादशा सप्तविस्तारा कर्तव्या मूलमञ्जरी
त्रयोदशपदोच्छ्राया ग्रीवास्या भागमुच्छ्रिता ॥
अण्डकं द्विपदोत्सेधं भागोत्सेधा तु चन्द्रिका
कलशस्त्रिपदोत्सेधो वर्तुलः शुभलक्षणः ॥
यावत् क्षितिर्यावदब्धिर्यावच्छशिदिवाकरौ

कर्तास्य तावद्दिव्यास्ते यावत्सुरगुरुः सुराः ॥
सुनाभाः ।
माहेन्द्रमथ वक्ष्यामः प्रासादं भूषणं क्षितेः
सेवितं यक्षगन्धर्वैः फणीन्द्रैश्च महाप्रभैः ॥
माहेन्द्रं पञ्चदशभिर्भागैः प्राज्ञो विभाजयेत्
नवभागायतं गर्भं कुर्याद्भित्तिं त्रिभागिकीम् ॥
विस्तारेणास्य विख्याता तज्ज्ञैः शाला पदत्रयम्
शालायाः पार्श्वयोः कार्यौ रथौ सार्धपदौ बुधैः ॥
रथशालान्तरेणैव कर्तव्यमुदकान्तरम्
रथस्याप्रातः पञ्चारि गृहकार्यं पदार्धकम् ॥
प्रत्यङ्गानि पदं साधं --- जलान्तरम्
द्विपदं कर्णमानं च कार्यं कोणचतुष्टये ॥
भागेनान्योन्यमेतेषां विधातव्यो विनिर्गमः
ऊर्ध्वमानं तु कर्तव्यं द्विगुणं सीमविस्तृतेः ॥
तुलोदयो दशांशः स्याद्विंशत्यंशा च मञ्जरी
वेदिबन्धं प्रकुर्वीत साधभागद्वयं बुधः ॥
जङ्घयोस्तु समुच्छ्रायमर्धपञ्चमभागिकम्
भागेन भरणं कुर्गाल्लाञ्छितं पत्रभङ्गिभिः ॥
तदूर्ध्वं मेखला कार्या भागद्वितयमुच्छ्रिता
ऊर्ध्वतो मञ्जरी कार्या क्रमेणैव मनोहरा ॥
नवभागायतं रुद्धो ग्रीवा भागसमुन्नता
अण्डकं द्विपदोत्सेधं चन्द्रिका भागमुच्छ्रिता ॥

द्विपदं कलशं कुर्याद्विस्तारोत्सेधतः समाः
लताः सप्त विधातव्या रेषा ब्रूम कुलाकृति ॥
मध्ये लतायाः कर्णस्य वेलकः षड्विधः क्रमः
प्रत्यङ्गे तिलका कूटाः पञ्चालार्धा द्विपद्मकः ॥
कोणे वराटका कूटाः कार्या माहेन्द्रमन्दिरे
कृत्वा महेन्द्रं राजा स्याद्माहेन्द्रस्य वसेद्दिवि ॥
महेन्द्रः ।
अथो ब्रूमो वराटाख्यं प्रासादं शुभलक्षणम्
दयितं किन्नरेन्द्राणां नागानां चातिवल्लभम् ॥
चतुरश्रं समं क्षेत्रं विभजेद्दशभिः पदैः
कुर्यात् षड्भिः पदैर्गर्भं भित्तिं भागद्वयेन च ॥
द्विपदं कर्णविस्तारं कुर्यात्कोणचतुष्टयम्
उदकान्तरविस्तारमर्धभागप्रवेशकम् ॥
पञ्चभागायतं भद्रमन्तरं वारिमार्गयोः
विस्तारार्धेन कर्तव्यस्तस्य भद्रस्य निर्गमः ॥
कुर्यान्मध्येऽष्टभिर्भागैः सपादैर्वृत्तमुत्तमम्
सहितो वारिमार्गेण तलच्छन्दोऽयमीरितः ॥
ऊर्ध्वप्रमाणमेतस्य विस्तारादि्द्वगुणं भवेत्
तुलोच्छ्रायोऽष्टभिर्भागैः पदानि द्वादशोर्ध्वतः ॥
पदत्रितयमुत्सेधात्कर्तव्यं भद्रपीठकम्
विस्तारार्धार्धमुत्सेधं वेदिबन्धस्य कारयेत् ॥
चतुर्भागोच्छ्रितां जङ्घां हीरकं चार्धभागिकम्

मेखलान्तरपत्रं च कुर्याद्भागमुच्छ्रितम् ॥
त्रिपदं शृङ्गमुत्सेधाद् ग्रीवा च कलशाण्डकम्
षतदूर्ध्वं पञ्चविस्तारा स्यादुरोमञ्जरी शुभा ॥
ग्रीवा कार्या पदार्धेन भागेनैकेन चाण्डकम्
कलशोंऽशोच्छ्रितोऽष्टांशविस्तारा मूलमञ्जरी ॥
तस्याः कार्यः समुत्सेधः प्रमाणान्नवभागिकाः
स्कन्धः पञ्चपदो ग्रीवा पादहीनं पदं भवेत् ॥
सपादं पदमञ्जर्या पदस्यार्धेन चन्द्रिका
कलशो द्विपदोच्छ्रायः प्रासादे स्याद्वराटके ॥
वराटं कारयेद्यस्तु प्रासादं भक्तिमान्नरः
स याति यानैर्विविधैः स्वर्गं प्राप्नोति चाक्षयम् ॥
वराटः ।
सुमुखस्याधुना लक्ष्म प्रकामागतमुच्यते
भागैरेकोनविंशत्या चतुरश्रे विभाजिते ॥
तत्रैकादशभिर्गर्भश्चतुर्भिर्भित्तिरंशकैः
कोणो द्विभागिकस्तत्र भागपादो जलान्तरम् ॥
भागार्धेन प्रवेशोऽस्य चतुरंशकविस्तृतम्
भद्रमेवं विनिर्दिष्टमर्धभागेन निर्गतम् ॥
पादोनभागद्वितयादन्तरे कर्णभद्रयोः
त्रयः प्रतिरथाः कार्याः सहिताः सलिलान्तरैः ॥
अर्धभागोऽर्धभागश्च मिथस्तेषां विनिर्गमः
ऊर्ध्वमानं भवेदस्य द्विगुणं द्विकलाधिकम् ॥

अंशकैः पञ्चमश्चैव विधेयोऽस्य तुलोदयः
विभागैः पञ्चविंशत्या तदूर्ध्वं मञ्जरी भवेत् ॥
वेदीबन्धो विधेयोऽस्य सार्धभागचतुष्टयात्
जङ्घाशैरष्टभिः साधं वरण्डी तु द्विभागिका ॥
लताभिर्नवभिर्युक्ता प्राग्वत् कार्यास्य मञ्जरी
स्यडेकादशभिर्भागैरेतत्स्कन्धस्य विस्तृतिः ॥
चतुर्गुणेन सूत्रेण वेणुकोशं समालिखेत्
कोणासन्नप्रतिरथो द्राविडोऽस्य विधीयते ॥
भूमिका नव कर्तव्याः शेषं कार्यं महेन्द्रवत्
पादोनभागद्वितया ग्रीवास्य च विधीयते ॥
सार्धभागद्वयमितं विदध्यादण्डकं शुभम्
चण्डिका सार्धभागेन कलशश्चाण्डकैस्त्रिभिः ॥
इत्येष कथितः सम्यक्प्रासादः सुमुखाभिधः
य एनं कारयेद्भक्त्या स कामानश्नुतेऽखिलान् ॥
भुक्त्वेह विपुलान् भोगान् पदमभ्येति शाश्वतम् ।
सुमुखप्रासादः ।
चतुर्मुखा श्रीधरादीनां ये प्रोक्तास्तान् प्रचक्ष्महे ॥
लक्षणैरधुना सम्यग् देवानामनिवर्तनात्
यत्स्याद्विजयभद्रस्य रूपं तस्मिन्नथास्थिते ॥
विजयो नाम कर्तव्यः प्रासादो देवताप्रियः
कर्णे केसरि -- सर्वतो भद्रकः पुनः ॥
निवेशनीयो रथकैः सर्वलक्षणसंयुतः

तस्योपरि विधातव्या मञ्जरी चारुरूपिणी ॥
विस्तारादुदयात्तस्याः कुर्वीतैककलाधिकम्
स्कन्धस्तु षट्पदः कार्यो ग्रीवा भागसमुच्छ्रिता ॥
अण्डकं सार्धभागेन चन्द्रिकापि च तत्समा
तस्या एव हि मध्ये तु कुर्यादामलसारकम् ॥
सार्धभागद्वयोत्सेधं कलशं च तदूर्ध्वतः
द्राविडैश्च वराटैश्च प्रकुर्वीतास्य मञ्जरीम् ॥
---प्रपन्ना नापि जन्मनि जन्मनि
नन्दः ।
महाघोषाभिधानोऽथ प्रासादः कथ्यतेऽपरः ॥
नन्दिघोषस्य संस्थाने रूपे चास्य व्यवस्थितः
अस्य कर्तृषु सर्वेषु भद्राणि विनिवेशयेत् ॥
भद्रे चतुष्किका कार्या द्विपदायामनिर्गमा
भागिकी भित्तिरन्तश्च शेषं गर्भगृहं स्मृतम् ॥
शृङ्गाणि कर्णे कुर्वीतेत्येषा प्रथमभूमिका
द्वितीया तु पुनः कार्या भित्तिविन्यासवर्जिता ॥
चतुर्दिशं विधातव्यं वेदीचन्द्रावलोकनम्
विदधीत चतुःस्तम्भां तृतीयामपि भूमिकाम् ॥
छाद्यकैरूर्ध्वेन तस्या कार्या संवरणा बुधैः
कारयेन्नन्दिघोषं यः प्रासादमिममुत्तमम् ॥
विभूतिर्वाञ्छिता तस्य कुलेऽपि न विनश्यति
महाघोषः ।

प्रासादो मिश्रकेष्वेव वृद्धिरागो विधीयते ॥
स्त्रीनिसस्य संस्थानं यत्तदस्यापि कीर्तितम्
गर्भकन्दं परित्यज्य स्तम्भैः षोडशभिर्वृतम् ॥
अस्य मध्यं विधातव्यं शेषं च श्रीनिवासवत्
उरोघण्टाभिरष्टाभिरश्वशालाभिरेव च ॥
अस्य भद्राणि कुर्वीत सर्वालङ्कारवन्ति च
वसुन्धरस्य ये भेदास्तैः सर्वैरन्वितः शुभः ॥
कलशैरेकविंशत्या वृद्धिरामः प्रशस्यते
प्रासादस्यास्य कर्ता च यावच्चन्द्रार्कतारकम् ॥
तावदिन्द्र इव स्वर्गे क्रीडत्यप्सरसां गणैः
वृद्धिरामः ॥
वृद्धिरामस्य संस्थाने प्रासादः स्याद्वसुन्धरः ॥
बाह्यभित्तीः परित्यज्य गर्भभित्तिर्विधीयते
वेदिकाकालरूपाद्यो भद्रतोरणभूषितः ॥
एतद्भेदसमायुक्तः प्रासादः स्याद्वसुन्धरः
भक्त्या यः कारयेदेनं सोऽधितिष्ठत्यसंशयम् ॥
दुष्प्रापमपि देवानां महादेवस्य मन्दिरम्
वसुन्धरः ।
प्रासादं मुद्गनामानमिदानीमभिदध्महे ॥
चतुरश्रीकृते क्षेत्रे षड्भिर्भागैर्विभाजिते
कुर्वीत भागिकीं भित्तिं गर्भं चैवास्य वर्तुलम् ॥
भद्रं चतुष्पदं वृत्तं निर्गमेण पदद्वयम्

स्वस्तिकश्च समाकाराश्चत्वारो रथिकाः स्मृताः ॥
कर्णाश्च सर्वे कर्तव्या अश्रिभिः षड्भिरावृताः
जङ्घा वेदी च पीठं च तत्र कीर्तिनिभानि च ॥
विस्तृतान्येकभागेन द्विभागोत्सेधवन्ति च
कर्णकूटानि कुर्वीत सपत्रामकराणि च ॥
भद्रं चतुष्पदायामं पञ्चभागसमुच्छ्रितम्
ग्रीवाण्डकं सकलशं कुर्यात्सार्धपदद्वयम् ॥
विस्तारं मूलमञ्जर्याः षट्पदं ---मालिखेत्
उच्छ्रयं दशभिर्भागैर्ग्रीवाकलशसंयुतम् ॥
मञ्जरीमत्र कुर्वीत मन्नकीर्त्ते यथा कृता
प्रासाद्रं --- यो भक्तितः कारयेदिमम् ॥
गायन्ति तस्य किन्नर्यो दिवि चन्द्रामलं यशः
मुद्गप्रासादः ॥
इदानीं म--- हच्छालं सुरालयम् ॥
कमलोद्भवसंस्थाने कुर्वीतेमं यथास्थितम्
दिक्सूत्रे कर्णसूत्रेण रथ---त् ॥
कर्णान्ते भद्रमध्ये च कारयेदुदकान्तरम्
पदपादेन विस्तीर्णं प्रक्षेपेण पदार्धकम् ॥
कर्णाध --- तव्या षड्भिरमूलिङ्गवृत्ताः
पीठं वेदी च जङ्घा च मेखलान्तरपत्रकम् ॥
कमलोद्भववत्कार्यं बहुधा क---षितम्
कर्तव्यशिखरं कुर्यात् --- ॥

इलिकामकरग्रासैर्वरालैः सासुरैश्चिता
कथिता पुष्पके यादृग्जङ्घातादृगिहेष्यते ॥
ऊर्ध्वपीठप्रमाणस्य तथावच्छादकस्य च
यन्मध्यं तत्र कुर्वीत षड्दारुकनिवेशनम् ॥
रुष्टिकातोरणश्चारुसालभञ्जाविराजितम्
वेदिकाराजसेनाढ्यं शमूतेद्भवलोकनम् ॥
सस्तम्भशीर्षभरणं पट्टरङ्गोपशोभितम्
म्लल्लं च्छाद्यं विधातव्यं सिंहकर्णविभूषितम् ॥
सिंहरूपैः समाक्रान्तं विचित्रैश्च वरालकैः
त्र्यंशोच्छ्रितं कर्णकूटं कुर्याद्द्व्यूपदविस्तृतम् ॥
ग्रीवाण्डकसमेतं च वरण्डयां कलशान्वितम्
कर्णाः पृथक्पृथक्चेह स्युः षट्पञ्चाशदण्डकाः ॥
उरोमञ्जरिकाभिस्ते तिसृभिः स्युर्विभूषिताः
कर्णान्ते मूलरेखा च विस्तारात्सप्तभागिका ॥
सार्धभागाष्टकं चास्या विधातव्या समुच्छ्रितिः
उरोमञ्जरिका कार्या चतस्त्रोऽनुदिशं तथा ॥
प्रथमा स्यादुरोरेखा द्वादशाण्डकभूषिता
चतुर्दशाण्डका चान्या तृतीया षोडशांशका ॥
अष्टादशाण्डकोपेता चतुर्थी परिकीर्तिता
षट्त्रिंशताण्डकैर्युक्ता मूलरेखा विधीयते ॥
ग्रीवा पदं स्यात्पादोनं सपादं पदमण्डकम्
लवलीफलतुल्यं तच्चन्द्रिका च पदोच्छ्रिता ॥

द्विपदं कलशं विद्यात्समवृत्तं मनोरमम्
अर्धोतु द्व विधातव्यं बुजं तस्य चोपरि ॥
विचित्रभूमिके सप्तदशम्मिल्लिख्यराद्धणरयपि
स्तम्भैर्विविधविन्यासैर्बहुभङ्गविनिर्मितैः ॥
भूषितैः कर्मभिश्चित्रैः सर्वत्र शुभलद्धणैः
चन्द्रशालादिसंयुक्तैस्तोरणैश्चारुचामरैः ॥
तथाद्धतमुकग्रासैर्घनरूपतया स्थितैः
व्यालैर्व्यालोलजिह्मैश्च मकरग्राससंयुतैः ॥
मदान्धालिकुलाकीर्णगजवक्रविभूषितैः
विद्याधरवधूवृन्दैः क्रीडारम्भविभूषितैः ॥
सुराणां सुन्दरीभिश्च वीणाहस्तैश्च किन्नरैः
सिद्धगन्धर्वयद्धाणां वृन्दैश्च परितः स्थितैः ॥
अप्सरोभिश्च दिव्याभिर्विमानावलिभिस्तथा
चारुचामीकरान्दोलाक्रीडासक्तैश्च निःसराम् ॥
नागकन्याकदम्बैश्च सर्वतः समलङ्कृतम्
एवंविधाभिः सर्वत्र भूमिकाभिर्निरन्तरम् ॥
अलङ्कृतो विधातव्यो मेरुः प्रासादनायकः
मध्यमद्विगुणैर्ज्येष्ठः कर्तव्यो मेरुरण्डकैः ॥
कनीयान् मध्यमार्धेनेत्यण्डकस्थितिरीरिता
उत्तमेषूत्तमं न्यस्येन्मध्यमेषु च मध्यमम् ॥
अधमेष्वधमं लिङ्गमेवमन्येषु धामसु
मेरोस्तु त्रिविधस्यापि लिङ्गमुत्तममृद्धिदम् ॥

अन्यथाविहित---दिरोषकृत्
मेरुं मेरूपमं दिव्यं यः कारयति पार्थिवः ॥
स प्राप्नोति परां मुक्तिं --- सदाशिवाम्
मेरुं प्रदक्षिणीकृत्य काञ्चनं यत्फलद्धिभाक् ॥
शैलेष्टकादारुमये कृतेऽस्मिंस्तत्फलद्धिभाक्
मेरुः ॥
लक्षणं मन्दरस्याथ प्रासादस्याभिधीयते ॥
सिद्धिप्रदस्य पुण्यस्तुतस्य त्रिदशैरपि
चतुरश्रीकृतेक्षेत्रे --- भागविभाजिते ॥
गर्भः कार्यश्चतुर्भागो भित्तिरेकांशविस्तृता
अन्धारिकैकभागेन बाह्यभित्तिस्तु भागिकी ॥
कोणेषु रथिकाः कार्याः पदद्वितयसंमिताः
चत्वारो मण्डपाः कार्याः षट्त्रिंशत्पदसंमिताः ॥
चतुर्दिशमलिन्दाश्च विधातव्याश्चतुष्पदाः
भागेन निर्गतास्ते सर्वतः शुभलक्षणाः ॥
अस्योर्ध्वमानं कर्तव्यं विस्तरादि्द्वगुणं बुधैः
कर्णावेधश्च विस्तारसीमा सर्वत्र गृह्यते ॥
प्रासादे मूलमानं यत्तच्च सम्यक् प्रकल्पयेत्
द्विपदं पीठमुत्सेधात्कार्यं प्राङ्मुनतो बहिः ॥
तत्पद्मैरङ्कितं कार्यं सिंहैरपि च मन्दिरे
पदार्धं खुरकः कार्यः प्रासादसमवर्जितः ॥
सार्धं पदद्वयं कार्यो वेदीबन्धः सुशोभनः

चतुर्भागोन्नता जङ्घा भागार्धं रूपपट्टिका ॥
मेखलान्तरपत्रं च कार्यं पदसमुच्छ्रितम्
पदद्वयायतानि स्युः कर्णे शृङ्गाणि मानतः ॥
उच्छ्रयस्त्रिपदस्तेषां ग्रीवाण्डकलशैः सह
मूलरेखा विधातव्या कर्णकूटस्य चोपरि ॥
नवभागोच्छ्रिता शस्ता विस्तारेणाष्टभागिका
विस्तारं दशधा कृत्वा तैः षड्भिः स्कन्धविस्तृतैः ॥
लताः पञ्च विधातव्याः श्रीवत्से कथिता यथा
कुर्वीत पञ्चभौमं वा सप्तभौममथापि वा ॥
ग्रीवा पादोनभागा स्यात्सपदमण्डकम्
चन्द्रिकैकपदा कार्या कलशो द्विपदोदयः ॥
त्रिश्वरं त्रिपदं कुर्यात्तत्रैकं भागमुत्सृजेत्
शुकनासोत्सृतं कुर्यात्सिंहस्थानविभूषितम् ॥
कनकाभरणैर्युक्तः पुमान्यद्वद्विराजते
तथा प्रासादराजोऽयं शोभते चित्रकर्मभिः ॥
मञ्जरीं दशधा कृत्वा कर्मशोभां प्रकल्पयेत्
भागैर्भद्रस्य विस्तारः षड्भिर्भागेन निर्गमः ॥
भागिक्यौ रथिके तत्र कुर्याद्भागाद्विनिर्गमः
भागद्वयमितान् कर्णान् विदिक्षु च निवेशयेत् ॥
शालाश्चतस्रः कर्तव्या युक्ताः कूटैर्मनोरमैः
नीरान्तराणि ता अष्टौ मञ्जर्या द्विगुणान्विता ॥
कूटेऽर्धे प्रथमा भूमिः कार्या भागद्वयोच्छ्रिता

पदपादविहीनास्तु क्रमेणोपरि भूमिकाः ॥
अर्धभागोच्छ्रिता ग्रीवा भागिकोच्छ्रायमण्डकम्
भागेन कलशः कार्यः सर्वलक्षणसंयुतः ॥
विस्तारार्धेन कर्तव्यो वेदीबन्धो विबन्धुरः
षड्गुणेनैव सूत्रेण मध्यरेखां समालिखेत् ॥
द्वितीयामालिखेत्पञ्चगुणितेन विचक्षणः
सार्धत्रिगुणसूत्रेण --- रेखां समालिखेत् ॥
मञ्जरीभिर्विचित्राभिः सर्वत्रैव विराजितः
प्रासादो मन्दरः कार्यः प्रमाणेनामुना शुभः ॥
मन्दरं मन्दराकारं कृत्वा प्रासादमुत्तमम्
प्राप्नोतीह परं सौख्यं परत्र च शुभां गतिम् ॥
मन्दरः ।
कथयामोऽथ कैलासमशेषसुरसेवितम्
प्रमथप्रवरैर्जुष्टं प्रासादं पुण्यवर्धनम् ॥
चतुरश्रीकृते क्षेत्रे शतधा प्रविभाजिते
शाला षड्भागविस्तारा कर्तव्या भागनिर्गमा ॥
कलात्रिभागिका कुर्यात्सलिलान्तरसंयुतान्
आरभ्य ब्रह्मणः स्थानात्समा इव पादद्वयम् ॥
भ्रमयित्वा समं वृत्तं गर्भमंशं प्रकल्पयेत्
तथा भित्तिर्विधातव्या समन्तादर्धभागिका ॥
भागिका बाह्यभित्तिः स्यात्भद्रभूषिता
अन्तराले तु सर्वत्र विदध्यादन्धकारिकाम् ॥

अलिन्दकाश्चतुर्भागाः कर्तव्या दिक्त्रये बुधैः
भागद्वयेन निष्क्रान्ताः सर्वतः शुभलक्षणाः ॥
चतुर्थोकां विधातव्यास्तेषु स्तम्भद्वयान्विताः
मुखे तु मण्डपः कार्यः स्तम्भपङ्क्तिविराजितः ॥
अथोर्ध्वमानं वक्ष्यामः कैलासस्य यथास्थितम्
पीठं तस्य पदे द्वे तु कर्तव्यं गणभूषितम् ॥
पदस्यार्धेन कर्तव्यः खुरकस्तु खुरादिति
तदूर्ध्वं द्विगुणा ज्ञेया प्रासादस्य समुच्छ्रितिः ॥
एकेन कुम्भकः कार्यो भागेन समवर्जितः
मसूरकस्तु भागेन पादोनेन विधीयते ॥
कार्यं पदस्य पादेन ततश्चान्तरपत्रकम्
मेखलार्धपदेन स्याच्चन्द्रशालाविभूषिता ॥
जङ्घा तदूर्ध्वं कर्तव्या सार्धं पदचतुष्टयम्
भागेनैकेन कुर्वीत मेखलान्तरपत्रकम् ॥
कर्णशृङ्गं त्रिभिर्भागैः कुर्यात्सकलशाण्डकम्
तदूर्ध्वं द्विपदानि स्युः कूटान्युच्छ्रायमानतः ॥
पूर्वोक्तानाममीषां च प्रक्षेपः स्यात्पदांशतः
चतुर्धा कूटविस्तारं संविभज्य पदद्वये ॥
संद्रस्यादितिक्तयनि सिंहक्रान्तानि कारयेत्
विस्तारं मूलमञ्जर्याः कुर्यात् षड्भागसंमितम् ॥
सप्तभागिकमुच्छ्रायं कैलासेऽस्याः प्रकल्पयेत्
भागार्धेन भवेद्भागिकोच्छ्रायमण्डकम् ॥

चण्डिकामर्धभागेन कलशं सार्धभागिकम्
कुर्वीत शिखरं चास्य स्वस्तिकस्य यथोदितम् ॥
युक्तं भूमीभिरष्टाभिर्मञ्जरीभिरलङ्कृतम्
सिंहकर्णैर्विचित्रैश्च भद्राण्यस्य विभूषयेत् ॥
कर्तव्यः स्कन्धविस्तारस्तस्मिन्पदचतुष्टयम्
विदधीत समालेखसूत्रेण त्रिगुणेन च ॥
एवं --- कैलासं विदधाति यः
विभूतिं लभते सोऽत्र सुखसौभाग्यसंयुताम् ॥
कामानवाप्य विविधान् कीर्तिमारोग्यमेव च
भुक्त्वा भोगांश्च कैलासे कल्पान्ते यावदीप्सितम् ॥
शार्वं पदमवाप्नोति शान्तं ध्रुवमनामयम्
कैलासः ।
त्रिविष्टपमथ ब्रूमः प्रासादममरप्रियम् ॥
सेवितं यक्षगन्धर्वसिद्धविद्याधरादिभिः
चतुरश्रीकृते क्षेत्रे विंशत्यंशविभाजिते ॥
षड्भागविस्तृता शाला स्याच्चतुर्भागनिर्गमा
चतुरंशती कोष्ठकानां द्वासप्तत्यधिका भवेत् ॥
आशात्रयस्थितैर्भद्रैः सार्धमेवं प्रजायते
कुर्याद्गर्भगृहाण्यष्टौ दिक्षुष्वास्वपि तानि तु ॥
कोणे तु षोडशांशानि तन्मध्ये चतुरोंऽशकान्
भित्तिर्द्वादशभिर्भागैर्गर्भाणामिति निर्णयः ॥
चतुःषष्टिपदः कार्यो मध्ये प्रासादनायकः

पदैः षोडशभिस्तस्य मध्ये गर्भं प्रकल्पयेत् ॥
द्विभागविस्तृता भित्तिः कर्तव्या तस्य बाह्यतः
चतुर्द्विशतिं भ्रमन्ती स्य --- पञ्चपदायता ॥
वलभीः कारयेत्तद्वद्द्विद्वभागेषु चतुर्ष्वपि
प्रत्यङ्गं द्विपदं कर्णशालावलभिकान्तरे ॥
तच्च द्विपदमुद्दिष्टं जलमार्गे पदार्धिके
पदैर्द्वादशभिर्दिक्षु चतसृष्वपि मण्डपान् ॥
प्रासादस्य प्रकुर्वीत कर्मशोभाविभूषितान्
मूलाप्रासादगर्भस्य कुर्याद्द्वारचतुष्टयम् ॥
विज्ञेये तच्च दिग्भद्रे सूत्रमार्गानुसारतः
जलान्तराणि कुर्वीत प्रत्यङ्गे पार्श्वयोरपि ॥
बाह्यभित्तिं तु कुर्वीत भागेनैकेन संमिताम्
एवं विभज्य कुर्वीत पुरतो मुखमण्डपम् ॥
ऊर्ध्वमानमथस्त्रिंशा तत्र पीठं चतुष्पदम्
मध्यप्रासादजङ्घा च तद्वदेव समुच्छ्रिता ॥
अतः पदैः स्याद्विस्तारादि्द्वगुणा शिखरोन्नतिः
तस्याश्च मध्ये कुर्वीत षोडशांशं तुलोदयम् ॥
तुलोदयस्य मध्ये द्वे वेदीबन्धं सपञ्चकाम्
जङ्घा चाष्टपदा कार्या मध्ये चासनपट्टिका ॥
एषामन्तरपत्रं च कर्तव्यं त्रिपदोच्छ्रितम्
तुलोदयस्योपरिष्टात् प्रमाणमथ कथ्यते ॥
चतुष्पदेषु कर्णेषु कूटं पञ्चपदोदयम्

ग्रीवा पदस्य पादोनत्रिभिः पादैस्तथाण्डकम् ॥
चन्द्रिकाकलशोत्सेधं पादेनैकेन कल्पयेत्
प्रत्यङ्गे तिलकास्त्र्यंशा घण्टाकलशसंयुताः ॥
मध्ये तु वलभीशृङ्गमुन्नतं सप्तभिः पदैः
ऊर्ध्वतस्तिलकानां स्यादुरोमञ्जरिका दश ॥
विस्तारेण पदान्यूर्ध्वं भवेद्द्वादशभागिका
स्कन्धपट्टादिविस्तारो ग्रीवा पादोनभागिका ॥
अण्डकं सार्धभागेन चन्द्रिका भागमुच्छ्रिता
द्विपदः कलशोच्छ्रायस्तद्वद्बीजपूरकम् ॥
विस्तारो मूलमञ्जर्याः कार्यः षोडशभिः पदैः
उच्छ्रायः सप्तदशभिः स्कन्धो नवपदः स्मृतः ॥
कार्या सप्तलतोपेता प्रशस्ता मूलमञ्जरी
ग्रीवास्य भागिका भागद्वयमामलसारकम् ॥
चन्द्रिका भागमेकं स्यात्त्रिपदा कलशोच्छ्रितिः
उक्ता या मूलमञ्जर्यः प्राक्प्रासादेषु तास्वियम् ॥
कार्ये माहामाकारा चारुकर्मोपशोभिता
बाह्यभित्तिसमायुक्तं प्रासादस्य चतुर्दिशम् ॥
मल्लच्छाद्यं प्रकुर्वीत यथाशोभं विचक्षणः
सर्वतश्चारुरूपाद्यैर्विचित्रैः शुभलक्षणैः ॥
विभूषयेत्सिंहकर्णैर्मल्लच्छाद्यं मनोहरैः
वलभीत्रयसंयुक्तं कर्णकूटचतुष्टयम् ॥
यथाशोभं विधातव्यं प्रासादेऽस्मिंस्त्रिविष्टपे

वास्तौ शतपदे यानि मर्माण्युक्तानि सर्वतः ॥
उत्सृज्य तानि यत्नेन परिकर्मात्र कारयेत्
प्रासादं कारयित्वैनमुक्तरूपं त्रिविष्टपम् ॥
लभेतेह यशो राज्यं परत्रानन्त्यमेव च
कृत्वा त्रिविष्टपं दिव्यं प्रासादं पुरभूषणम् ॥
वसेत्त्रिविष्टपे तावद्यावदाभूतसंप्लवम्
तस्यान्ते तु परे तत्त्वे लयमाप्नोति मानवः ॥
त्रिविष्टपः ।
अथाभिधीयते सम्यक्प्रासादः पृथिवीजयः
किन्नरासुरयक्षाद्यैर्वन्दितः सुरसत्तमैः ॥
चतुरश्रीकृते क्षेत्रे विभागाष्व विभाजिते
चतुर्भागा भवेच्छाला सपादांशविनिर्गता ॥
कर्णशृङ्गद्वयं कार्यं प्रत्येकं भागविस्तृतम्
पादोनपदनिष्क्रान्तं --- ॥
भागैश्चतुर्भिर्गर्भः स्याद्भित्तिः कार्या तु भागिका
भ्रमन्तिकापि भागेन बाह्यभित्तिश्च भागिकी ॥
भागद्वयेन कुर्वीत दिक्त्रयेऽस्य चतुष्किकाम्
पुरतो मण्डपं कुर्यादुपेतं कर्मशोभया ॥
एवं विभागान् संकल्प्य यथोद्देशं विचक्षणः
मन्दरस्येव कुर्वीत कर्मशोभां समन्ततः ॥
ऊर्ध्वतो यत्प्रमाणं स्यात्तदस्येहाभिधीयते
अधस्तान्नागपीठः स्यात्प्रमाणेन पदद्वयम् ॥

हीरकं भागपादेन तस्य मध्ये निवेशयेत्
विस्तारादि्द्वगुणं चोर्ध्वमानं भागार्धसंयुतम् ॥
ऊर्ध्वमानस्य मध्ये स्यात्षट्पदानिबर्हणादयः
वेदीबन्धश्च तन्मध्ये कर्तव्यः सार्धभागिकः ॥
ततो हीरकसंयुक्ता जङ्घा पदचतुष्टया
मेखलान्तरपत्रं च कार्यं भागार्धसंमितम् ॥
भागद्वयेन कर्तव्यं वेदिका राजसेरका
चन्द्रावलोकं भागेन विदधीत विचक्षणः ॥
कुर्यात्पदस्य पादेन तत्रैवासनपट्टकम्
पदद्वयेन सांशेन स्तम्भमूर्ध्वं निवेशयेत् ॥
अर्धभागेन कुर्वीत भरणं स्तम्भशीर्षके
अर्धभागेन पट्टं च छाद्यं सार्धपदायतम् ॥
द्वे सन्त पठिका कार्या ततो भागार्धसंमिता
ऊर्ध्वमन्तरपत्रस्य कथमोथ यथाक्रमम् ॥
कुर्याद् ग्रीवाण्डकलशं चन्द्रिकाभिः समं बुधः
उच्छ्रायं कर्णशृङ्गाणां सार्धभागं प्रमाणतः ॥
स्तम्भसूत्रेण कर्तव्यं नष्टशृङ्गं विचक्षणैः
कूटानि पञ्च कुर्वीत यथावत्प्रथमद्वितौ ॥
प्रा त्रीणि भूमौ द्वितीयायां तृतीयायां तु कूटकम्
कुर्यात्तुल्यसमुच्छ्रायविस्तारं तच्च मानतः ॥
कर्णे कर्णे तु कूटानि भवन्त्येवं पृथङ्नव
शुकनासोन्नतिः कार्या सार्धभागद्वयं बुधैः ॥

स्यादुरोमञ्जरी पूर्वा नष्टशृङ्गस्य चोपरि
विस्तारात्त्रिपदा सा स्यात्सार्धभागत्रयोन्नता ॥
भागं सपादं कुर्वीत ग्रीवां सकलशाण्डकम्
द्वितीयशृङ्गस्योर्ध्वं स्यादुरोमञ्जरिकापरा ॥
विस्तीर्णा चतुरो भागान्कार्या पञ्चपदोच्छ्रिता
स्कन्धावरोहणग्रीवाचन्द्रिकाकलशैः सह ॥
एतेषां तु समुच्छ्रायः साधभागं विधीयते
उरःशिखरकाण्डयष्टावेवं कुर्याच्चतुर्दिशम् ॥
तृतीयकर्णशृङ्गस्य स्यादूर्ध्वं मूलमञ्जरी
सा भवेत्षट्पदोच्छ्राया पदपञ्चकविस्तृता ॥
त्रिपदः स्कन्धविस्तारो दिक्षु स्याच्चतसृष्वपि
कूटैश्च विविधन्यासैरलङ्कुर्वीत मञ्जरीम् ॥
अर्धभागोच्छ्रिता ग्रीवा सार्धांशद्वयविस्तृता
अण्डकस्य समुच्छ्रायस्त्रिभागोनपदं भवेत् ॥
कर्परं चार्धभागेन कलशः पदमुच्छ्रितः
नवभिः शिखरैर्युक्तः कर्तव्योऽयं समन्ततः ॥
वेदीबन्धस्तु सर्वत्र कर्तव्यः शतवास्तुवत्
कुर्यात्तेन विभागेन कलशानपि शोभनान् ॥
मञ्जरीः पद्मपत्राग्रतुल्याः सर्वत्र कारयेत्
अण्डकानि भवन्त्यत्र चत्वारिंशच्च पञ्च च ॥
एवंविधं विधत्ते यः प्रासादं पृथिवीजयम्
पृथ्वीं विजयते कृत्स्नां निर्गितारिः स पार्थिवः ॥

अन्योऽपि कश्चिद्यः कुर्याद्वर्णाच्छतभक्तिमानिमम्
सोऽपि सौख्यमवाप्नोति पश्चादन्ते परं पदम् ॥
पृथिवीजयः ।
अतः परं प्रवक्ष्यामि प्रासादं क्षितिभूषणम्
अमरैर्वन्दितं सर्वैस्तथा चाप्सरसां गणैः ॥
चतुरश्रीकृते क्षेत्रे द्वादशांशविभाजिते
भद्रे पञ्च पदानि स्युः कोणे कार्यं पदत्रयम् ॥
गर्भं षोदशभिर्भागैस्तस्य कुर्याद्विचक्षणः
कर्तव्या पदविंशत्या कन्दभित्तिः समन्ततः ॥
प्रासादस्यास्य कर्तव्या रमणी तु पदद्वयम्
पट्टिका बाह्यभित्तिः स्यादि्द्वपदो भद्रनिर्गमः ॥
जलान्तरं तु भागस्तु---गवाक्षकाः
भद्राणां मध्यतः पञ्च प्रकाशाः सुमनोरमाः ॥
बाह्यालिन्दं प्रकुर्वीत वेदीजालविभूषितम्
तस्योपरिष्टात्कुर्वीत माल्युच्छ्रायं सुशोभनम् ॥
ऊर्ध्वमानमथ ब्रूमः प्रासादे क्षितिभूषणे
क्षुरकं तस्य कुर्वीत त्रिपदं पीठसंयुतम् ॥
अस्योच्छ्रायस्ततः सार्धपदाः स्यात् पञ्चविंशतिः
एतन्मध्ये तु दशभिः पदैः कार्यस्तुलोदयः ॥
रेखा पञ्चदशांशा स्यात्स्कन्धशीर्षं पदार्धकम्
वेदीबन्धस्तु कर्तव्यः साधभागद्वयं बुधैः ॥
जङ्घा षड्भागिकोच्छ्राया भागार्धे षेचराः शुभाः

मेखलान्तरपत्रं च पदेनैकेन कारयेत् ॥
कार्या चतुष्किका पञ्चविस्तारा त्रिपदोच्छ्रिता
तदूर्ध्वतः क्रमः कार्यो द्विपदोऽन्योऽधिकं पदम् ॥
भूमयः पञ्च कर्तव्या न्यूना च यथोत्तरम्
प्रथमा भूमिका कार्या सार्ध द्विभागास्तु गवाक्ष भागत्रयं बुधैः ॥
सपादास्तु त्रयो भागा द्वितीयाया समुदाहृता
तृतीया त्रिपदा--- परा ॥
--- पञ्चमी भूमिरिष्यते
पादहीनपदं ग्रीवा सपादपदमण्डकम् ॥
चन्द्रिका भागमेकं स्यात्पद्मपत्रनिभा शुभा
त्रिपदं कलशं विद्यान्मातुलिङ्गसमन्वितम् ॥
द्राविडं नागरं वापि वाराटं वास्तु शोभनम्
यदेकं तेवते कर्तुं तद्रूपं तं प्रकल्पयेत् ॥
नानाप्रकारैः स्तम्भैश्च नानाभूषणभूषितैः
कलशैः पद्मपत्रैश्च हीरकैश्चोपशोभितम् ॥
कृत्रिमग्रासयुक्ताभिश्चन्द्रशालाभिरन्वितम्
मकरग्राससंयुक्तैस्तोरणैर्लक्षणान्वितैः ॥
कोणोत्करठैर्विचित्रैश्च रूपैश्चित्रैश्च शोभितम्
कर्म रम्यं प्रकुर्वीत यथावद्वित्तविस्तृतम् ॥
गुणवान् नृपतिर्यद्वद्भूषयत्यखिलां महीम्
क्षितिं विभूषयत्येवं प्रासादः क्षितिभूषणः ॥
द्रव्येषु रेणुसंख्या या सुधायामपि यावती

तावद्युगसहस्राणि कर्ता शिवपदे वसेत् ॥
क्षितिभूषणः ।
संस्थानं सर्वतोभद्रस्याधुना परिकीर्त्यते
चतुरश्रीकृतं क्षेत्रं विभजेद्दशभिः पदैः ॥
तत्र गर्भो भवेत्तावान् यावत्स्याद्ब्रह्मणः पदम्
--- भित्तिश्चेति पदं पदम् ॥
भागषट्केन भद्रं स्यात्सार्धभागविनिर्गतम्
कर्णं द्विभागिकं कुर्यात्---लमाग्रसमन्वितम् ॥
पदपादस्य पादेन विस्तारो जलवर्त्मनः
यत्रैकमेव भद्रं स्याच्चारुस्तम्भैरलङ्कृतम् ॥
संमोददं स्याट्तद्वस्तु धनधान्यसुखावहम्
चतुर्भिर्विस्तृतं भागैः सार्धभागविनिर्गतम् ॥
भद्रस्यैवाग्रतो भद्रं तच्छा बाह्योदरं विदुः
विस्तारादि्द्वगुणश्चास्य समुच्छ्रायः प्रकीर्तितः ॥
कुम्भकं भागिकं कुर्याद्भागार्धेन मसूरकम्
भागपादेन कुर्वीत ततश्चान्तरपत्रकम् ॥
मेखलायाः समुच्छ्रायमर्धभागेन कारयेत्
चतुर्भागोन्नता जङ्घा प्रासकिङ्किणिकान्विता ॥
पदं पादविहीनं स्यात्स्थानेषु हीरकम्
मेखलान्तरपत्रं च पदाधेन समुद्गच्छ्रितम् ॥
त्रिभागविनतं कुर्याद्भागे चन्द्रावलोकनम्
ऊर्ध्वमासनपट्टस्य स्तम्भं कुर्यात्पदद्वयम् ॥

हीरग्रहणशीर्षां च पदेनैकेन कारयेत्
भागेनैकेन कुर्वीत पट्टपिण्डं विचक्षणः ॥
द्विपदं छाद्यविस्तारं तदर्धेन तुलस्वनमः
जठरं बाह्यसीमा च भित्तयश्चान्धकारिका ॥
जङ्घोत्सेधश्च कर्णश्च---यथा भवेत्
कोणेषु रथिकाः कार्याः कलशान्ताः पदत्रयम् ॥
द्वितीया द्विपदोच्छ्राया रथिका परिकीर्तिता
उच्छ्रायः सिंहकर्णस्य प्रथमस्य पदत्रयम् ॥
पदद्वयं द्वितीयस्य तत एव समुन्नतिः
शृङ्गाणां स्यान्मिथः क्षेपो भागं प--- यथोत्तरम् ॥
भागान्सप्तोच्छ्रितं कुर्याच्छिखरं विस्तृतं षट्
अर्धभागोच्छ्रिता ग्रीवा स्यादेकं भागमण्डकम् ॥
चन्द्रिकार्धपदेन स्यात्सार्धं तु कलशः पदम्
मञ्जरीः पद्मपत्राग्रे तुल्याः सर्वत्र कारयेत् ॥
अधस्ताद्भद्रपीठं तु वास्तुपादेन शोभनम्
यः कुर्यात्सर्वतोभद्रं सर्वलक्षणसंयुतम् ॥
जयश्रीर्जायते तस्य ---
सर्वतोभद्रः ।
ब्रूतो विमानं दस्या सादस्याथ लक्षणम् ॥
गणगन्धर्वजुष्टस्य वल्लभस्य दिवस्पतेः
चतुरश्रीकृते क्षेत्रे शतधा प्रविभाजिते ॥
विमानं विभजेत् प्राज्ञः श्रेयःपुष्टिसुखावहम्

भदैश्चतुर्भिस्तं कुर्यात्कर्णप्राग्ग्रीवकैस्तथा ॥
विस्ताराधं भवेद्गर्भो यच्छेषं तेन भित्तयः
त्रिंशद्वा मतो ज्येष्ठो मध्यमः पञ्चविंशतिः ॥
कनीयांस्तु विधातव्यः षोडशाप्येकविंशतिः
जातिशुद्धो भवेदेको मञ्जरीभिस्तथापरः ॥
मिश्रकस्य विमानस्य त्रैविध्यमिति कीर्तितम्
ज्येष्ठो मिश्रको निर्भागेः सर्वः कैलास द्रवान् ॥
मध्यमो जातिशुद्धस्तु मञ्जरीभिर्विवर्जितः
कनीयांश्च विधातव्यो मञ्जरीभिरलङ्कृतः ॥
कर्णप्राग्ग्रीवविस्तारः कर्तव्यो भागसम्मितः
भागार्धं क्षोभणा कार्या यच्छेषं तच्च कर्णवत् ॥
भागस्यार्धेन कुर्वीत तस्माद्भद्रस्य निर्गमम्
मिश्रकस्य चतुर्भागः प्राग्ग्रीवो विस्तरेण तु ॥
मूलसूत्रानुसारेण पार्श्वयोः पदिकौ रथौ
ऊर्ध्वमानं विमानस्य यथावदथ कथ्यते ॥
द्विपदं पीठमाख्यातं किन्नरैरुपशोभितम्
स्कन्धं यावच्च भागानां द्वाविंशतिरुदाहृा ॥
वेदीबन्धो तु --- सार्धभागद्व --- भवेत्
चतुर्भागोऽत्र --- छाद्या भागार्धेन --- किन्नराः ॥
मेखलान्तरपत्रं च पदमेकं समुन्नतम्
रूपाणि जङ्घागात्रे स्युर्वा चारिणां रथके ॥
स्तरसेका तस्य मध्ये स्यान्मकरग्रासभूषिता

भल्लिकातोरणैश्चारुघण्टाचमरकिन्नरैः ॥
ऊर्ध्वं तुलाप्रमाणस्य चतुर्भोमं तु प्रथम
--- भूमिकायां चतुर्भागसमुन्नता ॥
सोर्धभागा त्वपरा विस्तारा सार्धभागिकी
संक्षेपः प्रथमोऽस्याः कलशान्ते पदं भवेत् ॥
तृतीया त्रिपदा कार्या सपादपदविस्तृता
पदार्धेन तु संक्षेपस्तस्याः कार्यो विचक्षणैः ॥
चतुर्थी त्रिपदा कार्या भूमिर्मेखलया सह
ललिता मञ्जरीभिश्च नीलोत्पलदलाकृतिः ॥
सीम्नः पञ्चगुणं सूत्रं रेखान्तं तत्र वर्तयेत्
व्यासहवसममात्रा प्रवेशः प्रथमो भुवः ॥
ततोऽर्धवृद्धिवृद्धौ द्वावन्यस्तुर्यस्तु तत्समः
पदार्धं वेदिकोत्सेध विस्तारात्पञ्चभागिकी ॥
ग्रीवा पादोनभागं स्यात्सपादं भगमण्डकम्
कङ्कतीफलरूपं च मन्दारकुसुमाकृति ॥
चन्द्रिका ग्रीवया तुल्या कलशो द्विपदोन्नतः
विमानं छन्दकं कुर्यात्सर्वलक्षणसंयुतम् ॥
अश्वमेधप्रधानैर्यदिष्टैः क्रतुशतैर्भवेत्
तदेकेन विभानेन फलमाप्नोति मानवः ॥
विमानम् ।
नन्दनस्याथ वक्ष्यामः प्रासादस्येह लक्षणम्
द्वाविंशतिकरं क्षेत्रमष्टधा प्रविभाजयेत् ॥

चतुर्भागप्रविस्तारं तस्य भद्रं प्रकल्पयेत्
भागेनैकेन निष्क्रान्तं प्राग्रीवं चास्य शोभनम् ॥
मूलकर्णस्य पदिकौ कर्तव्यौ पार्श्वगौ रथौ
षडङ्गुलं त्र्यङ्गुलं वा चतुरङ्गुलमेव च ॥
जलान्तरं प्रकुर्वीत दीयते तत्र मञ्जरी
गभश्चतुर्भिर्भागैः स्याच्छेषं भित्त्यन्धकारिका ॥
द्विपदं कन्दभद्रं स्यात्पदपादेन निर्गतम्
पुरतो मण्डपं चास्य सुग्रीवं नाम कारयेत् ॥
द्वैगुण्यं मूर्धविस्तारार्धे भ---वेदिका
रेखामस्य तथा कुर्यात्कैलासस्य यथोदिता ॥
भूमयः षड् विधातव्या द्वादशाण्डाः पृथक्पृथक्
नन्दयत्येष कर्तारमिह लोके परे च यत् ॥
नन्दनो नाम तेनोक्तः प्राज्ञैः प्रासादसत्तमः
नन्दनः ।
अभिदध्मः प्रासादं स्वस्तिकं स्वस्तिदायकम् ॥
देवासुरगणैर्वन्द्य पद्मसिद्धमहोरगैः
ज्येष्ठमध्यकनिष्ठस्य तलच्छन्दोऽस्य यदेशः ॥
यादृगूर्ध्वप्रमाणं च तत्सम्यगिहकथ्यते
चतुरश्रे समे क्षेत्रे पञ्चविंशतिहस्तके ॥
सूत्रपातं प्रकुर्वीत कर्णतिर्यङ्मुखायतम्
ततः सीमार्धसूत्रेण वृत्तमालिख्य निश्चितम् ॥
द्वात्रिंशता समन्ताद्रेखाभिर्विभजेत्ततः

वृत्तं तथोमुघाताद्विर्दिर्विदस्थाभिरङ्कयेत् ॥
दिक्कर्णसूत्रयोर्मध्यं ततो सेवत्रयं बुधः
कुर्याद्द्वात्रिंशदेवं स्युर्भागास्तुल्यप्रमाणकाः ॥
ऐन्द्र्यादिष्वीशपर्यन्तास्वष्टौ शालाः प्रकल्पयेत्
शालान्तरेषु कुर्वीत कोणानष्टौ यथाक्रमम् ॥
कोणात्कोणं नयेत्सूत्रं त्यक्त्वा शालाद्वयं मुहुः
विदिक्ष्वष्टसु सूत्राग्रं पद्मपत्रवदानयेत् ॥
कोणाश्च रथिकाश्चैव भवन्त्येवं सुलक्षणाः
चतुरश्रा भवन्त्यष्टौ शाला भागद्वयायताः ॥
द्व्यंशानि कर्णभद्राणि पद्मपत्रनिभानि च
ऊर्ध्वमानं भवत्यस्य द्विगुणं ह्यूर्ध्वमा---नात् ॥
विंशत्या विभजेदूर्ध्वं तत्राष्ट ष्टांशस्तुलोदयः
शेषां तु मञ्जरीं कुर्यादास्कन्धावधि बुद्धिमान् ॥
विस्तारपञ्चमांशेन पीठोच्छ्रायं प्रकल्पयेत्
त्रिपदं वेदिकाबन्धं सुएकेण समन्वितम् ॥
जङ्घांशलंबनां कुर्याच्चतुर्भागसमुच्छ्रिताम्
मेखलान्तरपत्रं च भागेनैकेन कारयेत् ॥
द्वादशांशोच्छ्रिता रेखा कार्या सप्त च भूमयः
अर्धभागोच्छ्रिता ग्रीवा विस्तारेण चतुष्पदा ॥
स्कन्धः षड्भागविस्तारः कार्यो वृत्तः सुशोभनः
समालिखेदेषु कोशं विस्तारात्त्रिगुणात्मना ॥
सूत्रेण येन वा स्कन्धो भवेत् षड्भागविस्तृतः

हस्तैः स्यात्पञ्चविंशत्या ज्येष्ठः षोडशभिः परः ॥
कनीयान् स्वस्तिको ज्ञेयः करैर्द्वादशभिः पुनः
भागषट्कसमुच्छ्राया जङ्घा ज्येष्ठस्य कीर्तिता ॥
मध्यमाधमयोः पञ्चचतुर्भागोच्छ्रिता क्रमात्
स्वस्तिके कारिते स्वस्ति सर्वलोकस्य जायते ॥
विशेषतश्च भूपानां कर्तुश्च स्यात् समीहितम्
स्वस्तिकम् ।
मुक्तकोणमथ ब्रूमः प्रासादं स्यात्स च त्रिधा ॥
हस्तैः क्रमेण ज्येष्ठादिः षोडशद्वादशाष्टभिः
ज्येष्ठो दश भागान्स्यान्मध्यमस्तु चतुर्दश ॥
कनीयान् दश भागान्स्यात्सदस्तस्याभिधीयते
चतुरश्रीकृते क्षेत्रे भक्तेऽष्टादशभिः पदैः ॥
कोष्ठकानां विधातव्यं चतुर्विंशं शतत्रयम्
भागषट्त्रिंशता कुर्यान्मध्ये गर्भगृहं शुभम् ॥
बाह्यभित्तिस्तथान्धारी मध्यभित्तिरिति त्रयम्
पृथक्पृथक् स्यादिद्वपदविस्तारं परिमाणतः ॥
चतुर्भागायता शाला भागेनैकेन निर्गता
शालाया भूषणं भद्रं विधायैतत्पदद्वयम् ॥
तत्पार्श्वद्वितये कुर्यात्त्वधिके भागिके बुधः
वार्यन्तराणि कुर्वीत दिक्चवष्टचतसृष्वपि ॥
वार्यन्तरानन्तरं तु भागद्वितयसंमितान्
अष्टौ कुर्वीत रथिकांश्चतुर्दिशमनुत्तमान् ॥

कोणे द्विभागिकैः कुर्याद्रथानामांससंमिता
कोणे रथान्परित्यज्य शेषं कुर्याद्यथोदितम् ॥
मध्यमोऽयं समाख्यातः कनीयान् कथ्यतेऽधुना
चतुरश्रीकृते क्षेत्रे दशभागविभाजिते ॥
चतुर्भागा भवेच्छाला भागेनैकेन निर्गता
एकभागप्रमाणानि पार्श्वे वार्यन्तराणि च ॥
तेषां मध्ये प्रकुर्वीत सरोजदलसंनिभम्
रथकर्णोन्यर्णे यथावच्च सलिलान्तरभूषणम् ॥
भागार्धं क्षोभणा कार्या चतुष्कोणे व्यवस्थिता
साधभागोन्मितान्कुर्यात्कर्णप्राग्ग्रीवकान्शुभान् ॥
वार्यन्तराणां प्रोक्ता भूषश्रोभिकनीयसि
प्रासादे मध्यमेऽप्येषा ज्यायस्यपि च कल्प्यवै ॥
त्रिविधोऽयं समाख्यातो मुक्तकोणः समासतः
ऊर्ध्वमानं भवेदस्य विस्तारादि्द्वगुणोच्छ्रयम् ॥
ग्रसिस्तु पञ्चदशभिस्तन्मध्यं स्यात्तुलोदयः
चतुष्पदो वेदिबन्धो जङ्घा सार्धैश्च सप्तभिः ॥
मेखलान्तरपत्रं चार्धहीरकं पदम्
त्रिपदा कर्णशृङ्गास्य कलशान्तसमुच्छ्रयान् ॥
सिंहकर्णश्च कर्तव्यः स्व---भागे समुन्नतः
ऊर्ध्वतः कर्णशृङ्ग विधेया मूलमञ्जरी ॥
सावषो विस्तरो---पदान्यष्टादशोच्छ्रिताः
चतुर्दिशं समायामः स्कन्धः स्यान्नवभागिकः ॥

मञ्जर्यास्त्र्यंशपुरेमनः शुकनाससमुच्छ्रितिः
ग्रीवा--मेन भागेन कुर्यादि्द्वपदमण्डकम् ॥
चण्डिकां सार्धभागेन त्रिपदं कलशोच्छ्रयम्
--- यन्नरः कश्चिन्मुक्तकोणं महायशाः ॥
संप्राप्नो ते महासौख्यं विमुक्तः सर्वपातकैः
सर्वद्वन्द्वविनिर्मुक्तः सर्वकिल्बिषवर्जितः ॥
सर्वपापविनिर्मुक्तो भोगं मोक्षं च विन्दति
मुक्तकोणः ।
श्रीवत्समथ वक्ष्यामः प्रासादं सुरपूजितम् ॥
चतुरश्रीकृते क्षेत्रे दशधा प्रविभाजिते
षड्भिर्भागैर्भवेद्गर्भो भित्तिः कार्या द्विभागिकी ॥
रथकं त्रिपदं कुर्यात्प्रत्यङ्गात्सार्धभागिकात्
द्विपदं कर्णमस्याहुर्विदिक्षु चतसृष्वपि ॥
भागार्धं क्षोभणा क्षेपात्तदर्धार्धं जलान्तरम्
प्रक्षेपः स्यात्पदार्धेन पदमानस्य बाह्यतः ॥
द्वे पदे निर्गतं चास्य शुकनासं निवेशयेत्
वास्तुविस्तारपादेन कर्तव्या द्वारविस्तृतिः ॥
द्वारोच्छ्राय विस्तारात्कर्तव्यो द्विगुणो बुधैः
ऊर्ध्वमानमथ ब्रूमः श्रीवत्सस्य यथोदितम् ॥
पीठं प्रासादपादेन खुरकश्च पदार्धकः
विस्तारादि्द्वगुणं कर्तव्यं कुम्भकादितः ॥
अंशैर्द्वादशभिस्तेषु कुर्याच्छिखरमायतम्

अष्टभागं तुलोच्छ्रायं वेदी सार्धद्विभागिकी ॥
कुम्भकं पदिकं कुर्यात्पादोनांशं मसूरकम्
पादोनं पादेन स्यात् मेखलान्तरपत्रकम् ॥
चतुर्भागोच्छ्रिता जङ्घा भागार्धं हीरकं भवेत्
मेखलान्तरपत्रं तु भागेनैकेन कारयेत् ॥
षड्भागविस्तृतं स्कन्धं भाजयेद्दशभिः पदैः
यथा मूले तथा स्कन्धेऽप्यङ्गप्रत्यङ्गकल्पना ॥
स्कन्धपार्श्वे तु या रेखा व्यक्ताश्च स्कन्धबाह्यतः
भजेत्ता दशभिर्भागै रूढमेवं विभाजयेत् ॥
ऊर्ध्वाधः प्रतिभागस्तत्रास्यात्पत्रसंहतिः
तदाकृतिं बाह्यरेखां गात्रे गात्रे प्रकल्पयेत् ॥
अनुमात्रगुणं सूत्रं त्रिभागेन समन्वितम्
भ्रमयेत्कोणरेखा स्यात्प्रत्यङ्गेस्तत्रपञ्चकान् ॥
षड्गुणेन तु सूत्रेण रथरेखां समालिखेत्
अत्र स्युर्भूमयः सप्त प्रथमांशद्वयोच्छ्रिता ॥
द्वितीया पदपादार्धहीना भूमिस्ततो भवेत्
पादद्वयं भागहीनं तृतीयायां भवेद्भुवि ॥
सार्धभागविहीनं च चतुर्थी स्यात्पदद्वयम्
पञ्चमा सार्धभागेन पदं स्यात्स्कन्धशीर्षकम् ॥
एवं परस्परं भागं पादार्धेन जिता भुवः
त्रिभागीकृत्य शिखरं तत्रैकं भागमुत्सृजेत् ॥
शुकनासोच्छ्रितिः शेषं सिंहेनाधिष्ठिता भवेत्

पादोनभागा ग्रीवाण्डं सपादं पदमुच्छ्रितम् ॥
रेखा --- विधातव्यं --- न्यूनाधिकमण्डकम्
सपादभागमानेन कर्तव्यं चन्द्रिकाद्वयम् ॥
पद्मपत्राकृतिं कुर्यान्मध्ये चामलसारिकाम्
द्विपदं कलशं कुर्याद्बीजपूरकवर्जितम् ॥
श्रीवत्सं कारयेद्यस्तु प्रासादमतिसुन्दरम्
कुलानां शतमुद्धृत्य स व्रजत्यमरावतीम् ॥
श्रीवत्सः ।
अथ हंसस्य वक्ष्यामः प्रासादस्येह लक्षणम्
चतुरश्रीकृते क्षेत्रे चतुर्भिर्विभजेत् पदैः ॥
भागैश्चतुर्भिर्गर्भः स्याद्भित्तिर्द्वादशभागिकी
भागद्वयेन भद्राणि ततश्च परिकल्पयेत् ॥
चतुर्भागेन निष्क्रामस्तेषां गर्भस्य शस्यते
भागस्य षोडशांशेन कुर्याद् नीरन्तराणि च ॥
पीठिका वेदिकाबन्धो जङ्घा मेखलया सह
ऊर्ध्वमानं च कर्तव्यं स्वस्तिकस्य यथोदितम् ॥
मध्ये किन्नररूपाणि पद्मपत्राणि चाप्यधः
उपरि व्यालहाराश्च पीठमेवं विभूषयेत् ॥
त्रिभौमं पञ्चभौमं वा कुर्यादेनं विचक्षणः
नागरं द्राविडेश्चेति कर्णे कर्णे निवेशयेत् ॥
भूमिकाभाञ्जि कूटानि कुर्यादेकान्तराणि च
रथिके रथिका कुर्याद् विन्यनागरकर्मणा ॥

विस्तारार्धेन वेदी स्याद् ग्रीवा चास्य पदार्धिका
अण्डकं पदिकं कार्यं कङ्कतीफलसन्निभम् ॥
--- चण्डिका कलशः स्यात्पदोच्छ्रितः
यथा विराजते हंसोमाशिरसि स्थितः ॥
प्रासादोऽपि तथा हंसः पुरमध्ये विराजते
हंसाख्यमेनं प्रासादं कारयेद्यो भरोत्तमा ॥
तावत्स्वर्गे वसेच्छ्रीमान् यावदिन्द्राश्चतुर्दश
हंसः ।
रुचकाख्यमथ ब्रूमः प्रासादं पुरभूषणम् ॥
आदौ समस्तवस्तूनां कल्पितं पद्मजन्मना
चतुरश्रीकृते क्षेत्रे चतुर्भिर्भाजिते पदैः ॥
भागमेकं भवेद्भित्तिस्तस्य गर्भः पदद्वयम्
वेदीबन्धं तथा जङ्घां मेखलामूर्ध्वमेखलाम् ॥
मानमूर्ध्वमधश्चास्य श्रीवत्सस्येव कारयेत्
कोणेषु स्तम्भकाः कार्या हाइ हीइसार्षसमन्विता ॥
मध्ये तु रथिका कार्या चारकर्मविभूषिता
चतुर्भौममिदं कार्यंस्तवैवसट कर्मणा ॥
युक्तं मध्ये तु रथिका प्रतिभूमि विधीयते
रुचकः कारितो येन प्रासादः शुभवास्तुनि ॥
कुलानां तारितं तेन शतमात्मा तथोद्धृतः
रुचकः ।
वर्धमानमथ ब्रूमो धर्मारोग्ययशस्करम् ॥

तस्याष्टगुणमैश्वर्यं भवेद्यः कारयेद्यदि
चतुरश्रं समं क्षेत्रं भाजयेद्दशभिः पदैः ॥
ततो भागचतुष्केण कर्तव्यो मध्यमो रथः
एकैकेन विभागेन द्वौ रथौ वामदक्षिणौ ॥
कर्णास्तु पदा कार्या वर्जं चारिधर्मभिः
भद्रस्य निर्गमं तत्र भागेनैकेन कारयेत् ॥
भागस्यार्धेन पार्श्वस्थरथकानां विनिर्गतम्
विस्तारार्धेन गर्भः स्याद्यच्छेषं तेन भित्तयः ॥
ऊर्ध्वमानं भवेदस्य स्वस्तिकस्य यथोदितम्
वर्धमानोऽयमाख्यातो यशोलक्ष्मीविवर्धनः ॥
वर्धमानः ।
गरुडस्याधुना ब्रूमः प्रासादस्येह लक्षणम्
प्रासादः सर्वदैवायं गरुडध्वजवल्लभः ॥
द्वाविंशतिपदं क्षेत्रं भक्ताल्या समायतम्
पूर्वापरेण दशभिर्भागैर्भूयो विभाजितम् ॥
कुर्वीत मध्ये प्रासादं तस्मिञ्शतपदं बुधः
द्विपदं भित्तिविस्तारं कर्णांश्चापि द्विभागिकान् ॥
उत्सृष्टमूलप्रासादमुभयोरपि पक्षयोः
अग्रतः पृष्ठतश्चापि द्वौ द्वौ भागौ परित्यजेत् ॥
शेषेण षट्पदौ --- सहसायामविस्तृती
गर्भः षोडशभिर्भागैर्भित्तिः स्यात्पदमेतयोः ॥
रीवत्सहंसरुचकवर्धमानेषु कोऽपि यः

रोचते गरुडं कुर्यात्तमेकं स्वेच्छया बुधः ॥
तस्य पक्षौ विधातव्यौ निर्गतौ वामदक्षिणम्
एवमेते त्रयो गर्भा गरुडे परिकीर्तिताः ॥
गरुडः ।
प्रासादस्य गजस्याथ लक्षणं सम्प्रचक्ष्महे
चतुःषष्टिपदं क्षेत्रं विधाय विभजेद्गजम् ॥
ततः सीमाधसूत्रेण पृष्ठतो वृत्तमालिखेत्
गर्भं कुर्यात्तदर्धेन --- रेखाकृतिं त --- ॥
ऊर्ध्वप्रमाणमधुना गजस्य स्पष्टमुच्यते
स्तम्भाश्चतुष्पदोच्छ्रायाः कार्याः कोणचतुष्टये ॥
जङ्घेयमस्य निर्दिष्टा खल्लस्तम्भान्तरं भवेत्
पट्टिकान्तरपत्राभ्यां समभागेन मेखला ॥
अग्रतः शूरसेनं स्यात्पृष्ठतस्तु गजाकृतिः
गजः ।
प्रासादस्याधुना लक्ष्म सिंहसंज्ञस्य कथ्यते ॥
चतुरश्रं समं क्षेत्रं विभजेन्नन्दने यथा
गर्भो भागैश्चतुर्भिः स्यात्कक्षभित्तिस्तु भागिकी ॥
भागेनान्धारिका कार्या बाह्यभित्तिश्च भागिकी
भद्रं भागैश्चतुर्भिः स्याद्भागेनैकेन निर्गतम् ॥
कर्णस्तु द्विपदः कार्यो जलमार्गसमन्वितः
द्विपदं पीठमुत्सेधात्सिंहरूपैरधिष्टितम् ॥
खुरकं च पदार्धेन कुर्यात्पीठस्य मध्यतः

कुर्यादूर्ध्वं ---विस्तारादि्द्वगुणं कलयाधिकम् ॥
द्विपदं वेदिकाबन्धं जङ्घा चास्य चतुष्पदम्
मेखलान्तरपत्रं च विदध्याद्भागिकोदयम् ॥
त्र्यंशानि कर्णशृङ्गाणि ग्रीवाण्डकलशैः सह
सिंहकर्णस्तु कर्तव्यः समुच्छ्रायाच्चतुष्पदः ॥
सिंहरूपसमाक्रान्ते प्रासादे सिंहसंज्ञिते
ऊर्ध्वतः कर्णशृङ्गस्य षट्पदा मूलमञ्जरी ॥
सप्तभागसमुत्सेधा लताभिः पञ्चभिर्युता
ग्रीवोच्छ्रायस्तु कर्तव्यः पदं पादेन वर्जितम् ॥
अण्डकं तु पदोत्सेधं रेखायां च द्विनिस्सृतम्
पादोनभागमुच्छ्रायश्चन्द्रिकायाः प्रकीर्तितः ॥
द्विपदं कलशं कुर्याद्बीजपूरकसंयुतम्
यदामं कारयेत्स स्यादजेयः पुरुषो ध्रुवम् ॥
व्यवहारे नृपकुले सङ्ग्रामे शक्रसंसदि
सिंहः ।
इदानीं पद्मकं ब्रूमः प्रासादं पदमसन्निभम् ॥
यः कसान् कारयत्येनं स कामाल्लभेतेऽखिलान्
चतुरश्रीकृते क्षेत्रे --- दिक्षु विदिक्षु वा ॥
न्यस्येत्पृथक्पृथक्सूत्राण्यथ वृत्तं प्रसाधयेत्
दिधिसूत्रयोर्मध्ये चतुरश्रं तु रोमकम् ॥
तुल्यप्रामाण्यविन्यस्येत्स्युर्द्वात्रिंशदमीरितः
विस्तृतान्यथ भागौ द्वौ कर्णपत्राणि षोडश ॥

पद्मपत्रसमानानि वारिमार्गान्वितानि च
गर्भः स्याद्बाह्य संमोहा सीमाधं यच्छेषं तेन भित्तयः ॥
षडष्टद्वादशकरः पद्मो ज्येष्ठादिकः क्रमात्
द्वात्रिंशत् षोडशाष्टौ च तस्य स्यू रथकाः क्रमात् ॥
जलान्तराणि चैतस्य श्रीवत्सस्येव कारयेत्
पीठकं वेदिकाबन्धं जङ्घाशेखरचन्द्रिकाः ॥
अण्डकं कलशं ग्रीवामेतस्योच्छ्रयमानतः
कुर्वीत स्वस्तिकस्येव स्वविस्तारानुसारतः ॥
पद्मः ।
अथाभिधीयते सम्यक् प्रासादो नन्दिवर्धनः
नन्दयत्येष कर्तारं पुत्रदारधनादिभिः ॥
चतुरश्रीकृते क्षेत्रे भजेत् षोडशभिः पदैः
शतद्वयं विभागाः स्युः षट्पञ्चाशत्तथा परैः ॥
गर्भः शतपदः कार्यो भित्तिश्च त्रिपदायता
कर्णप्रमाणं त्रिपदं ववबन्धसमन्वितम् ॥
भागायतं भागपदं विस्तीर्णं वारिवर्त्म च
विभजेत्पञ्चधा कर्णं तस्य भद्रं त्रिभिः पदैः ॥
भागं भागं भवेत्कर्णे भागार्धं भद्रनिर्गमः
प्रत्यङ्गं द्विपदं कुर्याद्वारिमार्गेण संयुतम् ॥
निर्गमां सार्धभागेन पार्श्वयोरुभयोरपि
शालाषट्पदविस्तारा प्रत्यङ्गा भागनिर्गतम् ॥
भद्रं तदग्रतः कुर्याद्विस्तारेण चतुष्पदम्

भागार्धनिर्गमं सम्यग्दद्यु सर्वास्वयं विधिः ॥
कर्णस्यार्धे नयेद्गर्भाद्वृत्तं तत्पूर्वमालिखेत्
अनुसारेण वितरेदङ्गप्रत्यङ्गनिर्गमम् ॥
सार्धभागं गजाधारं साब्जपत्रं समेखलम्
कुर्यात्पदं पादहीनं जङ्घाकुम्भसमुच्छ्रितम् ॥
भागपादेन कणकं पादोनान्तरपत्रकम्
तदर्धं ग्रासहारं च भागार्धं खुरकं तथा ॥
खुरकेण समं प्रोक्ता पीठस्यैषा समुच्छ्रितिः
विस्तारादि्द्वगुणश्चायं स्यादूर्ध्वकल्पयाधकः
तुलोदयो विधातव्यस्त्रयोदशभिरंशकैः
विंशत्यंशं तु शिखरं --- श्चतुष्पदम् ॥
पादोनभागद्वितयं कुम्भकं तेषु कारयेत्
भागेनैकेन कलशमर्धेनान्तरपत्रकम् ॥
पादहीनपदं कार्या मेखलास्य सुशोभना
जङ्घा षड्भागिकोच्छ्राया भागार्धं ग्रासपट्टिका ॥
हीरकं चैकभागेन कर्णस्थं परिकीर्तितम्
मेखलान्तरपत्रं च साधभागसमुन्नतम् ॥
जङ्घामध्ये तु कर्तव्या रथका रथकास्तथा
वृत्तस्तम्भैः समकरैर्ग्रासैर्मुक्तावरालकैः ॥
जङ्घा तु संवृता कार्या मल्लच्छाद्यैर्विभूषिता
जलान्तरेषु रूपाणि कुर्यात्सङ्घाटकैः शुभैः ॥
कुर्यात्तुलोदयस्योर्ध्वमिमि भूमिभिरष्टभिः

स्कन्धाष्टांशोऽस्य दूराद्या---सपदत्रयम् ॥
द्वितीया त्रिपदा प्रोक्ता तृतीया पादवर्जिता
सार्धद्व्यंशा चतुर्थी च पादोना पञ्चमी ततः ॥
षष्ठी तु द्विपदा कार्या पादोना सप्तमी ततः
अष्टमी तु कृतिः कार्या सार्धभागेन संमिता ॥
एकैकस्याः पदार्धेन प्रक्षेपः स्यात्परस्परम्
कोणे कूटानि कुर्वीत प्रत्यङ्गं तिका लकानि च ॥
भद्रे कुर्वीत रथिका विविधाः कर्मसङ्कुलाः
रथस्य पार्श्वयोर्लेखाः कर्तव्याश्चोभयोरपि ॥
वेदिकास्य विधातव्या भागमेकं समुन्नता
ग्रीवा तावद्भागमेकमण्डकं द्विपदोदयम् ॥
कुर्यात्सामलसारिं च चन्द्रिकां सार्धभागिकाम्
कलशस्त्रिपदः कार्यो बीजपूरं बहिस्ततः ॥
पुरतः शूरसेनं स्यान्मध्ये रूपसमाकुलम्
मिश्रकस्य विमानस्य सदृशं कारयेदमुम् ॥
भूषणं भवनस्यास्य प्रासादं नन्दिवर्धनम्
प्रासादविंशतिरियं परिकीर्तितेह
मेर्वादिका सकलनाकसदामभीष्टा ।
तत्त्वेन वेत्ति य इमां स समग्रशिल्पि-
वर्गाग्रणीर्बहुमतश्च भवेन्नृपाणाम् ॥

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे

मेर्वादिविंशिका नाम सप्तपञ्चाशोऽध्यायः

अथ प्रासादस्तवनं नाम अष्टपञ्चाशोऽध्यायः

प्रासादानां चतुःषष्टिरिदानीमभिधीयते
या पूर्वं ब्रह्मणा दत्ता प्रासादा विश्वकर्मणे १
मर्मवेधस्थिता वास्तुदेवाः पूज्या यथोचितम्
पूज्यता च स्मृता तेषां प्रासादे मण्डपे ध्वजे २
आसने वाहने तद्वत्सर्वोपकरणेष्वपि
प्रासादे यादृशश्छन्दस्तादृङ्नन्दपीठयोः ३
तथा वास्तुविरुद्धं स्यात्प्रासादाङ्गे हिते विदुः
अष्टावष्टौ स्मृतास्तेषु त्रिदशानां पृथक्पृथक् ४
शम्भोर्हरेर्विरिञ्चस्य ग्रहाणामधिपस्य च
चण्डिकाया गणेशस्य श्रियाः सर्वदिवौकसाम् ५
विमानः सर्वतोभद्रो गजपृष्ठोऽथ पद्मकः
पृषभो मुक्तकोणश्च नलिनो द्राविडस्तथा ६
इत्येतेऽष्टौ समुद्दिष्टाः प्रासादास्त्रिपुरद्रुहः
गरुडो वर्धमानश्च शङ्खावर्तोऽथ पुष्पकः ७
गृहरस्वस्तिकश्चैव रुचकः पुण्ड्रवर्धनः
कार्या जनार्दनस्याष्टौ प्रासादाः पुरभूषणाः ८
मेरुमन्दरकैलासा हंसाख्यो भद्र एव च
उत्तुङ्गो मिश्रकश्चैव तथा मालाधरोऽष्टमः ९
इत्यष्टौ ब्रह्मणः प्रोक्ताः प्रासादाः पुरमध्यगाः

गवयश्चित्रकूटश्च किरणः सर्वसुन्दरः १०
श्रीवत्सः पद्मनाभश्च वैराजो वृत्त एव च
एते कार्या रवेरष्टौ प्रासादाः शुभलक्षणाः ११
नन्द्यावर्तश्चैव चलभश्चर्णादिरव्यः सिंह एव च
विचित्रो योगपीठश्च घण्टानादपताकिनौ १२
अष्टावेते विधातव्याश्चण्डिकायाः सुरालयाः
गुहारसलोकश्च वेणुभद्रोऽथ कुञ्जरः १३
तथा च हर्षविजयावुदकुम्भोऽथ मोदकः
एतान् विनायकस्याष्टौ प्रासादान् कारयेच्छुभान् १४
महापद्म हर्म्यननलमुञ्जयन्तस्तथा परः
गन्धमादनसंज्ञं च शतशृङ्गानवष्ककौ १५
सुविभ्रान्तो हारीत्यष्टौ लक्ष्म्याः प्रकीर्तिताः
वृत्तो वृत्तायतश्चैत्यः किङ्किणीलयनाभिधः १६
पट्टिशो विभवाख्यश्च ततश्चारागणाष्टमः
कुर्वीत सर्वदेवानां प्रासादान् वास्तुशास्त्रवित् १७

प्रासादस्तवनं नामाष्टपञ्चाशत्तमोऽध्यायः

विमानादिचतुष्षष्टिप्रासादलक्षणं नामैकोनषष्टितमोऽध्यायः

विमानमथ वक्ष्यामः प्रासादं शम्भुवल्लभम्
स्वर्गपातालमर्त्यानां त्रयाणामपि भूषणम् १
सर्वेषां गृहवास्तूनां प्रासादानां च सर्वतः
प्रासादो मूलभूतोऽयं तथा च परिकर्मणाम् २

एकाशीतिपदे वास्तु विमाने पञ्चभूमिके
कर्णान्तयोः शतपदं प्रासादेष्वपरेषु तु ३
ब्रह्मासृजत्पञ्चभौमविमानानि पुरा रवेः
मूलकर्णानुगैर्भद्रैर्द्विगुणोच्छ्रायवन्ति च ४
शेषभद्रस्य निष्कासो भद्रदेवचतुष्टयम्
आकाशदेवताधारचत्रयथा विदिक्षु च ५
दशधा कृतविस्तारो विमाने सम्प्रकीर्तितः
पञ्चभाग्यप्रमाणश्च गर्भे भित्तिस्तदर्धतः ६
प्राग्ग्रीवं भित्तिविस्तारं गर्भायामत्तथाग्रतः
ततः प्राग्ग्रीवविस्तारः क्षोभणीयः कराङ्गुलैः ७
भागिको रथविस्तारः कर्णिका चार्धभागिकी
भागपञ्चकविस्तारं भद्रं यत्तत्प्रकीर्तितम् ८
भूणस्तोवहेस्तस्य निर्गमो भागिकः स्मृतः
भागार्धेन विधातव्यः क्षोभणो जलवर्त्मनः ९
कर्णिकां जलमागं च समसूत्रेण मापयेत्
अथोच्यते भूमिकानां स्तम्भानां चेह लक्षणम् १०
विस्तारादि्द्वगुणः स्कन्धः सर्वस्मिन् बुद्धनागरे
---पञ्चभागा स्याज्जङ्घास्वसमुच्छ्रितिः ११
तिलकानां तथोच्छ्रायो विधातव्यो द्विभागिकः
तिलकस्य शिरोघरटां चैकसूत्रेण मापयेत् १२
जङ्घामानत्रिभागेन खुरपिण्डीं प्रकल्पयेत्
खुरकं वेदिबन्धं च समसूत्रेण मापयेत् १३

जङ्घामानत्रिभागेन खुरपिण्डीं प्रकल्पयेत्
खुरकं वेदिबन्धं च समसूत्रेण सूत्रयेत् १४
द्वितीयभूमिकोत्सेधं सिंहकर्णं विभूषयेत्
मस्तके घण्टया युक्ता चतुर्भागोच्छ्रिता च सा १५
ततस्तृतीयभूत्सेधः पदतुल्यांशवर्जितः
चतुर्थी भूमिका कार्या सार्धभागत्रयोच्छ्रिता १६
मञ्जरीस्तम्भयोर्मध्ये सवातायनमेखला
द्वितीया भूमिका या सा सिंहकर्णैरलङ्कृता १७
तस्या द्वारं विधातव्यं कपाटद्वयसंयुतम्
स्यावर्द्धात्पाटितं द्वारं तृतीयायां सदा भुवि १८
पादेन द्विपदोत्सेधा तदूर्ध्वं वेदिमेखला
कैरवाणां दलेर्युक्ता कर्तव्या दृष्टिहारिभिः १९
वेदिका पञ्चविस्तारा कार्या भागसमुच्छ्रिता
ग्रीवार्धभागिकोत्सेधा घण्टैकं भागमुच्छ्रिता २०
पञ्चभाग---विस्तारा घण्टाकोटिर्विधीयते
कुमान्दं वेदिबन्धं च घण्टाग्रं मस्तकोदयम् २१
मापयेत्समसूत्रेण समन्ताद्भूमिपञ्चके
व्यासार्धहस्तसङ्ख्यानि प्रवेशा प्रथमं क्षितेः २२
अङ्गुलानि तदा द्वयर्धो द्वितीयायाः प्रकीर्तिताः
संयोगादनयोर्यः स्यात्तृतीयायास्तमादिशेत् २३
तदर्ध्यर्धश्चतुर्थ्यास्तु पञ्चम्याः शेष ईरितः
स्वमूलविस्तृतेर्भागस्तृतीयो वेदिकोर्ध्वतः २४

लतया विस्तृतिर्भद्रे युक्तायां जालवर्तमनः
वेदिदोग्रविधातव्यो सार्धसविस्तृतौ २५
मञ्जर्याः स्तम्भसीमानां क्षोभयेत्पुष्टिमानतः
वेद्यां भागे शालायां निष्क्रामो मूलकोणतः २६
स्थानैर्विचित्ररूपैः स्यात्सिंहकर्णैश्च भूषितः
पञ्चव्यासेन सूत्रेण रेखामस्य समालिखेत् २७
एतद्विमानं ललितं देवदेवस्य कारयेत्
विमानम् ।
संस्थानं सर्वतोभद्रस्येदानीमभिधीयते २८
जठरं बाह्यसीमा च तथा भित्त्यन्धकारिका
जङ्घोत्सेधश्च कर्णौ च यथा मेरोस्तथा भवेत् २९
तथैव भद्रविस्तारः षड्भागेन समन्ततः
रथिके च द्विभागे स्तः कोणसंज्ञे च पार्श्वयोः ३०
मुष्टिप्रमाणं विस्तारं कर्तव्यमुदकान्तरम्
विस्तारादि्द्वगुणः स्कन्धस्योच्छ्रायो भागविंशतिः ३१
पञ्चभागसमुत्सेधा जङ्घा कार्या सदा बुधैः
मेखलान्तरपत्रं च सार्धभागसमुच्छ्रितम् ३२
शृङ्गं भागत्रयोत्सेधं सग्रीवामलसारकम्
मूलशृङ्गस्य गर्भेण न्यस्येदुपरिभूमिकाम् ३३
द्वितीयभूमिविस्तारं दशधा प्रविभाजयेत्
द्वौ भागौ शृङ्गविस्तारौ विधेयः पार्श्वयोर्द्वयोः ३४
सग्रीवामलसारस्य तैः शृङ्गस्योदयस्थितिः

तस्य शृङ्गस्य गर्भेण कर्तव्योपरिभूमिका ३५
तस्या भूमेस्तु विस्तारं दशधा भाजयेत्पुनः
यः शेषः शिखरायामो तद्विंतिनंते विनिर्दिशेत् ३६
विभजेद्वर्धमानं वा रुचकं वास्तुशोभनम्
कर्णान्तरे भद्रमध्ये वल्लभालभीं तत्र कारयेत् ३७
भूमिकाशिखरेणोर्ध्वं नवभूमिं विभेदयेत्
वेदिकामध्यसूत्रस्य कर्णतोर्ध्वभुवस्तथा ३८
भूमिकोर्ध्वभुवश्चैव विस्तारं दशधा भवेत्
मूलसीमानुसारेण स्याच्छेदावधि संहृतिः ३९
ग्रीवा मूलार्धभागे --- नामलसारकम्
चन्द्रिका चार्धभागेन --- कलशो भवेत् ४०
सर्वतोभद्रः ।
गजस्य संस्थानमथ प्रासादस्याभिधीयते
चतुःषष्टिपदं वास्तु प्रासादस्य विभाजयेत् ४१
ततः सीमार्धसूत्रेण पृष्ठतो वृत्तमालिखेत्
पञ्चभागमिता जङ्घा मेखला सार्धभागिकी ४२
अग्रतः सूरसेनः स्यात्पृष्ठतः कुञ्जराकृतिः
सीमानमष्टधा कृत्वा विभजेन्नन्दने यथा ४३
द्वौ द्वौ च कर्णयोर्भागौ भद्रेषु चतुरो विदुः
विस्तारार्धेन जङ्घा स्याद्रथिकायाः पृथक्पृथक् ४४
भागत्रयोच्छ्रितं शृङ्गं कर्णदेशे विधीयते
सप्तभागसमुत्सेधा वलभी मध्यसंश्रिता ४५

समन्ताद्भद्रसंस्थाना रेखाग्रीवाण्डकादिभिः
सिंहकर्णैश्च भद्रेषु प्रासादो गर्भ उच्यते ४६
वित्तसाध्यविहीनेन कर्तव्यः स्वस्तिके यथा
सर्ववत्तस्य स्युः पत्रनिभाः ४७
विस्तारोऽ ---थ जङ्घा च लतिनि स्वस्तिके यथा
उदकान्तर --- श्रीवत्से नन्दने यथा ४८
पद्मः ।
ब्रूमोऽथ वृषभं स स्यात्पूर्वोक्तै रूपकर्मभिः
चतुर्भद्रश्चतुर्द्वारो विमानो सत्रिसाकृति ४९
तेवृद्धिस्तत्प्रमाणाश्च सीमाशिखरकोदयैः
कर्णवेदकपोताली जङ्घाग्रे मस्तकेन च ५०
सार्धद्विभागविस्तारैरकैर्वामदक्षिणौ
कार्यौ भद्रं चतुर्भागं भागार्धं सलिलान्तरम् ५१
स्तम्भद्वयं भवेत्तस्य सर्वभूम्यन्तरेषु च
एकः स्तम्भो विमाने स्याद्द्वौ स्तम्भौ वृषभे पुनः ५२
एष भेदः समाख्यातो विमानस्य वृषस्य च
वृषभः ।
मुक्तकोणमथ ब्रूमस्तं भागैरष्टभिर्भजेत् ५३
मूलकर्णावुभौ भागौ भवतो वामदक्षिणौ
मध्यशृङ्गं चतुर्भागं प्रमाणं जठरस्य च ५४
कर्णशृङ्गान्तयोर्मध्ये कुर्वीत सलिलान्तरम्
रथकौ पार्श्वयोः पूर्णौ भद्रदेशे जलान्तरम् ५५

विस्तारोत्सेधजङ्घाश्च सग्रीवामलसारकः
लतिनामिव कर्तव्याः प्रमाणेन समन्ततः ५६
मुक्तकोणः ।
ब्रूमोऽथ नलिनीं तस्याः प्रमाणं लक्षणान्वितम्
तस्यां तु मार्गस्यश्च देवगर्भः सुरालयः ५७
भित्तिविस्तृतिरायामो मुक्तकोणे यथा तथा
मध्यदेशे तु यच्छृङ्गं --- कर्णान्तरे च यत् ५८
मुक्तकोणे यथा तच्च भेदः कर्मविभेदनात्
चतुरश्रे स्मृतो मध्ये कर्णश्रृङ्गे विचक्षणैः ५९
नलिनः
ब्रमोऽथ मणिकं तस्य शालालिङ्गसमुद्गता
अलिन्दकार्धसीमायां सर्वतः स्याच्चतुष्किका ६०
श्रेयः पुष्टिसुखार्थोऽयं मणिकोऽत्र विमानवत्
दशधा क्षेत्रसीम्नः स्याद्विभागः सर्वतोदिशम् ६१
रथ --- कर्णिकार्धं च जलवर्त्माथ भद्रकम्
मूलगर्भस्तथोत्सेधो घण्टा स्तम्भान्तविस्तृता ६२
भूमिजङ्घासमुत्सेधः कपोताद्द्वारनिर्गमः
सिंहकर्णा विमानानि स्तम्भचित्रादिकास्तथा ६३
तोरणान्यथ माल्यानि तस्यालङ्करणानि च
नीलोत्पलदलाकारा मञ्जर्यः सर्वशोभनाः ६४
विमानमपरं ह्येतद्योनिरेकस्तयोर्द्वयोः
केवलं भद्रभेदेन मणिको द्राविडोऽप्ययम् ६५

मणिकः ।

प्रासादमथ वक्ष्यामो गरुडं सर्वसुन्दरम्
दशधा क्षेत्रविस्तारं तस्य पूर्वं विभाजयेत् ६६
द्वौ भागौ रथिकाः कार्या मूलकर्णाद्विनिस्सृताः
भद्रं षड्भागविस्तारं पक्षवंशादिभेदितम् ६७
अलिन्दनिर्गमः कार्यः सीमार्धेन चतुर्दिशम्
मूलसीमा तु कर्तव्या सलिलान्तरवर्जिता ६८
स्यान्मूलसीमविस्तारात्स्कन्धः स्याद्द्विगुणोच्छ्रितिः
प्रासादस्य समुच्छ्रायात्त्रिभागेन समेखलाम् ६९
जङ्घामन्तरपत्रेण कुं युक्तं कुर्वस्तसा
जीरकं वेदिबन्धं च भागत्रयसमुच्छ्रितम् ७०
अलिम्बानां समुत्सेधं शेखरार्धेन कारयेत्
षड्भागं स्कन्धविस्तारं विदधीत विचक्षणः ७१
ग्रीवार्धभागमुत्सेधाद्भागमामलसारकम्
कुमुदं चार्धभागेन कुम्भः स्यादेकभागिकः ७२

गरुडः ।

अथोच्यते वर्धमानो दशधा तं विभाजयेत्
पादोनांशद्वयं कुर्यात्पार्श्वयोः कर्णविस्तृतिम् ७३
सपादपदविस्तारौ रथकौ वामदक्षिणौ
चतुर्भागोन्मितं भद्रं विस्तारेण प्रकीर्तितम् ७४
विस्तारो द्विगुणोच्छ्रायं स्कन्धं यावत्प्रकल्पयेत्
खुरकस्याथ जङ्घाया मञ्जरीस्कन्धयोरपि ७५

ग्रीवामलसारकादेः प्रमाणं गरुडे यथा
वर्धमानः ।
द्वाविंशतिकरायामः शङ्खावर्तोऽथ कथ्यते ७६
मूलसीमावृत्तनाहस्तस्य स्यात्पद्मके यथा
भित्तिगर्भस्य विस्तारः पादेनार्धनवकमात् ७७
अलिन्दमग्रतः कुर्यात्सिंहकर्णविभूषितम्
उत्सेधत्र्यंशतो जङ्घा वेद्यं तत्र विभागतः ७८
आस्कन्धं वेदिकाबन्धाद्विस्तृतेर्द्विगुणोच्छ्रितिः
मेखलान्तरपत्रं च जङ्घामध्ये विधीयते ७९
भ्रमयेत्कर्णसूत्रेण बहिर्वृत्तं समन्ततः
कर्णदिक्पालयोर्मध्यं वृत्तसूत्रेण वर्तयन् ८०
अवशिष्टं तलच्छन्दं स्वस्तिकस्येव कारयेत्
ग्रीवाममलसारं च कलशं वारिनिर्गमम् ८१
कुर्वीत स्वस्तिकस्येव विस्तारोत्सेधमानतः
शूलसीमानुसारेण च्छेदे संवरणं भवेत् ८२
तद्रूपमेव लतिनं वर्तयेद्वलनाकृतिम्
शङ्खावर्तः ।
ब्रूमोऽथ पुष्पकं स स्याद्विमानसदृशाकृतिः ८३
तावत्प्रमाणस्तद्वृद्धिः पञ्चभूश्चतुरश्रकः
विमानेन मानयुक्त यन्मञ्जर्या यच्च लक्षणम् ८४
तत्कार्यमत्र मञ्जर्या नतु कार्यं जलानतरम्
पुष्पकः ।

गृहराजमथ ब्रूमः स स्यात्कैलाससन्निभः ८५
विटङ्कनिर्गमाधारनिर्यूहैः सर्वतो वृतः
वलभ्या भूषितो मध्ये गवाक्षद्वारसंयुतः ८६
कपोतस्तम्भपर्यन्तः शालाभञ्जीविराजितः
वेदिकाखण्डशालाद्यं क---परितो भवेत् ८७
कुवीत्य मल्लकच्छाद्यैः सिंहकर्णैश्च भूषितः
अलिन्दभेदतः प्राहुर्गृहराजमितं बुधाः ८८
कैलासस्येव संस्थानं स्यादस्योर्ध्वमधोऽपि च
गृहराजः ।
ब्रूमोऽथ स्वस्तिकं तस्य पूर्ववन्मानलक्षणम् ८९
तेनैव लतिनं सर्वं कुर्वीतैनं विचक्षणः
यथा मूले विभक्ताः स्युर्लतिनस्वस्तिकादयः ९०
तथैषां स्कन्धभक्तानां मध्ये रेखां प्रकल्पयेत्
प्रासादः स्वस्तिको नाम स्यादेवं लक्षणान्वितः ९१
सुधानासोदयः स्वस्य कर्तव्यः स---भागिकः
स्कन्धं यावत्समुत्सेधो विस्तारादि्द्वगुणो भवेत् ९२
त्यवृद्धागोच्छ्रिता जङ्घा मेखला चा---भागिकी
मध्यशाला द्विभागाश्च मूलसूत्रविभागतः ९३
कर्णा द्विभागिकाश्चैवं जलमार्गस्तु षोडश
अष्टौ शाला भवन्त्यस्मिन् कर्णाश्चाष्टौ समन्ततः ९४
प्राग्ग्रीवं बाह्यतः कुर्यात्सुखभागविचक्षणः
कलशश्चण्डिका ग्रीवा तद्वदामलसारकः ९५

ऊर्ध्व ऊर्ध्वप्रमाणं च यथैवाद्य तथा भवेत्
स्वस्तिकः ।
रुचकं ब्रूमहे तस्य विभागो दशधा भवेत् ९६
भागद्वयमितौ कर्णौ भद्रं षड्भागसम्मितम्
तेषां विनिर्गमं विद्याद्धस्तामात्रा प्रमाणतः ९७
कुर्यादुदकमार्गांश्च प्रासादे रुचके क्वचित्
स्कन्धावशिष्टमुत्सेधो विस्तारादि्द्वगुणो भवेत् ९८
वेदिकायास्तु विस्तारः स्कन्धे षड्भागिकः स्मृतः
तृतीयांशेन कुर्वीत जङ्घामूर्ध्वं सुरोदयान् ९९
जङ्घायाश्च त्रिभागेन कार्या खुरखरण्डिका
मेखलान्तरपत्रं च कुर्यादध्यर्धभागिकम् १००
सार्धत्रिगुणसूत्रेण पूर्वा कर्कटना भवेत्
चतुर्गुणं मूलसूत्रेण मध्ये कर्कटना स्मृतौ १०१
विभज्य दशधा स्कन्धविस्तारं तैः प्रकल्पयेत्
भद्रं चतुर्भिः कर्णांशुर्णांस्तु कुर्याद्भस्त्रिभिस्त्रिभिः १०२
स्वच्छाया भूमिकाः कार्या या वा मूलार्धभागिकीः
भागेनामलसारं च कुमुदं चार्धभागिकम् १०३
कुम्भं भागेन कुर्वीत प्रासादे रुचके बुधः
साधारणोऽयं सर्वेषां प्रासादस्तु दिवौकसाम् १०४
रुचकः ।
पुरुद्रवर्धनकं ब्रूमः प्रासादं वल्लभं हरेः
भ्रमयेन्मूलसीमास्पृग्वृत्तमादौ समन्ततः १०५

तच्छालाकर्णसंयुक्तं कर्तव्यं सर्वतोदिशम्
यश्छन्दः स्वस्तिकेऽस्य स्याद्द्विगुणः पुरड्रवर्धने १०६
जङ्घोदकान्तभद्राणामुच्छ्रायो विस्तृतिश्च या
स्वस्तिके कथिता सैव विज्ञेया पुरड्रवर्धने १०७
पुरड्रवर्धनः ।
अथाभिधीयते मेरुर्दशधा तत्र भाजयेत्
सीमानं तस्य कुर्वीत शृङ्गं चापि विभागिकम् १०८
शेषं भागिकं भद्रमायमाने विधीयते
पदस्य षोडशौसेनं कर्तव्यमुदकान्तरम् १०९
पदैः षोडशभिर्गर्भो विधातव्यः पदं पदम्
भित्तिरन्धारिका बाह्यभित्तिश्चास्य विधीयते ११०
भागषट्कोच्छ्रिता जङ्घा मेखला चैकभागिकी
शृङ्गं च त्रिपदोत्सेधं शिखरं स्याद्दशोच्छ्रितम् १११
कर्तव्यं वास्तुशास्त्रज्ञैस्तस्यैकादशभूमिकम्
अर्धपञ्चमविस्तारः स्कन्धो ग्रीवार्धभागिका ११२
उच्छ्रायेण विधातव्या भागिकोत्सेधमण्डकम्
भागाधिकं च कुमुदं भागिका कलशोच्छ्रितिः ११३
षड्गुणेनैव सूत्रेण रेखा तस्य प्रकीर्तिता
मेरुं मेरुगिरिप्रख्यमेवं यः कारयेदिमम् ११४
शिलाभिरिष्टकाभिर्वा स महत्पुण्यमाप्नुयात्
मेरुः ।
लक्षणं मन्दरस्याथ प्रासादस्याभिधीयते ११५

गर्भस्यार्धेन निष्क्रान्तं भद्रं कुर्वीत मन्दरे
--- मेरुसङ्काशं विन्यस्येत् सर्वतोदिशम् ११६
वलभी मध्यदेशे तु शिखरोर्ध्वसमुद्भृता
सर्वमन्यत्प्रमाणं तु मेरोरिव भवेदिह ११७
मन्दरः ।
कैलासमथ वक्ष्यामो दशधा तं विभाजयेत्
भद्रं षड्भागविस्तारं मध्यदेशे विनिःसृतम् ११८
कर्णद्विभागविस्ताराः सलिलान्तरवर्जिताः
गर्भस्यार्धेन विष्कासः कार्यो भद्रस्य सर्वतः ११९
लतिस्याखरं मध्ये शिखरार्धसमोदयम्
भित्तिगर्भभ्रमन्तीमां जङ्घामेखलयोरपि १२०
विस्तारमुदयं चास्मिन् विदध्यात्स्कन्धशृङ्गयोः
मेरोरिवास्मिन् प्रासादे ववचद्व ग्रीवाण्डकस्य च १२१
कैलासः ।
ब्रूमोऽथ हंसकमस्य स्याद्विभागो रुचके यथा
जलान्तरं विशेषोऽत्र शेषं भरुचकवद्भवेत् १२२
हंसः ।
भद्रस्य लक्षणं ब्रूमो दशधा तं विभाजयेत्
गर्भविस्तारमानेन स्यादस्मिन् भद्रविस्तृतिः १२३
सार्धद्विभागविस्तारौ रथकौ वामदक्षिणौ
गर्भार्धा तुल्यमायामात्प्राग्ग्रीवं चेहलं कारयेत् १२४
प्राग्ग्रीवस्य समुत्सेधं शिखरार्धेन कारयेत्

वलभीं मध्यदेशेऽस्य सिंहकर्णसमन्विताम् १२५
लताजलेगवाक्षाद्याश्चतुष्काभिश्चतुर्दिशम्
भद्रो भवति शेषं तु स्यादत्र रुचके यथा १२६
भद्रम् ।
अथ तुङ्गं प्रवक्ष्यामो द्वितीयो ह्येष मन्दरः
भूषयेत्सिंहकर्णैस्तं लतामूर्ध्वं च कारयेत् १२७
भूमिभूमिसमुत्सेधः स्तम्भचित्रादिकं तथा
मेरोरिवात्र मध्ये तु मञ्जर्यः सर्वतोदिशम् १२८
तुङ्गः ।
ब्रूमोऽथ मिश्रकं स स्यान्मानसंस्थानलक्षणैः
भौमो विमानवन्मध्ये शृङ्गं कैलासवद्भवेत् १२९
मिश्रकः ।
अथ मालामाकारं तु तं कृत्वा गवाक्षैरुपशोभयेत्
यत्किञ्चिन्मानमध्यं तु तदाद्यस्येव प्रकल्पयेत् १३०
गवयः ।
चित्रकूटमथ ब्रूमो दशधा तं विभाजयेत्
प्राग्ग्रीवा निर्गता तस्य गर्भमानेन कारयेत् १३१
सार्धद्वयाधोविस्तारांस्तत्कर्णान् वामदक्षिणान्
उत्सेधस्य त्रिभागेन जङ्घोत्सेधं प्रकल्पयेत् १३२
जङ्घोत्सेधत्रिभागेन विन्यस्येत्खुरपिण्डिकाम्
कपोतान्तरपत्रं च तत्र स्यादर्धभागिकम् १३३
शिखरोत्सेधमानं यत्तत्त्रयोदशभिः पदैः

तत्र भूमास्तदुत्सेधं कल्पयेदनुसारतः १३४
स्तास्तम्भसो भित्तिः कुर्यान्मुक्ताश्च परिकर्मणा
कूटच्छेदेन तत्कर्म विन्यस्येत् सर्वतोदिशम् १३५
भक्तमन्तरपत्रेण तलच्छन्दं तदूर्ध्वतः
द्वे द्वे कूटे ततो न्यस्येद्वामदक्षिणकर्णयोः १३६
शालामध्ये तु चत्वारि नामे कूटानि सर्वतः
भूमिकाः सिंहकर्णाश्च कपाटद्वारघट्टनाः १३७
शिखराणां समुत्सेधो यथैवाद्ये तथा भवेत्
चित्रकूटः ।
किरणः कथ्यते स स्यात्पद्मतुल्यः प्रमाणतः १३८
द्वात्रिंशदनारा नस्मिन् विदध्यात्षोडशाथवा
शालासु भेदः कर्णैः स्याच्छेषं मालाधरे यथा १३९
किरणः ।
सर्वाङ्गसुन्दरं ब्रूमः कर्मभेदैरनेकधा
नानाशिल्पलताधारं प्रासादैर्बहुभिर्युतम् १४०
तलच्छन्दतुल्यन्यासविरुक्तं बहुलक्षणम्
ना --- प्रासादे सर्वसुन्दरे १४१
तोरणैः सिंहकर्णैश्च संयुक्तं परिकर्मभिः
प्रमाणमिह यत्किञ्चित्सर्व विद्यात्तदाद्यवत् १४२
सर्वसुन्दरः ।
श्रीवत्समथ वक्ष्यामो दशधा तं विभाजयेत्
भागत्रयेण कुर्वीत शालां तत्र विचक्षणः १४३

सार्धभागप्रविस्तारौ रथकौ वामदक्षिणौ
मूलकर्णा भवन्त्यत्र भागद्वितयविस्तृताः १४४
प्रासादहस्तमात्राभिः प्रत्येकं भद्रनिर्गमः
द्व्यङ्गुलं त्र्यङ्गुलं वापि चतुरङ्गुलमेव वा १४५
भली मध्ये तु मञ्जर्यः कार्याः पद्मदलोपमाः
सर्वतः परिकर्म स्याद्रथिका कर्णसंश्रया १४६
आमलिश्चन्द्रशालाभिः स्कन्धान्तं परिपूरयेत्
खुरपिण्डा च जङ्घा च कुम्भाग्रं शिखरादि च १४७
यत्किञ्चित्तत्प्रमाणेन वर्धमानसमं भवेत्
नन्द्यावर्तः ।
ब्रूमो वलभ्यं स भवेद्गृहराजस्य सन्निभः १४८
आयतश्चतुरश्रो वा प्रमाणेनैकतः समः
चतुरश्रस्तु विस्तारादुदयो द्विगुणो भवेत् १४९
आध्यतन्त्रस्य पुनः सार्धः स्कन्धोच्छ्रायो विधीयते
विस्तारं दशधा समक्ष---तुरश्र समन्तः १५०
विभजे स्यात् ततो मानं पूर्वप्रासादसन्निभम्
स्वरूपं तस्य वक्ष्यामः श्रीवत्समिव तं भवेत् १५१
यद्वा विमानरुचकवर्धमानादिसद्मना
छन्देनैकस्य कस्यापि प्रासादस्य विभाजयेत् १५२
भूस्तम्भपरिकर्माणि विस्तारोसेधमेखलाः
सिंहकर्णरथा घण्टा तथा कुम्भाग्रषण्डकम् १५३
यत्किञ्चित्तत्प्रमाणेन यथैवाद्यं तथा भवेत्

वलभ्यः ।
सुपर्णस्य स्वरूपं च प्रमाणं चाभिधीयते १५४
विभक्तं सिंहरूपेण सर्वभद्रं निवेशयेत्
भागैश्चतुर्भिर्निष्क्रान्तं भद्रं गभयितः समम् १५५
द्वौ भागौ मूलकर्णौ तो षड्भागा भद्रविस्तृतिः
पञ्चभागोच्छ्रिता जङ्घा मेखला तस्य भागिका १५६
मूलजङ्घात्रिभागेन कुरवेदिसमुच्छ्रितिः
सच मध्ये तु शृङ्गे द्वे कर्तव्ये वामदक्षिणे १५७
उच्छ्रायाद्द्विपदे स्यातां विभक्ते सर्वतोदिशम्
मूलकर्णेषु शृङ्गाणां त्रिपदा स्यात्समुच्छ्रितिः १५८
--- सेवापि चतुरङ्गुलमेव वा
कुर्याज्जाला विस्तारं श्रीवत्से नन्दने यथा १५९
विस्तारादि्द्वगुणोत्सेधः स्कन्धः षड्भागविस्तृतः
उत्सेधस्य त्रिभागेन जङ्घोत्सेधो विधीयते १६०
तृतीयांशेन जङ्घायाः कुर्वीत खुरपिण्डिकाम्
मेखलान्तरपत्रं च विदध्यात्सार्धभागिकम् १६१
विभाज्या दशभिर्भागैः पूर्ववत्स्कन्धविस्तृतिः
सार्धद्विगुणविस्तृत्या पूर्वा कर्कटना भवेत् १६२
चतुर्गुणेन सूत्रेण मध्या कर्कटना भवेत्
श्रीवार्धभागमुत्सेधात्कुमुदं कुम्भकं पुनः १६३
अस्मिन्नामलसारं च यथा चाद्ये तथा भवेत्
श्रीवत्सः ।

पद्मनाभमथ ब्रूमः पद्मशालाभिरन्वितम् १६४
द्वितीयः पद्मको ह्येष पद्ममालाधरः शुभः
सर्वमन्यत्प्रमाणं तु पद्मस्वस्तिकयोर्यथा १६५
पद्मनाभः ।
वैराजमथ वक्ष्यामि स विज्ञेयो विमानवत्
रूपशिख---मुत्सेधस्तम्भग्रीव---रूपकम् १६६
सभातोरणनिर्यूहसिंहकर्णाश्च तादृशैः
साधारं चतुरश्रं च तं कुर्यात्पञ्चभूमिकम् १६७
विमानसदृशाकारो वैराजोऽयमुदाहृतः
वैराजः ।
ब्रूमोऽथ वृत्तकं मूले चतुरश्रः प्रकीर्तितः १६८
जङ्घामूले ततोऽष्टाभिस्त्रिर्वृत्तो भागतृतीयके
मूलमध्याग्रतः पूर्णं तं कुर्यात्सर्वतोदिशम् १६९
भद्राकारं च भद्रेषु विभागे चतुरश्रके
अष्टाश्रिवज्रकाकारा वृत्ते स्वस्तिकसन्निभम् १७०
यथा मूलविभागेन लतिनः स्वस्तिकोदयः
तथा वृद्धिप्रमाणाभ्यामयमप्याद्यवद्भवेत् १७१
वृत्तकः ।
नन्द्यावर्तमथ ब्रूमो दशधा तं विभाजयेत्
पादोमध्यंशविस्तारो कर्णौ कुर्वीत पार्श्वयोः १७२
चतुर्भागप्रविस्तारं भद्रमस्य प्रकल्पयेत्
सपादपदिकं कुर्याच्छालाकर्णान्तरे रथम् १७३

जलाधाररथं कर्णतः शालान्तेषु यथेष्टतः
ष---सु शिखरायामास्तन्मध्ये वलभी भवेत् १७४
जलमार्गं च कुर्वीत शालाकर्णान्तमूलयोः
प्रमाणमन्यथा किञ्चिद्भूसिंहस्येव कारयेत् १७५
सुपर्णः ।
प्रमाणमथ सिंहस्य लक्षणं चाभिधीयते
दशधा क्षेत्रविस्तारं विभजेत् सर्वतः समम् १७६
द्विभागौ मूलकर्णौ तु कर्तव्यौ वामदक्षिणौ
मूलभद्रस्य विस्तारः षड्भिर्भागैर्विधीयते १७७
विस्तारो द्विगुणः कार्यः स्कन्धोत्सेधप्रमाणतः
पञ्चभागोच्छ्रिता जङ्घा मेखला सार्धभागिकी १७८
खुरकं वेदिबन्धं च तत्त्रिभागेन कल्पयेत्
भागत्रयोच्छ्रितानि स्युः शृङ्गाणि च चतुर्दिशम् १७९
सिंहस्य कर्णवन्मध्ये वलभ्या भूषयेद्बुधः
सर्वमन्यत्प्रमाणं च सर्वतोभद्रवद्भवेत् १८०
सिंहः
विचित्रकूटं वक्ष्यामो दशधा तं विभाजयेत्
द्विभागिको मूलभद्रस्य हस्ततुल्याङ्गुलो भवेत् १८१
शालामध्यप्रदेशे तु वलभीं सन्निवेशयेत्
कूटे द्वे सर्वतो न्यस्येच्छलष्टे---मूलक---योः १८२
एष भेदः समुद्दिष्टः शाला स्यात्कूटवर्जिता
प्रमाणमन्यत्सर्वं तु विज्ञेयं चित्रकूटवत् १८३

चित्रकूटः ।
योगपीठमथ ब्रूमस्त्रिविष्टपमिवोत्तमम्
विभजेद्भागविंशत्या चतुरश्रं समन्ततः १८४
कोष्ठान्यद्भागविस्तारा कुर्याद्दिक्षु विदिक्षु च
भागिकौ जलमार्गौ च विदध्याद्वामदक्षिणौ १८५
विस्तारात्तेषु गर्भः स्याद्भागत्रितयसंमितः
पञ्चभागोच्छ्रिता जङ्घा कपोतान्तरवर्जिता १८६
खुरकं वेदिबन्धं च कुर्याद्भागत्रयोच्छ्रितम्
विस्तारात्कुर्याद्दिक्षु द्विगुणोच्छ्रायः कार्योऽयं पञ्चभूमिकः
सिंहकर्णै रथैर्घण्टाभ्रमिकास्तम्भतोरणैः
रचनास्य विधातव्या कथिता पुष्पके तथा १८८
सान्धारः केवलं कार्यः प्रासादोऽयं विचक्षणैः
योगपीठः ।
घण्टानादमथ ब्रूमः स भवेत्पञ्चभूमिकः १८९
अष्टाश्रिकोणः कर्तव्यः संस्थानात्पुष्पकोऽपरः
भैरवो भद्रकाली च स्थाप्य चात्र पाठको १९०
घण्टानादः ।
पताकिनमथ ब्रूमो वातोद्धूतमिवार---
लतिनं लतिनाकारं विभक्तं सर्वतोदिशम् १९१
तं चण्डिकायाः कुर्वीत रुचकं वर्धमानकम्
वृक्षपताकिनं वक्ष्यामि --- भृतं शाखिनं यथा १९२
पताकिनः ।

गुहाधरमथ ब्रूमः श्रीपुष्टिसौखदायिनम्
विभक्ते दशधा क्षेत्रे भद्रं स्याद्गर्भमानतः १९३
अर्धेन मूलगर्भस्य कार्यो भद्रस्य निर्गमः
सार्धभागप्रविष्टारौ कर्णौ द्वौ द्वौ च पार्श्वयोः १९४
जलाधा मूलकर्णान्ते कर्तव्यः पार्श्वयोर्द्वयोः
तद्द्वारमध्यदेशे तु विन्यस्येत्स्तम्भतोरणम् १९५
विस्तारद्विगुणोत्सेधश्चतुःशृङ्गश्चतुर्मुखः
भूग्रीवामेखलाजङ्घाः कुम्भकामलसारके १९६
सिंहस्येव प्रकुर्वीत गुहाधारस्ततो भवेत्
द्वारभेदेन नामास्य प्रासादस्य विनिर्मितम् १९७
गुहाधरः ।
कथयामोऽथ शालाकं दशधा तं विभाजयेत्
द्विभागिकौ मूलकर्णौ षड्भागा भद्रविस्तृतिः १९८
द्वाराणि भद्रमध्ये स्युर्मूलद्वारसमानि तु
चतुर्बाहुश्चतुर्द्वारो द्वितीयो रुचको ह्यसौ १९९
द्वारमानेन नामास्य शालाक इति कीरितम्
प्रमाणमन्यद्यत्किञ्चिद्भद्रकस्येव तद्भवेत् २००
शालाकः
इदानीं वेणुकं ब्रूमश्चतुरश्रं समं शुभम्
न कुर्याद्भद्रनिष्क्राममात्रच्छत्रात्मनः शुभम् २०१
विस्तारद्विगुणोच्छ्रायः कुम्भाग्रं यचेदिष्यत्
शिखाद्विगुणमानस्य जङ्घा त्र्यंशेन कल्पते २०२

जङ्घात्रिभागमुत्सेधात्कार्या खुरवरशिडका
कपोतान्तरपत्रं च कर्तव्यं साधभागिकम् २०३
चतुर्भागोन सूत्रेण वेणुकोशं समालिखेत्
सर्वतः शोभनं कुर्यात्तं कपोतविनिर्गमे २०४
मुखेऽस्य सिंहकर्णाः स्युश्चन्द्रशालाविवर्जिताः
प्रमाणमस्य यत्किञ्चिद्वेणुकं च विधीयते २०५
वेणुकम् ।
इदानीं कुञ्जरं ब्रूमो गजलक्षणलक्षितम्
अर्धसूत्रेण तत्साम्नः पृष्ठतो वृत्तमालिखेत् २०६
चतुर्भागा भवेज्जङ्घा मेखला सार्धभागिका
वृत्ताकारं पृष्ठदेशे तं कुर्वीत विचक्षणः २०७
शालासु सिंहकर्णाः स्युः पार्श्वतः पृष्ठतोऽग्रतः
कर्णाश्च तस्य कर्तव्याः शृङ्गैः सर्वेऽपि पूरिताः २०८
मध्यप्रदेशे वलभी कर्तव्या चातिशोभना
यत्किञ्चित्तत्प्रमाणं तु यथैवाद्ये तथा भवेत् २०९
कुञ्जरः ।
अथ हर्षं प्रवक्ष्यामश्चतुरश्रं मनोरमम्
विस्तारात्सार्ध उत्सेधः स्याद्धयटां मस्तकावधेः २१०
छाद्यरूपं च कुर्वीत चतुरश्रं चतुर्दिशम्
शुकनासं सुखातेन शोभितं परिकर्मणा २११
जङ्घामेखलयोश्च---सुरपिण्डस्य चोच्छ्रितिः
घण्टाग्रं चन्द्रशाला च च्छाद्यकं च यदृच्छया २१२

कुर्यात्प्रमाणमन्यच्च यथैव मनसः प्रियम्
हर्षणः ।
इदानीं विजयं ब्रूमः प्रासादं सार्धशोभनम् २१३
लतिनो वर्धमानेन --- विभाजयेत्
शुकनासोदयं न्यस्येदंशोनशिखरोदयम् २१४
अग्रप्राग्ग्रीवकौ कार्यौ रथकौ वामदक्षिणौ
कर्तव्योर्ध्वलतश्चापं पूर्णः सर्वतोदिशम् २१५
विजयो वर्धमानश्च प्रमाणेन समावुभौ
अलिन्दभेदान्नामास्य कृतं विजय इत्यदः २१६
महापद्मः
ब्रूमोऽथ हर्म्यं प्रासादं तं कुर्यादेकभूमिकम्
दारुजं चतुरश्रं च पट्टतुलाभित्तिभिः २१७
दण्डच्छाद्यं च कुर्वीत समन्ताच्च चतुष्किकाम्
ऊर्ध्वतस्तुम्बिकाक्रान्तं पद्मखण्डविभूषितम् २१८
मुखैः पत्रैर्गवाक्षैश्च वेदिकास्तम्भतोरणैः
वलभीशालभञ्जीभिः सिंहकर्णैश्च भूषयेत् २१९
विस्तारमस्य हर्म्यस्य कुर्यादुच्छ्रयसंमितम्
हर्म्यः ।
इदानीमुज्जयन्तस्य लक्षणं सम्प्रचक्ष्महे २२०
कुर्याद्भूहर्म्यमानेऽत्र द्वारि मण्डपभूषितम्
चतुर्द्वारं च कुर्वीत सर्वतो मण्डपान्वितम् २२१
प्रमाणमन्यदप्यस्य हर्म्यस्येवाखिलं भवेत्

उज्जयन्तः ।

इदानीमभिधास्यामो गन्धमादनलक्षणम् २२२

हर्म्यमानेन कर्तव्यः प्रासादो गन्धमादनः

अग्रतः पृष्ठदेशे च मण्डपं तस्य कारयेत् २२३

चतुष्कीजालपद्माद्या वामदक्षिणभागयोः

प्रमाणमस्य कर्तव्यं यथा हर्म्यस्य कीर्तितम् २२४

गन्धमादनः

ब्रूमोऽथ शतशृङ्गं स त्रिविष्टपसमो भवेत्

विभजेद्भागविंशत्या पञ्च भौमं च कारयेत् २२५

---द्विभागानि कूटानि सैकमण्डशतं भवेत्

भूमौ भूमौ च शृङ्गाणि भूविस्तारदशांशतः २२६

प्रमाणमस्य यत्किञ्चित्तत्त्रिविष्टपवद्भवेत्

निरवद्यः ।

विभ्रान्तमथ वक्ष्यामः सर्वतोभद्रसन्निभम् २२७

सान्धारं तं प्रकुर्वीत सर्वतो मण्डपैर्युतम्

गवाक्षा वेदिजालाद्याः कुर्याद्दिक्षु चतुष्किकाः २२८

विभ्रान्तः ।

मनोहरमथ ब्रूमः स भवेन्मण्डपो यथा

साच्छाद्यतोरणैर्दिक्षु चतुर्द्वारः समण्डपः २२९

वेदिषण्डाम्बुमार्गाद्यैः प्रतोलीद्वारजालिकैः

सिंहपीठतलन्यासैः कलशैः परिपूरितः २३०

वृत्तस्तम्भस्तुलाच्छन्नो बहिश्छाद्येन भूषितः

सिंहव्यालगजैः पत्रैर्मुखे सस्तम्भतोरणैः २३१
पुनः कार्यं प्रमाणं तु यथाशोभं विधीयते
मनोहरः ।
वृत्तवृत्तायतौ ब्रूमस्तयोः कम्बुसमाकृतिः २३२
वृत्तस्तत्र तलन्यासचतुरस्त्रोंशपञ्चकम्
वृत्ताद्यमूर्ध्वतो वृत्तं यथाशोभं समुत्थितम् २३३
कुर्यान्मुखायतं चान्यं सिंहकर्णान्वितं मुखे
वृत्तवृत्तायतौ ।
चैत्यस्य लक्षणं ब्रूमः स स्याच्छात्रयान्वितः २३४
अस्याकारः प्रमाणं च यथा वृत्ते तथा भवेत्
चैत्यः ।
किङ्किणीकमथ ब्रूमः पञ्चाण्डं नवभूमिकम् २३५
वृत्तकूटाः शुभाः कार्याः सर्वेऽमी शुभलक्षणाः
किङ्किणीकः ।
इदानीं लयनं ब्रूमः स शैलखननाद्भवेत् २३६
निःश्रेण्यारोहसोपाननिर्यूहकगवाक्षकान्
वेदीभ्रमविटङ्कांश्च प्रतोलीद्वारसंयुतान् २३७
उत्कीर्णानाचरे तरप्राग्रीवन्मानं च
लयनम् ।
इदानीं पट्टिसं ब्रूमः प्रासादं वस्त्रसम्भवम् २३८
बोहातो जालपादैश्च वेदीषण्डैश्च मण्डितम्
कूर्मपृष्ठं प्रदातव्यमिच्छता शुभलक्षणम् २३९

पट्टिसः ।
विभवः कथ्यते स स्यात् सुर्यामन्यसमाश्रयः
दारवे दारवो योज्यः शैलजे शैलसम्भवः २४०
मृन्मये मृन्मयः कार्यश्चयने चयनोद्भवः
प्रत्यन्तग्रामखेटेषु दारुस्तम्भैर्विधीयते २४१
विभवस्यानुसारेण स कार्यो धार्मिकैस्त्रिभिः
विभवः ।
तारागणमथ ब्रूमः स भवेन्मण्डपाकृतिः २४२
वस्त्रचीरतुलाशाणडो डोलाक्रीडाभ्रमैर्गृहैः
वस्त्रजैश्चित्ररूपाद्यैर्घण्टादर्पणतोरणैः २४३
ध्वजच्छत्रविमानाद्यैः किङ्किणीभिर्विराजितम्
यत्किञ्चित्सुन्दरं सर्वं तदत्र विनिवेशयेत् २४४
तारागणः
अष्टाष्टकैर्द्वे च विशेषयोगात्
प्रासादषष्टिश्चतुरन्वितैषा
विमानमुख्याः कथिता य एतान्
जातायस्यैस शिल्पिगणाग्रणीः स्यात् २४५

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
विमानादिचतुःषष्टिर्नामैकोनषष्टितमोऽध्यायः

अथ श्रीकूटादिषट्त्रिंशत्प्रासादलक्षणं नाम षष्टितमोऽध्यायः

षड्विंशतमथ ब्रूमः प्रासादान् नागरक्रियान्
साधारान् प्रथमस्तेषु श्रीकूटः श्रीमुखस्ततः १
श्रीधरो बदरश्चैव तथाभ्यः प्रियदर्शनः
कुलनन्दोऽन्तरिक्षश्च पुष्पभासो विशालकः २
सङ्कीर्णोऽथ महानन्दो नन्द्यावर्तस्तथापरः
सौभाग्यश्च विभङ्गश्च विभवस्तदनन्तरम् ३
बीभत्सकोऽथ श्रीतुङ्गो मानतुङ्गस्तथापरः
भवतो रुद्रसंज्ञश्च भवद्वाह्योदरस्तचः ४
निर्यूहोदरसंज्ञोऽन्यस्ततो ज्ञेयः समोदरः
नन्दिभद्रो भद्रकोशश्चित्रकूटस्ततः परम् ५
विमलो हर्षणो भद्रसङ्कीर्णस्तदनन्तरम्
ततो भद्रविशालाख्यो भद्रविष्कम्भ एव च ६
उज्जयन्ताभिधानश्च सुखे मेरुरथ मन्दरः
कैलासः कुम्भकाक्षश्च गृहराजश्च नामतः ७
एतेषां त्रिंशदुद्दिष्टा लक्षणं कथ्यतेऽधुना
चतुरश्रीकृते क्षेत्रे द्वादशांशविभाजिते ८
प्रासादं विभजेत् प्राज्ञः श्रीकूटं नाम शोभने
ज्येष्ठः स्याद्विंशतिर्हस्ता मध्यमो दश पञ्च च ९
कनीयान्दश विज्ञेयः प्रमाणं हस्तसङ्ख्यया
भद्रं षड्भागिकायासं कर्णाः कार्या द्विभागिकाः १०
तिलकं भागिकं कार्यं भागेनैकेन निर्गतम्
तस्माद्भागेन निष्क्रान्तं भद्रमस्य विधीयते ११

भागिकी बाह्यभित्तिः स्याद्द्विपदा चान्धकारिका
भागिकी गर्भभित्तिश्च गर्भः कार्यश्चतुष्पदः १२
अधश्छन्दः समुद्दिष्ट ऊर्ध्वच्छन्दोऽभिधीयते
विस्तारार्धेन जङ्घा स्यान्मेखला चैकभागिका १३
भागत्रयोच्छ्रितं शृङ्गं द्वितीयमपि तादृशम्
पूर्वशृङ्गस्य मध्ये तद्विधातव्यं विचक्षणैः १४
सार्धभागोदयः कार्यस्तिलकोऽन्यश्च तादृशः
द्वितीयतिलकस्योर्ध्वं सुश्लिष्टा रूपसंयुता १५
स्यादुरोमञ्जरी सप्तभागोत्सेधा षडायता
स्याद्भागिकमधश्छाद्यं मञ्जर्या या तु विस्तृतिः १६
दशधा प्रविभाज्यासौ शेषं श्रीवत्सवद्भवेत्
स्कन्धः षड्भागविस्तारो ग्रीवा भागार्धमुच्छ्रिता १७
अण्डकं भागिकं कार्यं कुमुदं चार्धभागिकम्
सार्धभागेन कलशो बीजपूरकसंयुतः १८
द्वितीयकर्णशृङ्गस्य स्यादूर्ध्वं मूलमञ्जरी
--- अष्टभागसमुच्छ्रिता १९
श्रीवत्सवद्विभागोऽस्याः स्कन्धग्रीवादिके भवेत्
एवं श्रीकूटसंक्षेपं प्रासादः परिकीर्तितः २०
यं कृत्वा त्रिसहस्राणि दिव्यानि दिवि मोदते
श्रीकूटः ।
अथ लक्ष्म --- स्याभिधीयते २१
तुल्यं प्रासादमानेन विदध्यादिह मण्डपम्

मुखायामेन तिर्यक्तु चतुरश्रं --- २२
--- भद्रविस्तारः कर्णाश्च तिलकास्तथा
मध्ये चतुष्किका कार्या भद्रविस्तारसम्मिता २३
नि --- विधातव्यस्तु मण्डपे
जङ्घाप्रासादजङ्घायाः समोत्सेधा विधीयते २४
मेखलं भागिक --- च पूर्ववत्
स्तम्भं त्र्यंशोच्छ्रितं भागं वेदी घण्टा त्रिभागिका २५
क्रमाश्रयो यवाः पञ्च सिंहक ---
शोभिताः सिंहकर्णैश्च नृच्छाद्याङ्गातिभूषिताः २६
मण्डपं कारयेदेवं श्रीकूटस्य विचक्षणः
श्रीकूटस्य मण्डपः समाप्तः ।
अलिन्दे तु यदास्यैव क्रियते भद्रवेदिका यदा २७
प्रासादः श्रीमुख --- तदानीं स्यात्सुखावहः
श्रीमुखः ।
यदा कूर्परमस्यैव चतुरश्रमधो भवेत् २८
तदा स्याच्छ्रीधरो नाम प्रासादो देवताश्रयः
श्रीधरः ।
अस्यैव तु यदालिन्दः क्रियते भद्रवर्जितः २९
रुचेः भवेत्तदानीं वरदः प्रासादः शुभदायकः
वरदः ।
विधीयते यदास्यैव भद्रमेकं विनिर्गतम् ३०
निर्यूहश्च तदा स स्यात्प्रासादः प्रियदर्शनः

प्रियदर्शनः ।
विधीयते यदास्यैव नन्द्यावर्तो विनिर्गमः ३१
कुलनन्दस्तदा ज्ञेयः प्रासादः सुखकारकः
कुलनन्दनः ।
इति श्रीकूटादिषट्कम् ।
अन्तरिक्षस्य ब्रूमस्तस्य द्वादशभागिकाः ३२
षड्विंशत्या करैर्ज्येष्ठमानायां दशभिर्भवेत्
मध्यमे मध्यमानेन हस्तसंख्येयमीरिता ३३
पञ्चभागायतं भद्रं कर्णाः कार्या द्विभागिकाः
विस्तारस्तिलकानां स्यादन्तरं भद्रकर्णयोः ३४
निर्गमः साधभागः स्याद्भद्रस्य तिलकस्य च
गर्भः षोडशभागः स्याद्भागिकी भित्तिविस्तृतिः ३५
प्रदक्षिणा तु भागौ द्वौ बाह्यभित्तिः पदं भवेत्
कथितोऽयमधश्छन्दो ब्रूमश्छन्दमथोर्ध्वतः ३६
जङ्घा षड्भागिकोत्सेधा भागोत्सेधा च मेखला
--- भागत्रयोत्सेधे शिखरं प्रथमं तथा ३७
द्वितीयं तत्समं चोर्ध्वं तिलकस्योपरि स्थितम्
अधस्ता --- छाद्यं तु भागिकम् ३८
शिखरं गर्भविस्तारं कर्तव्यं षट्पदोच्छ्रितम्
अर्धेन गर्भविस्तारा --- स्तथा ३९
द्वितीयशिखरस्योर्ध्वं प्रागुल्भ्यान् मूलमञ्जरी
इत्येष कथितः सम्यगन्तरिक्ष --- ४०

अन्तरिक्षप्रिया देवाः सर्वे वैमानिका यतः
अन्तरिक्षः ।
भागैरष्टभिरत्रैव क्रियतेऽलिन्द --- ४१
पुष्पाभासस्तदा ज्ञेयः प्रासादश्चारुदर्शनः
पुष्पाभासः ।
अथास्य क्रियते भद्रमलिन्दा --- ४२
--- विशालको नानाप्रासादाज्ञायते शुभः
विशालकः ।
अथास्य क्रियते भद्रयुक्तस्य --- वर्जितः ४३
तदा संकीर्णको नाम प्रासादः परिकीर्तितः
संकीर्णकः ।
यदा संकीर्णकस्यैव नन्दिका समभागिकी ४४
क्रियते निर्गमेणैव महानन्दस्तदा भवेत्
महानन्दः ।
विस्तारेण समश्च स्यान्नन्दिकानिर्गमो यदा ४५
नन्द्यावर्त इति ज्ञेयः प्रासादः स तदा बुधैः
नन्द्यावर्तः ।
अन्तरिक्षषट्कम् ।
सौभाग्यमथ वक्ष्यामः स स्याद्द्वादशभिः पदैः ४६
उत्तमो विंशतिर्हस्ता मध्यमो दश पञ्च च
कनीयात्रिसन् दश मानेन सौभाग्यो मानतस्त्रिधा ४७
गर्भश्चतुर्भिर्भागैः स्याद्भद्रं तद्विस्तृतेः समम्

भद्रस्यार्धेन तिलकाः कर्णाः कार्या द्विभागिकाः ४८
द्वे द्वे पदे विधातव्यस्तथैकैकस्य निर्गमः
भद्राणां निर्गमं यद्वा विदध्यादेकभागिकम् ४९
भागिका गर्भभित्तिस्तु द्विपदा च प्रदक्षिणा
भागिकी बाह्यभित्तिः स्याज्जङ्घोच्छ्रायः पदानि षट् ५०
भागिका मेखला प्रोक्ता तन्मध्ये शिखरं भवेत्
मल्लच्छाद्यं च मध्ये स्याच्छृङ्गस्य शिखरस्य च ५१
एकभागोच्छ्रितं तच्च मञ्जर्यास्त्विह विस्तृतिः
गर्भभित्तिसमा कार्या सप्तभागा समुच्छ्रितिः ५२
ऊर्ध्वं द्वितीयशृङ्गस्य पूर्ववन्मूलमञ्जरी
ग्रण्डकाद्यं यथोक्तं स्यात्सौभाग्योऽयं प्रकीर्तितः ५३
सौभाग्यः ।
विधीयते यदास्यैव विना भद्रमलिन्दकः
तदा विभङ्गको नाम प्रासादः स्यात्सुशोभनः ५४
विभङ्गकः ।
यदि भद्रस्य निष्कासः क्रियतेऽस्य तदा पुनः
प्रासादो विभवो नाम जायते परमोत्तमः ५५
विभवः ।
भागद्वयविनिष्क्रान्ता नन्दिका क्रियते यदि
तदा वदन्ति बीभत्ससंज्ञं प्रासादमुत्तमम् ५६
बीभत्सः ।
यदा निर्गमविस्तारसमा भवति नन्दिका

श्रीतुङ्ग इति विज्ञेयस्तदा प्रासादसत्तमः ५७
श्रीतुङ्गः ।
यदा त्वलिन्दकोऽस्यैव क्रियते न विनिर्गतः
प्रासादो मानतुङ्गाख्यस्तदानीमुपजायते ५८
मानतुङ्गः ।
ब्रूमोऽथ सर्वतोभद्रं दशधा तं विभाजयेत्
षड्विधान्त्या भवेज्ज्येष्ठः कनीयान् दशभिः करैः ५९
हस्तैस्तथाष्टादशभिर्मध्यमः परिकीर्तितः
कर्णा द्विभागिकाः कार्या अलिन्दाः षट्पदोन्मिताः ६०
चतुर्भागानिन् भद्राणि विभागस्तद्विनिर्गमः
गर्भभित्तिर्बहिर्भित्तिरन्धारी च पदं पदम् ६१
गर्भस्तु षोडशपद इत्येवं छन्द ईरितः
विस्तारार्धेन जङ्घा स्यान्मेखला चैकभागिका ६२
प्रथमं कल्पयेच्छृङ्गं विस्तारात्सार्धमुच्छ्रितम्
द्वितीयशृङ्गं तत्राल्पं पूर्वशृङ्गस्य मध्यगम् ६३
प्राच्छ्रिता षडायाम्या सुरःशिखमिष्यते
कर्तव्यं मूलशिखरं तद्वच्चोपरिशृङ्गयोः ६४
मञ्जर्या विभजेद्भागं विस्तारं दशधा बुधः
स्कन्धः षड्भागविस्तारो धनुर्ग्रीवाण्डकादिकम् ६५
श्रीवत्सस्येव तत्कार्यं मञ्जरी भागमानतः
क्रमार्धं वा पञ्चसिंह --- रूपैर्विभूषिता ६६
इत्युक्तः सर्वतोभद्रः --- कल्याणकारकः

सर्वतोभद्रः ।
अलिन्दशोभितं भद्रं यदास्यैव विधीयते ६७
तदा बाह्योदरो नाम प्रासादप्रवरो भवेत्
बाह्योदरः ।
यद्यलिन्दो न भवति भद्रमेकं तु निर्गतम् ६८
स्यान्निर्यूहोदरो नाम प्रासादप्रवरस्तदा
निर्यूहोदरः ।
यदा न तत्र भद्रं स्यान्नन्दिकानिर्गमो भवेत् ६९
भद्रकोशं तदा विद्यात्षष्ठं प्रासादमुत्तमम्
भद्रकोशः ।
सर्वतोभद्रषट्कम्
चित्रकूटमथ ब्रूमस्तं भजेदष्टभिः पदैः ७०
कुर्यात्करेभ्योऽष्टाभ्यस्तं यावत्स्याद्धस्तविंशतिः
कर्णभागिकविस्ताराः शेषालिन्दति विस्तृतिः ७१
भद्रं चतुष्पदं विद्याद्भागेनैकेन निर्गतम्
भागेन निर्गतोऽलिन्दो भिहत्त्यन्धार्यः पदं पदम् ७२
द्विपदोऽस्य भवेद्गर्भस्तलच्छत्ति समशिखमिष्यते
अरडकं भागिकं कार्यं क्रमाच्च क्रमसंवृता ७३
ऊर्ध्वं द्वितीयशृङ्गस्य कर्तव्या मूलमञ्जरी
सप्तभागोदया प्राग्वद्भागषट्कं तथायता ७४
प्रासादमीदृशं कुर्याच्चित्रकूटं प्रमाणतः
चित्रकूटः ।

भद्रागवविनिष्क्रा तस्यैव यदा भवेत् ७५
प्रासादो विमलो नाम तदानीमुपजायते
विमलः ।
अलिन्दस्तु यदास्यैव भद्रहीनो विधीयते ७६
तदानीं हर्षणो नाम प्रासादः स विजायते
हर्षणः ।
क्रियते तु यदास्यैव कूर्परं भागनिर्गमम् ७७
तदानीं भद्रसंकीर्णः प्रासादो जायते शुभः
भद्रसंकीर्णः ।
अस्यैव तु यदा भद्रं भागेनैकेन निर्गतम् ७८
भवेत्तदानीं प्रासादो नाम्ना भद्रविशालकः
भद्रविशालकः ।
--- भद्रैश्च विना यदा त्वेष विधीयते ७९
तदानीं भद्रविष्कम्भः प्रासादः स्यात्सुस्वप्रदः
भद्रविष्कम्भः ।
चित्रकूटादिषट्कम् ।
चतुरश्रे समे क्षेत्रे विभक्तेऽष्टभिरष्टकैः ८०
प्रासादं चयेद्वा उज्जयन्तं सुशोभनम्
पदमेकं भवेत्कर्णस्तिलकन्तावदेव च ८१
सभित्तिगर्भमानेन भद्रं कुर्याद्विचक्षणः
बाह्यभित्तिर्भवेद्भागं भागमेकं प्रदक्षिणा ८२
भागिका गर्भभित्तिश्च गर्भमध्ये चतुष्पदम्

पञ्चभागोन्मिता जङ्घा भागं तत्रैव मेखला ८३
कर्तव्यं भागिकं शृङ्गरडकं चार्धभागिकम्
द्वितीयं सारडकं शृङ्गं तत्समं पदमध्यगम् ८४
मल्लच्छाद्यं विधाटव्यमुत्सेधेनार्धभागिकम्
पदोत्सेधं च शिखरं गर्भभित्तिसमं भवेत् ८५
भागिकः कलशः कार्यो ध्वजशं ---स्य तत्समः
एतस्य मूलशिखरं कुर्यात् षड्भागविस्तृतम् ८६
भागाधिकसमुत्सेधं कार्यं कल्याणमिच्छता
ऊर्ध्वं र्तिलकशृङ्गस्य शिखरं स्यात्पदोच्छ्रितम् ८७
पञ्चाशद्विस्तृतं शेषं श्रीवत्सस्येव कारयेत्
इत्येष कथितः सम्यगुज्ञयन्तोऽभिधानतः ८८
कार्योऽयं सर्वदेवस्य प्रासादः शुभलक्षणः
उज्ञयन्तः ।
चित्रकूटा यथोत्पन्नाः प्रासादा विमलादयः ८९
उज्ञयन्तात्तथा पञ्च मेरुप्रभृतयो मताः
मेरुश्च मन्दरश्चैव कैलासः कुम्भ एव च ९०
गृहराज इति प्रोक्ताः प्रासादास्ते सुलक्षणाः
अष्टोत्तरमिहोद्दिष्टं प्रासादानां शतं बुधैः ९१
ज्येष्ठमध्यकनिष्ठानां साधाराणां तथैव च
तेष्वलिन्दैर्युताः केचिद् भद्रैः केचिच्च वेष्टिताः ९२
केचिद्वर्णसमाः कार्याः प्रासादाः सर्वशोभनाः
सर्वेऽप्येते विधातव्या भागप्रतिष्ठिताः ९३

कोणा न विषमाः कार्या वर्गभेदश्च नेष्यते
एकहस्ता द्विहस्ता --- ये प्रकीर्तिताः ९४
यद्धनारागृहादीनां रङ्गसां च भवन्ति ते
भागेन धूमः स्त्रतु त्रेधा विनिर्दिशेत् ९५
ज्येष्ठं मध्यं कनीयश्च ज्ञेयं तच्चांशमानतः
ज्येष्ठं साधत्रिहस्तं स्यात्त्रिहस्तं मध्यमं विदुः ९६
सार्धहस्तद्वयमितं कनीयस्तद्विधीयते
त्रिहस्तं ज्येष्ठमपरं मध्यं हस्तसमन्वितम् ९७
अर्धहस्तं कनीयश्च मानं भागस्य कीर्तितम्
ज्येष्ठो भागो द्विहस्तः स्यात्पादोनंमध्यमः करम् ९८
कनीयान् मध्यमार्धेन भागमानमिदं करैः
षडन्वितास्त्रिंशदमी विचित्राः
श्रीकूटकाद्यातिथिता ग्रवात् ।
प्रासादमुख्या इह षट्कप्रभेदा
भिन्ना --- सह मण्डपैश्च ९९

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे श्रीकूटादिषट्त्रिंशत्प्रासादलक्षणं
नाम षष्टितमोऽध्यायः

अथ पीठपञ्चकलक्षणं नामैकषष्टितमोऽध्यायः

इदानीं द्राविडान् ब्रूमः प्रासादाञ्शुभलक्षणान्
एकभूम्यादयस्ते स्युर्यावद्द्वादशभूमिकाः १

पीठान्यपि च कथ्यन्ते तेषां पञ्चैव लक्षणैः
तलच्छन्दाश्च पञ्चैव तेषां ये शुभलक्षणाः २
पीठमाद्यं भवेत्तेषु पादबन्धनमुत्तमम्
स्त्रीबन्धाख्यं द्वितीयं च तृतीयं वेदिबन्धनम् ३
प्रतिक्रममिति प्रोक्तं चतुर्थं पीठमुत्तमम्
पञ्चमं पीठमुद्दिष्टं नाम्ना क्षुरकबन्धनम् ४
एतानि पञ्च पीठानि प्रोक्तानीह समासतः
उत्सेधं भागविंशत्या विभजेत् पादबन्धने ५
खुरकः पञ्चभागः स्याद्द्वौ भागौ पद्मपत्रिका
भागिकी कणिका कार्या त्रिभागं कुमुदं भवेत् ६
कण्ठस्तु भागेनैकेन कण---श्च द्विभागिकः
पट्टिका भागमेकं स्याद्भागिकी पद्मपट्टिका ७
त्रिभागिकं कपोतं च कुर्यान्नासिकया सह
भागमेकं भवेच्छेद पादबन्धाख्यपीठके ८
पद्मपत्र्याः प्रवेशः स्यात्खुरकादङ्गुलद्वयम्
ग्रासः षडङ्गुलस्तस्याः कुमुदं सप्तनिर्गमम् ९
प्रवेशमानं तावत्स्याद्यावद्विच्छेदपट्टिका
षडङ्गुलप्रवेशं च च्छेदपट्टस्य कारयेत् १०
समस्तत्रं विधातव्यं छेदस्य कणिकस्य च
निर्गमेण पुनस्तस्माद् द्व्यङ्गुला कण्ठपट्टिका ११
अङ्गुलत्रितयं तस्याः पद्मपत्रीविनिर्गमः
कापोत्तस्य --- तस्या स्यादङ्गुलत्रयम् १२

पट्टिकानां समसूत्रच्छेदानां च संष्टिथः
पादबन्धोऽयमाख्यातः श्रीबन्धः कथ्यतेऽधुना १३
पीठच्छेदस्य मानं तु सप्तविंशतिधा भजेत्
तीडवर्तिचतुर्भाग द्विभागा पद्मपत्रिका १४
कणिकां भागिकां कुर्यात् त्रिभागं कुमुदं ततः
छेदमेकं पदं विद्याद्भागं मेडथराथं तथा १५
मकरं भागमेकं च भागं मकरपट्टिकाम्
छेदमेकं पदं विद्यात्कणठमेकं पदं तथा १६
पट्टिकां भागमेकं च वेदी भागं ततः परा
छेदमेकपदं कुर्यात्ततः कणठं द्विभागिकम् १७
पट्टिका भागमेकं च --- पद्मपत्रिका
कपोतं नालिकायुक्तं विदधीत पदत्रयम् १८
छेदं च भागिकं कुर्यात्पीठे श्रीबन्धनामनि
श्रीबन्धोऽयं समाख्यातो वेदीबन्धोऽथ कथ्यते १९
भागैरेकान्नविंशत्या पीठस्याच्छोतिं भजेत्
नीडवर्तिश्चतुर्भागा द्विभागा पद्मपत्रिका २०
कणिकां पदिकां विद्यात्कुमुदं त्रिपदं तथा
कुर्वीत पदिकं छेदं तद्वन्मेणठस्तरं बुधः २१
भागेनैकेन मकरं तथा मकरपट्टिकाम्
छेदं पदं --- कणठं भागिका पद्मपत्रिका २२
कर्तव्या भागिकीं कुर्यात्कुमुदं च त्रिभागिकम्
छेदमेकपदं विद्यात्ततः कणठं द्विभागिकम् २३

पट्टिकां भागिकीं कुर्याद्भागिकीं --- पट्टिकाम्
द्विभागो रसनापट्टाश्छादस्तु पट्टिको भवेत् २४
इति प्रतिक्रमं पीठं क्षुरबन्धोऽधुनोच्यते
विभजेद्भागविंशत्या पीठोच्छ्रायं विचक्षणः २५
नीरवर्तिश्चतुर्भागा --- पद्मपत्रिका
कर्णिका भागमेकं स्याद्द्विभागं कुमुदं ततः २६
भागं मेडथाक्षेपो मकरो भागिकस्तथा
भागमेकं विधातव्या ततो मकरपट्टिका २७
छेदा मकरपदं कुर्यात्करठमेकं पदं ततः
पट्टिकां भागिकीं विद्याद्भागिकी पद्मपत्रिका २८
कपोतं त्रिपदं कुर्यात्ततो नासिकया सह
छेदश्च भागिकः कार्यः क्षुरबन्धोऽयमीरितः २९
पीठपञ्चकमित्युक्तं सूत्रितं पूर्वमेव यत्
पीठादूर्ध्वं तु विज्ञेया प्राज्ञैः खुरवरण्डिका ३०
सन्ति चान्यानि पीठानि लक्ष्मभेदादनेकधा
तेषां मध्ये प्रकृष्टत्वादेतत्पञ्चकमीरितम् ३१
प्रासादानथ वक्ष्यामस्तलच्छन्दादनन्तरम्
तत्र पद्मो महापद्मो वर्धमानस्तथापरः ३२
स्वस्तिकः सर्वतोभद्रः प्रासादाः पञ्च कीर्तिताः
चतुरश्रीकृते क्षेत्रे कर्णसूत्रं प्रसारयेत् ३३
कर्णस्यार्धं ततः कृत्वा गर्भादृक् बहिर्नयेत्
तदग्रयोः सूत्रपातात् स्यादन्यचतुरश्रकम् ३४

कूटं कुर्याद् द्विभागेन समस्तत्राद्विचक्षाणः
सूकराननसंस्थानं कुर्वीत सलिलान्तरम् ३५
एवं सर्वेषु कूटेषु सलिलान्तरमिष्यते
यदायतं भवेत्सूत्रचतुर्भागविभाजिते ३६
गर्भो द्विभागिकस्तेन भागिका भित्तिरुच्यते
गर्भकर्णार्धमादाय कोणास्तं लाञ्छयेत्पुनः ३७
अष्टसृ---मध्ये स्यादेवं --- बहिः
एवं पद्मतलच्छन्दो विधाटव्यो विचक्षणैः ३८
महापद्मतलच्छन्दमधुना सम्प्रचक्ष्महे
पूर्वं यः कीर्तितश्छन्दः सम्पाता सूत्रयेकृताः ३९
तेषु संपादयेद् --- दिग्विदिगन्तरे
कर्णार्धं दापयेत्तत्र बाह्यभागविनिर्मितार्गतम् ४०
---रडीग्रेय्योर्दिशोर्मध्ये लाञ्छनं यद्व्यवस्थितम्
नैर्ऋतीयाम्ययोर्मध्ये तस्मात्तत्र प्रसारयेत् ४१
नैर्ऋतीयाम्ययोर्मध्याद्वाय्वम्बुपदिगन्तरौ
चाय्वम्बुपदिशोर्मध्यादीशसोमदिगन्तरे ४२
तृतीयां --- कूटस्य जलान्तरम्
कूटयोरुभयोर्मध्ये सूकराननसन्निभम् ४३
महापद्मतलच्छन्दः प्रोक्तोऽयं राजपूजितः
इदानीं वर्धमानस्य तलच्छन्दोऽभिधीयते ४४
चतुरश्रं भजेत्पञ्चदशधा क्षेत्रमादितः
कूटं द्विभागिकं --- सलिलान्तरम् ४५

पञ्जरं साध --- भागिकं सलिलान्तरम्
चतुर्भागा भवेच्छाला द्विविदध्या च पञ्जरे मः ४६
अर्धभागं प्रवेशस्तु शालास्वत्र जलाध्वनः
अष्टाङ्गुलविनिष्क्रान्ते बाह्यतः शुभदर्शने ४७
भागपादं प्रवेशः स्यात्पञ्जरान्तजलाध्वनः
अर्धभागं प्रवेशस्तु --- ४८
जलान्तरं तृतीयं च कर्तव्यं भागसम्मितम्
अनन्तरं प्रकुर्वीत पञ्जरं साधभागिकम् ४९
भागमेकं तलच्छन्दो यथावदभिधीयते
चतुरश्रं समं क्षेत्रमष्टाविंशतिधा भजेत् ५०
कुर्यात्कूटं चतुर्भागं --- सलिलान्तरम्
त्रिभागं पञ्जरं तद्वद्द्विभागं सलिलान्तरम् ५१
शालां षड्भागिकीं कुर्याज्जलमार्गं द्विभागिकम्
त्रिभागं पञ्जरं भूयश्चन्द्रशालाविभूषितम् ५२
पुनर्द्विभागिकं कुर्याच्चतुर्थं सलिलान्तरम्
विदधीत चतुर्भागं रथकं च सुशोभनम् ५३
एवं दिक्षु समस्तासु समैर्भागैः प्रकल्पयेत्
चतुर्भागे ततः क्षेत्रे गर्भं कुर्यादिद्विभागिकम् ५४
स्वस्तिके वर्धमाने च भागिक्यो भित्तयः स्मृताः
स्वस्तिकोऽयं तलच्छन्दः कथितोऽतिमनोहरः ५५
इदानीं सर्वतोभद्रतलच्छन्दोऽभिधीयते
चतुरश्रीकृते क्षेत्रे गर्भं कुर्यादिद्विभागिकम् ५६

कुर्यात्त्रिभागिकं कूटं जलमार्गं द्विभागिकम्
त्रिभागिकं ततः कूटं तोयमार्गं द्विभागिकम् ५७
शालाष्टभागिकी कुर्याज्जलवर्त्मद्विभागिकम्
भूयस्त्रिभागिकं कूटं द्विभागं सलिलान्तरम् ५८
त्रिभागिकी च रथिका भवेद्दिक्षु चतुर्दश
चतुरश्रीकृते क्षेत्रे अष्टाविंशतिधा भजेत् ५९
कुर्यात्त्रिभागिकं कूटं चतुर्धा प्रविभाजिते
भागिक्यो भित्तयः कार्यास्तथा गर्भो द्विभागिकः ६०
इत्येष सर्वतोभद्रस्तलच्छन्दो विधीयते
एते प्रोक्ता निरन्धाराः सान्धारांस्तु प्रचक्ष्महे ६१
चतुरश्रीकृतं क्षेत्रं भजेद्द्वादशभिः पदैः
चतुर्भागो भवेद्गर्भो भागिक्यो भित्तयः स्मृताः ६२
भागिकान्धारिका तद्वद्द्विद्वभागा बाह्यभित्तयः
एवमेते तलच्छन्दाः पद्माद्याः परिकीर्तिताः ६३
पीठान्युक्तान्येवमेतानि पञ्च
प्रासादानां नामभिर्लक्षणैश्च ।
पञ्चप्रोक्ता ये तलच्छन्दभेदा-
स्तैर्विज्ञातैः पूज्यतामेति लोके ६४

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे पीठपञ्चकाध्यायो
नामैकषष्टितमोऽध्यायः

अथ द्राविडप्रासादलक्षणं नाम द्विषष्टितमोऽध्यायः

ऊर्ध्वमानमथ ब्रूमो घण्टान्तपुरपादितः
प्रमाणं कर्णमानेन सर्वेषामेव धारयेत् १
तत्रैकभूमिकः कार्यो हस्तपञ्चकविस्तृतः
अङ्गुलद्वितयोपेतः सप्तहस्तसमुच्छ्रितः २
पादो द्विहस्त उत्सेधात्सर्वालङ्कारभूषितः
सार्धहस्तसमुत्सेधस्तावन्मानः स्तरावधि ३
माला तु द्विस्तरा प्रोक्ता स्तरो लशुनकं भवेत्
भरणं स्तरमेकं स्याद्भरणार्धं स्तरद्वयम् ४
कलशाद्युतरं ज्ञेयो वारराद्यासमन्वितः
द्विस्तरं कुलकं कुर्यात्पद्मपत्रसमन्वितम् ५
वीरगन्द्रा पुनः कुर्यात्स्तरमेकं तदूर्ध्वतः
द्विस्तरं हीरकं प्रोक्तं पट्टश्चैव तथाविधः ६
पट्टिका स्तरमेकं स्याद्वसन्तं द्विस्तरं विदुः
वसन्तपट्टिका चोर्ध्वं स्तरमेकं विधीयते ७
कपोतं नासिकायुक्तं विदधीत स्तरत्रयम्
--- दन्तरं प्रकुर्वीत मेटमेकस्तवंस्तत ८
स्तरप्रमाणं मकरं तद्वन्मकरपट्टिकाम्
पुनश्छेदं स्तरं कुर्याद्विदीबन्धस्ततः स्तरम् ९
छेदः स्तरप्रमाणश्च कण्ठः स्यात्द्विस्तरं ततः
पट्टिका स्तरमेकं तु तद्वच्चाम्बुजपट्टिका १०
मालादिपद्मपत्रान्तं द्विहस्तोत्सेधमीरितम्

सार्धहस्तः समुत्सेधः कूटस्य परिकीर्तितः ११
नासिकापद्मसंयुक्तं तदूर्ध्वं कलशो भवेत्
एकभूमेरिदं मानं प्रासादस्य प्रकीर्तितम् १२
एकभूमिकः ।
द्विभूमिकस्य लक्ष्माथ प्रासादस्याभिधीयते
सप्तहस्तसविस्ता --- समुच्छ्रितः १३
कर्णमानाद्भवेदस्य विभागोऽथनिगद्यते
द्विहस्तं कल्पयेद्बीजं जङ्घा सार्धद्विहस्तकम् १४
कूटस्य सन्निवेशोऽयं विज्ञातव्यः सभागिकः
जङ्घा द्वितीया तु पुनः कर्तव्या तस्य भागिका १५
सन्निवेशो द्वितीयस्य स्यात्कूटस्यार्धभागिकः
दिदिक्रव्यस्पृ कर्तव्या सह करठेन भागिकः १६
तस्योपरिष्टाद् घरटा च सार्धभागसमुच्छ्रिता
नासिकापद्मसंयुक्ता विधातव्या विपश्चिता १७
पीठानां पूर्वमुक्तानां पादबन्धादिनामभिः
पञ्चानां कल्पयेदेवं --- भूम्यादितः क्रमात् १८
तेषां शोभावहं यत्स्यात्तत्कर्तव्यं विपश्चिता
तस्योपरि भवेज्जङ्घा मालाल---संयुता १९
भरणं कलशस्तद्वद्द्वारगरडसमन्वितम्
उच्छालं पूर्वमानेन पद्मपत्रायुतं ततः २०
वीरगरडः पुनः कार्यो हीरं पूर्वक्रमेरा च
तस्योपरिष्टात्पट्टश्च भवेत्पट्टिकया सह २१

वसन्तवेदूर्ध्वं ततस्तस्यैवोपरि पट्टिका
ततः कपोतच्छेदश्च मेढकर एव च २२
पट्टिका मकरोष्या च भेदकण्ठोऽथ पट्टिका
वेदीच्छेदश्च कण्ठश्च पट्टिका पद्मपट्टिका २३
कूटं तदूर्ध्वं कुर्वीत विचित्रं नासिकान्वितम्
छेदान्तं पूर्वमानेन सर्वमेतद्विधीयते २४
तस्योपरि पुनर्जङ्घा सर्वाभरणभूषिता
ततो मालाथ लशुनं तोरणं कलशस्ततः २५
वीरगण्डस्तथोच्छालं पत्रकं वीरगण्डकः
हीरकं पट्टिका तद्वद्वसन्तपट्टिका पुनः २६
कपोतच्छेदमेढाश्च मकरोऽस्य च पट्टिका
छेदः करपट्टिका च वेदीच्छेदोऽथ कण्ठकः २७
पट्टिका पद्मपूर्वा च कर्तव्या पट्टिका ---
ततश्छेदो विधातव्यः सर्वैराभरणैर्युतः २८
ततश्छित्त्वा तथा कार्यं यथा शोभा प्रजायते
पुनः कण्ठचं प्रदातव्यः पट्टिका पद्मपट्टिका २९
ततः कण्ठं विधातव्यं चन्द्रमालाविभूषितम्
प्रकुर्वीत ततश्छेदमुपरिष्टाद्विचक्षणः ३०
कण्ठपट्टिकया युक्तं तदूर्ध्वं कण्ठपट्टिकाम्
सप्ताङ्गुलानि कर्तव्यस्ततो घण्टाविनिर्गमः ३१
भागार्धं विस्तृतिस्तस्या विस्तारार्धं समुच्छ्रितिः
एवं द्विभूमिकं प्राज्ञः प्रासादं परिकल्पयेत् ३२

द्विभूमिकः ।
त्रिभूमिकस्तृतीयोऽथ प्रासादोऽस्माभिरुच्यते
तस्यैकादश विस्तारो हस्ताः पञ्चदशोच्छ्रयः ३३
चतुर्दशाङ्गुलान्येषां भवेदस्याधिकानि च
---भूमिकस्यैतत्कर्णमानमसंशयम् ३४
पीठं द्विहस्तं कुर्वीत तत्रादौ पूर्वसूचितम्
जङ्घां त्रिभागिकोत्सेधां कूटोच्छ्रायं तु भागिकम् ३५
भवेज्जङ्घा तृतीया च सार्धभागद्वयं ततः
भागं च कूटप्रसरश्च न्द्रशालाविभूषितः ३६
पुनस्तृतीया जङ्घा स्याद्भागद्वयसमुच्छ्रिता
ततश्चाकूटप्रस्तारो भागिको भूषणान्वितः ३७
भागं स्याद्वेदिबन्धः --- सगुणद्वारकण्ठकः
चतुर्दशमसौ कार्यो भूषायुक्तो यथोचितम् ३८
घण्टाच्छेदस्तु भागौ द्वौ द्व्यङ्गुलद्वयसंयुतौ
एकादशस्तरा कुरुस्तस्योपरि विधीयते ३९
इदानीं प्रविभागोऽस्य पीठादूर्ध्वं विधीयते
हस्तमेकं भवेज्जङ्घाद्यंयपि च तया समा ४०
माला तु द्विस्तरा प्रोक्ता लशुनं भागिकं ततः
भरणं स्तरमेकं स्यात्कलशोऽपि च तत्समः ४१
वीरगण्डसमायुक्तमुच्छालं द्विस्तरं ततः
ततस्तरं वीरगण्डो --- ४२
हीरकं द्विस्तरं विद्यात्सस्तरं वासन्तपट्टिका

कपोतं नासिकायुक्तं त्रिस्तरं कारयेत्ततः ४३
छेदं प्रस्तप्रमाणं च मेढं च तत्सम्मितम्
स्तरं कुर्वीत मकरं तदर्धेनास्य पट्टिका ४४
छेदं तथैव कुर्वीत करठमेकस्तरं ततः
पट्तिका वेदिका चैव स्तरमेकं विधीयते ४५
छेदमर्धस्तरं विद्यात्करठं सार्धस्तरं ततः
पट्टिका स्यात्स्तरं पद्मं स्तरमेकं ततो भवेत् ४६
शेषे च सुन्दरं करठं विधातव्यं विचक्षणैः
अनन्तरं द्वितीया च जङ्घा कार्या नवस्तरा ४७
मध्ये च सा प्रकर्तव्या तदूर्ध्वं तां विभाजयेत्
ततस्तरं भवेच्छाला स्तरार्धं लशुनं ततः ४८
तथैव भरणं ज्ञेयं पूर्वनिर्दिष्टलक्षणम्
वीरगण्डेन सहितः कलशोऽपि तथा भवेत् ४९
पद्मपत्रकया युक्तं स्तरमुच्छालकं विदुः
वीरगण्डं स्तरं विद्यादर्धभागं च हीरकम् ५०
पट्टं तथैव कुर्वीत स्तरस्यार्धेन पट्टिका
वसन्तः स्तरमेकं स्याद् स्तरं वासन्तपट्टिका ५१
कपोतं त्रिस्तरं कुर्यान्नासिकासहितं बुधः
छेदमर्धस्तरं विद्यान्मेढं तत्तुल्यमेव च ५२
मकरं स्तरमेकं च भागार्धं पट्टिका ततः
भागमेकं भवेच्छेदः स्तरं करठस्तदूर्ध्वतः ५३
पट्टिका वेदिका चैव स्तरमेकं विधीयते

छेदं भागार्धिकं कुर्यात्करठकं सार्धभागिकम् ५४
भागेन पट्टिकां कुर्यात्तथा कमलपत्रिकाम्
कूटं ततः परं कुर्यान्नासिका च विभूषितम् ५५
तृतीयजङ्घामद्वा स्याच्चतुर्भिः कल्पिता स्तरैः
स्तरमेकं भवेन्माला स्तरं च लशुनं विदुः ५६
भरणं स्तरमेकं च कुम्भमेकस्तरं तथा
वीरगण्डसमोपेतमुच्छालं स्यात्तदूर्ध्वतः ५७
स्तरमेकं प्रकुर्वीत वीरगण्डसमुच्छ्रितम्
ततश्च हीरकं कुर्याद्भागेनैकेन बुद्धिमान् ५८
सार्धभागेन पट्टिः स्यात्पट्टिकार्धं स्तरं तथा
स्तरमेकं वसन्तं स्यात्स्तरं वासन्तपट्टिका ५९
कपोतो द्विस्तरश्छेदोऽर्धस्तरो मेरुढकः स्तरः
भागिको मकरः कार्यः पट्टिका चार्धभागिका ६०
भेदोऽर्धभागिको भागमेकं करठः प्रकीर्तितः
पट्टिकोवेदिकास्त्रयोऽप्यर्धस्तरं पृथक् ६१
करठश्चार्धस्तरः कार्यः पीठिका चार्धभागिका
अर्धभागेन कर्तव्या तदूर्ध्वं पद्मपत्रिका ६२
विचित्रलक्षणोपेतं ततः कूटं विधीयते
स्तरमेकं भवेच्छेदः स्यात्करठोऽप्येवमेव हि ६३
पट्टिका स्तरमेकं स्यात्ततो वेदी स्तरद्वयम्
छेदः स्तरं भवेद्भूयः करठः स्याद्द्विस्तरं ततः ६४
कर्तव्ये स्तरमेकैकं पट्टिका पद्मपत्रिका

घरटा ततःपरं कार्या मानतो विंशतिस्तरा ६५
एकादशस्तरः कुम्भः सर्वेषां सर्वतो भवेत्
त्रिभूमिकोऽयमाख्यातश्चतुर्भूमिरथोच्यते ६६
त्रिभूमिकः ।
हस्तान्पञ्चदश क्षेत्रं विस्तारात्तु प्रकल्पयेत्
उच्छ्रायेण तु हस्तानां स्यात्पादैकविंशतिः ६७
द्विहस्तं कारयेत्पीठं जङ्घां हस्तत्रयोच्छ्रिताम्
सार्धहस्तं भवेत्कूटं सर्वालङ्कारभूषितम् ६८
द्वितीयजङ्घा कर्तव्या पादहीनं करत्रयम्
सपादहस्तं कुर्वीत कूटमन्यत्तदूर्ध्वतः ६९
तृतीयजङ्घा कर्तव्या सार्धं हस्तद्वयं ततः
ततश्च कूटप्रस्तारो हस्तमेकं विधीयते ७०
जङ्घा चतुर्थी कर्तव्या सार्धहस्तद्वयं ततः
ततश्च कूटप्रस्तारो हस्तमेकं विधीयते ७१
जङ्घा चतुर्थी कर्तव्या सपादद्विकरोच्छ्रिता
हस्तं च कूटप्रस्तारो वेदीबन्धस्तथाविधः ७२
गर्भार्धविस्तृता घरटा कार्या हस्तत्रयोच्छ्रिता
चतुर्दशस्तरः कुम्भः सर्वेषामुपरि स्थितः ७३
सूचिकाहस्तसङ्ख्यैषा विभागः कथ्यतेऽधुना
पीठं हस्तद्वयोत्सेधं जङ्घालङ्कृतिरुच्यते ७४
दशभागो भवेदेकमुच्छालं द्विस्तरं ततः
वीरगण्डं स्तरं विद्यादि्द्वस्तरं हीरकं भवेत् ७५

पट्टस्तथैव विज्ञेयोत्सेधकी पट्टिका ततः
वसन्तं द्विस्तरं --- वासन्तपट्टिवा ७६
कपोतस्त्रिस्तरः कार्यो भागं छेदो विधीयते
मेढं स्तरं प्रकुर्वीत स्तरं कण्ठस्य पट्टिका ७७
कुर्वीत भागिकीं देवा ततच्छेदे च भागिकम्
पुनः कण्ठं प्रकुर्वीत द्विस्तरं पट्टिकां ततः ७८
स्यात्पद्मपत्रिकाप्येवं घण्टा पञ्चस्तरा ततः
वोचोत्रं लक्षणोपेतं ततः कुम्भं निवेशयेत् ७९
जङ्घास्तम्भं द्वितीया विदध्यादष्टभागिकम्
मालां --- द्विस्तरं कुर्याद्भागिकं लशुनं ततः ८०
भरणं स्तरमेकं च कलशं तत्प्रमाणतः
वीरगण्डेन संयुक्तं तावांश्चोच्छालकं भवेत् ८१
द्विस्तरं तत्तु विज्ञेयं वीरगण्डः स्तरं भवेत्
हीरकं द्विस्तरं विद्यात्पद्मं चैव तथाविधम् ८२
पट्टिका स्तरमेकं स्याद्वसन्तं द्विस्तरं ततः
वसन्तपट्टिकां भागं कपोतं त्रिस्तरोच्छ्रितम् ८३
कुर्वीत भागिकं भेदं स्तरमेकं च मेढकम्
मकरं स्तरमेकं च तथा मकरपट्टिकाम् ८४
भेदः स्तरं भवेत्कण्ठः स्तरं भागं च पट्टिका
वेदिका स्तरमेकं च च्छेदमर्धेन कारयेत् ८५
कण्ठं सार्धस्तरं कुर्यात्स्तरमेकं च पट्टिकाम्
आभाजपत्रिकां भागं कुर्याद्घण्टां चतुःस्तराम् ८६

प्राग्ग्रीवभूषिता सा स्यात्कुम्भं कुर्यात्तदूर्ध्वतः
जङ्घास्तम्भस्तृतीयायां सप्तांशश्चतुर --- कः ८७
ततो मालाथ लशुनं भरणं कुम्भकाण्डकौ
उच्छालं गण्डको हीरं प्रत्येकं स्युः स्तरं स्तरम् ८८
पद्मं सार्धस्तरं विद्याद्भागेऽर्धे पट्टिकां तथा
भागमेकं वसन्तः स्याद्भागं वासन्तपट्टिका ८९
कपोतं त्रिस्तरं कुर्याच्छेदमेकस्तरं ततः
ततश्च मेढकं मरं विदधीत स्तरं स्तरम् ९०
तत्पट्टिका तु भागार्धं भेदं भागार्धमेव च
कण्ठो वेदि पट्टिका च त्रीण्येतानि स्तरं स्तरम् ९१
स्तरस्यार्धं भवेच्छेदः कण्ठः सार्धस्तरं ततः
भागार्धं पट्टिका कार्या तावती पद्मपत्रिका ९२
चतुर्भागा भवेद्घण्टा गुणद्वारसमन्विता
द्विस्तरं कारयेत्कुम्भं घण्टायाः स्थितमूर्ध्वतः ९३
एवं भूमिस्तृतीयैषा चतुर्थी कथ्यतेऽधुना
कर्तव्या पट्टरा जङ्घा महास्तम्भसमन्विता ९४
मालाथ लशुनं तद्वद्भरणं कुम्भ एव च
उच्छालं गण्डकं हीरमिति प्रा---पृथक् पृथक् ९५
सार्धभागं भवेत्पाडः पट्टिकार्धस्तरं ततः
वसन्तं स्तरमेकं स्यात्तत्संज्ञः पट्टिका स्तरम् ९६
कपोतं द्विस्तरं विद्याच्छेदं चार्धस्तरं ततः
मेढं तथैव कुर्वीत मकरं च स्तरं बुधः ९७

पट्टिकां मकराख्यां च च्छेदमेकस्तरं विदुः
स्तरमेकं भवेत्कण्ठः स्तरस्यार्धं च पट्टिका ९८
तथैव वेदिकां कुर्याच्छेदमर्धस्तरं पुनः
साधभागं प्रकुर्वीत कण्ठदेशं विचक्षणः ९९
पट्टिका मद्यसंज्ञा तु स्तरमेकं विधीयते
घण्टा स्तरद्वयं कार्या गुणद्वारविभूषिता १००
कुम्भं विदध्यादुपरि द्विस्तरं पङ्कजाननम्
भागमेकं भवेच्छेदस्ततः कण्ठः स्तरद्वयम् १०१
पट्टिका स्तरमेकं तु वेदिका तु स्तरावुभौ
पुनश्छेदो भवेद्भागं --- कण्ठो विधीयते १०२
पट्टिका स्तरमेकं तु तद्वदम्भोजपत्रिका
स्तराणां विंशतिर्घण्टा भवेद्गर्भार्धविस्तृता १०३
चन्द्रशालाश्च कर्तव्या दर्शनीयाश्चतुर्दिशम्
एवं पद्मे महापद्मे स्वस्तिके वर्धमानके १०४
तथैव सर्वतोभद्रे कुर्याद्घण्टामिमां वुधः
कुम्भं तु पञ्चदशभिः स्तरैः कुर्यात्समुन्नतम् १०५
स्याच्चतुर्भूमिको ह्येवं तलच्छन्दस्तु कामतः
चतुर्भूमिकः ।
पञ्चभौममथ ब्रूमः प्रासादं राजपूजितम् १०६
विस्तारेण विधातव्यः स हस्तानेकविंशतिम्
विभाजयेत्तथोत्सेधं पादोनत्रिंशतं करान् १०७
पीठं भागद्वयं सार्धं जङ्घा साराम्रा त्रिभागिकी

कुर्वीत कूटप्रस्तारं सार्धहस्तं च बुद्धिमान् १०८
जङ्घा द्वितीया कर्तव्या हस्तत्रितयमुच्छ्रिता
भूयोऽपि कूटप्रस्तारं सार्धहस्तं प्रकल्पयेत् १०९
जङ्घा तृतीया कर्तव्या पादहीनं करत्रयम्
सार्धहस्तसमुत्सेधः कूटप्रस्तार इष्यते ११०
चतुर्थभूमिजङ्घा च सार्धहस्तद्वयोच्छ्रिता
कूटप्रस्तारकं कुर्यात्पूर्वमानेन बुद्धिमान् १११
पञ्चम्यां भुवि कुर्वीत जङ्घा सा हि करद्वयम्
कुर्वीत कूटप्रस्तारं तथा प्रागागुदितो यथा ११२
कुर्याद्धस्तद्वयोत्सेधं कपोतमपि बुद्धिमान्
चतुर्भागसमुत्सेधा महाघण्टा विधीयते ११३
उपरिष्टाद्भवेत्तत्र प्रासादे पञ्चभूमिके
कुम्भं तदूर्ध्वं कुर्वीत स्तरानेकोनविंशतिम् ११४
संस्थानमेतत्कर्तव्यं सर्वतोभद्रसंज्ञकौ
विभाजयेद्विशेषेण ततः स्तरविभाजनात् ११५
श्री बन्धपीठं कर्तव्यं सार्धहस्तद्वयोच्छ्रितम्
चतुर्दशस्तरं जङ्घा कर्तव्या स्तम्भसंयुता ११६
कर्तव्या द्विस्तरा माला लशुनं स्तरसम्मितम्
विदधीत स्तरं पद्मभगण्डसमन्वितम् ११७
उच्छालं द्विस्तरं कुर्यादिडो भागं विधीयते
द्विस्तरं हीरकं कार्यं पट्टाश्चैव तथाविधाः ११८
पट्टिका स्तरमेकं च वसन्तं द्विस्तरं ततः

वसन्तपट्टिका भागं कपोतं त्रिस्तरं ततः ११९
छेदमेकस्तरं कुर्यात्स्तरमात्रं च मेठकम्
मकरं भागमेकं च भागं चरालपट्टिकाम् १२०
कुर्वीत भागिकं छेदं ततः करठं च भागिकम्
करठं छेदं ततः करठं च --- भागिकम् १२१
वाख्यापट्टिकां भागं वेदीं विचक्षणः
कुर्वीत भागिकं छेदं ततः करठं स्तरद्वयम् १२२
स्तरं स्तरं प्रकुर्वीत पट्टिका पद्मपट्टिका
कूटप्रस्तारके कुर्यान्मकराननपञ्चकम् १२३
विचित्ररूपं सर्वासु दिक्षु सर्वगुणान्वितम्
ऊर्ध्वतः पट्टिकायास्तु घरटा पञ्चस्तरा भवेत् १२४
नासिकाभिर्विचित्राभिरत्युदाराभिरन्विता
भद्राणि यस्य दृश्यन्ते कूटे कूटे समन्ततः १२५
स सर्वतोभद्र इति प्रासादः शिल्पिनां मतः
अवलम्बेन तदनु स्तम्भच्छेदं प्रकल्पयेत् १२६
स्तम्भत --- त्रेण समानं भुवि सूत्रयेत्
मेढस्य निर्गमे दद्यादङ्गुलद्वितयं बुधः १२७
पञ्चाङ्गुलानि कर्तव्यस्ततो मकरनिर्गमः
सूत्रयेत् समसूत्रेण ततो मेढकस्य पट्टिका १२८
षडङ्गुलप्रवेशस्तु कार्यश्छेदस्य धीमता
यथा प्रवेश --- छेदस्यापि तथा भवेत् १२९
अङ्गुलद्वितयं कार्यः पट्टिकाया विनिर्गमः

विनिर्गमो वेदिकाया विधातव्यः षडङ्गुलः १३०
अङ्गुलद्वयनिष्क्रान्ता विधेया करठपट्टिका
पद्माख्यानिर्गमं कुर्यादङ्गुलत्रितयं ततः १३१
अङ्गुलानि ततः पञ्च योनि --- निर्गमो भवेत्
घरटा त्विह विधातव्या सर्वालङ्कारभूषिता १३२
भेदस्ततः स्याद्भवति भूमिका तस्य चोपरि
द्वितीयाभूमिकाजङ्घा सद्यः स्यादष्टाभिः स्तरैः १३३
मालाद्यैर्लशुनं चैकं भरणं कलशस्तथा
यथा माला तथोच्छालं वीरगरडं स्तरं भवेत् १३४
उच्छालहीरके पट्टसमे कुर्याद्विचक्षणः
पट्टिका भागिकोत्सेधा वासन्तं --- का तथा १३५
कपोतं त्रिस्तरोत्सेधं छेदो सत्र्यंशवर्जितम्
छेदस्यार्धे भवेन्मेढो मकरः पट्टिका तथा १३६
ततश्छेदं च करठं च --- पट्टिकां तथा
मालार्धेन प्रकुर्वीत च्छेदमेव ततो बुधः १३७
पुनः करठं प्रकुर्वीत हीरकेण समन्वितम्
पट्टिका पद्मपूर्वा च त्रिभागेन कपोतके १३८
कुर्याच्चतुःस्तरां घरटां द्वाभ्यां कुम्भं तथोपरि
पुनश्छेदो भवेद्भागं जङ्घां कुर्वीत सप्तभिः १३९
सीतमाठा विधातव्या मालोच्चो द्विस्तरो भवेत्
लशुनं भरणं कुम्भो गरडश्चेति स्तरं स्तरम् १४०
गरडद्विगुणमुच्छालं हीरपट्टस्तथैव च

पट्टिका स्तरमेकं स्याद्वसन्तपट्टिकास्य च १४१
पीठं दशगुणं कुर्याच्छेदमेरठौ स्तरं स्तरम्
स्तरं कुर्वीत राकर तथा मकरपट्टिकाम् १४२
स्तरं छेदं च करठं च पट्टिकां वेदिकां तथा
छेदं कुर्यात्पुनर्भागं करठं तद्द्विगुणं ततः १४३
पट्टिका स्तरमेकं स्याद्वसन्तपट्टिका स्तरम्
चतुःस्तरा भवेद्धरटा प्राग्ग्राचकभूषिता १४४
तस्योपरि पुनः कुम्भं घरटार्धेनैव कारयेत्
छेदं भागं विजानीयाज्जङ्घा सप्तांशिका स्मृता १४५
माला द्विभागिका कार्या भागिकं लशुनं भवेत्
भरणं कुम्भकं गरडं कुर्याल्लशुनवद्बुधः १४६
उच्छालं गरडकं चैव हीरकान्तं च भागिकम्
सार्धं भागं भवेत्---पट्टिकार्धं स्तरं भवेत् १४७
---तं भागमेकं स्याद्वसन्ताख्या च पट्टिका
कपोतं त्रिस्तरं कुर्यान्नासायुक्तं विचक्षणः १४८
छेदमंशेन कुर्वीत मरडमंशेन कारयेत्
मकरे पट्टिकां छेदं विदधीत स्तरं स्तरम् १४९
कुर्वीत भागिकं करठं पट्टिकां वेदिकामपि
भागं कुर्यात्पुनश्छेदं ततः करठं द्विभागिकम् १५०
पट्टिका पद्मपूर्वा च विधातव्या स्तरं स्तरम्
कुर्वीत घरटामुपरि चतुर्भागां विचक्षणः १५१
तदर्धमूर्ध्वतः कुम्भं छेदमर्धेन तस्य च

जङ्घा षड्भागिका कार्या मात्ता गेन सुन कारयेन १५२
लशुनं भरणं कुम्भं गरडमुच्छालवाडके
हीरकं चेति कुर्वीत भागिकानि पृथक्पृथक् १५३
सार्धभागं भवेत्पट्टः पट्टिकार्धस्तरोच्छ्रिता
वसन्तं भागमेकं स्याद्वसन्ताख्या च पट्टिका १५४
कपोतं त्रिस्तरं कुर्याच्छेदं त्र्यंशोनशंसकाम्
मरडको मकरश्चैव पट्टिका छेदकरठकौ १५५
करठं पट्टी च वेदी च च्छेदश्च स्यात्स्तरं स्तरम्
द्वितीयो द्विस्तरः करठो भागिकी पट्टिका भवेत् १५६
तथैव पद्मंज्ञा च स्यादुच्छ्रायेण पट्टिका
घरटां कुर्याच्चतुर्भागां कुम्भमर्धेन तस्य च १५७
छेदमेकेन भागेन जङ्घाम --- र्धभागिकीम्
मालामेकेन भागेन लशुनं सार्धभागिकम् १५८
तथैव भरणं कुर्यात्कुम्भोच्छाले स्तरं स्तरम्
हीरकं भागिकं कुर्यात्पट्टं सार्धस्तरं ततः १५९
पट्टिकार्धस्तरं कार्या वसन्तं च स्तरं ततः
कपोतं द्विस्तरं कुर्याद्विदीमर्धस्तरं तथा १६०
यथा छेदस्तथा मरडो मकरश्च विधीयते
पट्टिकार्धस्तरं कार्या छेदोऽप्यर्धस्तरं भवेत् १६१
भागं करठः पट्टिका च वेदी कार्या द्विभागिकी
छेदो भागेन कर्तव्यः करठश्चान्यस्त्रिभागिकः १६२
पट्टिकां पद्मपत्रीं च विदधीत स्तरं स्तरम्

तुङ्गस्य चलनं कार्यं द्विभागिकमनन्तरम् १६३
घण्टा कार्या समुत्सेधात् त्रयस्त्रिंशद्विभागिकी
सर्वतोभद्रसंयुक्ता चन्द्रशालाविभूषिता १६४
कुर्वीत त्रिस्तरं पद्मं चित्रपत्रसमन्वितम्
तस्योपरि भवेत्कुम्भश्चतुर्दशविभागिकः १६५
ग्रीवा द्विभागिका कार्या कर्णश्चैव तथाविधः
बीजपूरं ततः कार्यां साभासंयुक्तमर्धतः १६६
पद्मचक्रं त्रिशूलं वा विधातव्यं यथोचितम्
प्रोत्तुङ्गग्राससंयुक्तं --- मकरमेढकैः १६७
सोत्तुङ्गकूटाके कुर्यादेवं दिक्षु विदिक्षु च
भूमौ भूमौ विधातव्या शाला साध्यलतोरणम् १६८
कोणे कोणे च --- करा भद्रे करिक्यकरानपि
--- कूटैस्त्रिभिर्युक्तं चतुर्भिश्च जलान्तरैः १६९
कुर्वीत सर्वतोभद्रमेवंलक्षणलक्षितम्
एवं पद्मो महापद्मः स्वस्तिको वर्धमानकः १७०
सर्वतोभद्र इत्येते समारभ्यैकभूमिकान्
पञ्चभूमिकपर्यन्तं कार्याः साधारणक्रियाः १७१
एतैर्विंशतिभागैश्च प्रासादाः पूर्वसूचिताः
पीठादारभ्य घण्टान्तं पञ्चैते लक्षणान्विताः १७२
षड्भूमिकादिको ब्रूमो यावद्द्वादशभूमिकम्
पञ्चभूमिकः ।
अथ षड्भौममेकान्तं त्रिंशद्धस्तं प्रचक्ष्महे १७३

चत्वारिंशत्कराः सैकास्तस्योच्छ्रायो विधीयते
पीठं प्रकल्पयेत् तस्य सार्धहस्तद्वयोच्छ्रितम् १७४
जङ्घा समुच्छ्रये कार्या सार्धहस्तचतुष्टयम्
कूटप्रस्तारमस्याहुः सोर्धहस्तोच्छ्रितं बुधाः १७५
जङ्घा द्वितीया तु भवेत्तस्य हस्तचतुष्टयम्
द्वितीयकूटस्योत्सेधं सार्धहस्तं प्रकल्पयेत् १७६
घरटा तृतीया चतुरो हस्तास्तार्धाद्विवर्जिता
तृतीयकूटप्रस्तारं कुर्याद्भूयोऽपि पूर्ववत् १७७
जङ्घा भवेच्चतुर्थी स साधां त्रे करत्रयम्
पूर्वमानेन कुर्वीत कूटप्रस्तारमूर्ध्वतः १७८
हस्तत्रयं विधातव्या जङ्घोच्छ्रायेण पञ्चमी
कूटप्रस्तारकं कुर्यात्सार्धहस्तोच्छ्रितं ततः १७९
षष्ठीहस्तत्रयं जङ्घा पादहीनं विधीयते
प्राग्वत्प्रस्तारकूटं तु कपोतं त्रिकरोच्छ्रितम् १८०
तस्योपरि भवेद्धरटा हस्तपञ्चकमुच्छ्रिता
कर्तव्यं पद्ममुपरि सुविचित्रं षडङ्गुलम् १८१
कुर्याद्भागैकविंशत्या कुम्भमाद्धरणैतम्
षड्भूमिकोऽयमाख्यातः कथ्यते सप्तभूमिकः १८२
षड्भूमिकः ।
पञ्चत्रिंशत्करः प्रोक्तो विस्तारात्सप्तभूमिकः
साधार्त्तेकान्नपञ्चाशत्कर्ण नित्योच्छ्रिता करात् १८३
त्रिहस्तं पीठमुत्सेधाज्जङ्घा पञ्चकरोच्छ्रिता

सार्धहस्तोच्छ्रितः कूटप्रस्तारोऽस्य विधीयते १८४
द्विहस्तो वेदिकाबन्धो जङ्घोच्छ्रायश्चतुष्करः
सार्धहस्तसमुत्सेधः कूटविप्रस्तार इष्यते १८५
साधहस्तोच्छ्रिता वेदी जङ्घा सार्धकरत्रयम्
सार्धहस्तोच्छ्रितः कूट प्रस्तारः परिकीर्तितः १८६
सपादहस्ता वेदी स्याज्जङ्घा त्र्यंशं करत्रयम्
सार्धहस्तस्तु कूटस्य प्रस्तारः स्यात्समुच्छ्रयात् १८७
हस्तं स्याद्वेदिकाबन्धो जङ्घांशो हि करद्वयम्
सपादहस्तः कूटस्य प्रस्तारो वेदिका करम् १८८
पादोनद्विकरा जङ्घा कूटं पादयुतः करः
हस्तमात्रोच्छ्रिता वेदी जङ्घा सार्धकरोच्छ्रिता १८९
कूटप्रस्तारको हस्तं कपोतः स्यात्करत्रयम्
सपद्मशीर्षघण्टा तु सार्धं स्याद्धस्तपञ्चकम् १९०
एवमेष समुद्दिष्टः प्रासादः सप्तभूमिकः
सप्तभूमिकः ।
अथाष्टभूमिकं ब्रूमः प्रासादं शुभलक्षणम् १९१
चत्वारिंशत्करांस्तस्य विस्तारं परिकल्पयेत्
उच्छ्रायः सप्तपञ्चाशत्कराः स्युस्त्रिंशवर्जिताः १९२
नवहस्तान् प्रकुर्वीत सार्धान्प्रथमभूमिकाम्
द्वितीयाष्टौ सपादोर्धास्तृतीयाष्टौ करान् भवेत् १९३
चतुर्थी सप्तहस्ता तु षट्करा पञ्चमी भवेत्
पञ्चहस्ता ततः षष्ठी चतुर्हस्ता तु सप्तमी १९४

ततोऽष्टमी त्रिहस्ता स्याद्वेदीबन्धः करद्वयम्
घरटां चतुष्करां कुर्यादेवं स्यादष्टाभूमिकः १९५
अष्टभूमिकः ।
अथोच्यते हस्तमानात्प्रासादो नवभूमिकः
विस्तारादेकपञ्चाशदुच्छ्रित्या स्याद्द्विसप्ततिः १९६
कर्णप्रमाणं तस्योक्ता विस्तारोऽस्य चनुच्छ्रितिः
पञ्चहस्ता भवेद्धरटा वेदिबन्धस्तदर्धतः १९७
कुर्याद्धस्तत्रयं सार्धं नवमीमस्य भूमिकाम्
अष्टमीं चतुरः सार्धान् सपादान् पञ्च सप्तमीम् १९८
षष्ठीं षट् पादहीनांश्च सपादोनाम पञ्चमीम्
अष्टौ चतुर्थी पादोनान् हस्तात्राच तृतीयकाम् १९९
विलोमेनैककथितः प्रासादो नवभूमिकः
नवभूमिकः ।
इदानीमभिधास्यामः प्रासादं दशभूमिकम् २००
एकोनाशीतिरुत्सेधः सपादा विस्तृतिः पुनः
षट्पञ्चाशत्कराः कर्णमानाद्ब्रूमोऽथ भागशः २०१
एकादशकरोत्सेधा काया प्रथमभूमिका
सार्धान् दश द्वितीया स्यात्तृतीया तु करान् दश २०२
सार्धानष्टौ चतुर्थी तु सप्तसार्धस्व पञ्चमी
षष्ठी सप्तकरा प्रोक्ता सप्तमी षट्करा भवेत् २०३
पञ्चहस्ताष्टामी ज्ञेया नवमी तु चतुष्करा
त्रिहस्ता दशमी कार्या वेदी सांशं करद्वयम् २०४

--- प्रमाणेन सार्धं करचतुष्टयम्
एवमेष समुद्दिष्टो विन्यासो दशभूमिके २०५
दशभूमिकः प्रासादः ।
ब्रूमः समासादभीथैकादशभूमिकम्
पञ्चषष्टिकरः कार्यो द्विनवत्युच्छ्रितश्च सः २०६
कर्णमानेन विज्ञेयः प्रासादः शास्त्रवेदिभिः
प्रथमा भूमिका तस्य चतुर्दशकरा भवेत् २०७
द्वितीया द्वादशार्धं च तृतीयैकाडशोच्छ्रिता
नव सार्धांश्चतुर्थी स्यात्सपादानष्ट पञ्चमी २०८
सप्तहस्ता भवेत्षष्ठी षड्ढस्ता सप्तमी ततः
पञ्चहस्ताष्टमी सार्धांश्चतुरो नवमी करान् २०९
चतुर्हस्ता तु दशमी सार्धमेकादशी त्रयम्
सपादद्विकरा वेदी घरटा सार्धचतुष्करा २१०
प्रासादः कथितः सम्यगित्येकादशभूमिकः
एकादशभूमिकः ।
ब्रूमो द्वादशभौमं स सप्तषष्टिकरायतः २११
उच्छ्रायात्पञ्चनवतिहस्तः स्यात्कर्णमानतः
आद्या चतुर्दशकरा भूमिकास्य विधीयते २१२

द्वितीयैकादशकरान् तृतीयार्धयुतान् दश
दश हस्तांश्चतुर्थी स्यादष्टौ सार्धांस्तु पञ्चमी २१३
सार्धसप्तकरा षष्ठी सप्तहस्ता च सप्तमी

अष्टमी षट्करा पञ्चहस्ता तु नवमी भवेत् २१४
दशमी स्याच्चतुर्हस्ता त्रिहस्तैकादशी क्षितिः
द्वादशी द्वौ करौ सार्धौ वेदीबन्धः करद्वयम् २१५
चतुर्हस्ता भवेद्धरणटा सर्वालङ्कारभूषिता
स्तम्भकर्णस्य मानेन कुम्भं कुर्याद्विचक्षणः २१६
उच्छालं द्विगुणं स्तम्भात् हीरसार्धसङ्गुणाम्
इत्येते द्राविडाः सम्यक्प्रासादा द्वादशोदिताः २१७
एषां पद्ममहापद्मस्वस्तिका वर्धमानकः
सर्वतोभद्र लतास्तलबन्धान्निवेशयेत् २१८
आरभ्यन्तामरेकस्या च द्वादशभूमिकात्
ऊर्ध्वमानं च कर्तव्यं सामान्यं तेषु पञ्चसु २१९
द्वादशभूमिकः ।
पीठमूलच्छन्दकभूमिकाभि-
र्विनिर्मिता द्राविडनामधेयाः ।
प्रासादमुख्याः कथिता यथा यथा-
वेत्यं स्वल्पिविभिरुच्यतेऽसौ २२०

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे द्राविडप्रासादाध्यायो नाम
द्विषष्टितमः

अथ मेर्वादिविंशिकानागरप्रासादलक्षणं नाम त्रिषष्टितमोऽध्यायः
अधुना नागरान्ब्रूमो प्रासादान्नामलक्षणैः

मेरुमन्दरकैलासाः कुम्भोऽथ मृगराड्गजः १
विमानच्छन्दसंज्ञश्च चतुरश्रस्तथापरः
अष्टाश्रिः षोडशाश्रिश्च वर्तुलः सर्वतोदकः २
सिंहास्यो नन्दनो नन्दिवर्धनो हंसको वृषः
गरुडः पद्मकाख्यश्च समुद्र इति विंशतिः ३
नागराणामिति प्रोक्ता प्रासादानां समासतः
शतमुद्रश्चतुर्द्वारः षोडशद्धितिरूर्ध्वतः ४
विचित्रशिखराकीर्णो मेरुः प्रासाद उच्यते
मन्दरो द्वादशतलः कैलासो नवभूमिकः ५
अनेकशिखरश्चित्रश्चतुर्द्वारो महोच्छ्रितिः
विमानच्छन्दकस्त्वष्टभूमिकः परिकीर्तितः ६
विंशत्यण्डकसंयुक्तः सप्तभूर्नन्दिवर्धनः
षड्भूमिर्नन्दनः कार्यः प्रासादः षोडशाण्डकः ७
पञ्चभूः सर्वतोभद्रो भद्रशालाविभूषितः
अनेकशिखराकीर्णः कर्तव्यः प्रचुराण्डकः ८
वलभिच्छन्दकः कार्यो देवतानां वृषः सदा
वृषस्तु स्वोच्छ्रितेस्तुल्यः सर्वतः स्वस्ति वर्तितः ९
मण्डलं स तु विज्ञेय एकाण्डकविभूषितः
सिंहः सिंहाकृतिर्ज्ञेयो गजो गजसमाकृतिः १०
कुम्भः कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रितः
अञ्जलीपुटसंस्थानः पञ्चाण्डकविभूषितः ११
षोडशाश्रिः समन्ताच्च विज्ञेयः स समुद्रकः

पार्श्वयोश्चन्द्रशाला च उच्छ्रायात्स द्विभूमिकः १२
तथाष्टाश्रिः पद्मनिभो भूमिकात्रयमुच्छ्रितः
षोडशाश्रिः स विज्ञेयो विचित्रशिखरः शुभः १३
मृगराजस्तु विख्यातश्चन्द्रशालाविभूषितः
प्राग्ग्रीवेण विशालेन भूमिकास यदुच्छ्रितः १४
अनेकचन्द्रशालस्तु गजः प्रासाद उच्यते
पर्यस्तो मृगराजस्तु गरुडो नाम नामतः १५
सप्तभूम्युच्छ्रितस्तद्वच्चन्द्रशालात्रयान्वितः
अश्रिभिर्विहरं तस्य षड्भिर्युक्तः समन्ततः १६
स्यादन्यो गरुडस्तद्वदुच्छ्राये दशभूमिकः
पद्मकः षोडशाश्रिः स्याद्भूमिकाद्वितयाधिकः १७
पद्मतुल्यप्राणन वावृत्तश्चतुरश्रकः
पञ्चाशडमे एकभूमिस्तु गर्भं हस्तचतुष्टयम् १८
वृषो भवति नात्रायं प्रासादः सर्वकामिकः
सप्तकापञ्चकाभूमिप्रासादो य इहोदिताः १९
हिंस्यते समा ज्ञेया ये चान्ये तत्प्रमाणकाः
विचित्रशिखराः कार्याश्चन्द्रशालाविभूषिताः २०
सर्वे प्राग्ग्रीवसंयुक्ताः कर्तव्यास्तोरणान्विताः
ऐष्टिका दारवा यद्वा शैलजा वाजनाकुलाः २१
स्यात्पञ्चाशत्करान्मेरुसूत्रलिङ्गं नवोदयान्
गर्भास्तु द्विगुणा लिङ्गाद्वित्तयः स्युश्चतुष्कराः २२
अन्धारिका हस्तषट्कं विधातव्या समन्ततः

अन्धारिकां च कुर्वीत बाहाभित्तिं विचक्षणः २३
अयं साधारकः प्रोक्तो मेरुः सर्वगुणान्वितः
प्रासादानां तथान्येषां गर्भो लिङ्गदिशंगुणः २४
प्रासादगर्भमुत्सृष्टं यच्छेषं तेन कल्पयेत्
सहान्धारिकया सर्वां समभागेन पूर्ववत् २५
मेर्वाद्या ये विमानान्ताः सं--- पूर्वं प्रकीर्तिताः
शस्तास्ते मृज्य लिङ्गानामन्येषां तु भयावहम् २६
वावृक्षमुख्या ये तूक्ता नन्दिवर्धनपश्चिमाः
तेऽष्टौ शुभा मध्यमानामन्येषां दुःखदाः स्मृताः २७
हंसादयः समुद्रान्ताः पञ्च ये समुदाहृताः
प्रशस्तास्ते समुद्दिष्टा लिङ्गानां विधीयसा २८
मन्दरस्तु करात्कायश्चत्वारिंशत्तु ---
--- लासो विमानोषरोष्टिताः २९
हस्तद्वात्रिंशता कार्यः प्रासादो नन्दिवर्धनः
हस्तांस्तु नन्दनस्त्रिंशत्सर्वतोभद्र एव च ३०
अष्टाविंशतिमष्टाभिः श्रिः षोडशा श्रि स्त्रिभिर्विना
वर्तुलः पद्मकः श्वेतो विमानच्छन्द एव च ३१
एते द्वादशहस्ताः --- कार्या विंशतिहस्तकौ
गजः सिंहश्च कुम्भश्च वलभीछन्दकस्तथा ३२
चत्वार एते तुल्याः स्युर्हस्तोन्मेडसमानतः
वावृद्धो मृगराजश्च विमानच्छन्द एव च ३३
एते द्वादशहस्ताः स्युः प्रमाणेन पृथक्पृथक्

दशहस्तो भवेद्वा स गरुडोऽष्टकरः स्मृतः ३४
एतैः प्रमाणैः प्रासादान् कुर्यादित्यपरे स्थिताः
एकहस्ता द्विहस्ताश्च त्रिहस्ता ये च कीर्तिताः ३५
यक्षनागग्रहादीनां विधेया रक्षसां च ते
विधिरेष समुद्दिष्टः प्रासादानां समासतः ३६
विशेषेण पुनर्ब्रूमो विमानं शुद्धपुष्पकम्
चतुरश्रीकृते क्षेत्रे पञ्चात्रिंशद्विभाजिते ३७
रथिका पञ्चभागा स्याद्द्विभागं सलिलान्तरम्
कूट त्रिभागं पञ्जरं कुर्यात्प्राग्ग्रीवकविभूषितम् ३८
जलान्तरं द्वितीयं तु तदपि स्याद्द्विभागिकम्
शालैकादशभागा तु पूर्ववत्सलिलान्तरम् ३९
त्रिभागं पञ्जरं कुर्याद् द्विभागं सलिलान्तरम्
कूटं पञ्चकरं प्रान्ते दिक्षु सर्वास्वयं विधिः ४०
नागरोऽयं तलच्छन्दः प्रासादे शुद्धपुष्पके
जङ्घा सपीठा क्षेत्रार्धविस्तारसदृशोदया ४१
सार्धैर्द्वितीया दशभिस्तृतीया नवभिः करैः
अष्टहस्ता चतुर्थी स्यात्सप्तहस्ता तु पञ्चमी ४२
षष्ठी तु भूमिका कार्या प्रमाणेनास्य षट्करा
सप्तमी पञ्चहस्ता तु चतुर्हस्ता ततोऽष्टमी ४३
त्रिहस्तं वेदिकाबन्धं विचित्रं कारयेद्बुधः
विस्ताराद् द्विगुणोच्छ्रायः स्कन्धोऽयं वेदिकाबन्ध ४४
स्कन्धादूर्ध्वं भवेद्घण्टा यदि वामलसारकम्

तद् वर्तुलं शुभं कार्यं घरटा स्कन्धार्धमुच्छ्रिता ४५
घरटाविस्तारतः कुम्भं चतुर्थांशेन कारयेत्
प्रमाणं समुदायेन भूमिकानामुदाहृता ४६
एकैकस्या विशेषेण प्रविविच्याधुनोच्यते
प्रमाणेन विधातव्या खकारा भूमिरङ्गिका ४७
यं हस्तं तु खुरकं द्विभागा पद्मपत्रिका
भागिका कणकयायस्त्र्यंशं कुमुदं छेद एव च ४८
त्र्यंशस्तद्द्विगुणः करठः किङ्किणीपल्लवान्वितः
तस्यार्धं पट्टिका कार्या तत्समा गिरिपत्रिका ४९
भात्र्यंशावरण्डीतमध्ये पच्छीतलार्धभागिकी
पूर्वप्रोक्तेन करठेन समसूत्रा च सा भवेत् ५०
छेदं तदूर्ध्वं कुर्वीत स्तरमेकं विचक्षणः
पुनः करठःह् प्रदातव्यो भागद्वितयसम्मितः ५१
पट्टिका स्तरमेकं तु तत्समा गिरिपत्रिका
चतुर्गुणाथ त्रिगुणा कार्याविलकनासिका ५२
स्तम्भद्वितयमध्ये तु पञ्चयं कर्म कारयेत्
शोभनं तत्तु कर्तव्यं युक्तं तिलकनामया ५३
पुनश्छेदः प्रदातव्यः पूर्वमानेन धीमता
जङ्घा सप्तस्तरा मेठा वरण्डी त्रिस्तरोर्ध्वतः ५४
भवेदधस्ताज्जङ्घायास्त्रिस्तरलकुम्भकः
घरटापमरटपसंयुक्ता माला स्यात् षद्यरात्ततः ५५
अर्धेन तस्या लशुनं स्तरेण भरणं भवेत्

कुर्वीत द्विस्तरं कुम्भं गण्डमेकस्तरं ततः ५६
उच्छालं द्विस्तरं कुर्याद्वीरगण्डं ततः स्तरम्
द्विस्तरः स्यात्ततः पट्टस्यार्धेन पट्टिका ५७
तत्समा गिरिपत्री च वरण्डी त्रिस्तरा ततः
स्तम्भस्योर्ध्वं विधातव्या मनोज्ञा त्र्यर्धपादिका ५८
स्तरमेकं ततश्छेदस्ततः कण्ठः स्तरत्रयम्
पट्टिका स्तरमेकं स्यात्तत्समा गिरिपत्रिका ५९
वरण्डीं त्रिस्तरां कुर्यादर्धप्रस्तरसंयुतम्
पुनश्छेदः स्तरं कार्यः कण्ठस्तेन समस्ततः ६०
तत्समा गिरिपत्री च त्र्यंशमामलसारकम्
ततश्छेदं च कण्ठं च गिरिपत्रीं वरण्डिकाम् ६१
पूर्वमानेन कुर्वीत च्छेदकम्पे तथा पुनः
गिरिपत्रीं स्तरं कुर्यात् त्र्यंशक्तखरंकततः ६२
छेदं कण्ठं पत्रिकां च प्रास्तरमेकं ततश्छेदकं कुर्यात्पुनर्बुधः
वरण्डीं त्रिस्तरां कुर्यादर्धप्रस्तरसंयुतम् ६३
छेदं कण्ठं च पीठं च प्राग्ववामलसारकण्ठं कुर्यात्तथापरम्
पूर्ववद्गिरिपत्रीं च द्विस्तरां वेदिकां ततः ६४
छेदं कुर्यात्तदर्धं च ततः कण्ठं स्तरद्वयम्
गिरिपत्रीं ततः कुर्यात्स्तरमेकं सुशोभनाम् ६५
चतुरश्रप्रमाणं च कुर्यादामलसारकम्
पद्मपत्रं तु तस्यार्धमुपरिष्टात्प्रकल्पयेत् ६६
चतुःस्तरो भवेत्कुम्भः स्तरं कण्ठस्ततो भवेत्

स्तरमेकं ततः कर्णो द्विस्तरं बीजपूरकम् ६७
चतुर्भिः कूटविस्तारं ततो भागे विराजयेत्
द्विभागं मञ्जरी कार्या स्तरसेनैरलङ्कृता ६८
वरण्डिकाख्यो बन्धश्च भागं भागं भवेत्ततः
विस्तारं मूलमञ्जर्याः शुकनासां प्रकल्पयेत् ६९
अथ निर्णीयते द्व्यर्धपादाख्यं तत्र विस्तृतिः
उच्छ्रायाद्द्विद्विगुणा कार्या पञ्चभागक्रमोऽथवा ७०
शूरसेनोऽथवा कार्यः शुकनासास्त्रिवेत्यसौ
कृत्वा त्रिभागमुच्छ्रायं मकरं चोर्ध्वभागिकम् ७१
स्तम्भयुक्तं गुणद्वारं स्योतस्योधिः संप्रताम्
अर्धप्रस्तरसंयुक्तं कुर्यात्पार्श्वयोर्द्वयोः ७२
कर्तव्यं गर्भकूटं वा शुभं तत्र विपश्चिता
द्वितीयभूमिकायां तु पीठं सास्तदशस्तरम् ७३
मेलान्ततोवती जङ्घा माला कार्या चतुःस्तरा
लशुनं द्विस्तरं प्रोक्तं स्तरं भरणमिष्यते ७४
कुम्भं तद्वत्प्रकर्तव्यमुच्छालं द्विगुणान्वितः
गण्डकः स्तरमेकं स्यात्ततः पट्टः स्तरद्वयम् ७५
अर्धेन पट्टिका कार्या तथैव गिरिपत्रिका
सूरत्रयं वरण्डी स्याच्छूरसेनैरलङ्कृता ७६
स्तरमेकं भवेच्छेदस्ततः कण्ठः स्तरद्वयम्
पट्टिका भागमेकं च तत्समं गिरिपत्रिका ७७
त्रिभागं शिखरं कुर्याच्छेदं मे तु भागिकम्

एकं कणठं प्रकुर्वीत पथिकां विस्तरं विदुः ७८
स्तरमेकं भवेत् कणठः पट्टिकापि च तत्समा
गिरिपत्रीं च कुर्वीत भागार्धेन विचक्षणः ७९
द्वार्धपादिकया युक्ता त्रिस्तरा स्याद्वरण्डिका
छेदं कणठं च कुर्वीत पूर्वमानेन बुद्धिमान् ८०
पट्टिका गिरिपत्री च भागं भागं विधीयते
द्विस्तरं शिखरं कुर्यात्तथा छेदं तु भागिकाम् ८१
एवं कणठं प्रकुर्वीत --- पट्टिकाम्
वरण्डिका द्विभास्योदृकारेण समन्विता ८२
छेदं कणठं च पत्री च गिरिवर्ती त्रिभागिका
प्राग्वद्विरिहिर कुर्याद् यथाशोभं प्र --- ८३
चतुर्थी भूमिका चोर्ध्वं कर्तव्या लक्षणान्विता
त्रयोदशस्तरं पीठं मध्यजङ्घा च तत्समा ८४
चतुःस्तरा भवेन्माला तदर्धं लशुनं ततः
कुम्भं तेन समं कार्यमुच्छालं द्विस्तरं भवेत् ८५
तस्यार्धे गण्डकं कुर्यात् पट्टं तद्द्विगुणं ततः
पट्टिका गिरिपत्री च विधातव्ये स्तरं स्तरम् ८६
वरण्डी त्रिस्तरा कार्या छेदमेकस्तरं विदुः
कुर्वीत द्विस्तरं कणठं तदर्धेन तु पट्टिकाम् ८७
तत्समां गिरिपत्रीं द्वौ स्तरौ खिरिहिरं ततः
छेदः कणठः पट्टिका च गिरिपत्रीति भागिकाः ८८
वरण्डी द्विस्तरा कार्या ततश्छेदः स्तरं भवेत्

करठश्च पत्रिका चेति गिरिपत्रीति भागिकाः ८९
प्राग्वकाशिखिरिहिरं कुर्याच्छेदं पूर्वक्रमेण च
द्विस्तरा तिलनासा तु विधातव्या विपश्चिता ९०
कुर्वीत भागिकं छेदं ततः करठा द्विभागिकी
पट्टिकां भागमेकं च तत्समां गिरित्रिकाम् ९१
घरटा सप्तस्तरा प्रोक्ता पद्मं द्विस्तरमुच्यते
द्विगुणः कलशस्तस्यां छेदं पूर्ववदाचरेत् ९२
ऊर्ध्वं स्यात्पञ्चमी भूमिः पीठमेकादशस्तरम्
तद्वन्मट्टा भवेज्जङ्घा माला च त्रिस्तरा ततः ९३
साधस्तरं स्याल्लशुनं स्तरेण भरणं भवेत्
कुम्भं गरडकसंयुक्तं कुर्यात् सार्धस्तरं बुधः ९४
उच्छालं द्विस्तरं प्रोक्तं स्तरं गरडो विधीयते
द्विस्तरः स्यात्तरः पट्टः पट्टस्यार्धेन पट्टिका ९५
तत्समा गिरिपत्री च त्रिस्तरा तु वररिडका
स्तरमेकं भवेच्छेदः करठस्तद्द्विगुणस्ततः ९६
तदर्धं पट्टिका कार्या तथैव गिरिपत्रिका
स्तरकं द्वयं विरिहिरं तदर्धं छेदमाचरेत् ९७
एवं करठः पट्टिका च स्यात्तथा गिरिपत्रिका
द्वौ स्तरौ तिलनासा स्याच्छेदः सार्धकरायतः ९८
करठं तद्द्विगुणं कुर्याद्भागेनैकेन पट्टिकाम्
तत्समा गिरिपत्री स्याद्घरटा पञ्चस्तरा भवेत् ९९
कुर्वीत द्विस्तरं पद्मं शेषं पूर्वक्रमात्ततः

ततो भूमिर्भवेत्षष्ठी पीठं तत्राभिधीयते १००
द्विस्तरा भूमिरङ्गा स्यातुलः खुरकस्ततः
छेदो भवेत्तदर्धेन ततः कण्ठः स्तरद्वयम् १०१
पट्टिका भागमेकं स्याद्भागं च गिरिपत्रिका
वरण्डीं द्विस्तरां कुर्यात्तदर्धं छेदमादिशेत् १०२
द्वादशांशमिदं पीठं जङ्घा माट्टा तदर्धतः
माला तु द्विस्तरा प्रोक्ता लशुनं तत्समं भवेत् १०३
भरणं स्तरमेकं तु द्विभागः कलशो भवेत्
उच्छालकं च तत्तुल्यं गण्डो भागं विधीयते १०४
कुर्वीत द्विस्तरं पट्टं भागेनैकेन पट्टिकाम्
पूर्ववद्गिरिपत्रीं --- स्तरां तु वरण्डिकाम् १०५
स्तरमेकं भवेच्छेदः कण्ठस्तद्द्विगुणस्ततः
पूर्ववत्पत्रिके द्वे तु द्वयंशं खिरिहिरं भवेत् १०६
छेदः कण्ठः पट्टिका च गिरिपत्रीति भागिकाः
द्विस्तरा तिलनासा स्याच्छेदः कार्यस्तु भागिकः १०७
द्विस्तरः स्यात्ततः कण्ठो भागिका कण्ठपट्टिका
भागिकी गिरिपत्री च विधातव्या ततः परम् १०८
पञ्चस्तरान् त्रिभागोनान् कुर्यादामलसारकम्
त्रिस्तरं स्यात्ततः --- शेषं पूर्वक्रमाद्भवेत् १०९
पञ्चम्यां भूमिकायां तु पीठं स्याद्द्वादशस्तरम्
जङ्घा पञ्चस्तरा मेठा माला च स्याद्द्विभागिकी ११०
अर्धस्तरेण लशुनं स्तरेण भरणं भवेत्

कुम्भं गरडेन सहितं स्तरं कुर्याद् विचक्षणः ११११
उच्छालं द्विस्तरं कुर्याद्गरडो भागं विधीयते
पट्टः सार्धस्तरः कार्यः पट्टिका तु स्तरं भवेत् ११२
तत्समा गिरिपत्री च त्रिस्तरा तु वरण्डिका
छेदो भागत्रिभोगं करठस्यार्धे गुणस्ततः ११३
पत्रिके द्वे तु भागिक्यौ --- स्तरा तिलनासिका
अर्धप्रस्तारयुक्तासौ कार्याथ प्रस्तरान्विता ११४
छेदं भागेन कुर्वीत करठं तद्द्विगुणं ततः
अर्धप्रस्तरं पूर्ववत्पत्रिके द्वे तु घरटा स्तरचतुष्टायम् ११५
कुर्वीत द्विस्तरं पद्मं शेषं पूर्वक्रमेण तु
अष्टमी भूमिका या तु सा कार्या शुभलक्षणा ११६
मेर्वादयो विंशतिरेवमुक्ताः
प्रासादमुख्याः --- ।
भूम्यष्टकान्तास्तदिमान् विदध्यात्
स्याच्छिल्पिनां संसदि पूजनीयः ११७

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
मेर्वादिविंशिकानागरप्रासादभूमिजा नामाध्यायस्त्रिषष्टितमः

अथ दिग्भद्रादिप्रासादलक्षणं नाम चतुष्षष्टितमोऽध्यायः
प्रासादमथ वारोयं वक्ष्यामो नामलक्षणैः
लक्षणैस्तेषु दिग्भद्रः श्रीवत्सो वर्धमानकः १

नन्द्यावर्तश्चतुर्थः स्यात्पञ्चमो नन्दिवर्धनः
विमानश्च तथा पद्मो महाभद्राख्य एव च २
श्रीवर्धमानकाख्यश्च महापद्मतोऽपि वा
एकादशः पञ्चशालो द्वादशः पृथिवीजयः ३
तत्र प्रागेव दिग्भद्रः श्रावणं प्रतिपाद्यते
चतुरश्रीकृते क्षेत्रे नवभागविभाजिते ४
कोणो द्विभागविस्तारः प्रत्यङ्गौ भागिकौ स्मृतौ
शाला भागत्रया कार्या नासिकात्रयशोभिता ५
परस्परं विनिष्कासमर्धभागेन कारयेत्
कोणप्रत्यङ्गयोरन्तः शालाप्रत्यङ्गयोस्तथा ६
षोडशांशेन कुर्वीत---सलिलान्तरम्
सीमास्याद् दशभिर्भागैः प्रविभज्य विधीयते ७
---का गर्भपादैः षड् भित्तयः स्युर्द्विभागिकाः
वर्धमानेनमथ ब्रूमो विस्ताराद् द्विगुणं हि तत् ८
द्वौ भागौ वेदिकाबन्धो जङ्घा ज्ञेया चतुष्पदा
शान्तापत्रा कपोताली सार्धभागं समुच्छ्रिता ९
सार्धभागसमुच्छ्राया कार्या प्रथमभूमिका
द्वितीया भूमिका ज्ञेया सार्धभागत्रयोदया १०
तृतीया च विधेया स्यात्सार्धभागद्वच्छ्रिता
उछालकं च जङ्घा च भूमिकार्यं विधीयते ११
कूटं चार्धतो देयं कर्मशोभासमन्वितम्
घण्टा भागत्रयोत्सेधा बहुभिश्चाश्रिभिर्युता १२

कलशं स्थापयेदूर्ध्वं भागद्वयसमुच्छ्रितम्
बीजपूरकसंयुक्तं वर्तुलं पल्लवावृतम् १३
शिखरार्धस्य कुर्वीत सपादमुदयं तथा
इमं दिग्भद्रसंज्ञं यः प्रासादं कारयेत्पुमान् १४
शतक्रतुफलं सोऽपि लभते नात्र संशयः
लक्ष्म श्रीवत्ससंज्ञस्य प्रासादस्याभिधीयते १५
चतुरश्रीकृते क्षेत्रे भक्ते पञ्चदशांशकैः
अस्योच्छ्रायो सकास्त्र्यंशस्त्रं क्षोणस्यादंशकैस्त्रिभिः १६
कर्णशालान्तरे कार्यौ द्व्यंशौ प्रतिरथावुभौ
तयोरुभयोः सार्धं सादं तु मार्ग्रो निवेशयेत् १७
भागमेकं प्रविष्टौ च शाला भागत्रयात्मिका
निर्गमः स्यात्पदार्धेन गर्भस्तु नवभागिकः १८
त्रिपदा च भवेद् भित्तिरूर्ध्वमस्याथ कथ्यते
श्रीवत्सः कीर्तितः सम्प्रत्युच्यते वर्धमानकः १९
चतुरश्रीकृते क्षेत्रे --- भागकल्पितम्
छेदादि गिरिपत्र्यन्तं दद्यात्पूर्वक्रमेण तु २०
द्विस्तरा त्रिस्तरा चापि कर्तव्या वेदिका मता
स्तरमेकं भवेच्छेदः कण्ठस्तद्द्विगुणो भवेत् २१
पट्टिकां गिरिपत्रीं च तस्यैवार्धेन कारयेत्
दशस्तरा ततो घण्टा यदि वामलसारकम् २२
द्विस्तरं स्यात्ततः पद्मं द्विगुणः कलशस्ततः
तदूर्ध्वं भूमिका कार्या सपीठा लक्षणान्विता २३

स्तरैः स्यात्पञ्चदशभिः पीठं जङ्घापि तावता
चतुःस्तरा भवेन्माला लशुनं तु स्तरद्वयम् २४
तस्यार्धेन भरणं कुम्भं कुर्वीत तत्समम्
तस्य द्विगुणमुच्छालं गरडमेकस्तरं भवेत् २५
पट्टं द्विगुणमेतस्मात्कुर्यादर्धेन पट्टिकाम्
पट्टिकायाः प्रमाणेन कर्तव्या गिरिपत्रिका २६
वरणडी त्रिस्तरा कार्या शूरसेनैरलङ्कृता
एकस्तरस्ततश्छेदः करठस्तु द्विगुणस्ततः २७
पट्टिका गिरिपत्री च विधातव्ये स्तरं स्तरम्
उभौ स्तरौ खिरिहिरं भवेच्छेदः स्तरं ततः २८
तथैव करठस्तद्वच्च पट्टिकागिरिपत्रिके
वरणिडका द्विस्तरा स्याच्छेषं पूर्ववदाचरेत् २९
उभौ स्तरौ खिरिहिरं छेदं कुर्वीत भागिकम्
करठश्च पत्रिका चैव गिरिपत्री च पूर्ववत् ३०
द्विस्तरा वेदिका कार्या द्यवपादिकया युता
छेदमेकं स्तरं कुर्यात्करठं तद्द्विगुणं ततः ३१
पत्रिकां गिरिपत्रीं च तस्यैवार्धेन कारयेत्
स्तराष्टकेन घरटा स्याद्यदिवामलसारकम् ३२
भवेत्यमं --- कलशो द्विगुणस्ततः
स्तरमेकं भवेद्ग्रीवा कर्णं कुर्वीत तत्समम् ३३
द्विगुणं बीजपूरं तु पूर्वत्राप्येवमाचरेत्
--त्कृष्टा सप्तदशांशकैर्भागेस्त्रिभिर्भवेत् ३४

द्विभागिकः प्रतिरथः शाला स्यात्पञ्चभागिका
शालाप्रत्यङ्गयोरन्तर्भागार्धेनोदकान्तरम् ३५
परस्परं विनिष्कासः पादहीनं पदं भवेत्
गर्भः स्याद्दशभिर्भागैर्भित्तिः सार्धपदत्रयात् ३६
चतुर्भिर्वेदिकाबन्धो जङ्घा स्यादष्टभिः पदैः
सार्धैः पञ्चभिराद्या भूः कपोतालीसमन्विता ३७
तृतीया भूमिका चास्य कर्तव्या पञ्चभिः पदैः
सार्धैर्भवेत्तृतीयापि चतुर्भिर्भूमिका पदैः ३८
चतुर्थी भूमिका भागैश्चतुर्भिः कीर्तिता पदैः
घण्टा च त्रिपदा कार्या कूटभक्त्यादि पूर्ववत् ३९
शुकनासादि कुम्भादि पूर्ववत्समुदाहृतम्
उक्तोऽयं वर्धमानाख्यः प्रासादः शुभलक्षणः ४०
नन्द्यावर्तमथ ब्रूमः क्षेत्रे सप्तदशांशके
कोणांश्चतुष्पदान् कुर्यात्पञ्जरं सार्धभागिकम् ४१
षड्भिर्भागैर्भवेच्छाला गर्भस्तु दशभागिकः
साधत्रिभागिका भित्तिरूर्ध्वमानद्विभांगुणम् ४२
वेदी चतुष्पदोत्सेधा जङ्घा भागाष्टकोच्छ्रिता
षट्पदा भूमिका --- पञ्चपदायता ४३
स्यात्सम्पदे चतुर्भागा तृतीयान्या पदोच्छ्रिता
सांद्विवांसेवघटा स्यात्पूर्ववत्कलशादिकाः ४४
नन्द्यावर्तोऽयमाख्यातः प्रासादः सर्वकामदः
अथातः सम्प्रवक्ष्यामः प्रासादं नन्दिवर्धनम् ४५

चतुरश्रीकृते क्षेत्रे पदाष्टदशकाङ्किते
कोणस्त्रिपदविस्तारः प्रत्यङ्गं स्यात्पदद्वयम् ४६
शाला चतुष्पदा प्रोक्ता चित्रकर्मोपशोभिता
पादोनभागमानेन निर्गमः स्यात्परस्परम् ४७
कोणप्रत्यङ्गयोर्मध्ये शालाप्रत्यङ्गयोस्तथा
भागेन विस्तृतं कार्यं सर्वत्र सलिलान्तरम् ४८
गर्भः स्याद्दशभिर्भागैर्भित्तिर्भागचतुष्टयात्
ऊर्ध्वमानमथ ब्रूमो द्विगुणं तत्प्रकीर्तितम् ४९
वेदीबन्धोंऽशकाः पञ्च जङ्घा स्यादष्टभागिका
प्रथमा भूमिका कार्या कपोतालीसमन्विता ५०
सपादैः पञ्चभिर्भागैर्द्वितीया तद्वदेव हि
तृतीया तु भवत्यस्य भूमिका पञ्चभागिका ५१
चतुर्थी भूमिका ज्ञेया सार्धभागचतुष्टया
घण्टा तस्योर्ध्वतः कार्या पदत्रयसमुच्छ्रिता ५२
शुकाघ्रा शूरसेनश्च स्तम्भिकाकूटभक्तयः
कलशस्योदयस्तस्य विधेयाश्चास्य पूर्ववत् ५३
अमुं यः कारयेदन्यः प्रासादं नन्दिवर्धनम्
स नन्दिगणसामान्यो जायते नात्र संशयः ५४
अतः परमथ ब्रूमो विमानं शुभलक्षणम्
चतुरश्रीकृते क्षेत्रे विंशत्या भाजिते पदैः ५५
कोणाः पञ्चपदाः कार्या मध्ये च सलिलान्तरम्
कर्णिका सार्धभागेन भागार्धमुदकान्तरम् ५६

सालोपद्यदविस्तीर्णा सार्धभागेन निर्गता
कोणस्य चार्धभागेन कर्णिकानिर्गमः स्मृतः ५७
गर्भश्चास्य विधातव्यो द्वादशांशकविस्तृतः
भित्तिश्चतुष्पदा कार्या दिक्षु सर्वास्ववस्थिता ५८
ऊर्ध्वमानमथैतस्य ब्रूमस्तद् द्विगुणं भवेत्
वेदीबन्धोंऽशकाः पञ्च जङ्घा नवपदोच्छ्रिता ५९
प्रथमा भूमिका कार्या भागैः षड्भिः समुच्छ्रिता
शतपत्रां कपोतालीं मध्ये चास्याः प्रकल्पयेत् ६०
द्वितीया भूमिका चास्य विधेया पञ्चभिः पदैः
अर्धेऽस्याः स्तम्भकोच्छालं कूटं चार्धव्यवस्थितम् ६१
परस्परपाधेन हमास्तिस्त्रोऽन्यभूमिकाः
स्तम्भिकाकूटभरणशूरसेनाः सघरटकाः ६२
कलशस्योदयश्चात्र प्राग्वत्कार्या विपश्चिता
य इमं कारयेद्भक्त्या विमानाख्यं नृपुङ्गवः ६३
इह भोगान् स लभते तथा सत्कायदंविधे
अथ पद्माप्रियप्रीतिजननः पद्म उच्यते ६४
चतुरश्रीकृते क्षेत्रे भक्ते षोडशभिः पदैः
कोणाश्चतुष्पदाः कार्याः सलिलान्तरभूषिताः ६५
द्विपदः पञ्जरो ज्ञेयो गर्भे कोणाश्चतुष्पदाः
भागःस्यात् षोडशांशेन तदन्ते सलिलान्तरम् ६६
गर्भः स्यान्नवभिर्भागैर्भित्तिः सार्धपदत्रयम्
ऊर्ध्वमानमथ ब्रूमस्तथास्य द्विगुणं भवेत् ६७

द्वितीया भूमिका ज्ञेया भागैः पञ्चभिरुच्छ्रिता
अन्योन्यं तु पदार्धेन हीनं स्याद्भूमिकाद्वयम् ६८
स्तम्भिकाकूटभरणशुकाघ्राशूरसेनकाः
घरटा कारसविस्तारा भवन्त्येतस्य पूर्ववत् ६९
पद्मप्रासादमेनं यः कारयेद्भक्तिसंयुतः
स श्रीपतिरिव श्रीशो भवत्यवनिमण्डनः ७०
महाभद्रमथ ब्रूमः प्रासादमतिसुन्दरम्
चतुरश्रीकृते क्षेत्रे विंशत्या सैकयाङ्किते ७१
कोणाश्चतुष्पदाः सार्धद्व्यंशाः प्रत्यङ्गकाः स्मृताः
शाला पञ्चपदा कार्या दिक्षु सर्वास्ववस्थिता ७२
पादोनभागविस्तारं कर्तव्यं सलिलान्तरम्
गर्भस्त्रयोदशपदो भित्तयश्च चतुष्पदाः ७३
ऊर्ध्वमानमथैतस्य ब्रूमस्तद्द्विगुणं भवेत्
वेदी चतुष्पदोत्सेधा जङ्घा स्यादष्टभागिका ७४
सप्तभागसमुत्सेधा विधेया चादिभूमिका
मध्ये सान्तरपत्रास्याः कपोताली पदत्रयम् ७५
द्वितीयभूमिका चास्य सार्धैः षड्भिः पदैः स्मृता
भागभागविहीनास्तु तिस्रोऽन्या भूमिकास्ततः ७६
घरटा भागत्रयोत्सेधा पद्मपत्रिकया सह
स्तम्भिकाकूटभरणशुकाघ्राशूरसेनकाः ७७
कलशः कुम्भं नघाः प्राग्वत्तस्य भवन्त्यमी
महाभद्रमिमं योऽत्र कारयेद्भक्तिमान् नरः ७८

स स्वर्गे सुरनारीभिः सेव्यते मदनाज्ञया
अथ श्रीवर्धमानस्य लक्ष्म साम्प्रतमुच्यते ७९
चतुरश्रीकृते क्षेत्रे चतुर्विंशतिभाजिते
कोणाः षड्भागिकाः कार्याः शालाः स्युर्नवभागिकाः ८०
साधं पदद्वयं कार्यः शालानामत्र निर्गमः
कुर्याज्जलान्तरं तत्र मध्यतः कोणशालयोः ८१
विस्तृतं साधभागेन प्रविष्टमपि भागतः
कोणे मध्यं विधातव्यं भागेनैवोदकान्तरम् ८२
नवांशक्लृप्तशालायाः प्रत्यङ्गौ द्वावुदाहृतौ
भागद्वितयविस्तारौ भागेनैकेन निर्गतौ ८३
चतुर्दशपदो गर्भो भित्तिः पञ्चपदा स्मृता
ऊर्ध्वमानमथ ब्रूमस्तदस्य द्विगुणं भवेत् ८४
वेदिका षट्पदोत्सेधा जङ्घैकादशभिः पदैः
प्रथमा भूमिका चास्य कार्या सप्तांशकोच्छ्रिता ८५
पादोनैः सप्तभिर्भागैर्द्वितीया भूमिकेष्यते
तृतीया भूमिका षड्भिः सपादैर्जायते पदैः ८६
पादेन षटका भागेन चतुर्थी भूमिका स्मृता
भागं भागं विधातव्यः प्रवेशः प्रतिभूमिकम् ८७
सपादैः पञ्चभिर्भागैः कार्यौ घण्टासमुच्छ्रयः
भागत्रयसमुत्सेधस्तदूर्ध्वे कलशो भवेत् ८८
सुकाघ्रासूरसेनश्च स्तम्भिकाकूटभक्तयः
कार्या पूर्वोक्तमार्गेण विचित्रकर्मोपशोभिताः ८९

श्रीवर्द्धमानं य इमं प्रासादं कारयेन्नृपः
यशः श्रीश्रेयसांगस्य वृद्धि स्यादुत्तरोत्तरा ९०
पद्मयोनिपृथः सद्मद्मथ कीर्त्यते
चतुरस्त्रीकृते क्षेत्रे विंशत्येकोनयान्तिके ९१
कोणाश्चतुष्पदाः कार्या प्रत्यङ्गा अपि तत्समाः
रिवर्त्तनकर्त्तव्या परस्परसमी शुभाः ९२
शाला नवांशविस्तीर्णा स्यात्पदत्रयनिर्गमा
शालालस्ताश्च कर्त्तव्या द्विभागा बालमञ्जरी ९३
कर्णप्रत्यङ्गयोर्मध्ये बालप्रत्यङ्गयोस्तथा
जलान्तराणि कार्याणि तत्प्रमाणस्य मध्यतः ९४
गर्भः सप्तदशांसः स्याद्भित्तयः षड्भिरंशकैः
ऊर्ध्वमानमथैतस्य ब्रूमस्तद्द्विगुणं भवेत् ९५
वेदी षड्भागिकोत्सेधा जङ्घाभागास्त्रयोदश
सप्तभागसमुत्सेधा कर्त्तव्या चादिभूमिका ९६
षड्भिः सार्धैः द्वितीया स्याद्भागभागोज्झिते परे
पञ्चमी स्याच्चतुर्भागा भागार्द्धेन परेत्पृथक् ९७
प्रवेशः कूटदर्भेण भूमीनां स्यात्परस्परम्
भूमिकार्द्धं विधातव्यं स्तम्भिकाभरणान्वितम् ९८
अपरं कूटशोभातिरर्द्धमस्याविभूषयेत्
घरटापञ्चपदोत्सेधा विस्तृता गर्भमानसः ९९
सुकाघ्राय परं यत्तु पूर्ववत्तत्प्रकल्पयेत्
महापद्माभिधयोत्र प्रासादं कारयेत्सुधीः १००

इहामुत्र च निर्द्वन्द्वः स परं सुखमश्नुते
लक्ष्यथ पञ्चशाला प्रासादस्याभिधीयते १०१
चतुरस्त्रीकृते क्षेत्रे अष्टाविंशतिपदान्तिके
तस्यार्जनफलाः काराः कोणा पञ्चपदाः स्मृताः १०२
प्रत्यङ्गास्त्रिपदाः कार्या भागद्वितयनिर्गता
शालाष्टपदविस्तारा पदत्रितयनिर्गमा १०३
कोणप्रत्यङ्गयोर्मध्ये शालाप्रत्यङ्गयोस्तथा
भागेन विस्तृतं कार्यं प्रविष्टं च जलान्तरम् १०४
गर्भः षोडशभिर्भागैः भित्तयोऽपि च षट्पदाः
ऊर्द्ध्वमानमथैतस्य ब्रूमस्तद्द्विगुणं भवेत् १०५
विधेयो वेदिकाबन्धः सार्धपञ्चपदोच्छ्रयम्
जङ्घा चास्य भवेत्कार्या तत्रैकादशभागिका १०६
सार्द्धसप्तपदोत्सेधा विधातव्या च भूमिका
कपोतपाली कार्यास्य मध्ये भागत्रयोच्छ्रिता १०७
अयं भूमिप्रमाणेन स्याद्वितीयाऽपि भूमिका
तृतीया सप्तभिर्भागैश्चतुर्थी सार्थषट्पदा १०८
पञ्चऋृमी षट्पदा कार्या घण्टा पञ्चपदोच्छ्रिता
शालास्थानेषु सर्वेषु कर्त्तव्यं पञ्चघण्टाकम् १०९
कुमारैः पञ्चभिर्युक्तं पञ्चशालोयमुच्यते
शुकाघ्रासूरसेनादि यच्चान्यत् कलशादिकम् ११०
तदस्य पूर्ववत्कार्य पञ्चशालस्य धीमता
पञ्चशालमिमं यस्तु प्रासादं कारयेद्भुवि १११

तस्य धन्यस्य सन्तानेऽप्यतुला जायते सुखं
अथातः संप्रवक्ष्यामः प्रासादं पृथिवीजयम् ११२
चतुस्त्रीकृते क्षेत्रेऽष्टाविंशतिपदाङ्किते
--- पदाः स्मृताः
भागद्वितयविस्ताराः कर्तव्या बालपञ्जराः ११३
शाला षड्भागविस्तीर्णा भागत्रितयमुच्छ्रिता
कोणप्रत्यङ्गयोर्मध्ये शालाप्रत्यङ्गयोस्तथा ११४
कक्षान्तरे विधातव्यं भागिकं सलिलान्तरम्
गर्भः स्याद्दशभिर्भागैर्भित्तिः कार्यास्य षट्पदा ११५
षट्पदा स्यात्तृतीयात्र --- भागोच्छ्रिताः पराः
कर्ण --- स्तिस्त्रो घरटा चाष्टपदोच्छ्रिताः ११६
कूटैरलङ्कृता कार्या शुकाघ्रादि च पूर्ववत्
स --- पि चैतेषां प्रासादार्धेन कारयेत् ११७
घरटां तु संहतां श्लक्ष्णां बन्धनैरुपशोभिताम्
यादृशी कम --- ने कूटेष्वेषां विधीयते ११८
भद्रेषु तादृशी कार्या कृत्स्नप्रासादसिद्धये
य इमं कारयेद्राजा प्रासादं पृथिवीजयम्
भुनक्ति निखिलां पृथ्वीं स सप्ताम्भोधिमालिनीम् ११९
इतीरिता द्वादश स्यगर्ते
प्रासादमुख्याः शुभलक्ष्मयुक्ताः
वावाटसंज्ञास्तदमून् विदित्वा
लभेत्पूज्यस्थयते नृपेभ्यः १२०

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे वटोकप्रासादो नाम
चतुःषष्टितमोऽध्यायः

अथ भूमिजप्रासादलक्षणं नाम पञ्चषष्टितमोऽध्यायः

भूमिजानां विमानानां ब्रूमो लक्ष्म क्रमागतम्
चतुरश्रीकृतानां च वृत्तानां वृत पूर्वशः १
केषाञ्चिन्निर्गमस्तत्र जायते भागसंख्यया
केषाञ्चित्पुनरेष स्याद्वृत्तमध्यमधिष्ठितः २
चतुरश्रीकृते क्षेत्रे दशभागविभाजिते
चतुर्भूमियुतस्याथ लक्ष्म त्संशस्य कथ्यते ३
चत्वारश्चतुरश्राः स्युर्निषधो मलयाचलः
माल्यवान् नवमाली च निषधस्तेषु कथ्यते ४
कोणा शंभोतरो द्व्यंशं भार्दशंभोर्धभागिकः
विस्तारायामतः प्रोक्तो भद्रं पञ्चांशविस्तृतम् ५
कार्या पादोनभागेन भद्रस्यैतस्य निर्गमाः
कार्या पल्लम्बिका तस्य पादभागेन विस्तृता ६
भागेन कर्णिका कार्या विस्तृत्या निर्गमेण च
प्रतिभद्रं च भागार्धनिर्गतं तत्र कल्पयेत् ७
पादोनभागद्वितयं प्रतिभद्रस्य विस्तृतिः
षड्भिर्भागैर्भवेद्गर्भो भित्तिरस्य द्विभागिका ८
तलच्छन्दस्य लक्ष्मोक्तमूर्ध्वमानमथोच्यते

विस्तृतेर्द्विगुणं तच्च चतुर्भागाधिकं भवेत् ९
वेदीबन्धो भवेदस्य सार्धभागद्वयोच्छ्रितः
तत्तु भागद्वयं सार्धं विभजेदर्धपञ्चमैः १०
भागद्वयेन कुम्भः स्यात्कलशो भागिकः स्मृतः
भागार्धेनान्तरं पत्रं कपोतली तु भागिकी ११
उक्तोऽयं वेदिकाबन्धो भागैरित्यर्धपञ्चमैः
अर्धपञ्चमभागैः स्याज्जङ्घोच्छालकसंयुता १२
त्रिभि --- भूत्सेधः सवरण्डिकः
द्वितीयास्य भवेद्भूमिरर्धपञ्चमभागिका १३
कुम्भः सोच्छालका --- यापि तावता
तृतीया स्याद्भूर्विधेया स्यासादा चतुरङ्गिका १४
चतुर्थी चतुरो भागाच्चः समु---
कुम्भः सोच्छालकः कूटस्योच्छ्रायोऽपि च पूर्ववत् १५
वेदी स्यात्सांशका सार्धपञ्चांशा स्कन्धविस्तृतिः
--- खेत्सार्ध चतुर्गुणितविस्तरात् १६
तले या कथिता शाला भागपञ्चकविस्तृता
स्कन्धस्थानं -- भागद्विस्तयविस्तृता १७
रेखावशेन कर्तव्याः प्रवेशाश्च क्रमाद्भुवाम्
मूलतः स्कन्धपर्यन्तं घरटायाः पु--- याः १८
भवेत्प्रासादविस्तारः पञ्चमशैव सुन्दरः
वेदकोऽर्धेतरं यत्स्याच्छालायास्तत्प्रमाणतः १९
--- ये विस्तरः प्रोक्तस्तं --- षड्भिर्विभाजयेत्

भागेनैकेन कण्ठस्य प्रवेशः परितो भवेत् २०
कण्ठवृत्तं चतुर्भागविस्तृतं परिकल्पयेत्
घण्टोत्सेधं त्रिभिर्भागैर्विभजेत् तत्र भागिकात् २१
घण्टोत्सेधादतः कार्यं पद्मशीर्षं विपश्चिता
उत्सेधात्कलशो द्व्यंशः सार्धभागेन विस्तृतः २२
शिखरात्त्र्यंशहीना स्यात्सर्वत्र द्युताशिका
इति त्र्यंशश्चतुर्भूमिः प्रासादो निषधो मतः २३
सर्वासामेव कर्तव्यो देवतानां विभूषयेत्
निषधप्रासादः ।
मलयाद्रेरिदानीं तु लक्षणं सम्प्रचक्ष्महे २४
चतुरश्रीकृते क्षेत्रे द्वादशांशविभाजिते
कर्णा द्विभागिकाः कार्याः समं सलिलवर्त्मभिः २५
शाला स्यात्पञ्चभिर्भागैः साधांशस्तु प्रतीरथः
स शालाकर्णयोर्मध्ये कर्तव्यः सोदकान्तरः २६
प्रतीरथस्य --- श्चार्धभागं विनिर्गमः
भवेत् पथविकान्यः स विभागोऽन्य --- पूर्ववत् २७
ते च द्वादशभागा ये दशभिस्तान् विभाजयेत्
गर्भभित्तिं तथोत्सेधं जङ्घायाः प्रथमक्षितेः २८
वेदीबन्धस्य चोत्सेधं पूर्वमानेन कारयेत्
मध्यं पल्लविकान्तं तु शालयोर्दशभिर्भजेत् २९
क्षितेरारभ्य पूर्वस्याः स्कन्धं यावत्समुच्छ्रिता
कार्या द्वादशभिर्भागैरनन्तरनिरूपितैः ३०

सार्धयैकोनविंशत्या भाजयेद्भूय एव ताम्
द्वितीयभूमिकोत्सेधस्तैर्भवस्यथ भागिका ३१
त्रिस्त्रोऽन्याः पदपादेन हीनाः कार्या यथाक्रमम्
भागेन वेदिकोत्सेधः शाला कार्या च नागरः ३२
ऊर्ध्वमाद्यं क्षितेः कार्या मालायाः शूरसेनकाः
कोणप्रतिरथा ये तु पञ्चभागसमुच्छ्रिताः ३३
स्तम्भोच्छालकमध्येन तेषु कूटोच्छ्रितास्तथा
अर्धेन प्रविधातव्या भूष्वन्यास्वप्ययं विधिः ३४
स्कन्धविस्तारेरेखा भूप्रवेशो घरटया सह
कलशः शुकनासस्य चोच्छ्रितिः पूर्ववद्भवेत् ३५
मलयाद्रिरयं प्रोक्तः प्रासादः शुभलक्षणः
य एनं कारयेत्तस्य तुष्यन्ति सकलाः सुराः ३६
वर्षकोटिसहस्राणि स्वर्गलोके महीयते
मलयाद्रिप्रासादः ।
अथ माल्यवतो लक्ष्म यथावदभिधीयते ३७
भजेदर्धयुतैः पञ्चदशभिश्चतुर ---
कर्णा द्विभागिकाः कार्या शाला पञ्चांशविस्तृता ३८
कर्णाभ्यर्धैऽशयुगलं पादोनाः स्युः प्रतीरथाः
शालायाः पार्श्वयोः कार्यौ पञ्जरौ सार्धभागिकौ ३९
पृथक्पञ्जरशालाया --- र्धभागिका
शालायाः पल्लवी या च निर्गमश्चार्धभागिकः ४०
सार्धपञ्चदशोक्ता ये भागास्ता ---

गर्भोऽथ भित्तिविस्तारस्तथा खुरवरण्डिका ४१
जङ्घाधः क्षितिराद्या च रेखोच्छ्रायश्च पूर्ववत्
--- भाज्यं पादहीनाष्टयुक्तया ४२
पञ्चभागसमुत्सेधा द्वितीया भूमिका भवेत्
पदपादविहीनाःस्युस्तिस्त्रोऽन्याभूमयः क्रमात् ४३
सार्धांशो वेदिकोच्छ्रायः कर्तव्यो वास्तुवेदिभिः
स्कन्धस्य विस्तृती रेखा घण्टा च कलशस्तथा ४४
--- यांस्तरासमाश्च स्तम्भकूटादिकल्पना
शुकनासोच्छ्रितिश्चेति इति एतानि पूर्ववत् ४५
इत्येवं माल्यवान् नाम प्रासादः परिकीर्तितः
य एनं कारयेत्तस्य जायन्ते सर्वसिद्धयः ४६
शिवलोके निवासोऽस्य भवेत्कल्पायुरप्ययम्
माल्यवान् ।
नवमालिकसंज्ञस्य लक्षणं कथ्यतेऽधुना ४७
चतुरश्रीकृते क्षेत्रे भक्तेऽष्टादशभिः पदैः
कर्णा द्विभागिकाः कार्याः समं सलिलवर्त्मभिः ४८
शाला स्यात्पञ्चभिर्भागैः पार्श्वयोर्बालपञ्जरौ
सपादभागिकौ तौ च कार्यौ स सलिलान्तरौ ४९
कर्णाभ्यर्णे प्रतिरथौ पादौ नालद्वयोन्मितौ
तौ सोदकान्तरौ कार्यौ पञ्जरौ सार्धभागिकौ ५०
द्वौ बालपञ्जरकस्यैतौ मध्ये प्रतिरथस्य च
प्रतीरथः पञ्जो वा बालपञ्जरकस्तथा ५१

शालापल्लविकां यावदेतानि तु पृथक्पृथक्
भागार्धनिर्गमानि स्युर्भागा येऽष्टादशोदिताः ५२
विभाजयेत्तान् दशभिर्विभागैर्वास्तुतत्त्ववित्
गर्भो भित्तिः समुच्छ्रायो वेदिकाजङ्घयोरपि ५३
आद्यभूम्युच्छ्रितिस्तद्वदुच्छ्रायः शिखरस्य च
प्रासादेऽस्मिन्निदं सर्वं पूर्ववत् कथितं बुधैः ५४
तत्पञ्चत्रिंशता भागैः पादोनैः शिखरं भवेत्
द्वितीया भूमिका कार्या ततः पञ्चपदोच्छ्रिता ५५
पदपादविहीनास्तु शेषाः स्युः सप्त भूमयः
पादोनभागद्वितयं वेदिकायाः समुच्छ्रितिः ५६
स्कन्धस्य विस्तृती रेखा घण्टाथ कलशस्तथा
शालायां शूरसेनाश्च स्तम्भकूटादिकल्पना ५७
शुकनासोच्छ्रितिर्भूमिप्रवेशश्चेह पूर्ववत्
य इमं कारयेद्भक्त्या प्रासादं नवमालिकम् ५८
तुष्यन्ति देवतास्तस्य भवन्ति च समृद्धयः
नवमालिकः ।
इदानीमभिधीयन्ते प्रासादा वृत्तजातयः ५९
वल्लभाः सर्वदेवानां भूमिजाः पुरभूषणम्
आश्रयः श्रेयसामेको यशसामपि राशयः ६०
भुक्तिमुक्तिप्रदातारः समागते कृता नृणाम्
तत्राद्यः कुमुदो नाम कमलः कमलोद्भवः ६१
किरणः शतशृङ्गश्च निरवद्यस्तथापरः

सर्वाङ्गसुन्दरश्चेति प्रासादा वृत्तजातयः ६२
न विस्तरान्न संक्षेपाल्लक्ष्मैषामथ कीर्त्यते
तत्राद्यः कुमुदो नाम सर्वानन्दकृदुच्यते ६३
चतुरश्रीकृते क्षेत्रे विस्तारायामतः समे
विभक्ते दशभिर्भागैर्भवेद्गर्भस्त्रिषट्पदः ६४
तत्र शेषेण कुर्वीत --- चतुष्टयम्
--- ततः कर्णसूत्रेण तत्र वृत्तं समालिखेत् ६५
दिग्विदिक्ष्वष्ट कर्णाः स्युः सलिलान्तरभूषिताः
समन्त भूमिपर्यन्तं दशभिः स्यादयं पदैः ६६
वेदीबन्धो विधातव्यः सार्धांशस्य पदद्वयम्
--- सार्धचतुर्भिर्विभजेत्पदैः ६७
कुम्भकं द्वि ---
भागार्धेनान्तरं पत्रं कपोताली च भागिका ६८
वेदीबन्धोऽयमित्युक्तो जङ्घोत्सेध ---
स्यादर्धपञ्चमैर्भागैः सोच्छालस्तलकुम्भकः ६९
आद्यभूमौ भवेत्कूटं भागत्रितयलक्षितम्
प्रासादे पञ्चदशभिर्विभजेत समुच्छ्रयम् ७०
द्वितीया भूमिका तत्र कार्या पञ्चांशकोच्छ्रिताः
अर्धेनोच्छालकस्तम्भैः कूटोच्छ्रायस्तथोर्ध्वतः ७१
पादोनैः पञ्चभिर्भूमिं तृतीयां परिकल्पयेत्
चतुर्थीं रचयेद्भागैर्भूमिकामर्धपञ्चमैः ७२
द्वितीयभूमिकावत्स्यात्कूटस्तम्भादिकल्पना

वेदिकाभागोच्छ्रिता कार्या षट्पदा स्कन्धविस्तृतिः ७३
षड्गुणेन च सूत्रेण वेणुकोशं समालिखेत्
प्रासादपञ्चमांशेन कार्या घरटासमुच्छ्रितिः ७४
घरटोत्सेधं ततस्तस्य त्रिभिर्भागैर्विभाजयेत्
करठग्रीवारडकान्यस्य भागेन नैकेन कारयेत् ७५
षड्भागभक्तघरटायाः समन्ताद्भागविच्युतेः
भागैश्चतुर्भिः कर्तव्ये घरटे करठस्य विस्तरम् ७६
घरटोत्सेधार्धतः कुर्याद्घरटार्धे पद्मशीर्षकम्
घरटोत्सेधसमा कुम्भे बीजपूरवितो समुच्छ्रितिः ७७
चतुरश्रांजितोच्छ्रायो विस्तारः कलशः स्मृताः
य इमं कारयेत्प्रीत्या प्रासादं कुमुदाभिधम् ७८
स मोदते जगद्भर्तुः शिवस्य भवने शुभे
कुमुदप्रासादः ।
अथातः सम्प्रवक्ष्यामः प्रासादं कमलाभिधम् ७९
चतुरश्रीकृते क्षेत्रे दशभागविभाजिते
ततः कर्णार्धसूत्रेण वृत्तं तत्र समालिखेत् ८०
विस्तीर्णं पञ्चभिर्भागैः कुर्याद्भद्रचतुष्टयम्
सुरेन्द्रसमतायसकुबेराशास्वनुक्रमात् ८१
भवेत्पल्लविकायास्तु विस्तारो भागपादिकः
भागेन कार्या भद्राणां निर्गमा वृत्तबाह्यतः ८२
शालायाः प्रतिभद्रं स्यात्कर्णिकाधेन निर्गता
पादोनभागत्रितयात्कार्या वृत्तस्य विस्तृतिः ८३

द्विभागविस्तरायामौ रशुकं द्वयमतोध्यगौ
परिवर्तनया कार्यौ द्वौ कोणौ सोदकान्तरौ ८४
पूर्वप्रासादवद्गर्भो विधेयो भित्तयोऽपि च
वेदीबन्धादिकुम्भान्तं सर्वमेतस्य पूर्ववत् ८५
द्वितीयभूमिपर्यन्तमूर्ध्वं प्रथमभूमितः
शूरसेनं विधातव्यं शालासु श्लिष्टमुत्तमम् ८६
कूटस्तम्भादिकन्यासाः कोणप्रतिरथादिषु
शाला स्याम्रागरास्तले पञ्चांशा द्व्यंशकोपरि ८७
शिखरस्य त्रिभागोना शुकाघ्रायाः समुच्छ्रितिः
य एनं कमलं नाम प्रासादं कारयेन्नृपः ८८
त्रैलोक्ये कमलाधीशविजये स भवेन्नृपः
कमलप्रासादः ।
अथातः कथ्यते सम्यक्प्रासादः कमलोद्भवः ८९
सदा लक्ष्मीपतिर्यत्र देवो विश्राम्यति स्वयम्
चतुरश्रीकृते क्षेत्रे चतुर्दशभिरंशिते ९०
---स्तारो भद्रं पञ्चपदं भवेत्
द्विभागायामविस्तारौ कार्याः प्रतिरथास्तथा ९१
कोण ---
कार्या पल्लविकायाश्च निर्गमो वृत्तमध्यतः ९२
शालाविभक्तिश्चैतस्य कर्त ---
--- न्तरेषु स्याज्जलान्तरम् ९३
द्व्यङ्गुलं त्र्यङ्गुलं वापि तद्विधेयं विपश्चिता

भागा --- ल्पयेत् ९४
प्रासादस्यास्य --- भाजयेद्दशभिः पदैः
गर्भश्च पूर्ववत्कार्यः पूर्ववद्भित्तयोऽपि च ९५
प्राग्वत्खुरवरण्डी स्याज्जङ्घाकूटाद्यभूमिका
शिखरस्योच्छ्रितिः प्राग्वत्तां सार्धैकानुविंशतिम् ९६
भागान्कुर्यात्ततः कार्या भूर्द्वितीयांशपञ्चकम्
कार्यास्तिस्रो भुवः शेषाः पादपादपरिच्युताः ९७
भागं वेदी भूप्रवेशः कार्यो रेखावशादितः
पूर्ववच्चार्थ विस्तारः स्याद्घण्टाकलशादि वा ९८
कूटस्तम्भादिकं प्राग्वच्छुकनासोच्छ्रयोऽपि च
य इमं कारयेत्कान्तं प्रासादं कमलोद्भवम् ९९
स समस्तजगन्नाथः प्रतिजन्म प्रजायते
कमलोद्भवप्रासादः ।
लक्षणं किरणस्याथ ब्रूमः सम्यक्क्रमागतम् १००
चतुरश्रीकृते क्षेत्रे भक्ते ---
--- पञ्चदशांशा ये तान् भजेद्दशभिः पुनः १०१
गर्भोऽत्र पूर्ववत्कार्यः पूर्ववद्भित्तयोऽपि च
प्राग्वत्खुरवरण्डी स्याज्जङ्घाकूटोच्छ्रितिस्तथा १०२
पूर्ववच्छिखरोत्सेधस्तं भजेत्पादहीनया
चतुरुत्तरविंशत्या भागानां तत्र भूमिका १०३
द्वितीया पञ्चभिर्भागैश्चतस्रस्त्वपराः पुनः
पादोनपदहीनाः स्युः क्रमशश्चास्य भूमिकाः १०४

वेदिका चास्य कर्तव्या सपादांशसमुच्छ्रिता
शुकनासोच्छ्रितिः शालास्तम्भकूटविभक्तयः १०५
रेखा स्तम्भस्य विस्तारो घण्टाकुम्भादि पूर्ववत्
कूटा द्राविडकाः कार्याः प्रतिभूम्यथ भौमज १०६
हरो हिरण्यगर्भश्च हरिर्दिनकरस्तथा
एषामेव विधेयोऽसौ नान्येषां तु कदाचन १०७
अमुं यः कारयेद्राजा प्रासादं किरणाभिधम्
स दुःसहप्रतापः स्यात्सहस्रकरवद्भुवि १०८
किरणप्रासादः ।
कथ्यते शशशृङ्गोऽथ प्रासादः शुभलक्षणः
वल्लभः सर्वदेवानां शिवस्य तु विशेषतः १०९
चतुरश्रीकृते क्षेत्रे विंशत्यैकोन यान्तिभे
कर्णार्धसूत्रेण ततो वृत्तमत्र प्रकल्पयेत् ११०
कर्णा द्विभागिकाः कार्याः शाला स्यात्पञ्चभागिका
शालापल्लविका चास्य निर्गता वृत्तमध्यतः १११
द्वौ द्वौ प्रतिरथौ कार्यौ द्विभागायामविस्तृतौ
परं वर्तनतो वृत्तमध्यता कोणशालयोः ११२
शालाकोणप्रतिरथान्तरेषु स्याज्जलान्तरम्
एकोनविंशतिं भागांस्तान् भजेद्दशभिः पुनः ११३
गर्भः प्राग्वत्तथा भित्तिः प्राग्वत्खुरवरण्डिका
जङ्घोत्सेधो भूत्सेधः पूर्ववच्छिखरोच्छ्रितिः ११४
अथाभिस्ते मेरारभ्य पट्टयन्तं शिखरोच्छ्रितिः

भागानामष्टविंशत्या विभजेत्पादहीनया ११५
द्वितीयभूमिका तस्य कार्या पञ्चपदोच्छ्रिता
रेखास्तु पञ्च कर्तव्याः पदपादोच्छ्रिता भुवः ११६
सार्धभागोच्छ्रिता वेदी प्रविधेयास्य तद्विदा
शालास्यस्तम्भक्तयदिविभक्तयदिविभक्तिः शुकनासिका ११७
रेखाद्यं चकंभस्य प्राग्वत्स्यात्सर्वमप्यदः
शतशृङ्गमिमं कुर्याद्यः प्रासादं मनोरमम् ११८
तस्यैकविंशतिकुला ---
कर्ता कारयिता चेति द्वावेतौ जगतां प्रभोः ११९
त्रिपुरद्वेषिणः स्यातां नियतं गणनायकौ
शतशृङ्गप्रासादः ।
--- यामो निरवद्यस्य लक्षणम् १२०
स स्याज्ज्येष्ठोऽथ मध्यश्च कनीयानिति च त्रिधा
चत्वारिंशत्करो ज्येष्ठोऽपि मध्यः त्रिंशत्करो भवेत् १२१
विंशत्या च करैरेष कनीयान् समुदाहृतः
चतुरश्रीकृते क्षेत्रे विंशत्या भाजिते पदैः १२२
ततः कर्णद्विसूत्रेण वृत्तमत्र प्रकल्पयेत्
कार्या तैः पञ्चभिः शालापल्लवी वृत्तध्यतः १२३
शालाविभक्तिः प्राग्वत्स्याच्छालयोरेतयोः पुनः
कोणे कोणे च षट्कर्णा --- भागायामविस्तृताः १२४
परिवर्तनया कार्या वृत्तान्तः सोदकान्तराः
ता तागा त्रिभागैर्विभजेद्दशभिस्ततः १२५

विमुच्य भूमिकाभागाञ्छेषं गर्भगृहादि यत्
तत्पूर्ववद्विधातव्यं तद्वच्च शिखरोच्छ्रितिः १२६
तामेकत्रिंशता भागैः सार्धैश्च विभजेत्पुनः
द्वितीयभूमिका कार्या पदैः पञ्चभिरुच्छ्रिता १२७
पदपादेन हीनाः स्युः शेषा षड्भासभूमिकाः
वेदी पञ्चयं कार्या पादोनमिह शिल्पिना १२८
स्तम्भकूटादि शालानां विन्यासः शूरसेनकाः
शुकनासोच्छ्रितिर्घण्टा कलशादि च पूर्ववत् १२९
य इमं निरवद्याख्यं प्रासादं कारयेत्सुधीः
स प्राप्नोति परं स्थानं ब्रह्मादीनां सुदुर्लभम् १३०
निरवद्यप्रासादः ।
सर्वाङ्गसुन्दरं ब्रूमः प्रासादमथ सुन्दरम्
भुक्तिमुक्तिप्रदातारं वरवालय मण्डनम् १३१
चतुरश्रीकृते क्षेत्रे चतुर्विंशतिभाजिते
कर्णा द्विभागविस्ताराः शाला स्यात्पञ्चभागिका १३२
वृत्तान्तः पल्लवी कार्या शेषाः शालासु पूर्ववत्
त्रयस्त्रयः प्रतिरथा मध्ये स्युः कर्णशालयोः १३३
परिवृत्यं वृत्तमध्ये द्विभागायामविस्तृताः
शालाकर्णप्रतिरथप्रान्तेषु स्याज्जलान्तरे १३४
त्रिचतुर्विंशतिर्भागा व् इभाज्याः शिल्पिभिः पुनः
विधेयं गर्भभित्त्यादि प्राग्वत्स्याच्च वरण्डिका १३५
जङ्घादिभूमिकोच्छ्रायः प्राग्वद्वा शिखरोच्छ्रितिः

तं पञ्चत्रिंशता भागैर्विभजेच्छ्रिखरोच्छ्रयम् १३६
द्वितीया भूमिका चास्य कार्या पञ्चपदोच्छ्रिता
पदपादविहीनाः स्युः शेषाः सप्तास्य भूमिकाः १३७
द्विभागो वेदिकोच्छ्रायो भूमिकानां प्रवेशनम्
रेखावशेन कर्तव्यं शेषमेतस्य यत्पुनः १३८
तत्पूर्ववद्विधाटव्यं स्तम्भकूटादि तद्विदा
सर्वाङ्गसुन्दरं योऽत्र प्रासादं कारयेदमुम् १३९
स स्वर्गसुन्दरीभोगानाप्नोति विपुलान् दिवि
सर्वाङ्गसुन्दरः प्रासादः ।
अथाष्टशालान्वक्ष्यामो --- भूमिजातिषु १४०
तेष्वाद्यः स्वस्तिकोऽन्यश्च वज्रस्वरितकसंज्ञितः
तृतीयो हर्म्यतलकश्चतुर्थ उदयाचलः १४१
गन्धमादनसंज्ञश्च पञ्चमः परिकीर्तितः
अथाभिधीयते तेषु --- स्वलक्षणः १४२
चतुरश्रीकृते क्षेत्रे विस्तारायामतः समे
कर्णार्धसूत्रपातेन वृत्तमस्य समं लिखेत् १४३
वर्तुलं भाजयेत्क्षेत्रं षड्गुणैरष्टभिः पदैः
अष्टौ शाला विधातव्या विस्तारेण चतुष्पदाः १४४
पल्लवी वृत्तसूत्रेण ---
--- कर्णिका ज्ञेया मानमूर्ध्वमथोच्यते १४५
वेदिबन्धो विधातव्यो भागद्वितयमुच्छ्रितः
तं भजेत्पञ्चभिर्भागैः --- तत्र कुम्भकः १४६

पादयुक्तेन भागेन कर्तव्यस्तु मसूरकः
अर्धांशेनोत्तरं पत्रं कपोताली ततो भवेत् १४७
सपादेनास्य भागेन जङ्घां भागचतुष्टयात्
तलकुम्भोच्छालकाभ्यां संयुक्ता शुभलक्षणा १४८
भागद्वितयमाद्य भूः कर्तव्या सवरण्डिक
व्यासं दशपदं कृत्वा तैर्द्वादशभिरुच्छ्रितिः १४९
स्कन्धश्च षट्पदस्तत्र विधातव्यो विजानता
षड्गुणेनैव सूत्रेण वेणुकोशं समालिखेत् १५०
द्वादशांशो य उत्सेधो भागानां सम ---
तं कृत्वा पञ्चभिर्भागैस्ते द्विस्तैर्द्वितीया भवेन्मही १५१
पदपादोच्छ्रिताः कार्यास्ततस्तिस्रोऽपरा भुवः
गर्भा गर्भं विधातव्यं भूमिकानां प्रवेशनम् १५२
वेदिका च ततः कार्या सार्धभागसमुच्छिता
पादोनद्विपदा घण्टा विभजेत्तां त्रिभिः पदैः १५३
पदं स्यात्कण्ठकोत्सेधो ग्रीवा भागसमुच्छ्रिता
अण्डकं भागिकं तस्यां कर्तव्यं सुमनोरमम् १५४
कर्परं सार्धभागेन कुर्यात्सामलसारकम्
सीस्तन चाभागायाः सार्धभागचतुष्टयात् १५५
घण्टाया विस्तरः कार्यस्तं भजेत्षड्भिरंशकैः
चतुर्भिः कन्दविस्तारात् --- १५६
सार्धभागः समुत्सेधः कलशस्य तदर्धतः
शिखरस्य त्रिभागेन शुकनासा विधीयते १५७

विस्ताराद् गर्भमानेन हीना वाष्टांशतो भवेत्
विस्ताराथ सपादेन शूरसेनस्तदूर्ध्वतः १५८
द्वितीयभूमिकातुल्य आद्यभूमेः स ऊर्ध्वतः
शालाविस्तारतुल्यास्तु शूरसेनास्त्रयो मताः १५९
शाला नागरिकाश्चाष्टौ ग्राहग्रासविराजिताः
य इमं कारयेद्धन्यः प्रासादं स्वस्तिकं शुभम् १६०
तस्यानुजन्म शातानां स्वस्तिश्रीभाजनं भवेत्
स्वस्तिकप्रासादः ।
अतः परं प्रवक्ष्यामो वज्रस्वस्तिकसंज्ञितम् १६१
प्रासादं लक्षणोपेतं शक्रादिसुरवल्लभम्
पूर्वोक्तलक्षणोपेते स्वस्तिके दवमध्यदे १६२
भद्रे शृङ्गं प्रदातव्यं तीक्ष्णाग्रं सुमनोरमम्
पुरस्तान्मण्डपं कुर्यात्सर्वलक्षणसंयुतम् १६३
इत्येष कथितः सम्यग्वज्रस्वस्तिकसंज्ञितः
य इमं कारयेद्धन्यः प्रासादं सर्वकामदम् १६४
स स्याद्भोग्यः सुरस्त्रीणामैन्द्रं च पदमश्नुते
वज्रस्वस्तिकप्रासादः ।
अथ हर्म्यतलं ब्रूमः प्रासादं मण्डनं भुवः १६५
चतुरश्रीकृते क्षेत्रे विस्तारायामतः समे
कर्णार्धसूत्रपातेन तस्मिन् वृत्तं समालिखेत् १६६
तद्वृत्तं विभजेत्क्षेत्रं चतुःषष्ट्या पदैस्ततः
कर्तव्या विस्तरेणास्मिन्नष्टौ शालाश्चतुष्पदाः १६७

पल्लवी वृत्तसूत्रेण बाह्यतो भद्रकर्णिके
कर्णौ द्वौ द्वौ विधातव्यौ शालाद्वितयमध्यतः १६८
विभागायामविस्तारौ सलिलान्तरभूषितौ
परिवर्तनतोऽन्योन्यं कोणान् कुर्वीत षोडश १६९
अष्टास्वपि च दिक्त्वेवं माना कर्मभिरन्विता
गर्भो भित्तिश्च वेदी च जङ्घाप्रथमभूमिकाः १७०
कर्तव्याः पूर्वमानेन स्वस्तिकोक्तेन तद्विदा
द्वादशांशो य उत्सेधो विंशत्या तत्र भाजितः १७१
सोऽत्राष्टाविंशतिविधः कर्तव्य सूत्र भूमिका
द्वितीया पञ्चभिर्भागैः पदपादोज्झिताः पृथक् १७२
अन्याः स्युर्भूमयः पञ्च वेदी व्यंद्विः द्विभागिकाः
चतस्रो मञ्जरीः कुर्यान्नागरैः कर्मर्युिताः १७३
चतस्रः पुनरन्याश्च युक्ता द्रविडकर्मभिः
घण्टा स्कन्धस्य विस्तारो वेदिकाकलशोच्छ्रयौ १७४
शूरसेनः शुकाघ्रा च स्तम्भिकाकूटभक्तयः
रेखाश्च पूर्ववत्कार्याः प्रासादस्यास्य जानता १७५
प्रासादस्यास्य कर्ता यस्तथा कारयिता च यः
प्राप्नुतामिव लोकं तौ नित्यानन्दसुखोदयम् १७६
हर्म्यतलकप्रासादः ।
अथातः सम्प्रवक्ष्यामि प्रासादमुदयाचलम्
चतुरश्रीकृते क्षेत्रे भुजाकर्णसमे शुभे १७७
ततः कर्णार्धसूत्रेण तस्मिन् वृत्तं समालिखेत्

वर्तुलं कारयेत्क्षेत्रमशीतिपदभाजितम् १७८
शालाश्चाष्टौ विधातव्याः पूर्वदिक्षु चतुष्पदाः
पल्लवी वृत्तसूत्रेण बाह्यतो भद्रकर्णिके १७९
कुर्याच्छालाद्वयस्यान्तः कोणानां च त्रयं त्रयम्
द्विभागायामविस्तारसलिलान्तरभूषिताः १८०
एवं कोणा विधातव्या विंशतिश्चतुरुत्तरा
परिवर्तनमन्योन्यमेषां कुर्याद्यथाक्रमम् १८१
एतत्सामप्रमाणेन गर्भं भित्तिं च वेदिकाम्
जङ्घां च भूमिशिखरं पूर्ववत्परिकल्पयेत् १८२
अष्टौ च मञ्जरीः कुर्याद्युक्ता नागरकर्मणा
रुद्रेश्वरसमायुक्ता नीरधारोपशोभिताः १८३
घण्टाकूटाश्च रेखा च स्तम्भिकाः शूरसेनकः
शुकाघ्रास्कन्धविस्तारकलशेन समन्वित १८४
स्वस्तिकोक्तविधानेन विदध्यादुदयाचलम्
द्वादशांशो य उत्सेधो विंशत्या तत्र भाजितः १८५
स्यात्पञ्चत्रिंशता भाज्यो --- तत्र भूमिका
पञ्चभागोच्छ्रिता कार्या ततोऽन्याः सप्त भूमयः १८६
पदपादोच्छ्रिता भागद्वयो यो तु वेदिका
--- सर्वलक्षणसंयुता १८७
प्रासादं यस्त्विमं सम्यग्भक्तिमान् कारयेन्नरः
शाश्वतं पदमाप्नोति स दुष्प्रापं सुरैरपि १८८
उदयाचलप्रासादः ।

इदानीं प्रक्रमायातः कथ्यते गन्धमादनः
स्वलक्षणप्रमाणाढ्यक्षितिस्मिन्नुदयाचले १८९
कुर्वीत मञ्जरीरष्टौ युक्ता द्राविडकर्मभिः
कूटाश्च मणिकाः कार्या नानाकर्मभिरन्विताः १९०
स्थानेषु शूरशेना --- पुरोरेखात्रयं भवेत्
शुकनासां च घण्टां च स्कन्धं शिखरमेव च १९१
कूटा --- स्तम्भिका कुम्भं पूर्ववत् परिकल्पयेत्
य इमं कारयेद्धन्यः प्रासादं मण्डनं भुवः १९२
विद्याधराधिपः श्रीमान्स भवेन्नात्र संशयः
भुङ्क्ते च विविधान् भोगान् सुरस्त्रीभिश्च सेव्यते १९३
गन्धमादनप्रासादः ।
उदयस्य विभेदेन रेखा याः पञ्चविंशतिः
लतिनागरभौमानां ताः कथ्यन्ते यथागमम् १९४
लतिनां स्याद्वारंगतो नागराणां तु कूटकः
भूमिजानां विधातव्या माथायाः पुरतो भुवः १९५
शिखरं व्यासकर्णाभ्यां तुल्यं स्यादधमोत्तमम्
भाजनीयचतुर्युक्तविंशस्यादनन्तरम् १९६
--- भागरेखास्तावत्य ईरिताः
संख्या सा शोभना भद्रा सुरूपा सुमनोरमा १९७
शुभा चैव तथा शान्ता कावेरी च सरस्वती
लोका च करवीरा च कुमुदा पद्मिनी तथा १९८
कनका विकटा देवरम्या च रमणी तथा

वसुन्धरा तथा हंसी विशाखा नन्दिनीति च १९९
जया च विजया चैव सुमुखा च प्रियानता
इत्येताः कीर्तिता रेखाः --- या पञ्चविंशतिः २००
रेखा एताः ।
एताः शुभफलाः सर्वाः कर्तुः कारयितुस्तथा
चतुरश्रचतुष्कमेवमुक्तं वृत्ताः सप्त च भूमिजा इमे २०१

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे भूमिजप्रासादाध्यायो नाम
पञ्चषष्टितमोऽध्यायः

अथ मण्डपलक्षणं नाम षट्षष्टितमोऽध्यायः

इदानीं मण्डपानष्टौ ब्रूमः प्रासादसंस्थितान्
प्रासादं कल्पयेद्पूर्वं भागशुद्धं सुलक्षणम् १
संवृतो वा भवेदेष व्यतिरिक्तोऽथवा क्वचित्
चतुरश्रो विभागैश्च घटंतेः य समंवृतः २
पशुभागैर्विघटते व्यतिरिक्तः स कीर्तितः
गर्भो गर्भसमः शस्तः सोन्यघटोषमावहेत् ३
एवं निवेशयेदग्रे मण्डपान्येव सद्मतः
भजेच्छतपदाख्येन ज्येष्ठमध्यदनीयसः ४
मण्डपांस्तेषु भद्रः स्यान्नन्दनाख्यस्तथापरः
महेन्द्रो वर्धमानश्च स्वस्तिकः सर्वभद्रकः ५
महापद्मोऽष्टमश्चैषां गृहराजः प्रकीर्तितः

एते यथार्थनामानो लक्ष्मैतेषां प्रचक्ष्महे ६
प्रासादद्विगुणायामः पादोनद्विगुणायतः
कार्यो यस्तथा व्यर्थमग्रतः सुरमन्दिरात् ७
प्रासादोच्छ्रायतुल्यं वा कार्या मण्डपविस्तृतिः
शुकनासान्विताः कार्यास्ते चालिन्दसमन्विताः ८
अलिन्दः सर्वतोभागनिर्गता लाववविस्तृताः
कदाचित्सार्धभागेन निष्क्रान्ता भागविस्तृता ९
--- भिर्भाजयेद्भागैर्भद्रं प्राज्ञः समन्ततः
शृङ्गाणि स्युर्द्विभागानि सहितान्युदकान्तरैः १०
भागं प्रमा --- रादामूलतलमस्तकम्
शृङ्गेषु रथिका कार्या भागपादेन निर्गता ११
भागेनैकेन निष्क्रान्तं विस्तृतं चतुश्चतान्
मध्यभद्रं विधातव्यमाशासु चतसृष्वपि १२
पीठं प्रासादपीठस्य नात्र कुर्वीत मण्डपे
तलपट्टे भवेच्छोकनाशोयाद्विततिरङ्गिका १३
तलपट्टमधस्तस्या मण्डपस्य निवेशयेत्
कर्तव्यमेवमग्रेऽग्रे निम्नं निम्नतरं ततः १४
अथवा तत्समं दद्यात्स्थपतिः शास्त्रवित्तमः
चतुभागायतद्वारं षड्द्वारुकसमन्वितम् १५
अग्रभद्रं विधातव्यं चतुस्तम्भविभूषितम्
पृष्ठतश्च भवेदेवं संसृतिश्चैत्रमण्डपे १६
संसृतेः शुकनासा स्याद्भूमिताः पृष्ठभद्रकम्

शेषं तथैव कर्तव्यं विधानं मण्डपस्य तु १७
स भित्तिभिः परिक्षिप्तः कर्तव्यः पार्श्वयोर्द्वयोः
भागेन कल्पयेद्भित्तिं गवाक्षैरुपशोभिताम् १८
वातायनाश्च कर्तव्याः सह चन्द्रावलोकनैः
प्रासादद्वारवद्द्वारविस्तारो मण्डपे भवेत् १९
सपादः सत्रिभागो वा सार्धः सौम्याथवा भवेत्
ऊर्ध्वद्वारविधिः कार्यो मूलद्वारानतिक्रमात् २०
जालव्यालकपोतालीमत्तवारणकैर्युताः
भ्रमनिर्मापितैः स्तम्भैः कर्तव्याश्च गवाक्षकाः २१
वातायनं तदर्धेन पादोनं द्वावलोकनम्
क्षणमध्ये प्रकुर्वीत चतुष्कीं विधिवच्छुभाम् २२
क्षोभायां बाह्यतो रेखा क्षात्या द्रमं च विवर्जयेत्
दारुकर्मविधेर्मध्ये यथा स्यात्कथ्यते तथा २३
समैः क्षणैः समैः स्तम्भैः समैश्चालिन्दकैर्युतः
समैः कर्णैश्च --- समद्रव्यविधानवान् २४
षड्दारुकैस्तिरश्चीनैः कार्याः कैश्चिन्मुखायतैः
तुला समतला यद्वा प्रोत्क्षिप्रा मध्यदेशगा २५
तुलाषड्दारुकाधीनांस्तदधीनानि तानि वा
केचिन्मन्थानसंस्थानालीगतिर्युताप २६
अथवा मध्यतः कार्या --- स्तम्भालिन्दवेष्टिताः
महाधरयुता कार्या चतुष्क्युभयतः समा २७
गजतालुलुमाकर्म द्रव्यैः स्यादुत्तरोत्तरैः

एते नानाविधाः कार्या द्रव्यैरविकलैस्तथा २८
या काचिद्रोचते प्राज्ञस्तामेकां कारयेत्क्रियाम्
द्गणान्तरायलङ्कुर्यादिल्लीतोरणकैस्तथा २९
वज्रबन्धसमायुक्ता घण्टिकापल्लवैर्युताः
हारपद्मदलाकीर्णाः शालभञ्जीविराजिताः ३०
स्तम्भकाश्च विधातव्याः पञ्चाभरणभूषिताः
करठकैरतिचित्रैश्च रथकैस्तोरणैः सह ३१
विधानैर्विचिधाकारै रूपकर्मोपशोभितैः
एवंविधा विधातव्या सीमातुल्यास्तुलोदयाः ३२
प्राग्ग्रीवकेष्वलिन्देषु मध्ये भागे च पार्श्वयोः
न तलानि विधीयन्ते यथाकामं क्रिया भवेत् ३३
सीमाद्वारे यथा वायोः प्रवेशं नैव पीडयेत्
तथाद्ध्वरिका कार्या पट्टस्योपर्यवस्थिता ३४
वेदिव्यालकपोताली मत्तवारणतुलोदयः
षड्द्वारुकं --- भद्रे तत्र कुर्वीत बुद्धिमान् ३५
बाह्यतो मण्डपेऽप्येवं मानतः कर्मतोऽपि च
कपोतालीवरण्डीभिस्तथाचान्तरपत्रकैः ३६
कर्णप्रासादकैश्चित्रैः कर्म स्याद्भद्रमण्डपे
उच्छ्रायस्य विवेचीयादशस्त्वन्यतमो बुधैः ३७
शिखरस्य त्रिभागेन पादोनैकेन वा भवेत्
उच्छ्रायो मण्डपस्यामः शुकनाससमुच्छ्रिते ३८
हर्म्यं वा तत्र कुर्वीत चारुकर्णोपशोभितम्

भद्रमण्डपलक्षणम् ।
चतुरश्रीकृते क्षेत्रे नन्दनं प्रविभाजयेत् ३९
भद्रं षड्भागमायामाश्चतुर्भागं तथा पव
भागभागं निष्क्रान्ते स्तम्भैः प्राग्ग्रीवकल्पितैः ४०
पञ्चभागायता ज्ञेया कर्णे भद्रान्तरस्थिता
भित्तिः स्याद्भागविस्तारा सलिलान्तरसंयुता ४१
एवं चतुर्दिशं कार्यो नन्दनो मण्डपः सदा
नन्दनः ।
महेन्द्रस्य तलच्छन्दः कर्णौ लाङ्गलसंयुतौ ४२
चतुर्भागायतो दिक्षु दारुकर्मविभूषितः
द्विभागिकानि शृङ्गाणि क्षोभयेदुदकान्तरैः ४३
चतुर्भागायतं भाग --- मेकं तु निस्सृतम्
एकतश्च मुखं दद्याद्दारुकर्मपरिच्युतम् ४४
महेन्द्रः ।
नन्दनश्चेद्बहिभद्रैर्जलमार्गैर्विवर्जितः
भागद्वितयविस्तारो भागमेकं विनिगतौ ४५
प्राग्ग्रीवपार्श्वयोस्रर्दद्यादुच्छ्रायोर्ध्वपदस्थितौ
वोतयेनौ वा कुर्वीत वर्धमानस्तथा भवेत् ४६
वर्धमानः ।
पक्षद्वये नन्दनस्य भद्रे भित्त्याभिवेष्टयेत्
गवाक्षकैरलङ्कुर्यान्न कुर्यादुदकान्तरम् ४७
स्वस्तिकोऽयं समाख्यातः सर्वलक्षणलक्षितः

स्वस्तिकः ।

अथाभिधीयते सम्यक्सर्वतोभद्रलक्षणम् ४८

कर्णौ कर्णौ लाङ्गले चेत्सार्धभागद्वयायतम्

कार्या परस्परं तेषु दारुकर्मविकल्पना ४९

भागेनैकेन निर्यातं भागषट्केन चायतम्

षड्दारुकद्वयं भद्रं कारयेद् बाह्यवस्थितम् ५०

सर्वतोभद्रः ।

चतुरश्रीकृते क्षेत्रे --- प्राग्भागैर्विभाजयेत्

त्यक्त्वा तेस मध्ये कर्णेष्वादध्याल्लाङ्गलानि च ५१

चतुर्भागान्तरस्थानि षड्दारुयुतानि च

कर्तव्यं भागनिष्क्रान्तं दिक्षु भद्रचतुष्टयम् ५२

चतुष्पदस्तदायामात्सर्वतोऽलिन्दको बहिः

प्रतिभद्राणि कुर्वीत चतुर्भागायतानि च ५३

निर्गतानिरभागेन दिक्षु स्तम्भान्वितानि च

इत्येतैर्लक्षणैर्युक्तो महापद्मः प्रकीर्तितः ५४

महापद्मः ।

चतुरश्रीकृते क्षेत्रे चतुष्कोणविभूषिते

अलिन्दावेष्टितं कुर्यात्प्राग्ग्रीवं मुखसंश्रितम् ५५

गवाक्षकाश्च कर्तव्यास्तथा चन्द्रावलोकनाः

वातायनास्तथोद्द्योताः समन्ताद्रूपशोभिताः ५६

गृहराजक्रिया ह्येवं सर्वशोभासमन्विता

एवं लक्षणसंयुक्तमतृगोमपि मन्दिरम् ५७

गृहराजः ।
वृद्धरा शुकनासस्य शुकनासस्य मूलतः
कनीयसं मण्डपानां कर्तुरिच्छावशाद्भवेत् ५८
पार्श्वयोरुभयोस्तुल्यं विदध्यात्तिर्यगायतम्
व्यापिचत्तु रघनद्यापि वा --- ५९
प्रासादमसमं स्थानं विदध्यान्मण्डपं बहिः
यथापूर्व द्वारविस्तारविस्तीर्णास्तेषु कार्या गवाक्षकाः ६०
समा सपादपादोना सार्धा चोच्छ्रितिरायता
अष्टाङ्गुलब्रूमोपेता दशांशे द्वारविस्तृते ६१
विस्तारो मण्डपस्तम्भद्वारोच्छ्रायसमोच्छ्रितिः
गर्भव्यासो मण्डपस्य साष्टांशः सांश एव च ६२
सार्धो वा मण्डपस्यायं गर्भे --- ६३

--- कार्यति शक्त्या
यां देवसंयति स सद्मनि देवताना-
मास्तेऽप्सरोगणवृतः शरदां शतानि ६४

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे मण्डपाध्यायो नाम षट्षष्टितमः

अथ सप्तविंशतिमण्डपलक्षणं नाम सप्तषष्टितमोऽध्यायः
इदानीमभिधीयन्ते मण्डपाः सप्तविंशतिः
प्रासादाद् द्विगुणं कुर्यात्कनिष्ठं तत्र मण्डपम् १

पादोनद्विगुणं मध्यं प्रासादे तु कनीयसि
तस्मिन्नेव कनीयांसं विदध्यात्सार्धमानतः २
पादोनद्विगुणः सार्धः सपादश्चेति मध्यमे
सार्धः सपादस्तुल्यश्चेत्युत्तमाद्याः स्युरुत्तमे ३
सपादद्विगुणाः सार्धद्विगुणाः सान्तरोद्भवाः
क्षुद्रप्रासादकेषु स्युर्मण्डपा बहवोऽपरे ४
क्षेत्रालाभे पुनरिमान्सर्वान्सर्वेषु योजयेत्
दैर्घ्यादैर्घ्येण गृह्णीयाद्विस्तृती --- तथा ५
प्रमाणं मण्डपे कार्ये वलभ्यां गरुडेऽपि च
चतुरश्रीकृते क्षेत्रे दशधा प्रविभाजिते ६
भागैश्चतुर्भिर्भद्रं स्याद्द्वौ भागौ प्रतिभद्रकम्
अग्रतः पृष्ठतो वापि निर्गमो भागिको भवेत् ७
भद्राणां निर्गमो भागं सार्धभागमथापि वा
प्रासादस्य त्रिभागेन चतुर्भागेन वा भवेत् ८
अर्धेनाथ षडंशेन पञ्चांशेनाथ निर्गतिः
प्रासादानां समा कार्या पादोना वा प्रमाणतः ९
कार्या त्रिभागहीना वा मण्डपास्तु समैः क्षणैः
स्वविस्तारसमं भद्रं मुखे चैषा प्रकीर्तिता १०
कर्णा द्विभागिका ज्ञेयास्तेषां कोणचतुष्टये
वामदक्षिणभागाभ्यां सह भद्रं षडंशकम् ११
प्रतिभद्रे नचैतस्मिन्विदध्यादग्रपृष्ठयोः
चतुःषष्टिधरोऽयं स्यात्पुष्पको नाम मण्डपः १२

पुष्पकः ।
दिक्त्रये प्रतिभद्राणि मुखे प्राग्ग्रीव एव हि
पुष्पभद्रो तिस्तम्भश्चतुष्कः सुप्रभो भवेत् १३
इति स्तम्भद्वयत्यगाद्ब्रूमो मण्डपविंशतिम्
यो पुष्पभद्रस्तु व्रतोऽमृतनन्दनः १४
कौसल्यो युद्विसंकीर्णो गजभद्रो जयावहः
श्रीवत्सो विजयश्चैव वस्तुकीर्णश्रुतिर्जयः १५
यज्ञभद्रो विशालश्च सुश्लिष्टः शत्रुमर्दनः
भायंवो दमश्चैव मानवो मानभद्रकः १६
सुग्रीवो मण्डपः प्रोक्तो भद्रैर्युक्तश्चतुष्पदैः
चतुर्भिस्त्रिपदैः कर्णैर्निर्गमैः प्रागुदाहृतैः १७
धराणामेव विंशत्या चतुरुत्तरया युतः
अस्मद्वासस्तम्भं षडन्ये द्विधरद्वयात् १८
सुग्रीवो हर्षनामा च कर्णिकारः पदार्धिकः
सिंहश्च सागभद्रश्च सुस्तत्र श्वेति सप्तमः १९
सप्तविंशतिरित्युक्ता मण्डपानां समासतः
एषां विचित्ररूपाणां प्रासादाकृतिधारिणाम् २०
मिश्रकाश्च परिज्ञेया हस्तैर्द्वित्र्येकमानतः
मूलप्रासादतुल्या वा त्र्यंशेनार्धेन चोर्जिताः २१
द्विस्तम्भशुकनासाग्रे विज्ञेयः पादमण्डपः
प्रासादभित्तिमानेन मण्डपे भित्तयः स्मृताः २२
सपादसत्रिभागा वा वी स्यु ---

क्वचिद्भित्तिविहीनांश्च कुर्यादाकाशमण्डपान् २३
लतिष्वेष विधिः प्रोक्तः सान्धारेषु स्वमानतः
प्रासादो यादृशस्तादृङ् मण्डपोऽपि तदग्रतः २४
यानि प्रासादनामानि तानि स्युर्मण्डपेष्वपि
वास्तुभेदेन भेदोऽयं मण्डपानां विधीयते २५
शतार्धमण्डपस्थानं नीलाधं भोजनाय च
यज्ञार्थो यतिमुख्यार्था विहारार्था नृपालदो २६
कार्यो दशभ्य विस्तारो --- नु शतावधेः
हस्तानां संख्यया मानं हस्तेन स्यादृहेशितुः २७
उपयोगानुसारेण स्वधिया परिकल्पितः
आयतश्चतुरश्रो वा कर्तव्यो नाद्यमण्डपः २८
शतमष्टोत्तरं ज्येष्ठश्चतुःषष्टिकरोऽवरः
कनिष्ठो मण्डपः कार्यो द्वात्रिंशत्करसंमितः २९
अद्विविस्तारोऽस्य स्यान्नेपथ्यगृहकादि तु
परिच्छेदानुसारेण स्वधिया परिकल्पयेत् ३०
द्वारद्वयं च कर्तव्यं तत्प्रमाणानुसारतः
नेपथ्यगृहके चान्यत्तृतीयं रङ्गसम्मुखम् ३१
समैः क्षणैः समैः स्तम्भैरलिन्दैश्च समैर्युताः
समकर्णाः समा द्रव्यविधेया मण्डपाः शुभाः ३२
भित्तिमां चतुस्स्रस्यात्कार्यः कामं सनिर्गमः
स्तम्भकोणाश्रितं मानं भित्तिः स्यान्मानबाह्यतः ३३
वेदिर्मण्डपभूषाद्यैः स्यान्मध्ये बाह्यतोऽपि वा

क्षेत्रलोभे तु कर्तव्या भित्तिमानस्य मध्यतः ३४
चतुःषष्टिपदं ज्येष्ठे भद्रं कुर्याच्चतुष्पदम्
एकाशीतिपदं मध्ये भद्रं स्यात्पञ्चभागिकम् ३५
सततागा विभक्ते तु खण्डशः स्यात्कनीयसि
कर्णा द्विभागिकाः कार्या भित्तियुक्तश्च मण्डपः ३६
भद्रप्रासादसदृशौ कर्णभद्रं च भाजयेत्
क्षोभणं बाह्यतो रक्षेत् पाडनं स्याद् विपर्यये ३७
क्षरकं कुम्भकलाशा कपोतं जङ्घया सह
प्रासादस्यानुरूपेण --- ३८
रुचकश्चतुरश्रः स्यादष्टाश्रिर्वज्र उच्यते
द्विवज्रः षोडशाश्रिश्च प्रतीतो द्विगुणस्ततः ३९
मध्यप्रदेशेऽयं स्तम्भो वृत्तो वृत्तः प्रकीर्तितः
अथान्येन प्रकारेण षोढ कुर्वीत मण्डपान् ४०
त्रिपञ्चसप्तनवभिश्चतेक्षणैः उभयसमः
साद्रमध्यक्षणोऽन्येभ्यः सत्र्यंशः सार्ध एव वा ४१
एवमेव प्रकर्तव्यः षड्प्रकारेऽपि मण्डपे
प्रासादगर्भस्यान्तेन स्युस्तद्भित्तिरथापि वा ४२
स्तम्भसूत्रस्य मार्गेण क्षणे मण्डपमध्यगे
मूलप्रासादगर्भेण कार्या वा भद्रविस्तृतिः ४३
शेषाः क्षणा विधातव्या समसंख्याक्षतैर्धरैः
प्रासादच्छादनासाद्भिः सत्र्यंशावापि मण्डपे ४४
सदृशां स समञ्चशद् द्वा--- समतले भवेत्

उच्छ्रायं मण्डपे ब्रूमः प्रकारेणापरेण च ४५
तलार्धं पदमध्येया --- यस्य विहितः शुभः
प्रासादे दशधा भक्ते चतुःपञ्चकरे समा ४६
नव्यंश मण्डपंस्यादुत्तरपट्टयोर्द्वयोः
षडयुट्सूहस्तेत्वष्टांशं सप्तभागे न वास्तके ४७
दशैकादशके षट्स्युः सार्धभागासु संख्यया
त्रयोदशक --- हस्तयोः सार्धपञ्चकम् ४८
सपादाः पञ्चभागाः स्युश्चतुर्दश करे पुनः
तदूर्ध्वं विंशतिं यावदुच्छ्रितिः पञ्चभागिकी ४९
संसृता व्यतिरिक्तव्या त यथा वापि प्रकल्पयेत्
शुकनासस्य यः स्तम्भः स्तम्भो यो मण्डपस्य च ५०
मिथः श्लिष्टावपि व्यक्तौ यत्र तौ संश्रितौ हसः
प्रासादकोणस्तम्भो य ग्रस्तास्ते ग्रस्तमण्डपा ५१
निर्गता व्यतिरिक्ताः स्युश्चतुर्भद्रविभूषिताः
तलपट्टाञ्छौकनासाव्यातले भूमिरङ्गिका ५२
तलपट्टमधस्तस्या मण्डपानां नियोजयेत्
एवं परं परं कुर्यान्निम्नान्निम्नतरं बुधः ५३
सममेवाथवा कुर्यात् प्रासादतलमानतः
ध्रुवादिनाम्नां श्रीकूटः प्रवृत्तानां तथैव च ५४
रुचकप्रभृतीनां च या संज्ञा या विभक्तयः
मण्डपेष्वपि ता ज्ञेया तत्सम्बन्धेषु नान्यथा ५५
देवालयोत्सवार्थाय विमानानि पृथक्पृथक्

मण्डपादि समाख्यातादूर्ध्वं स्युः सप्तविंशतेः ५६
देवयात्रानिमित्तानि तथैव परिकल्पयेत्
चतुःषष्टेरप्यधिकाः स्तम्भाः स्युः पदसंख्यया ५७
प्रासादाङ्गानि --- स्युस्तत्क्षणान्मण्डपेन च
संवास्तुपदं संबुद्ध्या कर्तव्यो विषमैः क्षणैः ५८
न दोषो जायते तत्र शिल्पीच्छतेऽत्र कारणम्
अथ दारुकलां ब्रूमः --- मण्डपसंश्रयाम् ५९
यादृक् समतलं तत्र विभागस्तादृगुच्यते
प्रासादस्य विभागेन राजसेनं तु भागिकम् ६०
वेदी भागद्वयं ज्ञेया द्वौ भागौ मत्तवारणम्
चन्द्रावलोकनं तद्वद्विधातव्यं द्विभागिकाम् ६१
पट्टो भवति भागार्धमर्धभागिकमासनम्
कूटस्तम्भं तु भागेन सपादेन प्रकल्पयेत् ६२
शीर्षकं भरणं चैव सपाद भागमिष्यते
एतत्समतले कार्यं विषमोऽपि क्वचिद्भवेत् ६३
पट्टिर्भागिकी विधातव्या प्रकारेणापरेण च
अधस्तादूर्ध्वपट्टस्य तलपट्टस्य चोर्ध्वतः ६४
पदे त्रिभागमध्ये वा कार्या चन्द्रावलोकने
तदधस्ताद्विधातव्यो विभागः पञ्चभिः पदैः ६५
भागिकं राजसेनं स्याद्वेदिकापि द्विभागिकी
मत्तवारणकं कार्यं भागद्वितयसंमितम् ६६
दशभक्तेऽथवा कार्या चतुर्भिश्चन्द्रलोकना

भागद्वयेन वेदी च तत्समं मत्तवारणम् ६७
भागेन रूपहारस्तु भागेनैकेन करिठका
मत्तवारणपातश्च त्र्यंशहीनैकभागिकः ६८
भागार्धेनाथवा पातस्तयोर्मध्ये च मध्यमः
कूटागारेष्विदं मानमिदं चासनपट्टके ६९
भागद्वितयविस्तारमासनं परिकल्पयेत्
पिण्डो भागद्विकं तस्य त्र्यंशोना मत्तवारणा ७०
वेद्यां पिण्डः सपट्टः स्यात्कूटागारे तथैव च
राजसेनस्य पिण्डस्तु कूटागारसमो भवेत् ७१
कुम्भिकापि च तत्पिण्डा चोदरूर्ध्वतयासनम्
विद्यात्सशिरःस्तम्भः कूटकं --- ७२
राजसेनसमा कुम्भी जङ्घा वेदिसमा भवेत्
एवमेतत्त्रिधा प्रोक्तं सूर्पच्छाद्यमथोच्यते ७३
अधःपट्टोर्ध्वपट्टान्तं पञ्चधा प्रविभाजयेत्
उभाभ्यां वा त्रिभिर्वापि भजे निगतिस्तु सायते ७४
--- पट्टसमोऽथ त्रयोदशविभाजिते
शूर्पभागं त्यजेदूर्ध्वं घटना द्वादशांशिका ७५
कुर्यान्निपातं शूर्पस्य पञ्चभागमथापि वा
दण्डकैर्भूषयेच्छूर्पं मध्ये दण्डं विवर्जयेत् ७६
मध्ये च स्तम्भिका वेद्या मत्तवारणकस्य च
भागेन पट्टपिण्डस्तु सपादेनाथवा भवेत् ७७
पृथुत्वं स्यात्स षड्भागपिण्डतुल्यं तु पट्टके

स्तम्भः पट्टसमः कार्यः शीर्षकं त्रिगुणं ततः ७८
स्तम्भादप्यधिका कूटी हीरकादपि पट्टकः
बाहापट्टवदुच्छ्रायः शुकनासस्य पट्टके ७९
पट्टपिण्डोच्छ्रिता वेदी यद्वा पट्टाधिका भवेत्
मण्डपे स्यात्तुलोच्छ्रायो विभागैः प्रमितोऽष्टभिः ८०
स्थलप्रासादतुल्यो वा पातस्य च सतोऽपि वा
निम्नोन्नतं छादयेच्च छेदिकायोगतो बुधः ८१
करठकश्चे --- कार्थेन विधातव्यो विचक्षणैः
छेदिकायोगतो मध्ये स्तम्भाः स्युर्बाह्यतोऽधिकाः ८२
पञ्चाशेनाष्टषष्ठेन केशान्तात्सालभञ्जिकाः
रथिकाशालभञ्जीभिः स्थिताभिः पट्टिकोर्ध्वतः ८३
मध्ये कराटकं कार्यं मनोज्ञं वा सरोरुहम्
छादयेद्वास---मलं विमानैर्बहुभेदवत् ८४
क्षणान्तरेषु रचयेद्दीप्तिकातोरणानि च
अन्यथा वा भवेद्वृत्तं चतुरश्रो यथा क्वचित् ८५
गजतालुयुतः पट्टस्योर्ध्वमष्टाश्रिरेव वा
कुर्वीत मध्ये चाष्टाश्रिबाह्यतः पङ्कयस्तथा ८६
विशेषं छादये ब्रूमः स्तम्भिकासूत्रवद्भासयेत्
षोडश द्वादशाष्टौ बा---चतुरोच्छ्रायाः ८७
पादान्यदूषर्यत् शिल्पीभवेक्षणवशात् सदा
त्रयोविंशतिधा भाज्यमन्तरं पट्टघण्टयोः ८८

घरटादूर्ध्वं पद्मपत्री सार्धभागसमुच्छ्रिता
उच्छ्रिता सार्धभागेन तदूर्ध्वं दृट्टरी भवेत् ८९
कपोता ग्राससंयुक्ताः सार्धभागसमुच्छ्रिताः
करठकस्तु द्विभागः स्यादमरस्तु द्विभागिका ९०
भागद्वयं विनिष्क्रान्तं त्रिभागे गजतालुके
दत्ताभागानुच्छितकोसलं भागं च धालिका भवेत् ९१
भागद्वयं द्वितीयं च तृतीयं च द्विभागिकम्
तस्योपरिष्टात्कर्तव्या वलिन्यार्धभागिका ९२
निर्गमः सूत्रमार्गेण एकैकस्य स्वमानतः
--- गर्भकोणः स्यात्पद्मपत्र्याश्च मस्तमे ९३
विमृश्य सूत्रधारो वा निर्गमं कल्पयेत् स्वयम्
समैर्भागैश्च पत्रैश्च विकटैः पद्मपत्रकैः ९४
हस्तितुरडैर्वरालैश्च शालभञ्जीभिरण्डकैः
भल्लिकातोरणैश्चैव भूषणीया चतुष्किका ९५
खेचरैर्माल्यबन्धैश्च नानाकर्मवितानिभिः
मन्दारकैः शुक्तिभिर्वा पद्मैर्वा नागपाशकैः ९६
मण्डपं छादयेत्प्राज्ञो बाह्यतस्त्वभिधीयते
द्विगुणा मौलिकद्वारात्पादोनद्विगुणं क्वचित् ९७
सार्धभागमितं यद्वा त्र्यंशोनं द्विगुणं क्वचित्
क्वापि त्र्यंशाधिकं कार्यं चतुर्द्वारं मण्डपे ९८
द्वारे कार्यौ प्रतीहारौ भल्लिका तोरणास्तथा
स्तम्भयोश्च वरालौ द्वौ शालभञ्जिकया सह ९९

प्राग्ग्रीवं भद्रभद्रं च रथिका वेदिका बहिः
मण्डपे वरकस्योर्ध्वमधस्ताच्छिखरस्य च १००
भागार्धभ्रां छेदपट्टः स्याच्छेषं कुर्वीत संवृति
शिखरा त्र्यंशयुग्मेन पादोन वा कारयेत् १०१
प्रासादे शुकनासं तु सन्तु सम्भ्रमेऽथवा
मण्डपस्योदयः स्वस्मादधस्तादथवा भवेत् १०२
वामनाद्या अनन्तान्ताः प्राक्प्रोक्ता ये दशोपयेः
कर्तव्यो मध्यतस्तेषामुदयः कोपि मण्डपे १०३
प्रविभज्योदयं त्रेधा घण्टां भागेन कारयेत्
तत्त्रिभागेन तिलकस्तिलकार्धेन फंसना १०४
क्रमैस्त्रिभिः पञ्चभिर्वा शूर्पैर्निर्माणमिष्यते
स्कन्धछाद्यवासने वामेषा सवणोदिता १०५
शोभां भद्रेषु कर्णेषु यथायोगं प्रकल्पयेत्
वीथीभिश्चन्द्रशालाभिः सिंहकर्णैश्च शोभनैः १०६
रथिकाभिर्वरालैश्च तिलकैश्चारुदर्शनैः
शुकनासैर्गजैः सिंहैरन्यैरित्येवमादिभिः १०७
कर्मप्रकारैः कर्तव्या मण्डपे भूषणक्रिया
त्रिविधैरथवा कूटैः सङ्घटैः कण्ठकूटकैः १०८
तिलकैर्वा तमङ्गैर्वा खुरच्छाद्यैः सघट्टकैः
शृङ्गादिभिः प्रभेदैश्च कार्या मण्डपसंवृतिः १०९
शुकनासोच्छ्रितेरूर्ध्वं न कार्या मण्डपोच्छ्रितिः
अधस्ताद्यत्र या प्रोक्ता कर्तव्या सा त्वशङ्कितैः ११०

वलभ्यां शुकनासान्ता कर्तव्या मण्डपोच्छ्रितिः
मण्डपः शुकनासान्तं योग्रासकुलम् १११
न च तत्पुरमध्ये तु यत्र सा मण्डपोच्छ्रितिः
स पुत्रयस्तबन्धवतस्य तयः कर्तकारकै ११२
हीनाधिकप्रमाणेषु दूविष्ठेषु वास्तुषु
द्रव्यैर्वाधिकप्रमाणेषु स्युरनर्थाः पदे पदे
ऋद्धिः पुरस्य न भवेत्स्यात्पुराधिपतेर्भयम् ११३
क्लृप्तैरेवं मण्डपैः सुप्रमाणैर्लक्ष्मोपेतैः सद्विधानेन कर्तुः
ऋद्धिः सिद्धिः कारकस्यापि लोके क्षेमं च स्याद्भूमिभर्तुर्जयश्च ११४

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे सप्तविंशतिमण्डपाध्यायो नाम
सप्तषष्टितमः

अथ जगत्यङ्गसमुदायाधिकारो नामाष्टषष्टितमोऽध्यायः

त्रिदशागारभूत्यर्थं भूषाहेतोः पुरस्य तु
भुक्तये मुक्तये पुंसां सर्वकालं च शान्तये १
निवासहेतोर्देवानां चतुर्वर्गस्य सिद्धये
मनस्विनां च कीर्त्यायुर्यशस्सम्प्राप्तये नृणाम् २
जगतीनामथ ब्रूमो लक्षणं विस्तरादिह
प्रासादं लिङ्गमित्याहुस्त्रिगल्लयनाद्यतः ३
ततस्तदाधारतया जगती पीठिका मता
आकारविस्तृतायामानुच्छ्रायं ते क्रिया ४

विना तमङ्गप्रत्यङ्गा कल्पना नापि --- क्रमम्
विभक्तिं तिलकन्दानां भद्रविस्तारनिर्गमम् ५
जलाधारप्रदोश्च प्रवेशं निर्गमोद्गमम्
मानसंख्यां च शालानां संस्थानोन्मानलक्षणम् ६
परिक्रमं तमेवासां संज्ञां च त्रिविधामपि
षट्प्रकारत्वमे वासां सम्भवस्य च कारणम् ७
मूलशालापरिच्छित्तिं परिक्रमविनिर्गमम्
सञ्चयद्वारसोपानमुण्डिकामण्डसम्भवान् ८
द्वित्र्यादिदेवताधिष्ण्याञ्जगतीस्तोरणानि च
युक्तानि लक्षणैः सर्वैर्यथावत्सम्प्रचक्ष्महे ९
चतुरश्रा समा शस्ता मनोज्ञा सर्वतःप्लवा
अंशप्रगूढदिग्भागा प्रासादानुगता शुभा १०
चतुरश्रायता यद्वा वृत्ता वृत्तायता तथा
अष्टाश्रिर्वा विधातव्या सा संशोध्यादितः क्षितिम् ११
निरूप्य त्रिदशागारं संस्थानोन्मानलक्षणैः
तदाकारवतीं पार्श्वे जगतीं तस्य योजयेत् १२
कनीयसी मध्यमा च ज्येष्ठा चेति त्रिधैव सा
कनीयः प्रभृतिष्वेताः प्रासादेषु नियोजयेत् १३
जगत्यो भ्रमणीभिः स्फारौकद्वित्रिस्त्रिभिः क्रमात्
नानाशातिशान्तिन्यकनिष्ठाद्या मनोरमाः १४
प्रासादस्यानुरूपेण साङ्गोपाङ्गादिसंख्यया
शालास्तासां मताः कर्म प्रोच्यते सामुदायिकम् १५

श्री श्रा द्वादशकरादूर्ध्वमोर्ध्वा विंशतिहस्ततः
शालात्रिभागं तुर्यांशः स्याद्वा द्वात्रिंशतः पुनः १६
श्रासनार्धात्तु पञ्चाशच्छाला प्रासादतो भवेत्
बहुदेवकुला या तु प्रासादस्यानुसारतः १७
ब्रूमः प्रकाराञ्शालानां यथायोगमिहाधुना
कर्णोद्भवा भ्रमोच्छा च भद्रजा गर्भसम्भवा १८
मध्यजा पार्श्वजा चेति भेदास्तासां भवन्ति षट्
विस्तारायामतोस्यभिः कर्णजा पूर्वमारिणा १९
भ्रमजा तत्प्रमाणेन --- पादेन वेष्टिता
भद्रजा कर्णजातीया सार्धायामा प्रकीर्तिता २०
गर्भजा मध्यजा चेति कर्णजायतसम्मिते
पार्श्वजा भ्रमजायामा स्थानं तासामथोच्यते २१
कर्णेषु कर्णजा ख्याता भ्रमजा च परिभ्रमे
भद्रेषु भद्रजा ज्ञेया त्रयमध्ये च गर्भजा २२
मध्ये व्यवस्थिता या तु पञ्चानां मध्यजा तु सा
पार्श्वसंस्थानश्चतस्रो यास्तासां शान्ताः पार्श्वद्वये स्मृताः २३
पार्श्वद्वयं स्युः कर्णानां --- स्ता श्रपि च पार्श्वजाः
प्रासादविस्तृतेरर्धं विधातव्या भ्रमन्तिका २४
पदवृद्धतिबाह्यस्याः कन्दा दिद्धु --- च
सुरसद्मानुसारेण कुर्यादष्टौ विचक्षणः २५
श्रारभ्य भद्रमालत्या युश्रावत्रिंशमत्रिकाम्
नवाण्डकाया यावत्स्यादेकत्रिंशत्तमे क्रमात् २६

शालाकन्दाः स्मृतास्तासां चतुर्वर्गविभाजिताः
चतुष्पदा तत्र सास्या स्याद्द्वादशपदो भ्रमः २७
क्रमेणानेन कर्तव्यं शालाकन्दनिवेशतः
तदूर्ध्वं तु भ्रमो नास्ति शालागणविभाजने २८
रुद्राद् भ्रमोऽयं न पुनः कर्णनिर्गमधारिणाम्
रुचकस्येव कर्तव्यः कर्णदेशात्परिक्रमः २९
शालानुसारतो भद्रे विस्तारैः कन्दकाद्बहिः
कर्तव्यो निर्गमस्तत्र बुधैः पदचतुष्टयम् ३०
उदकान्तरविस्तारो भागेनार्धेन वा क्वचित्
प्रजाङ्गस्य विधातव्यं क्षोभणं च पदद्वयम् ३१
प्रासादस्य च विस्तारं दत्त्वाग्रे सलिलान्तरम्
गण्डौ तत्सूत्रगौ कार्यौ भ्रमाद्द्विपदनिर्गतौ ३२
प्रासादानां तु विस्तृत्या स्युरेकद्वित्रिनिघ्नया
कर्णाद्विनिस्सृतौ गण्डौ ज्येष्ठमध्यकनीयसा ३३
भवग्रे सुण्डिकाः कार्याः कर्णशालाविनिर्गमः
मालासोपानसंयुक्त प्रतीहारसमाकुलाः ३४
प्रतोली चाग्रतः कार्या सपटो --र्गला दृढा
ब्रूमोऽथ जगतीपीठं तत्कुर्यादेकहस्तके ३५
प्रासादे विस्तृतेस्तुल्यसमुत्सेधे विचक्षणः
द्विहस्तके तु पादोनं त्र्यंशहीनं त्रिहस्तकम् ३६
चतुर्हस्ते तु कर्तव्ये सार्धहस्तद्वयोच्छ्रितम्
चतुरिष्टा त्रया च --- द्वादशहस्तकम् ३७

कनीयोमध्यमज्येष्ठानुदयान् कल्पयेत् क्रमात्
अर्धं वा कर्णशालायाः पादोनं वाथ तत्समम् ३८
अनेन च प्रकारेण ज्येष्ठमध्यमयोरपि
प्रासादयोर्जगत्युच्चा कर्णप्रासादमानतः ३९
पीठस्य यः समुत्सेधा --- तं विभाजयेत्
भागेन खुरकं कुर्याद्भागेनैकेन वर्त्मना ४०
कुम्भस्य खुरका भागं द्विभागं कुम्भकं तथा
कलशं भागिकोत्सेधं तथैवान्तरपत्रकम् ४१
वरण्डीं भागिकीं कुर्यात्तथा पट्टं च भागिकम्
जगत्याः खुरकाद्भागं प्रचिशोकोद्भकः सुरः ४२
पट्टो भागेन सार्धेन प्रतिष्ठाजगतीखुरान्
खुरकारकुम्भकाकिञ्चित्कुम्भका क्षणकस्तथा ४३
कणकादन्तेरपत्र कपोतालीं तथैव च
पट्टिकानां प्रवेशांश्च नासिकावर्तनास्तथा ४४
निम्नोन्नतप्रवेशांश्च विदधीत मनोहरान्
--- धिकाभिर्विचित्राभिः कूटैश्चानेकशेखरैः ४५
सुविभक्ता विधातव्याः शालानां कन्दकामूले
कर्माणयतिविचित्राणि स्थानस्थानोचितानि तु ४६
कुर्यात्पीठेषु शोभार्थं प्रासादानां विचक्षणः
यथा सिंहासनं राज्ञां शोभते मणिदीप्तिभिः ४७
तथा प्रासादराजस्य पीठं कर्मभिरुत्तमैः
पट्टस्योर्ध्वं विधातव्यमुत्कृष्टं राजसेनकम् ४८

पुष्पितैः कमलैर्युक्तं शोभितं भारपुत्रकैः
तदर्धं वेदिका देया नानापत्रसमाकुला ४९
रूपं संघटकोपेता ततश्चासमघट्टकः
स्तम्भिकाभिरनेकाभिर्धारयेत्तं समन्वितः ५०
तस्योपरि विधातव्यं करव्यासनसमुत्तमम्
अन्तरं कर्णशालानां तलपादार्धपट्टयोः ५१
राजसेनयुतां वेदीं तत्त्रिभागेन कारयेत्
वेदिकार्धं त्रिभागं वा तले स्याद्राजसेनकम् ५२
कूटारं --- त्रिभागेन वेदेरूर्ध्वं मनोहरम्
करमात्रसमुत्सेधं कर्तव्यं मत्तवारणम् ५३
सुखलीलाशनार्थं तत्सप्रवेशं सनिर्गमम्
गन्द्राग्रे सुकाग्रे च प्रतोल्यग्रे तथैव च
तोरणं त्रिविधं ज्ञेयं कनीयोमध्यमोत्तमम् ५४
इत्थं जगत्यायतनस्य सम्यक्
प्रासादपीठस्य च सम्प्रदिष्टम्
विधानमेतज्जगतीषु नार्त-
मन्यथाभिदधाः सह लक्षणानाम् ५५

इति श्रीमहाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे जगत्यङ्गसमुदायाधिकारो नामाष्टषष्टितमोऽध्यायः

अथ जगतीलक्षणं नामैकोनसप्ततितमोऽध्यायः

वसुधा वसुधारा च वहन्ती च तथापरे

श्रीधरा भद्रिका चैव एकभद्रा द्विभद्रिका १
त्रिभद्रिका भद्रमाला वैमानी भ्रमरावली
स्वस्तिका हरमाला च कुलशीला महीधरी २
मन्दारमालिकानङ्गलेखाथोत्सवमालिका
नागारामा मारभव्या तथा च मकरध्वजा ३
नन्द्यावर्ता च भूपाला पारिजातकमञ्जरी
चूडामणिप्रभा चैव तथा श्रवणमञ्जरी ४
विश्वरूपादिकमला तथा त्रैलोक्यसुन्दरी
गन्धर्वबालिका चान्या विद्याधरकुमारिका ५
सुभद्रा च समाख्याता तथान्या सिंहपञ्जरा
वज्रपकुरवाद्याः गन्धर्वनगरी तथा ६
तथामरावती ज्ञेया रत्नधूमा च नामतः
त्रिदशेन्द्रसभा चैव तथान्या देवयन्त्रिका ७
चत्वारिंशदि्द्वतीयं स्यादेकोना नामसंख्यया
यमलाम्बरधरा नेत्रा दद्युडाः खरिडला सिता ८
अथातः कथ्यते तासां प्रविभागो यथा यथा
जगतीनां क्रमेणैव शालानां च यथोदितः ९
चतुरश्रीकृते क्षेत्रे षडेते स विभाजिते
समं वा चार्धयुक्ते वा गुणोऽथ मुखायताम् १०
मण्डपेनोज्झिते कुर्याज्जगतीमनुसारतः
द्वौ भागौ मध्यदेशे स्यात्प्रासादो भागिको भ्रमः ११
कर्णादृशां समुज्य पार्श्वयोरुभयोः पुरः

श्रीखरिडका विधातव्याः प्रासादमं --- मिमाम् १२
मत्तवारणसंयुक्ता प्रतोल्यादिविभूषिता
प्रथमे च समाख्याता जगती वसुधाभिधा १३
वसुधा वसुधारा स्यात्समायुक्ताग्रशालया
निर्गमः पुरतः कार्यः प्रासादस्य प्रमाणतः १४
--- विस्तारस्तथा कार्यस्तं चतुर्धा विभाजयेत्
भागिका श्रमणी कार्या शेषशाला द्विभागिका १५
सुरिडका चापि पूर्वोक्तमानेनैवायता भवेत्
वसुधा च पुनः कर्णशालाभ्यां राजसिंहिका १६
प्रासादार्धेन ते कार्यं कर्णयोरुभयोरपि
स्वमानार्धेन च तयोर्भ्रमणीं परिकल्पयेत् १७
मूलप्रासादविस्तारा कर्तव्या सुरिडका पुरा
शाला स्याद्वसुधा राजहंसाः पुरो यदा १८
श्रीधरी सा तदा तस्याः सुरोयद्यन्द्र पूर्ववत्
यदा तु हंसिकास्थाने शाले स्तोऽपरकर्णयोः १९
तद्रूपे तत्प्रमाणे च तदा सा भद्रिका भवेत्
चतुरश्रीकृते क्षेत्रे षोडशांशविभाजिते २०
पूर्वोक्तक्रमसम्पन्ने यथाकामं मुखायते
मण्डपायामसंयोगाद्यथाभागं विभाजिते २१
मध्ये देवालयः कार्यश्चतुर्वर्गपदान्वितः
बहिर्द्विपदविस्तारो भ्रमस्तस्य समन्ततः २२
कर्णे कर्णे च कर्तव्या द्विपदायामविस्तृता

चतुर्दिशं कर्णशाला या पदिभ्रमणान्विता २३
पदद्वितयविस्तारा त्रिपदायामसंयुता
पदिका च भ्रमणा कार्या भद्रशालाश्च सुन्दराः २४
वार्यन्तराणि परितः कुर्यान्मध्येषु शालयोः
पदमेकं प्रविष्टानि तदर्धं विस्तृतानि च २५
शालायाः पृष्ठभद्रे स्यादेकभद्रद्विभद्रिका
कपोकृताभ्यां त्रिभद्राणि पृष्ठकुद्दिषु २६
शालाभिः स्याश्चाथ तिसृभिर्जगती भद्रमालिनी
एकभद्रादिचतुष्टयम् ।
चतुरश्रीकृते क्षेत्रे चतुर्विंशतिभाजिते २७
षड्वर्गलक्षणोपेतो मध्ये कार्यः सुरालयः
देवालयपरितस्त्रिपदः स्यात्परिभ्रमः २८
ततः शालाविभक्तिश्च कर्तव्या प्रोक्तलक्षणा
पञ्चभागायता मध्ये भूचतुविस्तृता पदैः २९
भद्रशालाश्च कर्तव्यास्तन्मध्ये भागिकभ्रमः
भद्रस्य पार्श्वद्वितये द्विपदायामविस्तृतम् ३०
शालाद्वयं विधातव्यं द्वादशी शत --- भ्रमम्
भागमेकं प्रवेशस्तु तयोः कर्णद्वयोर्भवेत् ३१
तिस्रस्तिस्रो भवत्येवं शालादिद्दु तिसृष्वपि
षडेवोदकमार्गाश्च कार्या भागार्धनिस्सृताः ३२
भागमेकं प्रविष्टाश्च भवेयुर्दिक्त्रयेऽपि ते
कर्णौ च पुरतः कार्यौ भागद्वितयसम्मितौ ३३

ससुण्डिका विमानोऽयं सुरासुरनरार्चिता
सुण्डिकाग्रे यदेतस्यां शालाप्रासादसंमुखम् ३४
संस्तुता किन्नरैः सिद्धैस्तदा स्याद्भ्रमरावलिः
वक्त्रशालाविहीना तु पार्श्वशालाद्वयान्विता ३५
तद्रूपा तत्प्रमाणा या स्वस्तिकी सा प्रकीर्तिता
प्रासादाभिमुखी शाला स्वस्तिक्यामेव चेद्भवेत् ३६
तदानीं हंसमालति विख्याता जगती भुवि
मुख्यस्य पार्श्वद्वितये भागं वार्यन्तरं यदा ३७
कृत्वा प्रासादयद्वग्रे भद्रमानेन निर्गमम्
प्रासादसंमितं सूत्रं शालास्तु गलभूषिताः ३८
शुण्डिका तदवस्थे च मुखे स्याच्छालया विना
कुलशैला तदा ज्ञेया हंसमालागमाश्रया ३९
सदा महेश्वरस्येष्टा स्कन्दस्य तु विशेषतः
अस्या एव यदा शाला पुरोभद्रे विधीयते ४०
तदा महीधरी प्रोक्ता महीधरमनःप्रिया
चतुरश्रीकृते क्षेत्रे साष्टाविंशतिभाजिते ४१
चतुःषष्टिपदं मध्ये कुर्याद्देवालयं बुधः
चतुष्पदो भ्रमः कार्यो देवागारस्य सर्वतः ४२
भ्रमसूत्रस्य कर्णस्था द्विपदायतविस्तृताः
शालाश्चतुस्तस्रः कर्तव्या भागिकभ्रमवेष्टिताः ४३
तासां पार्श्वेषु सन्त्यज्य भ्रमाद्भागचतुष्टयम्
शालां कं --- प्रकुर्वीत --- भागायतविस्तृतम् ४४

एकभागिकविस्तारः कर्णः स्यात्पार्श्वशालयोः
मध्ये भागे जलाध्वा स्याद्विहाय त्रिदशं वहिः ४५
द्विभागविस्तृतां तां च कुर्याद्भागत्रयायताम्
अन्तरेण जलाध्वा स्याद्भद्रपार्श्वजलालयोः ४६
स च भागार्धमायामात् प्रविष्टस्तावदेव च
कृत्वा तिसृषु दिक्ष्वेवं सुषिडकाकन्दमध्यतः ४७
प्रासादार्धसमायामौ सम्यक्तुण्डौ निवेशयेत्
तयोरपि च शाले द्वे भ्रमक्रमविभूषिते ४८
कार्ये मन्दारशाला स्यादेवं हरमनःप्रिया
सुषिडकायां यदा तस्याः शाला सम्पद्यते तदा ४९
अनङ्गलेखा भवति जगती पार्वतीप्रिया
यत्रास्मिन्नेव विन्यासे मुखशाले विना कृते ५०
शुषिडकागण्ड---न्यौ शाला सोपानमालिकाः
मुखशालान्विता सैव यदा नागाङ्गना तदा ५१
चतुरश्रीकृते क्षेत्रे द्वात्रिंशद्भागविभाजिते
चतुःषष्टिपदं मध्ये कर्तव्यं सुरमन्दिरम् ५२
कार्यस्तस्य भ्रमः सम्यक्समन्ताच्च चतुष्पदः
भ्रमन्ती द्विपदायामे शाले तु भ्रमसंयुतौ ५३
स्वप्रमाणाद्विधातव्ये मध्यगे भद्रकर्णयोः
स्युः षोडशपद्रः कन्दास्तेषु शालाश्चतुष्पदाः ५४
चतुर्ष्वपि च कर्णेषु प्रविष्टा भ्रमजाः पदम्
कर्तव्यं द्विपदायामं भद्रशालायुगं तथा ५५

विस्तारात् प्र --- पादोनमन्योन्याभिमिखं भवेत्
आयताद् द्वयंशविस्तारा पदेनैकेन वेष्टिता ५६
भद्रशाला विधातव्या सार्धत्रिपदनिर्गमा
सौम्यानिलीवारुणीषु नैर्ऋतीयाम्ययोरपि ५७
शालास्तिस्रः प्रतिदिशमशालाग्नेय्यायदिना मुरविद्विषः
अस्या एव मुखे शाला यदि तन्मकरध्वजा ५८
अमराणां कृतानन्दा कृत्वैनां मोक्षमाप्नुयात्
मुखशालां परित्यज्य यदैकैकाग्रकर्णयोः ५९
शाला प्रदीयते सा स्यान्नन्द्यावर्तयत्यहर्पतेः
विकर्णकन्दधोराग्रे यदास्याः पृष्ठवंशगा ६०
द्विभागायामविस्तारा शाला भवति शोभना
चतुर्ष्संस्थिता शाला शालायाः संमुखी भवेत् ६१
ताम्रमूला तदा ज्ञेयाः ब्रह्मविष्णुहरिप्रिया
यदास्याः पृष्ठवंशस्था हस्तायाम्योत्तरात्तथा ६२
शाले क्रियेते तदा ज्ञेया पारिजातकमञ्जरी
वारणीचतुष्टःस्थिता शालायाः सम्मुखी भवेत् ६३
ताम्रयाम्यासौम्यासु शालाः स्युर्यदि वंशगाः
प्रिया स्यात्सर्वदेवानां तदा चूडामणिः प्रभोः ६४
चतुरश्रीकृते क्षेत्रे चतुरश्रः समन्ततः
दशांशः स्यादुभायान्ता मध्ये प्रासादनायकः ६५
---पुरतश्चैवं पार्श्वयोरुभयोरपि
भ्रमास्तस्या विधातव्याः --- पञ्चभिः पदैः ६६

कर्णकन्दाश्च कर्तव्या भ्रमसूत्राद्बहिः स्थिताः
द्विभागायामविस्ताराश्चतुःशालोपशोभिताः ६७
अमुनैव क्रमेण स्युर्भद्रकन्दाः पदाधिकाः
मूलप्रासादमालायां मालात्रितयधारिणाम् ६८
कर्णे कर्णे तु याः शालास्ता द्व्यंशायामविस्तृताः
द्विभागिकजलाधारास्तथा भागपरिभ्रमाः ६९
पदप्रविष्टाम्बुपदा भ्रमपद्धतिसंयुताः
तुल्याश्चतुर्षु कर्णेषु तुल्या भद्रत्रयेऽपि च ७०
भागद्वितयविस्तीर्णा भागत्रितयमायताः
सृग भ्रमाश्च कर्तव्या भ्रमशालादिशान्तयोः ७१
शेषं च पूर्ववत्कार्यं शुण्डिकागण्डमण्डनम्
स्यात्कर्णमञ्जरीत्येषा त्रिलोक्यानन्ददायिनी ७२
कर्णमञ्जरिकाभद्रे विभक्ते दशभिः पदैः
द्विभागायामविस्तारां तुर्यां शालां निवेशयेत् ७३
उदक क्षणपूर्वाणि मुखान्यासां प्रकल्पयेत्
परिक्रमस्त्रिस्तु सर्वासां भागैकः सर्वतो भवेत् ७४
द्वौ भागौ भद्रकर्णाभ्यां संक्षेपोभ्याभयपार्श्वयो
भागिकोभयविस्तारा भद्रेऽन्या कर्णिका भवेत् ७५
पदैः षोडशभिर्युक्ता विचित्रभ्रमविभ्रमं
भद्रास्या च चतुष्की स्यात्पुरतः संवृतान्तरः ७६
श्रीमण्डपं प्रकुर्वीत प्रभूतस्तम्भमण्डितम्
दितामेतानेन परिक्षिप्तं छाद्यकाले हसंयुत ७७

एश्वास्याद्विश्वरूपे च कस्यायास्तु पुरस्करा
चतुष्किकाभिस्तिसृभिर्भवेत्त्रैलोक्यसुन्दरी ७८
चतुरश्रीकृते क्षेत्रे भक्ते द्वादशभिः पदैः
त्रिभागायामविस्तारा मध्ये शाला चतुर्मुखी ७९
सर्वतः सार्धभागाश्च कर्तव्या पदपद्धतिः
तस्याः प्रागुदक --- शालाचतुष्टयम् ८०
द्विभागायामविस्तारं विधातव्यं सुशोभनम्
भागिकालिन्दकेनैतत्स्यात्प्राक्से --- न वेष्टितम् ८१
कद्यास्थाभिर्द्विभागाभिः कर्णिकाभिरलङ्कृतम्
एवैतत् कर्णमञ्जर्याः कर्णे --- विधीयते ८२
जगती स्याच्छिवस्येष्टा तदा गन्धर्वमालिका
इयवे वापरे भागे चतुर्थ्या शालयान्वितं ८३
विज्ञेया जगती नाम्ना विद्याधरकुमारिका
अपरस्यां चतुर्थीं तु हित्वा शालां विनीयते ८४
ते द्वे --- कुद्यो कुर्वीत सुभद्रां त्रिदशप्रियाम्
चतसृषु भद्रेषु प्रत्येकं म्पञ्च कर्णिगा ८५
शालाः स्युर्यदिश्चन्द्राष्टा तदा स्यात्सिंहपञ्जरा
चतुरश्रीकृते क्षेत्रे चतुर्दशविभाजिते ८६
त्रिभागायामविस्तीर्णं मध्ये देवकुलं भवेत्
भागेनैकेन कर्तव्यो भ्रमो दिक्षु तिसृष्वथ ८७
प्रासादायामविस्तीर्णे तस्याग्रे मुखमण्डपः
भद्रस्य पार्श्वद्वितये बाह्यतो भद्रविस्तृतम् ८८

शालायुग्मं विधातव्यं त्रिपदायामविस्तृति
भागिकभद्रमाणोपेतं यदिकाच्च पयास्वित ८९
द्विभागायामविस्तारे भागिकभ्रमणान्विते
शाले द्वे पुरतः कार्ये साम्मुख्याच्च परस्परम् ९०
पञ्चस्वलं भवेदेवं पृष्ठभद्रं यदा शुभम्
याम्योत्तरे चतुःशाले भद्रद्वयपञ्चकञ्जरा ९१
पृष्ठभद्रं यदैतस्या--- न्मध्यशालया
कन्नाभद्रे तथा स्यायुते गन्धर्वनगरी तदा ९२
पञ्च त्रीणयेव भद्राणि पञ्चशालान्वितानि च
शिशुतत्षट्त्रिंशत्तमा ज्ञेया सा जगत्यमरावती ९३
शुण्डिकाग्रे यदैतस्याः शाला सम्पद्यते क्वचित्
तदा स्याद्दन्तचूडेति जगती जगतः प्रिया ९४
इयनि शुण्डिकाशाला गण्डशालाद्वयान्विताः
त्रिदशेन्द्रसभा ज्ञेया ससुण्डी देवयन्त्रिका ९५
इति चतुरस्त्राणां कीर्त्यतेषायताः कासानकामा
सप्तभागायते क्षेत्रे भागपञ्चकविस्तृते ९६
द्विभागायतविस्तारे स्तः शाले वामदक्षिणे
चतुष्किकैकभागेन तयोरेवाग्रतो भवेत् ९७
भ्रमश्च भागिको मध्ये समन्ताच्च विधीयते
प्रतोल्या भूषिता खण्डशुण्डिकाभिरलङ्कृता ९८
मत्तवारणशोभाढ्या यमालेखा प्रकीर्तिता
यदा स्यात्पृष्ठतः कन्दो भागत्रितयविस्तृतः ९९

भागत्रितयनिष्क्रामश्चतुर्धा भाजितः पुनः
द्विभागायामविस्तारा शाला भागद्वयं भ्रमः १००
तदा पयोधरा नेत्रा शालाभ्यामग्रपृष्ठयोः
नेत्राद्याश्चेत्यरशालास्यातां तु काया १०१
पौरस्त्ययोरुभयोः साम्नमूत्कन्दो भागनिर्गतः
भागमन्तः प्रविष्टश्च विभाज्यः सोऽपि पूर्ववत् १०२
शालयोः स्यांतमोमानभ्रमयोरपि पूर्ववत्
पार्श्वयोर्भ्रामरयं चागौ द्वे च चेन्मूलशालायाः १०३
शेषं तु पूर्ववत्सर्वदोर्दण्डा प्रासादाः प्रकीर्तिताः
दोर्दण्डयोस्तु पार्श्वेऽपि शालासुश्लिष्टकर्णयोः १०४
राक्षसानिलयोः शाले कुर्यादाखण्डला भवेत्
अखण्डालायास्तु यदा पश्चाच्छाला विधीयते १०५
पयो यं सरयोनि इव वच्छिदेति जगती भवेत्
शिवायं वारुणी यद्वा शालात्रयविभूषिता १०६
शुण्डिकारालय मचेन्माहेन्द्री वंपका तदा
कोकैणेषु यमेलायासाद्यदा शालाचतुष्टय १०७
भद्रत्रयोऽपि तिस्त्रस्ताः पूर्वभद्रममालकम्
ये कर्ण व---कन्दाः स्युः सार्धद्वयंशविनिर्गतः १०८
चतुर्भिस्तेषु भक्तेषु शाला भागद्वयं भवेत्
भागं भागं भ्रमरयः स्युः कर्णशाला इमा बहिः १०९
त्रिनिष्क्रान्ता सृविस्तीर्णा भद्रकन्दास्थिते बहिः
चतुर्भित्त्येषुतैः शाला स्युरार्धो भ्रमस्तथा ११०

पदार्धसंमितः कुष्टौ जलमार्गो विधीयते
पृष्ठसाधोसिकास्तस्या द्वे कुलामोदिकाष्टमा १११
भागार्धयलमाला--द्वितयशालिना
पृष्ठभद्रेण जगतीतिलकाले केचिस्तुता ११२
एतस्यां शुरिडकायां स्याच्छाला चेन्मुखभूषणम्
असौ --- पल्लवा नाम जगती जायते तदा ११३
तिलका गरडकरडेषु शाले द्वे भवतो यदा
तेदा सिद्धार्थसंमुखां तदा विद्याधरी भवेत् ११४
त्रिविस्तृतं द्विनिष्क्रान्तं पृष्ठशालातलं यदि
विद्याधर्याः पृष्ठभद्रे तदा यत्नं विनिर्दिशेत् ११५
षड्भागविस्तृते क्षेत्रे दशभागकृतायते
द्विभागायामविस्तारं कुर्याच्छालात्रयं बुधः ११६
तदग्रे तत्समं कुर्यान्मरडपा अधिवाधिकात्
यथाकामं प्रकुर्वीत कर्मशोभाविभूतये ११७
---भागं भ्रमं कुर्यात्तासां पार्श्वचतुष्टये
विशेषकरणायंच शालानां मध्यमैरपि ११८
मत्तवारणसंयुक्ताः सुरिडकागरडमरिडताः
इयं त्रिकूटा जगती ख्याता तृपुषपूर्या ११९
त्रिकूटा पूर्ववंशस्था त्रिभागायामविस्तृता
विदध्यात्सवमां शालां प्राग्वत्स्याच्चित्रकूटिका १२०
यथा पृष्ठे तथाग्रेऽपि यदि शाला विधीयते
तदा सरनिकूटीति विज्ञेया जगती बुधैः १२१

युक्ता प्राणास्य लाभ्यामग्रशालाविवर्जिता
उपमेवाजोत्तमा सा जगती विश्रुता भुवि १२२
नैर्ऋतानलवाय्वीशकर्णप्रासादकैर्युता
त्रिकूटैर्भवेन्नन्दै विभक्तषडला यथा १२३
चित्रकूटा क्रमानर्यां द्विभजनं पूर्वविकूटवद् विचक्षणः
त्रिकूटायामतो रूपे सिद्धिद्वयायामविस्तृतम् १२४
कर्णे कर्णे कृतं कन्दं चतुर्धा प्रविभाजयेत्
भागद्वयेन शाला स्याद्भागेन भ्रमणं तथा १२५
मूलतार्धविस्तारं भवतश्चेह मानतः
याम्योत्तरे चतुर्भागविस्तार भागं निर्गताम् १२६
--- भद्रं भागिकद्वयान्वितम्
शेषं तु भ्रमणं तत्र मध्यपार्श्वेषु कारयेत् १२७
एवमग्रेऽपि शाले द्वे द्वारस्योभयपार्श्वयोः
कर्तव्ये भागनिष्क्रान्ते भागिकायामविस्तृती १२८
पृष्ठभद्रं च कर्तव्यं सार्धांशद्वयविस्तृतम्
द्विभागनिर्गमं युक्तं शालया सार्धभागया १२९
याम्योत्तरेण चास्यैव कार्यं शालाद्वयं ततः
प्रमाणे पसन्नकार्ये भागे प्रवेशनम् १३०
शेषो भ्रमः स्याच्छालानां सप्तानां मध्यगस्ततः
स्याच्छैवी श्रयणी त्वेषा सर्वामरगणप्रिया १३१
अस्या एव मुखे शाला यदा सञ्जायते तदा
त्रिविक्रमेति विख्याता जगती जायते शुभा १३२

यदा सार्धविनिष्क्रान्ते सार्धांशद्वयविस्तृते
पार्श्वभद्रद्वये शाले भवेतां भागविस्तृते १३३
--- साधभागिकं भ्रमणान्विते
लिप्यते चापि मा शाला क्रमायाता तदा भवेत् १३४
शालायाः शुण्डिकाग्रे तु त्रिपथा सैव जायते
चतुर्यातो प्रोक्ता कथ्यन्ते वृत्तजातयः १३५
चतुरश्रीकृते क्षेत्रे चतुर्भागविभाजिते
मध्ये देवगृहं वृत्तं सार्धांशायामविस्तृति १३६
भ्रमयेज्जगतीवृत्तं समगां भागिकं ततः
पूर्वोक्तविधिना कार्यं पार्श्वतो मत्तवारणम् १३७
गोपुरद्वारशोभाढ्या जगती वलया भवेत्
वलयापृष्ठतः कन्दं मूलशालासमायतम् १३८
पूर्वोक्तविधिना भक्तां शालां कुर्यात्तदर्धतः
कलशेयं समाख्याता जगती कलशाकृतिः १३९
कर्णस्थं द्विपदायामं कर्णशालाचतुष्टयम्
चतुरश्रं भवेद्यत्र शातार्म्ये--- भिधीयते १४०
सप्तभागायते क्षेत्रे चतुरश्रे समन्ततः
भागांस्त्रीन्वर्जयेदग्रे चतुरः पृव्यन्तरश्चतान् १४१
सार्धांस्त्रीन्पार्श्वयोर्भागांस्त्यक्त्वा गर्भततोकयेत्
द्विभागायामविस्तारं वृत्तं स्याद्देवमन्दिरम् १४२
भागमेकं भ्रमस्तस्य विधातव्यः समन्ततः
भ्रमरयाः पृष्ठतः कन्दो भागायामविभूषितः १४३

तस्यार्धेन भवेच्छाला तदर्धेन परिक्रमः
गर्भाद्भागद्वयस्यान्त ईशानानलयोर्दिशोः १४४
द्विभागौ भवतः कन्दावर्धभागप्रवेशितौ
पृष्ठशालोर्ध्वगे तिर्यक्सूत्रेण दत्ते भ्रमान्तिके १४५
कर्णिकाद्वितयं कार्यं राक्षसानिलयोर्दिशोः
व्ययशालां च कुर्वीत पृष्ठशालासमां ततः १४६
प्राक्पश्चात् कन्दगर्भस्था सूत्रद्वितययोगतः
कुर्वीत कर्णिकां तीक्ष्णां पार्श्वयोरुभयोरपि १४७
शेषा भ पूर्ववत् सर्वा शुण्डिकादिक्रिया भवेत्
यदागभी करवीरेयमीशादित्रिदशप्रिया १४८
एतस्या एव पृष्ठस्था यदा सन्त्यष्ट कर्णिकाः
वामशाले विधीयेते नलिनीति तदा भवेत् १४९
दत्तंशस्य सालिख्यात्तद्यौ दृशभिः पदैः
सूत्राणि पातयेत्तस्य ततो दिक्षु विदिक्षु च १५०
प्रासादभ्रमणस्यान्ते द्विपदायामविस्तृतीन्
कुर्वीताष्टसु सम्पातेष्वष्टौ कन्दान् समन्ततः १५१
विधाय तां चतुर्भक्तां कुर्याद् ज्ञामांस्तथा
अन्तरेण च कन्दानां कर्तव्यं कर्णिकाष्टाकम् १५२
देशात्सार्धं यदा सूत्रे यथा सम्पत्स्यते मिथः
पार्श्वद्वयात् कर्णिकानां संस्थानं स्यात्तथाविधम् १५३
भक्त्वैवं सर्वभद्राणि त्रिपदोऽन्तः सुरालयः
पार्श्वभ्रमो व्यर्धपादो दशधा भाजिते भवेत् १५४

कन्दाश्च द्विपदाः कार्या बहिर्दिक्षु विदिक्षु च
अन्योन्याभिमुखास्तेषु शालाः कार्या यथोदिताः १५५
शक्तियस्ता समीक्षते विष्णोरप्रतिमौजसः
कार्येयं तस्य तान्येस्युः पुण्डरीकविनामतः १५६
एतस्याः कर्णिकास्थाने यदा वृत्तं प्रकल्प्यते
तदानीमातपत्रं स्यात्कर्तव्या ब्रह्मणश्च सा १५७
कृत्वा वृत्तायतं क्षेत्रं विभजेद्दशभिः पदैः
तस्य मध्ये विधातव्यं देवागारं पदैस्त्रिभिः १५८
तस्य पार्श्वेषु कर्तव्यो भ्रमः सार्धद्विभागिकः
द्विभागं बाह्यवृत्तं स्यात्तत्र कुर्यादिमां क्रियाम् १५९
भागैर्द्वादशभिस्तच्च तुल्यमानैर्विभाजयेत्
एकैकं च पुनर्भागं चतुर्धा तेषु भाजयेत् १६०
द्विभागायामविस्तारा शाला मध्ये विधीयते
भागिकश्चतुरश्रश्च दिक्षा लानृत्रितये भ्रमः १६१
वामदक्षिणतः शाले तां ये भवतः शुभे
ते वृत्ते संविधातव्ये संमुखे च परस्परम् १६२
शाला तु खुमागंस्याच्छालार्धभागार्धविस्तृतः
कल्प्यस्तेनैव मानेन सच्चावा भ्रमणं भवेत् १६३
जगत्येषां समाख्याता चक्रवालेति नामतः
दिवाकराय कर्तव्या सग्रहायाथवेन्दवे १६४
समक्षवायभद्रायामात्रिषुक्तायं वा पुन
चतुरश्रीकृते क्षेत्रे दशभागविभाजिते १६५

गर्भाट्कोणगसूत्रेण सर्वतो वृत्तमालिखेत्
बहिस्त्रिपदविस्तारं कन्दं कुर्याच्चतुष्पदम् १६६
शालायां च द्विपदायामां विस्तारात्सार्धभागिकाम्
शेषं तु भद्रशालायाः समन्ताद् भ्रमणं भवेत् १६७
भद्रस्योभयतो वृत्ते द्विभागायतविस्तृते
शाले च वृत्तयोरन्तर्भागिकायामविस्तृती १६८
याम्यसौम्यापरास्वेवं दिक्षु भद्रत्रयं भवेत्
साधमायामविस्तारास्तदर्धभ्रमणान्विताः १६९
शाला विदिक्षु कर्तव्याः शोभनाश्चतसृष्वपि
भद्रमध्ये स्थितां शालां हित्वा प्राच्या तु सा भवेत् १७०
सार्धमायामविस्तारास्तत्तदर्धभ्रमणान्विता
सनक्षत्राय सोमाय कर्तव्या पुष्टिहेतवे १७१
चतुरश्रीकृते क्षेत्रे दशभागविभाजिते
पञ्चभागायतां मध्ये शालां वृत्तां प्रकल्पयेत् १७२
साधभागद्वयस्तमिता देवागारस्य बाह्यतः
भ्रमण संविद्यातव्य कर्णशालाश्च कर्णगाः १७३
कर्णमानं बहिर्वृत्तं भ्रमयित्वासारन्दतः
भद्रोपभद्रकर्णेषु वृत्ताः शालाः प्रकल्पयेत् १७४
पदद्वयसमायामा पदत्रितयविस्तृता
भागिकाभ्रमणोपेता शालाः कुर्वीत भद्रजाः १७५
द्वे भद्रात्पार्श्वयोः शाले द्वे च प्रतिरथाश्रये
भागिकायामविस्तारा कुर्यादर्धपरिभ्रमे १७६

वौ हल्यायामतः साधभागा शालार्धकर्णगा
तासां तदर्धमानेन विधातव्यः परिक्रमः १७७
प्रविष्टौ तु पदाधेन भद्रान् प्रतिरथावुभौ
इत्येषा जगती प्रोक्ता मानतश्चन्द्रमण्डला १७८
अथ वृत्ता --- ब्रूमो जगतीः षडयथाक्रमम्
पञ्चभागायताः क्षेत्रा विस्तरेण चतुष्पदाः १७९
विद्धयादायतं वृत्तं चमस्यां भवभागिकः
मध्ये स्यात् त्रिपदास्तामा सद्विपदविस्तृताः १८०
मत्तवारणसंयुक्ता प्रतोल्यालङ्कृता शुभा
सोपानशुण्डिकाप्रान्तं --- गण्डितमण्डिता १८१
उक्तेयं मातुलिङ्गीति जगत्यमरवल्लभा
अस्या एव यदा पृष्ठे द्विभागायामविस्तृतिः १८२
शाला पूर्वक्रमेण स्यात्तदा ज्ञेया घटीति सा
तद्रूपे तद्यतालालं द्वे शाले वामदक्षिणे १८३
यदि पश्चिमशाला च तत्रेस्यायमती जगती तदा
घटीकर्णेषु सर्वेषु द्विभागायामविस्तृती १८४
यदि स्युर्भ्रमसंयुक्ता शाला प्राग्वद विभाजिता
कुरुयेर्धायंतरिक्षे द्वे च पृष्टे वार्तन्तदूर्य १८५
कालिङ्गीयं भवेदेवं पार्श्वयो अंयुर्लमदात्रेषु
एतस्यां तु यदा शाला शुण्डिकाननसंस्थिता
वृत्तायतविनिर्माणा जगती स्यात् ---
एता वृत्तायताः ।

ब्रूमोऽथाष्टाश्रिसंस्थाना जगतीः शुभलक्षणाः १८७
चतुरश्रीकृतं क्षेत्रं सपादैर्दशभिर्भजेत्
परित्यजेत्ततः सूत्रं कर्णे कर्णे पदत्रयम् १८८
सपादांश्चतुरो भागान् मध्यभागेऽवशेषयेत्
संसिध्यते च साष्टाश्रि तस्यार्धे स्यात्सुरालयः १८९
अष्टाश्रिमध्यभागस्थः --- शेषं भ्रमणं भवेत्
प्रासादश्च चतुर्द्वारश्च चतुर्भिर्मण्डपैर्युतः १९०
प्रासादसाकसूत्र मुखलिङ्गं निवेशयेत्
मूलकन्दार्धतः कन्दा क्रमादिक्षु च १९१
तुल्यप्रमाणकानष्टौ चतुर्भागविभाजिता
भ्रमशालाश्च पूर्वोक्तक्रमेण परिकल्पयेत् १९२
सोपानशुण्डिकागण्डस्ता गोपुराद्यैरलङ्कृताः
करव्यासामेरुपेता ववा सर्वायमुदाहृता १९३
कृत्वा पूर्ववदष्टाश्रि क्षेत्रं भद्रं द्विधा भजेत्
कुर्याद्भागार्धकं भद्रे पक्षयोश्च विनिर्गतम् १९४
तद्विस्तारं भजेत् षड्भिर्निर्गमस्तैस्त्रिभिः पदैः
परिक्रमो भवेत् -- पार्श्वयोः पृष्ठतोऽग्रतः १९५
शेषं शाला युगं कार्यं भागद्वितयमायतम्
साधभागिकविस्तारं संघचेस्यरस्यं च १९६
अनेनैव प्रकारेण भद्रे भद्रे भवेद्गतिः
कर्णभद्रं विधातव्यं त्रिपदायामविस्तृति १९७
चतुर्धा भाजिते तस्मिन् भागेन भ्रमणं भवेत्

शेषं तु शाला विज्ञेया द्विपदायामविस्तृता १९८
विदिगन्तेषु सर्वेषु न्यासोऽयमतिसुन्दरः
मूलशाला तु कन्दार्धे भ्रमश्चाधीभ्रमं ततः १९९
मातृकेयं समाख्याता जगतुपसरचन्दितकिन्नरोशप्रदिति
भद्रं --- पदेभ्यः स्याद्भागत्रितयनिर्गतम् २००
चतुर्भागिकविस्तारं त्रिपदायामकन्दकम्
तदा स्याच्छेखरा नाम भद्रत्रितयभूषिता २०१
नित्यप्रमुदितानेकदेववृत्तदकृतास्पदा
प्रागष्टच श्रीकृते क्षेत्रे चतुर्भागविभाजिते २०२
द्विभागायामविस्तारे प्रासादे दशमे भ्रमे
अश्रिभिः समविस्तारादासष्टौ--- प्रकल्पयेत् २०३
सदा भागप्रविस्तारान् तांश्च कुर्यात्पृथक्पृथक्
निर्गमेण चतुर्भागान् भागिक भ्रमणान्वितान् २०४
द्विभागायामविस्तारं मध्ये शालाद्वयं भवेत्
पद्मगर्भेयमित्युक्ता प्रजापतिमनःप्रिया २०५
भवेदार्यादिदेवीनां सदा चित्तप्रसादिनी
विधाय क्षेत्रमष्टासृतवदर्धायामविस्तृतौ २०६
मध्ये देवगृहं कार्यं तदर्धेन भ्रमो बहिः
भद्रं भवेद् द्वादशभिस्तैश्चतुर्भिर्विनिर्गमः २०७
तस्य भद्राणां निर्गमोऽपि चतुष्पदः
विस्तारः षट्पदस्तेषां चतुर्भिस्तं विभाजयेत् २०८
भागार्धेन शाला स्याद्भागत्रितयसमायता

भ्रमश्च स्यात्तु कर्तव्यो भागं तत्पार्श्वयोः रुद्राया २०९
द्विभागायामविस्तारे शाले स्यातां पदभ्रमे
इयमंशुमती प्रोक्ता जगती शुभलक्षणा २१०
विधाय क्षेत्रमष्टाश्रि तदर्धायामविस्तृति
मध्ये देवगृहं कार्यं तदर्धेन भ्रमो बहिः २११
प्रासादसमविस्तारं भद्रं कृत्वा ततो भजेत्
चतुर्दशभिरस्य स्यान्निर्तियमो दशभिश्च तैः २१२
मौलिकभ्रमणस्यान्ते त्रिपदायतविस्तृता
शालातिशोभना कार्या साधभागभ्रमान्विता २१३
द्विपदायामविस्तारे भागिकभ्रमणान्विते
कर्तव्ये पार्श्वयोस्तस्याः शाले द्वे चारुदर्शने २१४
प्रतिभद्रं विधातव्यं भागपञ्चकविस्तृतम्
भागत्रयं प्रविष्टं च तत्र शाला त्रिभागिकी २१५
भागद्वितयविस्तारा भागिकभ्रमणान्विता
पार्श्वयोः प्रतिभद्रस्य कर्णिके भागनिर्गमे २१६
साधभागायते स्यातां कर्णाः शालायुगान्विताः
पूर्ववच्छुण्डिकाद्यं च कमलेयमुदाहृता २१७
चतुर्दशविभक्तासु सप्तस्वस्तिषु कल्पयेत्
निर्गमायामतुल्यासु शालाः पञ्च पृथक्पृथक् २१८
अग्रभद्रे तु कर्तव्यं शालात्रितयमुत्तमम्
इति विज्ञेय समाख्याता शाला वज्रधरप्रिया २१९
इत्थं जगत्यश्चतुरश्रसंस्थाः

स्पदायतां वर्तुलसन्निवेशाः
वृत्तायता थस्तियुताश्चयः सम्यग्
जङ्घाः सदा शिल्पिभिरप्रमत्तैः २२०

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे जगतीलक्षणाध्यायो नामैकोनसप्ततितमः

अथ लिङ्गपीठप्रतिमालक्षणं नाम सप्ततितमोऽध्यायः

अथ प्रमाणं लिङ्गानां लक्षणं चाभिधीयते
लोहं हस्तत्रिभागेन कनीयसम् १
व्यंशवृद्धानावेवं स्युराहस्तात्रतवाविधे
ह्रस्वमध्योत्तमाख्यानि त्रीणि त्रीणयकल्पकादिभिः २
लिङ्गनामभिः प्रासाद् स्यानुसारतः
अतश्च द्विगुणानि स्युवारुणाजानि प्रमाणतः ३
त्रिगुणान्यस्माज्जातानि मृत्तिकाप्रभवानि च
स्वस्य कनिष्ठस्य पदेन परिवर्तनात् ४
कनिष्ठायाने हीनं च कर्तव्यं लक्षणं बुधैः
सप्तमे यदि वा तिर्यग्रज्जलोधसनिभाम् ५
स्तम्भद्रातौ दैतकैवलेषा विष्णुवारिता
पक्षरेखा विधातव्या लक्षणोद्धरणार्धनी ६
पक्षक्षेत्रे कृते षोढा त्यक्ताधांशकरैर्वृता
पुत्रार्थिनां पक्षलेखा हिता राद्यपिर्थिनानामपि ७
अष्टभिर्नवभिर्वास्मिन् भक्ते त्यक्त्वांशकावधः

स्यात्पद्मलेखा षड्भिश्च सप्तभिश्चेष्टकामदा ८
यथा षोडशभिर्भक्ते विहायाधोंऽशकद्वयम्
पशुरेखासरैर्नन्दैः स्तर्यैः शक्रैश्च शस्यते ९
लिङ्गेऽङ्गुलानि यावन्ति यवत्र्यंशैस्तदुन्मितैः
लक्षणाद्वारणा कार्यमन्तरं लक्ष्यरेखयोः १०
रेखान्तरेषु मांशस्य नर्थांशे पूर्वकसम्मितम्
खातं कुर्वीत रेखायां विस्तारं च विचक्षणः ११
कुर्यान्न लक्षणे द्वारं लिङ्गे लोहेच्चरत्रजे
बाणलिङ्गे चले चापि तथातोजाहिलक्षणम् १२
पूजांशमेकादशधा भक्त्वोर्ध्वं सर्वतः समाम्
तिर्यक् तथैकनवतिं भागानां शिरसो भजेत् १३
भवेत्सहस्रं लिङ्गानां सैकमित्यसमैः पदैः
सहस्रलिङ्गमित्युक्तं पञ्चाङ्कव्यङ्कमेवता १४
अर्था विभागं ववधा लिङ्गे सर्वमे भावयेत्
ऊर्ध्वं भागत्रयं त्यक्त्वा भागभागेन कल्पयेत् १५
भागेन शकास्य ग्रीवाः कुर्यात्ततः परम्
भागद्वयेन स्कन्धांशपशै युग्मपटानि च १६
पुष्पसंस्थे च माशासु विहिते चतसृष्वपि
चतुर्मुखं भवेल्लिङ्गमर्चितं सर्वकामदम् १७
त्रिमुखं तु ललाटानाङ्गान्यंशेन साङ्घ्रिणा
पृथक्पृथक् विधेयानि शेषांशात्स्कन्धकल्पना १८
एकचक्रे तु साधेन ललाटादीनि कल्पयेत्

नवभक्ते त्यजेद् द्वौ द्वौ विभागौ पार्श्वयोर्द्वयोः १९
विधिरेष चतुर्वक्त्रे विभक्ते पार्श्वयोर्द्वयोः
साधं सार्धं त्यजेद् भूषामेकवक्त्रेर्धशस्य च २०
चन्द्रार्धालङ्कृतं कार्यं कूटाकूटधरं शिरः
शिरसो वर्तते कार्या पूर्वप्रोक्तेन वर्त्मना २१
एकत्र चातुरो स्यातां विसृते मुखनिर्गमः
स्याद्वा विभागै राकेन्द्रि काराख्यैर्यथाक्रमम् २२
मुखलिङ्गं न कर्तव्यं लिङ्गात्सर्वसमादृते
सर्वेषां मुखलिङ्गानां द्विदलं पीठमिष्यते २३
तैज दैर्घ्य जायन्ते त्रयस्त्रिंशत् सहोदितैः
लौहानि तद्वद्दारूत्थान्यश्ममृत्प्रभवानि च
तेषां यवनवाल्यायान्यान्तराणि च ततोऽपि षट्
चतुराद्याश्चतुर्वृद्धा हस्तैः सहस्तपद्धतः २५
ये प्रासादा निरन्धारा नवलिङ्गानि तेष्विह
पञ्च --- द्वादशाद्येषु साधारेष्वा शतार्धतः २६
एकाद्येकोत्तरैहस्तैः शैलजानि प्रचक्षते
प्रासादगर्भमानाद्वा पञ्चदशैस्त्रिभिरुत्तमम् २७
नवांशैः पञ्चभिर्मध्यं कनीयोऽर्धेन तद्भवेत्
प्रभेदैरन्तरस्तेषां यथायोगं त्रिभिस्त्रिभिः २८
षडन्यानि भवन्त्येवं नवलिङ्गानि पूर्ववत्
तेभ्योऽप्यवान्तरैर्भेदैः प्राग्वत् सत्रिविधैर्युता २९
दिशानया दारुजानि --- यल्लोहजानि च

दैर्घ्ये षोडशधा भक्ते चतुर्भिः सुरपूजितम् ३०
लिङ्गं विष्कम्भतो नाद्यं भूतैः स अंशतैः शुभैः
भवेत् सर्वसमं षड्भिराद्याख्यं चतुरश्रकम् ३१
कोणे कर्णार्धसूत्रेण लाञ्छिते शेषलोपमात्
अष्टाश्रि स्यात् सप्तभक्ते हानातुणेशयोरन्थ ३२
गर्भसीमार्धसूत्रेण वर्तनाद् वृत्तनिर्मिता
अधोमध्योर्ध्वभागाः स्युश्चतुरश्रादिकाः क्रमात् ३३
ब्रह्मविष्णुमहेशानां दैर्घ्यात्लिङ्गे समोत्तमाः
नमस्तेष्वपि लिङ्गानां थुथुभागतः ३४
पूनाधेवै विधातव्यौ भागौ ब्रह्मशिवाश्रयौ
लिङ्गस्य दैर्घ्यजं पीठे विस्तारोऽसौ विधीयते ३५
लिङ्गविस्तारतश्चान्यत् पार्श्वपीठे विशिष्यते
तत्समो ब्रह्मणो भागात् संप्रदायापहृत्य वा ३६
रुद्रभागो विधातव्यो ब्रह्मभागेऽपि तद्वशात्
एवं कृते परिहृतस्त्वाय दोषो भवेदिह ३७
कर्तुः करेष्टेतुश्च स्यात् तस्मिन् परिहृते शुभम्
ऊर्ध्वं त्र्यंशस्य दानेन वर्तनाद्बालचन्द्रमाः ३८
कुक्कुटाण्डचतुर्यस्य त्रपुसम्भवे तु
अष्टमांस्या स तुच्छत्रं दानादर्धस्य वर्तनात् ३९
कृतेऽष्टांशे चतुर्धास्मिन् भागवृद्धया तदुच्यते
पुण्डरीकं विशालाख्यं श्रीवत्सं शक्रसर्वनम् ४०
लिङ्गेषु लक्षणैर्द्वार कर्तव्यः स च कथ्यते

रुद्रभागं त्रिधा भक्त्या द्वाभ्यां लक्षणमुद्धरेत् ४१
शिरोर्धायतो लिङ्गे लक्षणापि तदिष्यते
यद्वायताननं षष्ठे कर्तव्यं नवमांशके ४२
--- वायं --- वाकारपक्षरे विवर्जितम्
पार्श्वरेखात्रिभागेन विस्तृतं चतुरश्रकम् ४३
प्राग्वदष्टास्ति वृत्तं च षडश्रिच्छत्रमस्तकम्
शत्रुमर्दनसंज्ञेन च्छत्रेण समलङ्कृतम् ४४
लिङ्गमिन्द्रार्चितं शस्तमैन्द्रदिग्विजयार्थिनाम्
प्रतिष्ठाप्यमिदं शत्रोर्यद्वा स्तम्भनमिच्छता ४५
लोकपालैश्चेति कुर्यात् --- त्र्यंशार्धार्धलक्षणम्
ऐन्द्रे वज्राभमध्येऽस्य पक्षरेखा विधीयते ४६
स्वदैर्घ्यदलरुद्रांशैः पञ्चभिश्चित्रभावनाम्
विस्तृतं चतुरश्रं स्यान्मध्ये वृत्ते च पूर्ववत् ४७
अश्रिभिः सप्तभिर्युक्तं वृत्तं स्वास्त्रविवर्जितम्
प्राग्विस्तारार्धविस्तारि लक्ष्मस्योतमस्तकम् ४८
यद्वैकादशभिर्भक्ते पक्षयोश्च छिभिस्त्रिभिः
लुप्तैरंशैस्तदेवांशेनोच्छ्रितं छत्रमिष्यते ४९
इदमग्न्यार्चितं लिङ्गं कृत्वाग्नेर्योजयेद्दिशम्
चिकीर्षुणारिसन्तापं प्रतिष्ठाप्यमिदं सदा ५०
स्वदैर्घ्यार्धनवांशानां पञ्चकेन प्रस्तृतम्
कुर्यात्कुरण्डं च षष्टं च पार्श्वयुगं त्रिभिस्त्रिभिः ५१
नवधा सर्वतः कृत्वा त्रींस्त्रीनुत्सुज्य कोणगान्

कुर्वीताप्यस्त्रमेवं स्यात्क्रमाद्वृत्तं विनाश्रिभिः ५२
मूर्धानं दशभिर्भक्त्वा भागत्रितयलोपने
पद्मयोर्विहिते कुर्यादुच्छ्रितिं दशमांशतः ५३
लक्षणं पूर्ववत्कार्यं दण्डाग्रकोरमग्रतः
कथं यान्यादिष्वि --- लिङ्गमेतज्जिगीषुभिः ५४
वधार्थं वा विपक्षाणां सर्वैर्वैवस्वतार्चितम्
आग्नयवत्कविष्णोसाः किन्त्वर्तुस्यदशापिक ५५
स्वराशिर्मस्तकेरुक्ते सार्धभागपरिक्षते
पार्श्वयोः स्यादभिर्लाभ खड्गाग्राभं च शस्यते ५६
खड्गा भिधमिदं लिङ्गं प्रतिष्ठाप्य तु निर्ऋतिः
अथापश्यन्दिरासत्व तत्त्वव्योगं च शाङ्करम् ५७
सार्वसप्तांशकलिंविंष्वास्यारुणान्वितो
चतुर्भिर्लक्ष्म चैतस्य पाशाग्राभं कतासिचत् ५८
लिङ्गमेतत्प्रतिष्ठाप्य वरुणास्वादिगासतम्
योगं तथाप्तवानैशं किन्त्वेतच्छान्तिपुष्टिकृत् ५९
स्वर्धे द्वादशभागांशैः सप्तभिः पुवतेनिले
वेष्णासांकं शोकैः भक्ते द्वित्रिलोपने परश्चतम् ६०
विधेयं पूर्ववद्वृत्तं शरच्छत्रं विनांपरम्
लक्ष्म ध्वजाग्रवच्चास्य त्वैतसृषतांपरिः ६१
अथाप सुदिर्गसेत्थं तथा योगं च शाम्भवम्
द्विषदुच्चाटविश्लेष परौक्षकंपान्विधेश्चाभिः ६२
प्रतिष्ठाप्यमिदं लिङ्गं व्यधीयां --- मनीषिभिः

कार्यवारुणः सव्याक्षं किन्त्वाच्चोसे गुरुदशाम् ६३
पत्तांशेमूर्द्धि पार्श्वस्थ---पादांशपरिच्युतेः
छत्रं स्यात् लक्ष्म चैतस्य गदाग्रसदृशं भवेत् ६४
एतन्ननेश्वरः कृत्वा स्वदिर्गासत्वसाद्यवान्
योगं च शिवधामाप्तयै विभूतिं प्राप्तवानतः ६५
स्वद्वे रुद्रांशकैः षड्भिर्विस्तृतं चतुरश्रकम्
भवभक्ते त्रयं त्यागाद् भवत्यथाश्रि पार्श्वयोः ६६
वृत्तं तु पूर्ववत् कार्यं कुक्कुटाण्डनिभं शिरः
त्र्यंशवसयैर्नवभिः कुक्कुटाण्डमिदं भवेत् ६७
मूषनवभिः पार्श्वयोस्त्रिस्त्रिशातनाः कुक्कुटाण्डकम्
अश्रित्रयं च कर्तव्यं पूजाभागसमाश्रयम् ६८
शूलाग्रप्रतिमं लक्ष्म लिङ्गे कर्तव्यमैश्वरे
स्यादिदं योगसाम्राज्यज्ञानसम्प्राप्तिकारकम् ६९
ब्राह्मे स्याद् रौद्रवत्सर्वे पद्मकुड्मलवच्छिरः
लक्ष्मास्मिन् कमलाकारं लिङ्गे कमलजन्मनः ७०
लिङ्गमेतत्प्रतिष्ठाप्य प्राजापत्यं प्रजापतिः
लेभे पदमतः स्थासिदं व्येषूपदेस्यतिः ७१
वैष्णवे रौद्रवत् सर्वं शिरोऽस्मिन् कुन्तसन्निभम्
भक्ता भवजतुल्यं वा कर्तव्यं लक्ष्म वैष्णवे ७२
पुण्यक्षेत्रोद्भवमिदं द्विजादीनां सिताद्यया
संग्राहयेच्छिलाद्रव्यं गुक्तयोषितयान्विराम् ७३
इदं पक्वमपक्वं वा लोहतू भयगर्भितम्

अपक्वं वज्रलेपाद्यं कर्तव्यं सिद्धिभिः ७४
भूतये लोहजं लिङ्गं सीसकत्रपुवर्जितम्
काञ्चनशत्रुच्छेदकाययि संचितम् ७५
यास्य लिङ्गोक्तलक्ष्मैतत्रापुंसांनागाकुन्मचात्र्यादि
लोहोद्भवं वा यन्मातृ---गुह्यकसिद्धिकृत् ७६
भिद्भूणां चलमेतत्स्यान्मुमुषूणां च वेश्मशु
श्रेष्ठं समस्त रान्ताछ्रं वज्रज्रं ज्रजं तदरिच्छिदे ७७
पद्मरागं महाभृत्यौ सौभाग्या मौक्तिकम्
पुष्परागमहानीलौ---यातीरसमुद्भवम् ७८
यशसे कुलसन्तत्यै तेजसे सूर्यकान्तरम्
ता---च्छं स्फाटिकं सर्वकामद शूलारस्त्रो ७९
मणिजं --- शत्रुद्धयाय पुलका तथा
सस्यकं सस्यनिष्पत्त्यै भोजगं दिव्यसिद्धिदम् ८०
श्रेष्ठं सारक्त--- लिङ्गमारोग्याहितचेतसाम्
वैकृन्तकसहावर्तराकायस्कान्तजं हितम् ८१
द्भुद्र सिस्त्रिषु तन्मन्त्र---जातिसंस्कृतम्
फलं सम्यग्गुणादूह्यमन्यासु मणिजातिषु ८२
वर्णाभिधानसंस्थानविशेषाभ्य --- तद्विदा
पृथियां सपीठं वा तस्यान्नोर्ध्वं नवाङ्गुलात् ८३
सिद्धये चरदारान्तावश्वनकाद्वा प्रशस्यते
सुसंस्थानं सुदीतं चेदवाक्यं पिनयं दोषकृत् ८४
सूक्ष्मोपकोगुणोपेत बलीयान् सर्वदोषकृत्

सान्निध्यकारणं दीप्तिः समस्तमणिजन्मनाम् ८५
मानोन्मानप्रमाणादित्येषु ग्राह्यं नवा बुधैः
शैलं हस्तादधः स्थेयः प्रासादेषु च शस्यते ८६
ततश्चलमपि प्राहुर्हीणाश्रयसिस्त्रियो
इतश्चेदकृत्ये सुयवांकं पिण्डिकाधियाङ्कम् ८७
अर्था भागद्वये ता--- भागपिण्डिकावटे
वृत्ता भागास्त्रयोऽप्यस्य प्रतिष्ठा स्याद्गुहासु च ८८
क्षेत्रे परिगृहीतेऽसौ देशे देशाधिपक्षयः
निष्पन्नरूपप्रगुप्तं मण्डलां भाव्यसाकया ८९
सिद्धरालाप्तधौतेस्मिनभिः सिद्धरसं गतम्
यत्रोक्तः गर्भस्तंकास्यात्तत्रालेखात्समा भवेत् ९०
करखीइजटाकाङ्का हरितालविष्टेधिभिः
सर्वेषाभिः प्रविष्टाभिरनालिं ने लेखनीकृतम् ९१
प्रदेशो यानित्यां विभ्रान्ति व्यक्तिकृद्भवेत्
विषरुद्रजटापथ्या चब्रूकन्दविभीतकैः ९२
सुदर्शनाश्वमाराभ्यामविदुग्धेन संयुतः
प्रलेपो यदि वा पार्श्वे चिह्नाभिव्यक्तिहेतवे ९३
इदानीमिह पीठानां स्तथाव कथ्यते
मानतो नामतोर्घाच विशेषेतरसिद्धये ९४
देव्यादि भेदवतीठं तु पदेको गर्भमानतः
तत्सिद्धिर्मुखतः प्रोक्त शुनं षंगे मुक्तयो ९५
कारादिलिङ्गमानेन यामितंन्यमुखं ततः

भुक्तये मुक्तये चैतान्युपदिष्टानि मुख्यतः ९६
लिङ्गवद्गर्भमानेन सम्यग्वा तानि कल्पयेत्
लिङ्गदैर्घ्यप्रमाणानि मानेषु वेश्मसा ९७
अव्यक्तमुक्तलिङ्गानां समं विष्पतः
कारादिलिङ्गमानेन यामितान्यनुषङ्गतः ९८
भक्तये मुक्तये तेनात्फपदिव्यभानां तददर्घाविस्तृतिः
नृपार्कवित्तजायामास्तदर्धोच्छ्रायविस्तृतिः ९९
उत्तमादि सहार्घानां सिद्धयै कुर्वीत पीठिकाम्
वृत्तं वा चतुरश्रं वा सर्वप्रासादलिङ्गगगम् १००
वृत्तं व्यक्तेषु न हितं विनाशादि ---
विधिना पृथिवी --- पोवकी पूर्णसंज्ञिता १०१
भाभावती त्रपाद्मी च गणयन्ते ताश्च नामतः
इन्द्रादिलोकपालानां कार्या लिङ्गे व्यचसु क्रमात् १०२
ऐशानलिङ्गे रौद्रान्ति---या पीठिका भवेत्
ते चैतासु त्रयेऽन्यास्तु भुक्तिमुक्तिफलप्रदा १०३
पपापपावरावापी वज्र चन्द्रकला स्मृता
संवर्ता नन्दिकावर्ते चैताः साधारणा मताः १०४
अथ लक्षणमेतेषां तासां सर्वासामभिधीयते
ऐन्द्रलिङ्गा वृत्ता पृथ्वी स्तम्भादौ चतुरश्रिका १०५
चतुरश्रस्य यः कर्णस्तच्चतुर्थांशमष्टधा
कृत्वांशसप्तकेनास्य तुर्यात्तर्गत्सकल्पनात् १०६
पाश्चात्यभागयोः पार्श्वे बहिः सूत्रस्थितावथे

वृत्तद्वयस्य भ्रमणं विदधीत विचक्षणः १०७
चतुरश्रे पुरोगर्भसूत्राष्टस्यासवर्धनात्
कृतपत्रभमुद्देशं पार्श्वाभ्यां सूत्रमात्रयेत् १०८
लोपनात् त्यक्तभागस्या होतासि पीठिका भवेत्
आग्नेयलिङ्गं स्याच्छत्रुनाशसन्तापदाहकृत् १०९
क्षेत्रे---चतुरश्रेऽस्य द्वादशांशं परित्यजेत्
पामदो गर्भनस्तेन वृत्तस्यार्धं समालिखेत् ११०
इत्यर्धचन्द्राकारोऽयं सामी भवति पीठिका
याम्यलिङ्गस्य नगरादिक्षिणास्था रिनाशनी १११
चतुरश्रे विभागार्धवर्धनात्पार्श्वयोर्द्वयोः
परिस्वी भागवृद्ध्या च सूत्रद्वयनिपातनात् ११२
रौत्संत्तत्या नैर्ऋती स्त्रीमरणद्वेषरोगकृत्
पूर्वचन्द्रमाकृतिर्ण्या वारुणी परिमेखला ११३
शान्तिके पौष्टिके चाथ मृत्युनाशेने च पीठिका
प्रतीच्यो षडंशस्य वृद्धिं कृत्वा --- तः ११४
गर्भाव वृत्तलेखेन यत्सम्पातचतुष्टयम्
कर्णाभ्यकर्णं भवेत्तेन वृत्तस्थानद्वयेन च ११५
षडश्रं सममालेख्यं यद्वा वज्रसमाकृति
नाभस्वती पीठिका स्यात् पर्णेनिर्मरुतो दिशि ११६
कर्मसूच्चाटनाद्येषु विनियोज्या जिगीषुभिः
याक्षी त्रिमेखला वृत्ता वित्ताप्तये धनदार्चिते ११७
गणाद्विमखलाष्पश्रितः

कुर्वीतैकेन खुरकं चतुर्भिर्जाड्यकुम्भकम् ११८
द्वाभ्यामङ्घ्रं तथैकेन प्रवेशोऽत्र जाड्यकुम्भस्य शस्यते
अङ्घ्रयस्य चतुर्भिस्तैः कर्णिकाया द्वये नराः ११९
एकेन कण्ठकश्चातो निर्यात्येकेन कर्णिका
विभाजैरं पुशं षड्भिस्ततश्चैकेन मेखलाः १२०
पद्मयं पीठिका ख्याता सर्वकामप्रदायिनी
क्षेत्रे षोडशधा भक्ते भागेन खुरको भवेत् १२१
चतुर्भिर्जरातां कुम्भस्त्रिभिरेकेन कर्णिका
त्रिभिः कण्ठश्चतुर्भिश्च पूर्ववन्निर्गमो भवेत् १२२
इयं --- व्यक्तलिङ्गेषु पीठका स्यात्पयोधरा
एवंविधैव चापीठ स्यात्किंमुच्यक्तो लक्षणे १२३
भक्ते द्वादशभिः पीठमानं द्विर्भागिको भवेत्
जगतीति त्रिभिः कुसे द्वाभ्यामेकेन वेदिका १२४
कण्ठो द्वाभ्यामथैकेन वेदिका पुनरुत्तरा
एकैकेन तु भागेन ततः स्यात्पीठिकाद्वयम् १२५
एवं षडश्रा कर्तव्या वज्राद्या पीठिका बुधैः
पीठिका क्षेत्रेण निर्भक्तषो भागेन खुरको भवेत् १२६
द्वाभ्यां जङ्घाथ भागेन वेदी द्वाभ्यां तु कण्ठकः
उभयाभ्यां निर्गमः सा स्त्रीच्छि चन्द्रकला भवेत् १२७
आपायनाययुद्यौ च पदारेखैव चामृता
भवेत् षण्मेखलादर्धादूर्ध्वकण्ठोऽथ भागिकः १२८
पट्टिकात्रितयं शेषे क्षेत्रे स्यान्निर्गमान्तरम्

रुद्रार्चिता पीठिकेयं संवर्तेत्यभिधानतः १२९
यां कृत्वा प्रकृतेरूर्ध्वं गताः संवर्तकादयः
रुद्रावोथस्तराख्यं ते भेजिरे पदमव्ययम् १३०
षोढा पीठोदये भक्ते भागं स्यात्पट्टिकात्रयम्
एकेन कण्ठो भागेन पट्टिकान्यापि भागिका १३१
नन्द्यावर्ताङ्किता सेयं नन्द्यावर्तेति कीर्तिता
साधारणीयं सर्वेषां लिङ्गानां सर्वसिद्धिदा १३२
भवाकण्ठसुवासध्यानामियं सिद्धखुरा
दोदेरन्योनमिथै भवन्त्यन्याश्च पीठिकाः १३३
मानसंस्था न कथितास्तासामानन्त्यकारणात्
त्र्यंशेन गर्तः स्यादासां षोडशांशेन मेखला १३४
खातश्च नेयः श्वभ्रान्तं मेखलामध्यतो ह्यसौ
प्राणालार्घासमा दैर्घ्यविस्ताराभ्यामुदङ्मिशि १३५
पञ्चाशद्भिशयंस्ताल सद्वयंमन्तरा
सदांसद्भिभयं प्रान्ते खातोऽग्रे द्विगुणामुखान् १३६
साधाभमेखला कार्याः प्राणालः स्वसृतं भागतः
गुणागुणास्त्रयो लिङ्गे तान्यापत्रेव भावयेत् १३७
आवर्ताः शोभनाकाराः शुभाः स्यु --- धः
नतु पीठब्रह्मशिले शस्ते लिङ्गजात्यनुगे सदा १३८
गर्भकर्णचतुर्थांशमाना स्याद्ब्रह्मणः शिला
--- गस्य कर्णेन यद्वा ब्रह्मशिला भवेत् १३९
याताभिधेक ब्रह्मशिला ब्रह्मांशतो भवेत्

तावताभ्यधिका कार्या तस्याः कर्मशिला बुधैः १४०
स्थापयेत्पुरुषत्रया शिवं मध्ये निवेशयेत्
ब्रह्माणं दक्षिणेनास्य वामतः पुरुषोत्तमम् १४१
अन्यथास्थापनादेषां प्रत्यवायो महान् भवेत्
त्रिभागौना शचा स्यातां कोशान्तश्चक्रिणो भवेत् १४२
त्रिभागोनस्तिवासातां कोशान्तश्चक्रिणो भवेत्
त्रिभागोन्नतस्यादान्तः कोकस्यान्तः पद्मजन्मनः १४३
ब्रह्मविष्णुमहेशानां --- निवेशने
प्रमाणमेतेषु द्विश्च पृथक्स्थानां यदृच्छया १४४
उमामहेश्वरौ यत्र तत्रोमा ब्रह्मविष्णुवत्
आकाशे प्रतिमा येष्टा चत्वारिंशच्च पञ्च च १४५
हस्तान् कार्या त्रिभागोना मध्या हीना तदर्धतः
यात्राथा प्रतिमा द्वारप्रमाणेन विधीयते १४६
तच्च द्वारं त्रिधा भक्त्वा पीठं भागेन कल्पयेत्
द्वाभ्यां तु प्रतिमा कार्या ज्येष्ठायां मानमीदृशम्
मध्यायां नवधा द्वारं कृत्वैकं भागमुत्सृजेत्
शेषान् भागान् त्रिधा कृत्वा पीठं भागेन कल्पयेत् १४८
अर्चामुभाभ्यां हीनायां विदध्याद् द्वारमष्टधा
एकमुत्सृज्य शेषेण --- १४९
पीठात् तत् त्रितयेनार्चामुपविष्टां प्रकल्पयेत्
द्वारस्यार्धं त्रिधा कृत्वा द्वाभ्यां पीठं विधीयते १५०
चाक्लृप्तिरुक्तवतयद्वा द्वेधा चतुर्धा वा द्वारं कृत्वैकमुत्सृजेत्

शेषं भागत्रयं कृत्वा पीठमर्चां च पूर्ववत् १५१
द्वारोच्छ्रितेः पञ्चदशभागं कृ त्यक्त्वा विधीयते
भागत्रयं तदेकेन पीठमर्चां तु तद्द्वयात् १५२
भागान् पञ्च विधीयेत यदि वा भागयुग्मतः
पीठं तत् त्रितयेनार्चामुपविष्टां प्रकल्पयेत् १५३
द्वारस्यार्धं त्रिधा कृत्वा द्वाभ्यां पीठं विधीयते
भागेनार्चाशयानागार्धेऽर्चां वेश्मानुसारतः १५४
भक्ते प्रासादगर्भार्धे दशधा पृष्ठभागतः
पिशाचरक्षोदनुजाः स्थाप्या गन्धर्वगुह्यकाः १५५
आदित्यचन्द्रिकाविष्णुब्रह्मेशानान्ता पदक्रमात्
गर्भे षड्भागभक्ते वा त्यक्त्वैकं पृथता शत
स्थापनं सर्वदेवानां पञ्चमेंऽशे प्रशस्यते १५६
यदङ्गप्रत्यङ्गप्रहरणगतं लक्ष्म विततं
तदर्थानां चित्रकनावधो वाच्यमक्ष्य
सपीठार्चा लिङ्गोन्मपि विदित्वा वहुमतो
भवेद्भूपालानां कृतिभिरपि पूज्येत सकलैः १५७

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे ङ्गिपीठप्रतिमालक्षणं नाम सप्ततितमोऽध्यायः

अथ चित्रोद्देशो नामैकसप्ततितमोऽध्यायः

अथ प्रियं वितेऽस्माभिर्विन्यासश्चित्रकर्मणः
चित्रं हि सर्वशिल्पानां मुखं लोकस्य च प्रियम् १

पदे पदे वा कुड्ये वा यथा चित्रं सं वचने
वर्तयः कृतबन्धाश्च लेखामानं यथा भवेत् २
वर्णगव्यक्तिया यादृग्यादृशो वर्तनाक्रमः
नानोन्मानविधिश्चैव नवस्थाने विधिस्तथा ३
हस्तानां यश्च विन्यासो लक्षणनात्रसंशय
दिव्यानां मानुषाणां च दिव्या सा मुखजन्मना ४
गणरक्षःकिन्नराणां कुब्जवामनयस्तेषाम्
विकल्पाकृतिमानानि रूपसंस्थानमेव च ५
वृक्षगुल्मलतावल्लीवीरुधां पापकर्मणाम्
शूराणां दुर्विधानां च धनिनां पृथिवीभृताम् ६
ब्राह्मणानां विसासोडजातन क्रूरकर्मणाम्
मानिनामथ रङ्गोपजीविनां चेहङ्गकथ्यते ७
रूपलक्षणनैपथ्यं सतीनां राजयोषिताम्
दासीप्रव्रजितारण्डायतिवल्लीषु लक्षणा ८
कन्यानामसंकारणां च विध्याना गजवाजिनाम्
मकरव्यालसिंहानां तथा यज्ञोपयोगिनाम् ९
विना रात्रिविभागस्य ऋतूनां चापि लक्षणम्
अत्र योज्यं याप्यंभ्र कथं भवति १०
प्रविभागस्य देवानां रेखाणां चापि लक्षणम्
लक्षणं पञ्चभूतानां तेषामारम्भ एव च ११
वृकादीनां विहङ्गानां सर्वेषां जलवासिनाम्
चित्रन्यासविधानस्य ब्रूमः सम्प्रति लक्षणम् १२

कर्मण कर्मा करमे यस्माच्चित्रकर्मणि वर्तते
तस्याङ्गान्यभिधीयन्ते तेन सर्वानि विस्तरात् १३
वर्तिका प्रथमं तेषां द्वितीयं भूमिबन्धनम्
लेख्यं तृतीयं स्याद् रेखाकर्माणि वर्ततेमिह लक्षणम् १४
पञ्चमं कर्षकर्मच्च षाष्ठं स्याद् वर्तनाक्रमः
सप्तमं लेखनं लेखकरणं द्विचकर्म तथाष्टमम् १५
सङ्ग्रहोऽयमिति चैव कर्मणः
सूत्रिति तदनुक्रमेणा थः
भावयेन्न खलु मोहमेत्यसौ
चित्रकर्मणि कृती च जायते १६

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे चित्रोद्देशाध्यायो नाम एकसप्ततितमोऽध्यायः

अथ भूमिबन्धो नाम द्विसप्ततितमोऽध्यायः

इदानीं वर्तिकालक्ष्म भूमिबन्धश्च कथ्यते
गुल्मान्तरे शुभे क्षेत्रे पद्मिन्यां सरितस्तटे १
पार्वतानां च कक्षेषु वापिकाननान्तरे
भौमा लवणपिण्डाः स्युर्मूलेषु च महीरुहाम् २
क्षेत्रेष्वेतेषु या जाताः स्थिराः श्लक्ष्णाश्च पाण्डराः
ग्राह्या मृद्वावसासेष्वा विज्ञेया कटुशर्करा ३
क्षेत्राणामानुपूर्व्येण मृत्तिका कथिता शुभा
पेषयेत्कुट्टयित्वा तां ततः कल्कं समाचरेत् ४

शालिभक्तस्य दातव्यस्तत्र भागो यथोदितः
ग्रीष्मर्तौ सप्तमं भागं शीतकाले च पञ्चमम् ५
षष्ठं शरदि वर्षासु चतुर्थं भागमानयेत्
वर्तिकाबन्धनार्थामायान्ति तेन ता ६
अग्राया शालिवक्त्राभा यवं यव्यां सुखगृहम्
कुर्कुटाराग्रसदृशी कर्मभागविकल्पतः ७
शिक्षाकालेऽङ्गुलद्वन्द्वं प्रमाणेन विधीयते
कुथरेखासु शस्यन्ते वर्तिकाः त्र्यङ्गुलोन्मिताः ८
पटा रेखासु कुर्वीत मानेन चतुरङ्गुलाः
इदानीमभिधास्यामो वसुधाबन्धनक्रियाम् ९
पङ्क्तिका चैव कूटाश्च --- पट एव च
तस्य तस्य किभान भूमिबन्धो निगद्यते १०
पुण्यनक्षत्रवारेषु माङ्गल्यदिवसेषु च
क्षतो वासो भुक्ता च कर्ता भर्ताथ शिक्षकः ११
अनेकवर्णैः कुसुमैर्गन्धैः न कृपापाः
नानाधूपैः सुरभिभिरर्चयित्वारभेत ताम् १२
नवसूत्रात्तुलमृद्वस्तिततजलेन समं समम्
नवत्वामात्सदृशं वृक्तनभविद्वात्यपराक्रियः १३
लिङ्गसूत्रविनीक्षेतानिकटं सहतं नवः
अनुत्ततमनिस्मं च कुर्याद्यावत्क्षतौ समम् १४
सुस्थितं जलवक्षायं सम्यगालोक्य धीमता
कृत्वा भूमिक्रियामेतां पश्चाद्बन्धनमाचरेत् १५

लुचिमलांस्तिस्व व्रीहितण्डुलसन्निभाम्
संगृह्य तीर्थमथवा पिष्ट्वा कल्कं समाचरेत् १६
तेन पिण्डं प्रकुर्वीत शोषेयेचतमात्तयो
शवयेत् कल्कयेद्येन व्यासाद्व्यषव्यस्तुया १७
एवमेव चतुष्कोन्ता सप्त वारान् प्रघर्षयेत्
हस्तेन संमृशेत् पश्चाद्यथा लोनं च जायते १८
अथवा शिक्षिकाभूमौ खरवन्धनमाचरेत्
पूर्वोदितस्य कल्कस्य निर्यासे बन्धनं क्षिपेत् १९
पञ्चभागप्रमाणेन ग्रीष्मकालेषु शस्यते
शरद्यंशत्रयं साधं त्रीनंशा समागमम् २०
वर्षाकाले हि भागेन प्रदद्यादिति निश्चयः
पञ्चभागप्रमाणेन ग्रीष्मसं --- २१
बन्धानयं प्रकुर्वीतापपूर्वकं धिनाक्षितो
लेपयेद् रोमकूर्चेण शुष्कां शुष्कामनुक्रमात् २२
तोयेन हस्तक्तवचि प्रदातव्यो विचक्षणैः
विधिनैवं कृतं श्रेष्ठं शिक्षिकाभूमिबन्धनम् २३
बन्धनं कुडयभूमेश्च यथावत्कथ्यतेऽधुना
स्नुहीवास्तुककूश्माण्डकुद्दालीनामुपाहरेत् २४
क्षीरमन्यतमस्यापामामीस्येक्षरुकस्य च
तेषांणां वागसूत्रे सप्तरात्रं निधापयेत् २५
सिंहपासननिम्बानां त्रिफलव्याधेर्द्यातयो
समाहरेद्यथालाभं कथया कुटजस्य च २६

कषायक्षारयुक्तेन सामुद्रलवणेन च
पूर्वा कुढ्यं रामं कृत्वा कषायैः परिषे परिषेभयतु २७
चिक्कणां मृदमादाय स्थूलपाषाणवर्जिताम्
मानुषांस्तादि्द्वगुणान् स्यवालुकामृदाम्
ककुभस्य स्कन्दद्याधान्माषाणां शालमलेरपि
श्रीफलानां रसं तद्वद् दद्यात्कालानुरूपतः २९
पूर्वकालानुसारेण यत्प्रोक्तं बन्धनं क्षितेः
तत्सर्वं सिकतायुक्तं कृत्वैकत्र नवं बुधः ३०
कुमाद्यमालयापातं म हस्तिचर्मप्रमाणतः
विशेषां ष्याथ प्रतिक्षिपेत्तोयं कुर्यादशसन्निभाम् ३१
विशुद्ध विमलं स्निग्धं पाण्डुरं मृदुलं स्फुटम्
पूर्वोदितां समादाय विधिवत्कण्टकर्करीम् ३२
तां कुट्टयित्वा घृष्ट्वा च कल्कं कुर्याद् विचक्षणः
पूर्वोक्तभक्तभागं च निर्यासांश्च प्रदापयेत् ३३
विष्वङ्क यदि वा दद्यात् कूटसर्करया समम्
त्रीन् वारान् लेपयेत्कुड्यं पूर्वोक्तेन विचक्षणः ३४
हलेन हस्तमालिप्य प्रदद्यात् कूटकूर्तकाम्
जायते विधिनानेन कुड्यबन्धनमुत्तमम् ३५
साम्प्रतं कथयिष्यामः पट्टभूमिनिबन्धनम्
बिम्बाबीजानि संगृह्य त्यक्त्वा तेषां मलं बुधः ३६
एवं विशोध्य निष्पावान् यदि वा शालितण्डुलान्
तेषामन्यतमं श्लक्ष्णं पिष्ट्वा पात्रे विपाचयेत् ३७

पट्टमालिप्य बन्धेन पूर्वोक्तमिवा विधिमा चरेत्
पूर्वोक्तनिर्यासा पुना विधात्तयः कटशर्कराम् ३८
तोयेन तां प्रचांकृत्य पटमालेखयेत्तया
अनेन विधिना बन्धश्चित्रकर्मणि शस्यते ३९
विधिनान्येन वा कुर्यात् सादानां भूमिबन्धनम्
प्राद्यद्यामिकतालपङ्कनिर्यास समन्विताम् ४०
निर्याससंयुतां दद्यात्त्रिस्ततः कटशर्कराम्
पाटायनां भूमिबन्धोऽयं विज्ञेयव्यः प्रयत्नतः ४१
गोमयेन कटंपेने शैस्तदनन्तरम्
कटशर्करयुक्तिवारास्त्रात्तर्चकेन च
यथा पन्यत्तास्वां पश्चाद् भूमिबन्धः कटेपिहः ४२
इति निगदितमेवं लक्षणं वर्तिकाना-
मिहकपदकुडयद्मानिविविविधेश्च ।
इदमखिलमवैति ग्रन्थतो योऽर्थतश्च
प्रतिवति स विधातुर्विभ्रमस्यास्य योगात् ४३

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे भूमिबन्धो नाम द्विसप्ततितमोऽध्यायः

अथ लेप्यकर्मादिकं नाम त्रिसप्ततितमोऽध्यायः

लेप्यकर्म समृल्लद्म लक्षा लद्म च कथ्यते
वापीकूपतटाकानि पद्मिन्यो दीर्घिकास्तथा १
वृक्षमूलं नदीतीरं पद्मिन्यो दीर्घिकास्तथा १

वृक्षमूलं नदीतीरं गुल्ममध्यं तथैव च
मृत्तिकानामिति क्षेत्राण्युक्तान्येतानि तत्त्वतः २
तासां वर्णः सिताक्षौद्रसन्निभो गौर एव च
कपिलश्चेति ते स्निग्धाः शस्ता विप्रादिषु क्रमात् ३
इन्द्रांशी मृत्तिका ग्राह्या स्थूलपाषाणवर्जिता
शाल्मलीमाषककुभं मधूकत्रिफलोद्भवम् ४
रसं विनिक्षिपेत्तस्यां पप्रेक्षस्यसिकथितां चापि
क्रमुकं चनका बिल्वे सटालोमालि वाजिनः ५
गवां रोमाणि वा दद्यान्नालिकेरस्य वल्कलम्
मृदां संयोज्य मृद्नीयाद्दद्याद्वा द्विगुणांस्तुषान् ६
वालुकातीवती चापि त्तपासांयोगयेन्मृदम्
भागद्वयं मृत्तिकायै कार्पासांशेन मिश्रयेत् ७
तदेकीकृत्य मृद्भागं तृतीयमुपरि क्षिपेत्
पूर्वोदितां सन्निधाय ततश्च कटशर्कराम् ८
कल्कं विधाय चीरेण रूपं तत्परिवेष्टितम्
तेन निर्यासयुक्तेन कुर्यादाकारमादृतः ९
कटशर्करया लिम्पेत् कूर्चकेन विचक्षणः
मृत्तिकाक्वाथसङ्घाताल्लेपकर्म प्रशस्यते १०
रवयेल्लोहसङ्घातं लसंकार्यसुधामध्यये
युक्तं पक्षेत संयोज्य मोममान योजयेत् ११
अनेपकं समायुक्तं कर्तुः स्थानविनाशनम्
लेपकर्ममृत्तिकानिर्णयः ।

विलेखालक्षणं सम्यगिदानीमभिधीयते १२
कूर्चनं कूर्चकेनाथ द्वितीयं हस्तकूर्चकम्
तृतीयं भासकूर्चाख्यं चतुर्थं चल्लकूर्चनम् १३
वर्तनं पञ्चमं वर्तन्यकूर्चमान्यकूर्चनमिष्यते
लेप्यकर्मणि तच्छस्तमनामणवः १४
जलचूर्णकमानीतमिह सत्सन्ततो ---
कूर्चकं धारयेद् धीमान् वृषश्रवणरोमभिः १५
--- तत्कृतकूर्चकैः
वल्कलैर्वा विधातव्यः खरकेशैरथापि वा १६
कूर्चको येमतिर्यापि विहितोऽत्र प्रशस्यते
कूर्चकं धारयेद्धीमान् वृषश्रवणरोमभिः १७
तन्तूतः कूर्चकः श्रेष्ठो विलेखाकर्मणि स्वतः
आद्यो वदाङ्कुराकारस्ततो स्वच्छाङ्कुराकृतिः १८
प्लक्षसूचीनिभश्चान्यस्तृतीयः कूर्चको भवेत्
उदुम्बराङ्कुराकारश्चतुर्थः परिकीर्तितः १९
स्थूला लेखा न कुर्वीत वटाङ्कुरनिभादितः
न्यूनलेखा न कुर्वीत प्लक्षाङ्कुरसमेन च २०
अश्वत्थाङ्कुररूपेण यत्र विद्धतसहीकरात्
उदुम्बराङ्कुराकारो लेप्यकर्मणि शस्यते
ज्येष्ठः स्यादायतो दण्डो वैणवो --- ङ्गुलः २१
लेप्यकर्म --- समासतः
संस्कृतेः विधिरनन्तरं मृदः

अत्र सम्यगुदिता विलेखनी
कूर्चकस्य रचना च पञ्चधा २२

इति महाराजाधिराजपरमेश्वरश्रीभोजदेवविरचिते
समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे लेप्यकर्मविलेखाकूर्चकाध्यायो
नाम त्रिसप्ततितमः

अथाण्डकप्रमाणं नाम चतुःसप्ततितमोऽध्यायः
अथात्र प्रक्रमायाता कथ्यतेऽण्डकवर्तना
कायप्रमाणामपि च जातिभावादिसंश्रयम् १
अथ मधोतिरालिख्य तोरका सन्निवेशयेत्
तारका त्रयमालेख्य तत्राननसमायति २
तावत्प्रमाणमायामं गोलकस्योत्तमं विदुः
तेन गोलकत्वेन मानोन्माने तु कारयेत् ३
मुखाण्डकस्य विस्तारो लेपषट्केन सम्मितः
द्विदैर्घ्यं तु गोलकाः सप्त वापीसंस्थानमेव च ४
मुखाण्डकमिदं श्रेष्ठं कर्तव्यं चित्रकर्मणि
त्रिकोटि वृत्तिमालेख्यं वृत्ताण्डकमिति क्रमात् ५
भावाण्डकान्यथ ब्रूमः सोहस्याभिप्रस्तवेडकम्
गोलार्धाभ्यधिकं कार्यं पूर्वेस्तोत्तद्विचद्धणैः ६
अर्धगोलकमायामादलसाण्डकमुच्यते
नवगोलकदैर्घ्यं तदद्वहासमुखं भवेत् ७
पुंसां षडादात्तं मानं विस्तारात्पञ्चगोलकम्

वनिताराडकमालेख्यं नालिकेरफलोपमम् ८
चतुर्गोलकविस्तीर्णमायतं पञ्चगोलकान्
शिशूनामराडकं तावत्कर्तव्यं चित्रकर्मणि ९
हास्योभिः प्रस्त्रवेत् तस्य गोलकार्धान् विशेषयेत्
आलस्याराडकमप्येवं रोदनं तद्वदेव तु १०
षड्गोलकप्रविस्तारमायतं सप्तगोलकम्
राक्षसस्याराडकं कुर्याच्चन्द्रमराडलसन्निभम् ११
हास्योभिप्रस्तवे तस्य गोलकार्धान् विशेषयेत्
देवाराडकं प्रमाणेन तदालस्येऽत्र कीर्तितः १२
षड्गोलकप्रविस्तारं गोलकाष्टकमायतम्
वृत्तां या समालेख्यं दिव्याराडकमिति स्मृतम् १३
अथाभिधीयते दिव्यमानुषाराडक लक्षणम्
गोलकार्धाधिकं भे तच्च कार्यं मानुषमानतः १४
पञ्चगोलकविस्तीर्णं षड्गोलसेकमायुतम्
मुखाराडं मानुषं कृत्वा केत्तरस्य विधीयते १५
शिशुकाराडकमानेन प्रमथानां मुखाराडकम्
राक्षसाराडकमानेन यातुधानाराडकं भवेत् १६
दानवस्याराडकं कुर्याद्देवानां वदनोपमम्
गन्धर्वनागयक्षाणां तद्वदेवाराडकं भवेत् १७
विद्याधराणां विज्ञेयं दिव्यमानुषमराडकम्
बुध्यन्ते केऽपि शास्त्रार्थं केचित्कर्माणि कुर्वते १८
करामलकवत्यास्यं पर द्वयमप्यदः

न वेत्ति शास्त्रवित्कर्म न शास्त्रमपि कर्मवित्
यो वेत्ति द्वयमप्येतत्स हि चित्रकरो वरः १६

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे अरडकप्रमाणं नाम चतुःसप्ततितमोऽध्यायः

अथ मानोत्पत्तिर्नाम पञ्चसप्ततितमोऽध्यायः

ब्रूमोऽथ मातमङ्गणां परमाणवादि तद्भवेत् १
परमाणू रजो रोम लिक्षा प्ररिका यवोऽङ्गुलम्
क्रमशोऽष्टगुणा वृद्धिरेवं मानाङ्गुलं भवेत् २
द्व्यङ्गुलो गोलको ज्ञेयः कलां वा तां प्रचक्षते
द्वे कले गोलकौ बाहौ भागो मानेन तेन तु ३
आयामाद् विस्तृतेश्चित्रमन्यूनाधिकमाचरेत्
देवादीनां शरीरं स्याद्विस्तारेणाष्टभागिकम् ४
त्रिदशद्गायतं चैतद् विदध्याच्चित्रशास्त्रवित्
असुराणां सरं स्याद्भागान् समार्धसंयुतान् ५
विस्तारेण तदायामादेकान्नत्रिंशदिष्यते
सप्तभागं राक्षसानां विस्तारेणायतं पुनः ६
सप्तविंशतिभागं स्याद्यत् पुनर्दिव्यमानुषम्
साधा तु षडंशास्त कुर्यात्याद्वशत्यायतम् ७
षड्भागविस्तृतं कार्यं शरीरं मर्त्यजन्मनि
चतुर्विंशतिभागान् --- साधान् कुर्वीत दैर्घ्यतः ८

पुरुषस्योत्तमस्यैतन्मानमस्माभिरीरितम्
मध्यमस्य तु सार्धं स्याद्विस्ताराद्भागपञ्चमम् ९
आयामस्तस्य तु प्रोक्तो विंशतिंस्विति रन्विता
कनीयसानां कुब्जानां विस्तारान् पञ्चभागिका १०
दैर्घ्यमस्य विधातव्यस्तथा शरीरस्य विस्तरा पञ्चभागिका
दैर्घ्यं द्वाविंशतिर्भागा वपुषोऽस्य प्रशस्यते ११
कार्यां शरीरस्य कुब्जानां विस्तारात्पञ्चभागिकम्
दैर्घ्यमस्य विधातव्यं तथा भागं शुभदश १२
भागपञ्चकविस्तारं वामनानां वपुर्भवेत्
कुर्वीत साधार्न् सप्तैव भागान् दैर्घ्येण तद्वत्पुनः १३
किंवांराणि प्रोक्तं प्रमाणमिदमेदमेव हि
प्रथमानं तु विस्तारो वपुषोंऽशचतुष्टयम् १४
दैर्घ्यैदो पुनमूस्ये भागषट्कप्रमाणतः
उक्तं देहप्रमाणस्य भागसूत्रमिदं पृथक् १५
देवानामसुराणां च राक्षसानां तथैव च
दिव्यमानुषमर्त्यानां कुब्जवामनयोरपि
किन्नराणां सभूतानां क्रमेणास्मिन्नुदाहृतम् १६
इत्थमण्डक वेले च वनं क्रमं
कायमानमपि जातिभेदतः ।
भावतश्च कथितं विभाजन्मना वयन्
यलित्याख्या स्तखलु चित्रवित्तमः १७
अथ मानसमुत्पत्तिर्यथावदभिधीयते १८

देवानां त्रीणि रूपाणि सुरजो --- कुम्भकौ
स्याद्दिव्यमानुषस्यैकं शरीरं दिव्यमानुषम् १९
असुराणां त्रिधा रूपं चक्रमुत्तीर्णकं तथा
दुर्दरः शकटः कूर्मत्रिदिवौ इति द्वे रक्षसां पुनः २०
पुंसां रूपाणि पञ्च स्युस्तान्युच्यन्ते यथाक्रमम्
हंसः सामाप्ररूचको भक्तामालाव्य एव च २१
कुयस्वविद्विधौ ज्ञेयो मेषो वृत्तकरस्तथा
वामनास्त्रिविधा ज्ञेयाः सपिण्डास्थानपद्मकाः २२
कूष्माण्डकर्वटस्तिर्यक्--- प्रथमतः
मयूरः कुर्वटः काशः किन्नरस्त्रिविधो भवेत् २३
वालकापौरुषी वृत्ता --- दण्डका तथा
त्रयः पञ्चधा प्रोक्ताः समस्ताश्चित्रवेदिभिः २४
भद्रो मन्दो मृगो मिश्र इति हस्ती चतुर्विधः
जन्मतस्त्रिविधं प्राहु ग्निधिर्न र्गिरिनद्यूरुखांश्रयम् २५
विविधा वाजिनो रथ्य पारसादुत्तरान्ततः
सिंहाश्चतुर्धा शिखरबिलद्रुमतृणारव्यया २६
व्यालाः षोडश निर्दिष्टा हरिणो गृध्रकः शुकः
कुक्कुटः सिंहशार्दूलवृकाजागण्डकीगजाः २७
क्रडाश्वमहिषश्वानो मर्कटः खर इत्यमी
एसामिन्दमासं यं याम्यनैर्ऋतवारुणै २८
वायव्यां सौम्यमित्युक्तं जज्ञिपातमिहव्यधारु
नतस्तमिहर्भामः शिषद्या सूकरोऽपि च २९

पशुर्गोः सुसुमारुश्च गजमेषश्चतुर्मुख
तुरङ्गसिंहशार्दूलमेषाश्चेत्यत्र षोडश ३०
जातसंस्तृतिः ।
शुक्लवासाः शुचिर्दक्षः स्त्रीशूद्रानभिलाषुकः
स्थाने कर्मारभेतैतद्विभक्ते संवृतेऽपि च ३१
आरम्भो देवतार्चानां रोहिण्यामुत्तरेषु च
साधकं वा भवेत्यस्तु भवारम्भो विधीयते ३२
मुखं भागेन कुर्वीत ग्रीवा वक्त्रात् त्रिभागिका
ओयमतन्मुखं ज्ञेयं केशान्तं द्वादशाङ्गुलम् ३३
द्वादशैवाङ्गुलान्येतद्विस्तारेण पुनर्भवेत्
प्रविमानं त्रिभागेन नासिका च त्रिभागतः ३४
त्रिभागेन ललाटं स्यादुत्सेधात्त्रिसमं मुखम्
अक्षिणी द्व्यङ्गुलायामे तदर्धाध्यपि विस्तृते ३५
तारकाक्षित्रिभागेन कर्तव्या सुप्रतिष्ठिता
तारकायास्ततो मध्ये ज्योतिस्त्र्यंशेन कल्पयेत् ३६
भ्रवौ व्यक्षिरामे कुर्यादक्षिमांसयो
मंकाराणा स्युरुच्चाता सम्यगालिखेत्
एवं विधानतो योज्यं रूपजातमशेषतः ३७
जातीनां वशत इति प्रमाणमुक्तं
दिवादिष्वखिलमुक्तं देवामिदं स्फुटं विदित्वा
यश्चित्रं लिखति बहुप्रकारमस्मै
प्राधान्यं वितरति चित्रकृत्समूहः ३८

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे मानोत्पत्तिर्नाम पञ्चसप्ततितमोऽध्यायः

अथ प्रतिमालक्षणं नाम षट्सप्ततितमोऽध्यायः

प्रतिमानामथ ब्रूमो लक्षणं द्रव्यमेव च
सुवर्णरूप्यताम्राः स्युर्दारुलेखानि शक्तितः १
चित्रं चेति विनिर्दिष्टं द्रव्यमर्चासु सप्तधा
सुवर्णं पुष्टिकृद्विद्याद्रजतं कीर्तिवर्धनम् २
प्रजाविवृद्धिजं ताम्रं शैलेयं भूजयावहम्
आयुष्यं दावरवं द्रव्यं लेख्यचित्रे धनावहे ३
प्रारभेद् विधिना प्राज्ञो ब्रह्मचारी जितेन्द्रियः
हविष्यनियताहारो जपहोमपरायणः ४
शयानो धरणीपृष्ठे कुशास्तरणे तदन्तरम्
अप्राप्ताया द्वयोर्मध्यं भवेत्पञ्चाङ्गसम्मितम् ५
नेत्रश्रवणयोर्मध्यं भवेदङ्गुलपञ्चकम्
कर्णौ चाङ्गसमौ ज्ञेयावुत्सेधाद्द्विगुणायतौ ६
साकर्णपाली स्यान्मध्यं पत्पिष्यल्यकृकूटयोः
द्विभागोलकायता पिष्पल्याश्रिताङ्गुलविस्तृता ७
अरोमप्रभवा ज्ञेया व्याकृष्टधनुराकृतिः
एवम्प्रमाणं स्यादेषां कर्णपृष्ठाश्रयोऽपि च ८
ऊर्ध्वबन्धादधोबन्धः कर्णमूलसमाश्रितः
अध्यर्धं गोलकं ज्ञेयः पृष्ठतश्चैवमेव सः ९

निष्पावसदृशाकारा कर्तव्या कर्णपिप्पली
आयामेनाङ्गुलं सा स्याद्विस्तारेण चतुर्यवा १०
पिप्पल्याधातयोर्मध्ये लकार इति संज्ञितः
स्यादध्यर्धाङ्गुलायामो विस्तारेण च सोऽङ्गुलम् ११
मध्ये लकारो निम्नः स्यान्मानाद्यवचतुष्टयम्
मूले पिप्पलिकायाः स्याच्छ्रोत्रच्छिद्रं चतुर्यवम् १२
या गोलकारपीगूष्मो स्तूतिकेति प्रकीर्तिता
अर्धाङ्गुलायता सा स्याद्यवद्वितयविस्तृता १३
लकारावर्तयोर्मध्ये पीयुषी सा प्रकीर्तिता
अङ्गुलद्वितयायामा विस्तृता साधमङ्गुलम् १४
कर्णस्य बाह्या रेखा या तामावर्तं प्रचक्षते
षडङ्गुलप्रमाणः स्याद्वक्रो वृत्तायतश्च सः १५
मूलांशोऽर्धाङ्गुलः कार्यः क्रमान्मध्ये यवद्वयम्
अग्रे यवप्रमाणश्च विस्तारेण विधीयते १६
लकारावर्तयोर्मध्यमुद्धात इति कीर्तितम्
अधोभागे --- पीयूष्या विस्तारेण यवत्रयम् १७
ऊर्ध्वतः कर्णविस्तारो गोलकाद् द्वियवान्वितः
मध्ये च द्विगुणं नालं मूले मात्रा सषडयवा १८
समुदायप्रमाणे णोलकद्वितयायतः
कर्णप्रसप्तः कर्तव्यो निम्नोच्चूमतविभागवान् १९
अङ्गुलं पश्चिमं नालं पूर्वमर्धाङ्गुलं भवेत्
कुर्वीत कोमले नाले कला द्वितयमायते २०

श्रवणस्य विभागोऽयं पर्वायथावत् परिकीर्तितः
अन्यूनाधिकमानः स्यात्प्रशस्तो दूषितोऽन्यथा २१
चिबुकं द्व्यङ्गुलायामं तस्यार्धमधरं विदुः
तदर्धमुत्तरोष्ठः स्याद्भाजी चार्धाङ्गुलोच्छ्रया २२
नासापुटौ तु विज्ञेयौ चतुर्थं भागमोष्ठयोः
तयोः प्रान्तौ तु कर्तव्यौ करवीरसमौ शुभौ २३
तारकान्तःसमे चैव सृक्वणी परिचक्षते
नासिका स्यात्प्रमाणेन चतुरङ्गुलमायता २४
पुटप्रान्ते च विस्तारो नासाग्रस्याङ्गुलद्वयम्
विस्तारेणाङ्गुलान्यष्टौ तदर्थमपि चायतम् २५
प्रमाणगुणसंयुक्तं ललाटं परिकीर्तितम्
आरभ्य चिबूकाद्यावत् केशान्तं पश्चिमात्तथा २६
गणिकन्तं शिरसो मानं भवेद्द्वात्रिंशदङ्गुलम्
--- कर्णयोर्मध्ये मष्टकोऽष्टादशाङ्गुलः २७
--- ग्रीवयोः परीणाहो विंशतिश्चतुरन्विता
ग्रीवातः स्यादुरोभाग उरसो नाभिरेव च २८
नामेन्द्रं भवेद्भागौ द्वावुभयमेव च
ऊर्वोः समे मते जङ्घे जानुनी चतुरङ्गुले २९
चतुर्दशाङ्गुलौ पादौ स्मृतावायाममानतः
षडङ्गुलौ तु विस्तारादुत्सेधाच्चतुरङ्गुलौ ३०
पञ्चाङ्गुलपरीणाह अङ्गुलौ त्र्यङ्गुलायतः
अङ्गुष्ठकसमा चैव स्यादायामात्प्रदेशिनी ३१

तस्याः षोडशभागेन हीना स्यान्मध्यमाङ्गुलिः
अष्टभागेन मध्याया हीनां विद्यादनामिकाम् ३२
तस्याश्चैवाष्टभागेन हीना ज्ञेया कनिष्ठिका
पादोनमङ्गुलं कुर्यादङ्गुष्ठस्य नखं बुधः ३३
अङ्गुलीनां नखान् कुर्यात् खं पञ्चत्र्यंशसंमितान्
कुर्वीताङ्गुलकोत्सेधं त्रिभ्यन्वित्तमङ्गुलाम् ३४
प्रदेशिन्यङ्गुलोत्सेधा हीना शेषा यथाक्रमम्
जङ्घामध्ये परीणाहो भवेदष्टादशाङ्गुलः ३५
जानुमध्ये परीणाहस्त्वङ्गुलान्येकविंशतिः
तस्यैव सप्तमं भागं विद्याज्जानुकपालकम् ३६
ऊरुमध्ये परीणाहो भवेद्द्वात्रिंशदङ्गुलः
भागार्धमाशै वृषणौ मेढ्रं वृषणसंस्थितम् ३७
षडङ्गुलपरीणाहं कोशस्तु चतुरङ्गुलः
अष्टादशाङ्गुलमिता विस्तारेण कटिर्भवेत् ३८
अङ्गुलार्धं भवेन्नारीरोधोवश्चाङ्गुलं भवेत्
नाभिमध्ये परीणाहः षट्चत्वारिंशदङ्गुलः ३९
द्वादशाङ्गुलमात्रं तु स्तनयोरन्तरं विदुः
स्तनयोरुपरिष्टात्तु कक्षप्रान्तौ षडङ्गुलौ ४०
उत्सेधात्पृष्ठविस्तारो विंशतिश्चतुरन्विता
उरसः सह पृष्ठेन परीणाहः प्रकीर्तितः ४१
षडङ्गात्परीमाणादङ्गुलानीति निश्चयः
परीणाहाच्चतुर्विंशत्यङ्गुलाष्टौ च विस्तृता ४२

ग्रीवा कार्या भुजायामः षट्चत्वारिंशदङ्गुलः
पर्वोपरितनं बाहोः कार्यमष्टादशाङ्गुलम् ४३
षोडशाङ्गुलमात्रं तु द्वितीयं पर्व कथ्यते
बाहुमध्ये परीणाहो भवेदष्टादशाङ्गुलः ४४
प्रवाहोस्तु परीणाहो भवति द्वादशाङ्गुलः
आयामेन तलत्वापि कीर्तितो द्वादशाङ्गुलः ४५
अङ्गुलीरहितः प्राज्ञैः सप्ताङ्गुल उदाहृतः
पञ्चाङ्गुलानि विस्तीर्णो लेखालक्षणलक्षितः ४६
पञ्चाङ्गुलानि मानेन कर्तव्या मध्यमाङ्गुलिः
पर्वणोऽर्धं तु मध्याया हीनां विद्यात्प्रदेशिनीम् ४७
प्रदेशिनीसमा चैव स्यादायामादनामिका
पर्वार्धमानहीना च प्रमाणेन कनिष्ठिका ४८
अङ्गुलीनां नखाः कार्याः सर्वे पर्वार्धसंमिताः
आयाममात्रमेतासां परीणाहं प्रचक्षते ४९
अङ्गुष्ठकस्य दैर्घ्यं स्यादङ्गुलानां चतुष्टयम्
पञ्चाङ्गुलं परीणाहं स्पष्टचारुयवाङ्कितं ५०
तुङ्गास्थमानपर्यन्तात् किञ्चिद्धीना नखा मताः
अङ्गुष्ठकप्रदेशिन्योरन्तरं द्व्यङ्गुलं भवेत् ५१
स्त्रीणामप्येवमेतत्स्यात्स्तनोरुजघनाधिकम्
त्रीणि चत्वारि चत्वारि त्रीणि चत्वार्यथापि च ५२
एकादशैकाडश वा दशधा विंशतिस्त्रयम्
विंशतिस्त्रीणि च स्त्रीणां मानमेतत् प्रकीर्तितम् ५३

कनिष्ठं मानमेतत्स्यान्मध्यं सत्र्यंशमष्टकम्
पलानाष्टमकं सार्धमुत्तमं परिकीर्तितम् ५४
उरसश्च भवेत्तासां विस्तारोऽष्टादशाङ्गुलः
कर्तव्यः कटिविस्तारो विंशति चतुरुताः
एतत्प्रमाणमुद्दिष्टं प्रतिमानां समासतः ५५
प्रमाणमेतत् सकलाशराणा-
मर्धास्तु निर्दिष्टमनुक्रमेण ।
कार्यं सदा शिल्पिभिरंशुमतै-
र्यथोचितद्रव्यसमुद्भवासु ५६

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे प्रतिमालक्षणं नाम षट्सप्ततितमोऽध्यायः

अथ देवादिरूपप्रहरणसंयोगलक्षणं नाम सप्तसप्ततितमोऽध्यायः

त्रिदशानामथाकारान् ब्रूमः प्रहरणानि च
दैत्यानामथ यक्षाणां गन्धर्वोरगरक्षसाम् १
विद्याधरपिशाचानां --- यथायथम्
ब्रह्मानलार्चिःप्रतिमः कर्तव्यः सुमहाद्युतिः २
स्थूलाङ्गः श्वेतषुष्पश्च श्वेतवेष्टनवेष्टितः
कृष्णाजिनोत्तरीयश्च श्वेतवासाश्चतुर्मुखः ३
दण्डः कमण्डलुश्चास्य कर्तव्यो वामहस्तयोः
अक्षसूत्रधरस्तद्वद् मौञ्जया मेखलया वृतः ४
कार्यो वर्धयमानस्तु जगद् दक्षिणपाणिना

एवं कृते तु लोके क्षेमं भवति सर्वतः ५
ब्राह्मणार्थवर्धन्ते सर्वकामैर्न संशयः
यदा विरूपादीनां वा कृरसोदरी ६
ब्राह्मणैर्वा भवेद्वर्णा सा नेष्टा भयदायिनी
निहन्ति कारकं रौद्रा दीनरूपा च शिल्पिनम् ७
कृशा व्याधिं विनाशं च कुर्यात्कारयितुः सदा
कृशोदरी तु दुर्भिक्षं विरूपा चानपत्यताम् ८
एतान् दोषान् परित्यज्य कर्तव्या सा सुशोभना
ब्रह्मणोवार्चा विधानज्ञैः प्रथमे यौवने स्थिता ९
चन्द्राङ्कितजटः श्रीमान् नीलकण्ठः सुसंयतः
विचित्रमुकुटः शम्भुर्निशाकरसमप्रभः १०
दोर्भ्यां द्वाभ्यां चतुर्भिवा वधा युक्तो वा दोर्भिरष्टभिः
पट्टिशव्यग्रहस्तश्च पन्नगाजिनसंयुतः ११
सर्वलक्षणसम्पूर्णो नेत्रत्रितयभूषणः
एवंविधगुणैर्युक्तो यत्र लोकेश्वरो हरः १२
परा तत्र भवेद् वृद्धिर्देशस्य च नृपस्य च
यदारण्ये समाने वा विधीयेत महेश्वरः १३
एवं रूपस्तदा कार्यः कारकस्य शुभावहः
अष्टादशभुजो दोष्णां विंशत्या वा समन्वितः १४
शतबाहुः कदाचिद्वा सहस्त्रभुज एव च
रौद्ररूपो गणवृतः सिंहचर्मोत्तरीयकः १५
तीक्ष्णदंष्ट्राग्रदशनः शिरोमालाविभूषितः

चन्द्राङ्कितशिराः श्रीमान् पीनोरस्कोग्रदर्शनः १६
भद्रमू कर्तव्यः श्मशानस्थो महेश्वरः
द्विभुजो राजधान्यां तु पत्तने स्याच्चतुर्भुजः १७
कर्तव्यो विंशतिभुजः श्मशानारण्यमध्यगः
एकोऽपि भगवान् भद्र स्थानभेदविकल्पितः १८
रौद्रसौम्यस्वभावश्च क्रियमाणो भवेद्बुधैः
उद्याद्यथा भावद्भागभगवान् सौम्यदर्शनः १९
स एव तीक्ष्णतामेति मध्यन्दिनगतः पुनः
तथारण्यस्थितो नित्यं रौद्रो भवति शङ्करः २०
स येद सौम्यावति स्थाने सौम्यो व्यवस्थितः
स्थानान्येतानि सर्वाणि ज्ञात्वा किम्पुरुषादिभिः २१
प्रमथैः सहितः कार्यः शङ्करो लोकशङ्करः
एतद्यथावत्कथितं संस्थानं त्रिपुरद्रुहः २२
कार्त्तिकेयस्य संस्थानमिदानीमभिधीयते
तरुणार्कनिभो रक्तवासाः पावकसप्रभः २३
ईषद्बालाकृतिः कान्तो मङ्गल्यः प्रियदर्शनः
प्रसन्नवदनः श्रीमानोजस्तेजोन्वितः शुभः २४
विशेषान्मुटुकैश्चित्रि मुक्तामणि भूषितः
षण्मुखो वैकवक्त्रो वा शक्तिं रोचिष्मतीं दधत् २५
नगरे द्वादशभुजः खेटके षड्भुजो भवेत्
ग्रामे भुजद्वयोपेतः कर्तव्यः शुभमिच्छता २६
शक्तिः शरस्तथा खड्गो मुसृणटी मुद्गरोऽपि च

हस्तेषु दक्षिणेष्वेतान्यायुधान्यस्य दर्शयेत् २७
एकः प्रसारितश्चान्यः षष्ठो हस्तः प्रकीर्तितः
चतुः पताका घण्टा च खेटः कुक्कुटस्तथा २८
वामहस्तेषु षष्ठस्तु तत्र शोजर्जन करः
एवमायुधसम्पन्नः संग्रामस्थो विधीयते २९
अव्यया तु विधातव्यः क्रीडालीलान्वितश्च सः
छागकुक्कुटसंयुक्तः शिखियुक्तो मनोरमः ३०
नगरेषु सदा कार्यः स्कन्दः परजयैषिभिः
खेटके तु विधातव्यः षण्मुखो ज्वलनप्रभः ३१
तथा तीक्ष्णायुधोपेतः स्त्रङ्गामभिरलङ्कृतः
ग्रामेऽपि द्विभुजः कार्यः कान्तिद्युतिसमन्वितः ३२
दक्षिणा च भवेद्भक्तिर्नाम हस्ते तु कुक्कुटः
विचित्रपक्षः सुमहान् कर्तव्योऽतिमनोहरः ३३
एवं पुरे खेटके च ग्रामे वाभिलं शुभम्
कार्त्तिकेयं --- कुर्यादाचार्यः शास्त्रकोविदः ३४
अविरुद्धेषु कार्येषु खेटे याग्रामे पुरोत्तमे
कार्त्तिकेयस्य संस्थानमेतद् यत्नेन कारयेत् ३५
बालस्तु सुभुजः श्रीमान् स्थले केतु महाद्युतिः
वनमालाकुलोरस्को निशाकरसमप्रभः ३६
गृहीतसीरमुसलः कार्यो दिव्यमदोत्कटः
चतुर्भुजः सौम्यवक्त्रो नीलाम्बरसमावृतः ३७
मुकुटालङ्कृतशिरोरोहो रागविभूषितः

रेवतीसहितः कार्यो वनदेवः प्रतापवान् ३८
विष्णुर्वैदूर्यसङ्काशः पीतवासाः श्रियाकृतः
वराहो वामनश्च स्यान्नरसिंहो भयानकः ३९
कार्यो वा दाशरथी रामो जामदग्न्यश्च वीर्यवान्
द्विभुजोऽष्टभुजो वापि चतुर्बाहुररिन्दमः ४०
शङ्खचक्रगदापाणिरोजस्वी कान्तिसंयुतः
नानारूपस्तु कर्तव्यो ज्ञात्वा कार्यान्तरं विभुः ४१
इत्येष विष्णुः कथितः सुरास्वरनमस्वरनमस्त्वतः
त्रिदशेशः सहस्राक्षो वज्रभृत्सुभुजो बली ४२
किरीटी सगदः श्रीमाञ्श्वेताम्बरधरस्तथा
श्रोणिसूत्रेण महा दिव्याभरणभूषितः ४३
कार्यो राजश्रिया युक्तः पुरोहितसहायवान्
वैवस्वतस्तु विज्ञेयः कालेः केसं परायणः ४४
तेजसा सूर्यसङ्काशो जाम्बूनदविभूषितः
सम्पूर्णचन्द्रवदनः पीतवासास्तुः शुभेक्षणः ४५
विचित्रमुकुटः कार्यो वराङ्गदविभूषितः
तेजसा सूर्यसङ्काशः कर्तव्यो बलवाञ्छुभः ४६
धन्वन्तरिर्भरद्वाजः प्रजानीयतयस्तथा
दक्षार्थाः सदृशाः कार्या कार्यो रूपाणि --- रपि ४७
अर्चिष्मान् ज्वलनः कार्यः यत्करठाश्वसमीरणः
सौम्यः कार्यस्तथा विस्या--- रुद्रशरीरिणः ४८
रक्तवस्त्रधराः कृष्णा नानाभरणभूषिताः

कर्तव्या राक्षसाः सर्वे बहुप्रहरणान्विताः ४९
पूर्णचन्द्रमुखा शुभ्रा बिम्बोष्ठी चारुहासिनी
श्वेतवस्त्रधरा कान्ता दिव्यालङ्कारभूषिता ५०
कटिदेशनिविष्टेन वामहस्तेन शोभना
सपद्मेन वान्तेन दक्षिणेन शुचिस्मिता ५१
कर्तव्या श्रीः प्रसन्नास्या प्रथमे यौवने स्थिता
गृहीतशूलपरिघपाहिकापट्टिसध्वजा ५२
बिभ्राणा खेटकोपेतलघुखड्गं च पाणिना
घण्टामेकां च सौवर्णीं दधती घोररूपिणी ५३
कौशिकी पीतकौशेयवसना सिंहवाहना
सेचोष्टौ --- विधातव्याः शुक्लाम्बरधराः --- ५४
शोभमानाश्च मुकुटैर्नानारत्नविभूषितैः
सदृशावश्विनौ कार्यौ लोकस्य शुभदायकौ ५५
शुक्लमाल्याम्बरधरौ जाम्बूनदविभूषितौ
त्रिपञ्चदशपूतिरस्येदं भृङ्गवन्मेचकप्रभाम् ५६
वैदूर्यशकंसङ्काशा हरितश्मश्रवोऽपि च
रोहिता विकृता रक्तलोचना बहुरूपिणः ५७
नागैः शिरोरुहालीनैर्विरागाभरणाम्बराः
कार्याः पिशाचा भूताश्च परुषासत्यवादिनः ५८
बहुप्रकारमन्दहा विरूपा विकृताननाः
घोररूपा विधातव्या ह्रस्वा नानासुधाश्च ते ५९
सुभीमविक्रमा भीमा सङ्घा यज्ञोपवीतिनः

वर्मभिः शाटिकाचित्रैर्भूताः कार्याः सदा बुधैः ६०
येऽपि नोक्ता विधातव्यास्तेऽपि कार्यानुरूपतः
यस्य यस्य च यल्लिङ्गमसुरस्य सुरस्य च ६१
यक्षराक्षसयोर्वापि नाना गन्धर्वयोरपि
तेन लिङ्गेन कार्यः स यथा साधुविजानता ६२
प्रायेण वा वीर्यवन्तो हि दानवाः क्रूरकर्मिणः
किरीटिनश्च कर्तव्या विविधायुधपाणयः ६३
तेभ्योऽपीषत्कनीयांसो दैत्याः कार्या गुणैरपि
दैत्येभ्यः परिहीणास्तु यक्षाः कार्या मदोत्कटाः ६४
हीनास्तेभ्योऽपि गन्धर्वा गन्धर्वेभ्योऽपि पन्नगाः
नागेभ्यो राक्षसा हीनाः क्रूरविक्रिमतसूषिणः ६५
विद्याधराश्च यक्षेभ्यो हीनदेहधराः स्मृताः
चित्रमाल्याम्बरधराश्चित्रचर्मासिपाणयः ६६
नानावेषधरा घोरा भूतसङ्घा भयानकाः
पिशाचेभ्योऽधिकाः स्थूलास्तेजसा परुषास्तथा ६७
अन्यूनाधिकरूपांश्च कुर्वीत प्रायशः शुभान्
दिव्यैरासणाभरणैश्च युक्ताः
कृतीथविदधीत यथोदितांस्तान् ६८

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे देवादिरूपप्रहरणसंयोगलक्षणाध्यायो नाम
सप्तसप्ततितमः

अथ दोषगुणनिरूपणं नामाष्टसप्ततितमोऽध्यायः

अथ वर्ज्यानि रूपाणि ब्रूमहेऽर्चादिकर्मसु
यथोक्तं शास्त्रतत्त्वज्ञैर्गोब्राह्मणाहितार्थिभिः १
अशास्त्रज्ञेन घटितं शिल्पिना दोषसंयुतम्
अपि माधुर्यसम्पन्नं ग्राह्यं शास्त्रवेदिभिः २
अश्लिष्टसन्धिं विभ्रान्तां वक्रां चावनतां तथा
अस्थितामुन्नतां चैव काकजङ्घां तथैव च ३
प्रत्यङ्गहीनां विकटां मध्ये ग्रन्थिनतां तथा
ईदृशीं देवतां प्राज्ञो हि तार्थं नैव कारयेत् ४
अश्लिष्टसन्ध्या मरणं भ्रान्तया स्थानविभ्रमम्
वक्रया कलहं विद्यान्नतयामिवसः क्षयम् ५
नित्यमस्थितया पुंसामर्थस्य क्षयमादिशेत्
भयमुन्नतया विद्याद्भृद्रोगं च न संशयः ६
देशान्तरेषु गमनं सततं काकजङ्घया
प्रत्यङ्गहीनया नित्यं भर्तुः स्यादनपत्यता ७
विकटाकारया ज्ञेयं भयं दारुणमर्धया
अधोमुख्या शिरोरोगं तथानयापि च ८
एतैरुपेता दोषैर्या वर्जयेत्तां प्रयत्नतः
अन्यैरपि युतां दोषैरर्चां ब्रूमोऽथ सम्प्रति ९
उद्बद्धपिण्डिका सासिसासि स्वामिनो दुःखमावहेत्
कुक्षिष्टिप्राय दुर्भिक्षं रोगान् कुब्जार्चिता नृणाम् १०
पार्श्वहीना तु भवति राज्यस्याशुभदर्शनी

शालायासनया स्थानं स्त्रीश्र प्रतिमया भवेत् ११
आसनालयहीनायां बन्धनं स्थानविच्युतिः
नानाकाष्ठसमायुक्ता या चैवायसपिण्डिता १२
सन्धिभिः प्रविसहिर्या सानर्थभयदा भवेत्
सम्बन्धाकृष्टलोहेन त्रपुणा वा कदाचन १३
दारुणा च तथैवोक्ता प्रतिमायास्तु शास्त्रवेदिभिः
सन्धयश्चापि कर्तव्याः सुश्लिष्टाः पुष्टिमिच्छता १४
अर्चनाम धराधेन शास्त्रदृष्टविधानतः
बध्नीयात्ताम्रलोहेन सुवर्णरजतेन वा १५
कृतेन केणुना चान्यथा स्तुसामबद्धावरुजावहा
तस्मात्सर्वप्रयत्नेन स्थपतिः शास्त्रकोविदः १६
कुर्यादर्चां यथान्यायं सुविभक्तां प्रमाणतः
न क्षता नोपदिगां च न च विवर्जिता १७
न प्रत्यङ्गैः प्रहीनं च घाणपादैर्नखादिभिः
सुबिभक्तां यथोत्सेधां प्रसन्नवदनां शुभाम् १८
निगूढसन्धिकरणां समायतिमृजुस्थिताम्
ईदृशां राणायेदर्घां प्रमाणगुणसंयुताम् १९
समोपचितमांसाङ्गाः पुरुषाः स्युः समासतः
प्रमाणलक्षणयुता वस्त्ररत्नविभूषितः २०
क्षान्त गुणान् परिकल्प्य च दोषजात-
मर्चां यथोदितगुणां विदधीता मतून्या ।
शिष्यत्वमेत्य विविधमुपासतेऽन्ये

तं शिल्पिनः कृतघ्येयश्च मुहुः स्तुवन्ति २१

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे दोषगुणाध्यायो नामाष्टसप्ततितमः

अथ ऋज्वागतादिस्थानलक्षणं नामैकोनाशीतितमोऽध्यायः

अत ऊर्ध्वं प्रवक्ष्यामि नेविस्थानविधिक्रमम्
संपात्यारुघाणां हि जायन्ते नव वृत्तयः १
पूर्वभृष्कागतं तेषां ततोऽर्ध्वं क्षरगतं भवेत्
ततः शचीक्षतं विद्यादध्यर्धाक्षमनन्तरम् २
चत्वार्यूर्ध्वागतादीनि परावृत्तानि तानि च
ऋज्वागतपरावृत्तं ततोऽर्धज्वागतादिकम् ३
शचीकृत् परावृत्तं ततोऽध्यर्धाक्षपूर्वकम्
पार्श्वागतं च नवमं स्थानं भित्तिकविग्रहम् ४
ऋज्वर्धऋजुनोर्मध्ये चत्वारि व्यन्तराणि च
अर्धर्जुसाचीकृतयोर्मध्ये च व्यन्तरत्रयम् ५
द्व्यर्धाज्वा साचीकृतयोर्मध्ये द्वे व्यन्तरे परे
परोद्व्यर्धक्षपार्श्व व्यन्तरं चैकमन्तरे ६
ऋज्वागतपरावृत्तपार्श्वाभ्यागतयोर्दश
अन्तरे व्यन्तराणि स्युः स्थानकान्यपराणयपि ७
ऋज्वागताद्यं मध्यं च विग्रहं वेन्वा---
ऋज्वागतां --- शेषभाव्यन्तरा व्यया ८
अर्धापाङ्गमर्धपुटमर्धार्धपुटमेव च

अर्धर्ज्वंसेऽपि कथितं सिलीदव्यन्तरं व्ययः ९
अर्धसाचीकृतं चैव स्वस्तिकं च ततः परम्
साचीकृतोशे द्वावुक्तावंशौ द्व्यर्धाङ्गसंज्ञिते १०
द्व्यर्धाङ्गांशपरावृत्तं द्व्यर्धाङ्गांसं च ते उभे
द्विज्वाङ्गे व्यन्तरे प्रोक्ते चित्रशास्त्रविशारदैः ११
ऋज्वागतादध्यर्धाङ्गं यथा प्रोक्तानि संज्ञया
व्यन्तराणि तथैव स्युः परावृत्ते यथाक्रमम् १२
वैचित्र्यं भित्तिके नास्तीत्येव चित्रविचित्र्यं विविदो विदुः
एकान्नत्रिंशदेवं च स्थानानि व्यस्तवर्त्मना १३
वैतस्त्यमन्तरं स्थाप्यं पादयोः सुप्रतिष्ठितम्
हिक्कायां पादयोश्चान्तभूमौ लम्बे प्रतिष्ठिते १४
प्रोक्तमृज्वागतं पूर्वं प्रमाणेन निरूपितम्
ततोऽर्धर्ज्वागतस्येदं प्रमाणमुपलक्षयेत् १५
ब्रह्मसूत्रं तु कर्तव्यं मुखस्यैव तु मध्यगम्
नेत्ररेखासमत्वेन तिर्यक्तालो भवेन्मुखम् १६
अपाङ्गस्याच्चिकूटस्य कर्णस्य च भवेत्क्षयः
अन्यत्र कर्णमानं स्यादर्धाङ्गुलविशेषितम् १७
दृक्सूत्रे ब्रह्मलेखाया अपरे स्यात्कलाहवम्
यच्छमात्राश्रुपातोच्चि क्षीयतान्योपवस्तथा १८
त्रियवाः श्वेतभागः स्यात्तारा च प्रोक्तमानतः
विस्तारः श्वेतभागश्च करवीरोऽपि चोक्तवत् १९
परभाः करवीरं स्याद्ब्रह्मसूत्रात्तथाङ्गुलम्

पूर्वभाकरवीरात्तु सङ्गमश्चाङ्गुलं भवेत् २०
कर्णनेत्रान्तरं प्रोक्तं कलाध्यार्धाङ्गुलाधिका
पूर्वकू सर्वदिस्याविद्वायत्कथयेत्पराम् २१
पुटोऽङ्गुलं ब्रह्मसूत्रात्कपोलाद् द्वयङ्गुलं भवेत्
पूर्वे परत्र मात्रार्धं पुटः स्याच्छेषमुक्तवत् २२
परभागान्तराष्ट स्यादङ्गुलं द्वियवाधिकम्
अधरः परभागे तु यवषट्कं विधीयते २३
अधरान्ता कला गण्डो ब्रह्मसूत्रात् पुनर्हनुः
परभागेऽङ्गुलं सार्धं मुखलेखाङ्गुलं ततः २४
आरुड वा यत्कार्यं मुखयां पर्यतलेखया
परिवर्तसुखादेशा ज्ञात्वा कार्या प्रयत्नतः २५
अपादमध्यं हि ज्ञातः सूत्रेऽन्यस्मिन् प्रवर्तिते
खरे लुप्येत तुर्यांशः पूर्वेत्वेवाविवर्धते २६
कद्वाधरः परे भागे सूत्रतः पञ्चगोलकः
पूर्वभागे तृतं विद्यात्षड्गोलपरिमाणतः २७
मध्ये सूत्रात् पार्श्वलेखा --- गावच्चतुष्कलम्
उरसो मध्यमात् सूत्रात्कद्वा स्यान्नवमाभवा २८
द्वंतलेखात्तस्मात्वं विधाकलत्रयम्
स्तनाः पार्श्वकलां कुर्यात्स्तनं वा पतमण्डलम् २९
परतो हस्तकः कार्यः कर्मयोगानुसारतः
पार्श्वपर्यन्त सर्वा भागे षषंडलालम् ३०
तथैव पूर्वहस्तस्य यथायोगं प्रकल्पना

अभ्ययस्वाग --- दीनां क्रिया स्याद्दक्षिणे करे ३१
मध्ये षडङ्गुला रेखा बाह्यसूत्रात्परे भवेत्
पूर्वस्मिन् बाह्यलेखा तो मध्ये स्यादष्टमात्रका ३२
नाभिदेशे परे भागे बाह्यासौ सप्तमात्रका
कलामात्रं भवेन्नाभिस्तस्याः पूर्वं नवाङ्गुला ३३
परे भागे कटिः सप्त मात्रा दश च पूर्वतः
ऊरुलेखा परे भागे मुखमानस्य मध्यतः ३४
प्राग्भागस्य बहिर्लेखा ----परजानुतः
परभागेन्द्रवास्तेश्च सूत्रस्यात्तद्वदङ्गुले ३५
परस्य नलकस्य स्याल्लेखा प्रागङ्गुलान्तरे
परभागस्य षष्ठांशाः सूत्रा प्रागङ्गुलद्वयोः ३६
नलेन परपादस्य भूमिलेखा विधीयते
ततोऽङ्गुष्ठोऽङ्गुलेनाधः पार्ष्णिरूर्ध्वं तदर्धतः ३७
अङ्गुष्ठाग्रं ब्रह्मसूत्रात्परस्मिन् पञ्चमात्रकम्
तलं च परभागज्ञैस्तिर्यक् पञ्चाङ्गुलं स्मृतम् ३८
सत्वितस्तलघाष्प्येः स्यादङ्गुष्ठाग्रं कलात्रये
अङ्गुल्योऽङ्गुष्ठतः सर्वा व्रजत्परयं क्रमात् ३९
सन्निवेशसवासाद द्विरङ्गुल्यतो नवाङ्गुलः
यथोक्तं जानु पूर्वं स्यात्सूत्रतश्चतुरङ्गुले ४०
नलकस्तद्वदेवास्य नलकौ त्र्यङ्गुलान्तरौ
सूत्रादद्यः कलास्तिस्त्राङ्गुष्ठस्त्वङ्गुलत्रयम् ४१
भूमिसूत्राद् गतोऽधस्तात्पूर्वाङ्गुष्ठो भवेत् कला

अङ्गुष्ठोऽङ्गुलयश्चेति सर्वमन्यद्यथोदितम् ४२
दृश्यपार्श्वतलप्रविपारंहौ मध्यमे तलम्
एवमुक्तप्रमाणेन ज्ञात्वा युक्त्या समादिशेत् ४३
अर्धज्वागतमित्येतत्प्रवरं स्थानमीरितम्
लक्ष्म साची कृतस्याथ स्थानकस्याभिधीयते ४४
विन्यस्येद्ब्रह्मसूत्रं प्राक्स्थानबोधस्य सिद्धये
ललाटं परभागे स्यात्केशलेखा तथा कला ४५
परभागभ्रुवो लेखा --- र्धमुदाहृता
परता --- क्ष्मिलेखायां कालिका द्वियतो ज्ञत ४६
ज्योतिषः स्यात्परे भागे तारा दृश्या यवोन्मिता
यवमात्रं ततो ज्योतिस्तस्मात्तारा यवद्वयम् ४७
श्वेतं च करवीरं च ततः प्रागुक्तमानतः
कनीलिका तु नासाया मूलं विद्याद्यवान्तरम् ४८
नासामूलं प्रमाणेन ततो ज्ञेयं यवत्रये
ब्रह्मसूत्रात्पूर्वभागे नगन्तोर्ध्वगोलकौ ४९
आपाङ्गं स्तात्रेतो विद्यादिद्वगोलकमितेऽन्तरे
तस्माद्भागेन कर्णान्तः कर्णः स्याद्विस्तरेण तु ५०
द्वियवोना कला चक्षुर्व्यावृत्त्या परिवर्धितः
पूर्वस्य करवीरेण सह श्वैत्यं यवत्रयम् ५१
द्वितीयश्वैत्यदृक्तारापसृतिः प्रोक्तमानतः
कपोललेखा परतो यवद्वा ता कला भवेत् ५२
ब्रह्मसूत्रान्नासिकाग्रं परस्मिन् सप्तभिर्यवैः

नासापुटः पूर्वभागे स्याद्यवाधिकमङ्गुलम् ५३
पूर्वे भागे यवं गोजी तत्रोपान्ते विधीयते
परभागोत्तरोष्ठः स्यात्प्रमाणेनार्धमात्रकः ५४
त्रियवश्चाधरोष्ठः स्याच्छेषश्चापचयस्तयोः
पाल्या मध्ये भवेत् सूत्रं पाल्यास्तु चिबुकं परे ५५
हनुपर्यन्तलेखा च सूत्रादर्धाङ्गुले भवेत्
हनोर्मध्यगतं सूत्रं परे स्यात्परिमण्डलम् ५६
सहैकसूत्रे परदृक्पर्यन्तेन परिस्फुटा
मुखपर्यन्तलेखार्धे हनोरुपरि चाधरः ५७
कुर्याल्लेखाभिरेताभिः परभागं विचक्षणः
सूत्राङ्गुलोर्ध्वमात्रायां तस्माद् ग्रीवा यथोदिता ५८
सूत्रसंयोगात्पूर्वस्मिन्नङ्गुले सयवेऽङ्गुलः
हिक्काध्यर्धाङ्गुलं सूत्रात्पूर्वे स्यात्सुप्रतिष्ठिता ५९
बाह्यलेखा हि तत्सूत्रात्परस्मिन्नङ्गुलाष्टके
तालें यवोनग्रीवातो नग्रीवज्ञेयौसूनदूर्वकौ ६०
हिक्कासूत्रात्समारभ्य वक्षोभागोऽग्रिकं भवेत्
तावन्मात्रे तरेवाहु तस्मात्प्रभृति निर्दिशेत् ६१
हिक्कासूत्रात्परे भागे स्तनश्चाङ्गुलपञ्चके
रेखान्तसूचकः कार्यो मण्डलं सार्धमङ्गुलम् ६२
तस्मादनन्तरं बाह्यभागमात्रं विनिर्दिशेत्
हिक्कासूत्रात् समारभ्य स्तनः पूर्वषडङ्गुले ६३
स्तनात्षडङ्गुले तिर्यगक्षो स्मा द्वौ द्विभागिकः

कक्षतो द्विकलेऽधस्ताद्बाह्यलेखा विधीयते ६४
आभ्यन्तरा बाह्यलेखा स्तनात्पञ्चाङ्गुले तलेऽन्तरे
ब्रह्मसूत्राच्च भागेन मध्यभागे परिविदुः ६५
मध्यात्त्वकलयावहः परे तिर्यग्विभज्यते
मध्यप्रान्तः पूर्वभागे भवेत्सूत्राद्दशाङ्गुलः ६६
तिर्यङ्नाभिप्रदेशः स्यात्परतो ब्रह्मसूत्रतः
यवैश्चतुर्भिरधिकमङ्गुलानां चतुष्टयम् ६७
पूर्वभागे विनिर्दिष्टः स एवैकादशाङ्गुलः
मध्येनैति परस्योरोः सूत्रं नाभ्यन्तराश्रितम् ६८
प्रयात्यपरजाच्चैतात् पूर्वतः कलया च तत्
जान्वधोभागतश्चार्धकलया त्रियवेन च ६९
जङ्घामध्येन लेखायाः प्रसक्तं नलकस्य तु
षांते वैरवं परतश्चतुर्भिः सूत्रमिष्यते ७०
अनेनैवानुसारेण बहिर्लेखा विधीयते
ब्रह्मसूत्रात्परे भागे कटिरङ्गुलपञ्चके ७१
तामालमात्रा तु सा पूर्थे मेडाग्रं सूत्रसङ्गतम्
सूत्रादरभागोरू मूलाग्रये ७२
सूत्रादपरभागोरुमध्ये रेखा कलाद्वये
सूत्रात्पूर्वोरुमूलं स्यात्पूर्वतः कलया तथा ७३
कलाद्वयेन विज्ञेया रेखा पूर्वस्य जानतुः
साधार्ङ्गुलयवं जानु तत्पार्श्वं चार्धमङ्गुलम् ७४
सूत्रेण पादस्य मध्यरेखा विभज्यते

आदिमध्यान्तलेखायां सूत्रशौचमुदाह्वता ७५
सूत्रात्प्राग्भागमलके प्रान्तः पञ्चभिरङ्गुलैः
अर्धाङ्गुलं न्यसः कार्यः परभागोरुजङ्घयोः ७६
परान्तिमध्यगं सूत्रं लम्बभूभिप्रतिष्ठितम्
परपादतनान्तात्प्रागङ्गुलेन विधीयते ७७
--- सूत्रात्पूर्वपादस्य तलमष्टाङ्गुलं भवेत्
अधस्तात् तलयोः सूक्ष्मा स्याल्लेखाष्टादशाङ्गुलम् ७८
अङ्गुष्ठकाद्रकमात् प्रदेशिन्यङ्गुलाधिका
परपादतलावस्तून् पूर्वा ह्यङ्गुष्ठमूलगम् ७९
सूत्रं यथाति सा भूमिलेखेति परिकीर्तिता
सूत्रादर्धाङ्गुलेनोर्ध्वं तस्मात्पार्ष्णि परस्य च ८०
अङ्गुष्ठादङ्गुलीपातः पूर्वपादेऽनुसारतः
उपप्रदेशिनीमानात्कुर्यादत्र प्रदेशिनीम् ८१
अपराश्चाङ्गुलीः सर्वाः क्रमेण न्यपयेत्ततः
इति साचीकृतं स्थानमेतदुक्तं यथार्थतः ८२
अध्यर्धान्तमिदानीं च स्थानकं सू प्रचक्षते
ब्रह्मसूत्रमुखे कृत्वा मानमात्रं विधीयते ८३
केशान्तलेखा सूत्रात्स्यान्मात्रैका यवसंयुता
पृथग्वक्षः पृथक् श्रोणिः वृत्तःवाहः सुसंस्कृतिः ८४
भद्राकारो भवेद् भद्रो वृत्तवक्त्रः स्वभावतः
मालव्यस्य भवेन्मूर्धा प्रमाणेनाङ्गुलत्रयम् ८५
चतुर्मात्रललाटं च नाश वक्त्राशिरोधरा

मात्रा द्वादश वक्षेस्ये नाभिमेढ्रान्तरोदरे ८६
अष्टादशाङ्गुलौ चोरू जङ्घे अप्येवमेव हि
चतुरङ्गुलकौ --- जानुनी चतुरङ्गुले ८७
मालव्यस्यायमायामः षण्णवत्यङ्गुलो मतः
विस्तारो वक्षसस्तस्य मात्राः षड्विंशतिः स्मृतः ८८
बाह्वोः षोडशमात्रश्च प्रबाह्वोरेवमेव सः
पाष्णर्यौ द्वादशमात्रस्ये मालव्यस्त्वेह विस्तुतिः ८९
पीनांसो दीर्घबाहुश्च पृथुवक्षाः कृशोदरः
वृत्तोरुकटिजङ्घश्च मालवः पुरुषोत्तमः ९०
हंसस्य वक्रं पृथुगण्डभागं
कृशं शशस्यायतमास्यमाहुः
विस्तारदैर्घ्याद्भवकस्य तुल्यं
सुखं सुवृत्तं त्विहच भद्रवक्रे ९१
स्यान्मालावस्या लेपनं तु कान्तमयोज्यं
देही तु रूपैश्च भवन्ति युक्तास्ते कर्मणि सर्वगुणान्वितास्ते ९२
स दुर्लभं स्यात्पुरुषः प्रमेय-
मानोऽस्ति कीर्ण इति ह षष्टः ९३
मांसलेन शरीरेण ग्रीवासिरा अया ---
मांसलायातशाखा च नारी वृत्तेति सा मता ९४
पृथुवक्त्रा कटीह्रस्वा ह्रस्वग्रीवा पृथूदरी
पुंवत्कण्डकतुल्या स्यात्सा नारी पौरुषी मता ९५
अल्पकायशिरोग्रीवा लघुशाखा भवेच्च या

कृशाल्पब्रह्मसत्त्वा च सा नारी बालकी स्मृता ९६
पुंस्पर्शात्पश्यता या स्यात्कौमारे प्राप्तयौवना
अन्या सा बालकी प्रोक्ता स्त्रीलक्षणविचक्षणैः ९७
भुवः सद्वियवामात्रा लेखा कृशयवाङ्गुलाः
दक्तोयमन्तरे वर्त्म ताराय अर्धमालिखेत् ९८
स्वैत्यं चतुर्यवं दृश्यशेषं सा तिरस्कृतम्
कपोतरेखा परतो यववर्जितमङ्गुलम् ९९
सूत्रापूर्वपटान्तः स्यादर्धाङ्गुलमितेन्तरे
नासिकान्तोऽङ्गुलं सूत्रात्परे पूर्वेतपाङ्गुलम् १००
मूले नासापुटः साद्रः सूत्रं गोज्याश्च मध्यगम्
यवार्धमात्रा गोजी स्यादुत्तरोष्ठः परस्य यः १०१
स ब्रह्मसूत्रादारभ्य विज्ञेयो द्वियवोन्मितः
परे त्वधस्तान्नासाया रेखा चार्धाङ्गुलैर्भवेत् १०२
परभागेऽधरोष्ठस्य प्रमाणं --- यवं मतम्
हनुपर्यन्तलेखाया मध्ये सूत्रं प्रतिष्ठितम् १०३
सूत्रात्प्राक्करवीरः स्याद् द्वियवोनाङ्गुलद्वयम्
यवार्धं स च दृश्येत श्वैत्यं सार्धयवं ततः १०४
--- तारा त्रियवा ज्ञेया शेषमुक्तप्रमाणतः
कर्णावर्तादधः कर्णमध्यभागेन संमितम् १०५
द्व्यङ्गुलः कर्णविस्तारः कर्णावर्ताच्चतुर्यवे
शिरःपृष्ठस्य लेखा स्यादिति ज्ञात्वोक्तमाचरेत् १०६
कर्णसूत्राद् बहिर्ग्रीवा विधातव्यैकमङ्गुलम्

गलो ग्रीवा च हिक्का च सूत्राद् प्रागङ्गुलोत्तरे १०७
हिक्कासूत्राद्धवेदूर्ध्वमंसलेखा तथाङ्गुलम्
ब्रह्मसूत्रात्परे भागे स्यादंसोऽङ्गुलसंमिते १०८
वक्षोऽङ्गुलं ब्रह्मासूत्रां --- नस्ति कालान्तरे
भागमात्रे भवेत्कक्षासूत्रात्पूर्वः स्तनस्य च १०९
कक्षातिस्त्रिकलं यावत्पार्श्वलेखा विधीयते
दूराग्रभुजस्तस्यादग्रे कर्मानुसारतः ११०
प्रासादमध्यः सूत्रः स्यादेकादशभिरङ्गुलैः
परभागस्य मध्यस्त सूत्रात्स्यादङ्गुलैस्त्रिभिः १११
अङ्गुलेन परे भागे सूत्रतो नाभिरिष्यते
नाभेरुदरलेखा तु विज्ञातव्याङ्गुलत्रये ११२
श्रोणी कर्णो भवेन्नाभे मुखमर्धाङ्गुलान्वितम्
ब्रह्मसूत्रात्कटिः पूर्वे त्रिभागा त्र्यङ्गुला परे ११३
ब्रह्मसूत्राश्रित मेढ्रस्तले चा परतो भवेत्
पूर्वोक्तः मध्यभेखास्यात्सूत्रात्प्रत्यङ्गुल्यन्तरे ११४
तस्यैव मूलरेखा च सूत्रात्प्राग् द्व्यङ्गुलेन्तरे
मूललेखा परस्योरोः सूत्रात्स्यादिद्वकलेऽन्तरे ११५
पर्यन्तजानुनो भागे पर्यन्तोपरा जानुतः
परभागिका जातर्द्वे सूत्रस्य सम्यक्प्रतिष्ठितम् ११६
जानुमध्ये गता लेखा बाह्यलेखाश्रिता भवेत्
अध्यर्धमात्रं जानु स्यादधोलेखा तु तस्य या ११७
अर्धाङ्गुलेन सा सूत्रात्पूर्वतः प्रविधीयते

सूत्रात्परे पराङ्गुष्ठं मूलपादोनमङ्गुलम् ११८
मूलादङ्गुष्ठकस्याग्रं सार्धैः स्यादङ्गुलैस्त्रिभिः
सूत्रात्परं स्याज्जङ्घाया लेखाङ्गुलचतुष्टये ११९
तस्यास्तु पूर्वजङ्घाया लेखा स्यादङ्गुलद्वये
पूर्वजानु कलामानं शेषं कुर्याद्यथोदितम् १२०
परपादतले स्तम्भं यत्तिर्यक्सुप्रतिष्ठितम्
तत्प्राक्प्रदेलस्योर्ध्व सार्धया कलया भवेत् १२१
प्राग्भङ्गोऽङ्गुष्ठमूलेच्छस्तत्रास्वीया कनिष्ठिका
कलामात्रं निजाङ्गुष्ठादंधासागं प्रपद्यते १२२
यत्पराङ्गुलम्बसूत्रं प्रतिपद्यते
यत्पराङ्गुष्ठमूलोत्थं लम्बसूत्रं प्रपद्यते
मध्येन पूर्वभागाप्ति सबन्धाङ्गुष्ठकस्य तत् १२३
पूर्वपाष्णितलादूर्ध्वं विदध्यादङ्गुलत्रये
पाष्णेः परस्य पादस्य पूर्वपादं तिरस्कृतम् १२४
अध्यर्धार्द्धं यथाशास्त्रमेवं स्थानकमालिखेत्
अथ पार्श्वागतं नामस्थानं पञ्चममुच्यते १२५
व्यावर्तितमुखस्यान्ते ब्रह्मसूत्रं विधीयते
ललाटबाह्यलेखां च सूत्रस्पृष्टां प्रदर्शयेत् १२६
सूत्रात्तु नासिकावंशः संवृद्धय द्वाद्यमानतः
अपाङ्गो द्विकले सूत्रात्कर्णो यंशात् कलाद्वये १२७
कर्णो द्वयङ्गुलविस्तारः शिरःपृष्ठं कला ततः
अस्य मध्यगतं सूत्रमास्यार्धं स्थापयेत् ततः १२८

अङ्गुले चिबुकं सूत्राद्धनुमध्यं चतुर्यवे
साधार्ङ्गुले ततः कण्ठवर्तिग्रीवाङ्गुले नतः १२९
अङ्गुलेन ततो हिक्का चतुर्भिर्ब्रह्मसूत्रतः
मूर्ध्ना श्रवणपाल्यन्तेनैति सूत्रं तदुच्यते १३०
ग्रीवायाङ्गुल्यमध्येन मध्यसूत्रं तदुच्यते
भागे हिक्कामध्यसूत्रादण्डमूलं कलाद्वये १३१
मात्राष्टके च पृष्ठं तो हृल्लेखाप्येवमेव हि
स्तनस्य मण्डलं तस्मादङ्गुलेन विधीयते १३२
कक्षा च पूर्वभागे स्यात्सूत्रात् पञ्चभिरङ्गुलैः
मात्रात्रयेणापरस्मिन् भागे कक्षा विधीयते १३३
उभयोरन्तयोः प्राहुर्मध्यमष्टाङ्गुलं बुधाः
अङ्गुलैर्दशभिर्मध्यं पर्यन्तो मध्यसूत्रतः १३४
मध्यपृष्ठं चतुर्भिः स्यान्नाभिपृष्ठं च पञ्चभिः
नाभ्यन्तरेखा नवभिः कटिपृष्ठं कलात्रये १३५
उदरप्रान्तलेखा च ज्ञेया दशभिरङ्गुलैः
मां मा भ्रात्रयेणाभिरष्टाभि सूत्रात् स्फिजो मध्यं प्रचक्षते १३६
वस्तिशीर्षे च नवभिः स्फिगन्तोऽष्टभिरङ्गुलैः
अष्टभिर्मेढ्रमूलं स्यादूरुमध्यं च सप्तभिः १३७
अङ्गुलैः पञ्चभिर्मूलमूरोः पार्श्वात्यमुच्यते
चतुर्भिरङ्गुलैः सार्धैः करमध्यं च पृष्ठतः १३८
अग्रतः पञ्चभिः सार्धैस्तदेव प्राहुरङ्गुलैः
करमध्याङ्गुलैर्मध्यं सूत्रमध्ये विधीयते १३९

जान्वर्धे मध्यसूत्रं स्याद्भागो लेखा च जानुतः
भवेदुभयतः सूत्रं जङ्घा मध्ये च कीर्तता १४०
जङ्घ षडङ्गुला सूत्रं मध्ये स्यान्नलकस्य च
उभयोः पार्श्वयोः कार्यो नलकश्चाङ्गुलद्वयम् १४१
चतुर्भिरङ्गुलैः पार्ष्णिर्मध्यसूत्राद्विधीयते
यथोक्तमानेनाङ्गुल्यस्तथा पादतलं भवेत् १४२
पार्श्वागतमिदं प्रोक्तं स्थानं भित्तिकसंज्ञकम्
पार्श्वागतस्थानम् ।
अतः परं परावृत्तस्थानकान्यभिदध्महे १४३
ऋज्वा गतपरावृत्तं तत्रादावभिधीयते
तत्राङ्गुलद्वयं कर्णौ विधातव्यौ पृथक्पृथक् १४४
पार्ष्णिपर्यन्तयोर्मध्यं तथा सप्ताङ्गुलं भवेत्
अङ्गुलत्रितयं सार्धं पार्ष्णी कार्यौ पृथक्पृथक् १४५
कनिष्ठानामिकामध्या दर्शयेच्चतुरङ्गुली
अङ्गुष्ठानामिकामध्याकनिष्ठावलिखेन्तरे १४६
परावृत्तमिदं शेषमृज्वागतवदादिशेत्
अध्यर्धाद्यादिकाद्वूयानि स्थानानि तेषु यत् १४७
भवेद्यस्य परावृत्तं तद्वशात्तस्य तद्भवेत्
--- यस्य हि यद्दृश्यं स्थानकस्याङ्गमीरितम् १४८
तददृश्यं परावृत्ते तस्यादृश्यं च दृश्यते
स्थानानी भवितानि --- जीवेषु द्विपदेषु च १४९
निर्जीवेष्वपि जानीयाद्यानासनगृहादिषु

स्थानानि मूलभूतानि नवैवैतानि वस्तुतः १४०
यानि निविशतभक्तानि तद्भेदानि च तान् विदुः
मूर्धस्थिता यदा दृष्टा ऋज्वादीनि विलोकयेत् १५१
स्थानानि तेषां यन्मानं तदस्मात् तदिहोच्यते
विस्तृत्याष्टादश न्यस्येदायत्या द्विगुणानि च १५२
अङ्गुल्यन्यादारासूत्रं यथाभागं यथोचितम्
आयामस्यार्धदेशे च विस्तारोऽस्याग्रतोऽष्टभिः १५३
--- पृष्ठप्रदेशार्द्र--मङ्कयेत्
तन्मध्यगामिनी सूत्रे न्यस्येदायतविस्तृते १५४
अङ्गानां स्यात्तदवधिर्निर्गमो वष्टमाणकः
सूनत्योगतो गर्भसूत्रादित्यादि १५५
स्तनगर्भो गर्भसूत्राद्विस्तृतौ स्यात्षडङ्गुलः
षडङ्गुलः स्यात्स्तनयोस्तिर्यग्गर्भविनिर्गमः १५६
तिर्यग्गर्भात्पृष्ठपक्षौ स्फिजावपि दशाङ्गुले
नवाङ्गुले पृष्ठवंशः स्फिजो सप्ताङ्गुलेऽन्तरे १५७
कक्षाया मूलमायामाद्गर्भतश्च दशाङ्गुलम्
निर्गमोऽग्रेऽङ्गुलं तस्य सूत्रात्सप्त च पृष्ठतः १५८
गर्भसूत्रात्ततस्तिर्यक्पादांशोऽष्टादशाङ्गुलः
गर्भाद्यवप्रदेशश्च भवेत्पञ्चभिरङ्गुलैः १५९
अष्टाभिर्जठरं गर्भात्पार्श्वयोः पुरतोऽपि च
उदरस्य --- मं पृष्ठं पश्चात्सप्तभिरङ्गुलैः १६०
सार्धैर्द्वादशभिर्मूलमूर्वोरथो मतोऽङ्गुलैः

पञ्चाङ्गुलं निर्गमस्तत् --- स्यात्सप्त च पृष्ठतः १६१
ऊरुमूलस्य पृष्ठात्तु स्फिजौ त्र्यङ्गुलनिर्गतौ
मेढ्रमग्रे ततो ज्ञेयं गर्भसूत्रात्षडङ्गुले १६२
तिर्यक्सूत्राञ्जानुपार्श्वं सार्धैर्नवभिरङ्गुलै
आयामसूत्राञ्जान्वन्तपृष्ठेऽग्रे चतुरङ्गुलः १६३
नलकश्च भवेद्गर्भात्तिर्यगस्य षडङ्गुलः
गर्भसूत्रात्तु नलकः पृष्ठतश्चतुरङ्गुलः १६४
सूत्रान्ताङ्गुल्यपर्यन्तः स्यात्सार्धैः षड्भिरङ्गुलैः
अक्षः साधार्ङ्गुले सूत्राद्भवेद्विस्तृतिदर्शनात् १६५
चतुर्दशाङ्गुलाः पादो दैर्घ्येणात्र प्रकीर्तितः
गर्भादष्टाङ्गुलाग्रोऽसौ पश्चादपि षडङ्गुलः १६६
जानुनोरक्षश्च स्यादन्तरमङ्गुलं मिथः
ऊर्वोरङ्गुलमुद्दिष्टं न भलयोश्चतुरङ्गुलम् १६७
ऋज्वागतमिति प्रोक्तमङ्घ्रजौ मध्यसूत्रतः
परिवर्ततगुलगं सावावप्यङ्गुलद्वयम् १६८
तस्मात्सावेस्त साधार्न्दये त्वङ्गुले परिवर्तनी
--- भित्तिकं प्रोक्तं परावृत्तेऽप्ययं विधिः १६९
ऋज्वागतार्धर्जुकसाचिसंज्ञाध्यर्धाक्षपार्श्वागतसंज्ञकानि
तेषां परावृत्तचतुष्टयं च प्रोक्तान्यथो विंशतिरन्तराणि १७०

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे ऋज्वागतादिस्थानलक्षणं नामैकोनाशीतितमोऽध्यायः

अथ वैष्णवादिस्थानकलक्षणं नामाशीतितमोऽध्यायः

अथान्यान्यभिधीयन्ते चेष्टास्थानान्यनेकशः
यानि ज्ञात्वा न मुह्यन्ति --- चित्रविचक्षणाः १
वैष्णवं समपादं च वैशाखं मण्डलं तथा
प्रत्यालीढमथालीढं स्थानान्येतानि लक्षणम् २
अश्वक्रामत्तमथायामविहितनाकत्रयं स्त्रीणाम्
द्वौ तालावर्धतालश्च पादयोरन्तरं भवेत् ३
तयोः समन्वितस्त्वैकस्त्र्यश्रः पक्षस्थितोऽपरः
किञ्चिदञ्चितजङ्घं च शगात्रभोज्यचसंयुतम् ४
वैष्णवस्थानमेतद्धि विष्णुरत्राधिदैवतम्
समपादे समौ पादौ तालमात्रान्तरस्थितौ ५
स्वभावसौष्ठवोपेतौ ब्रह्मा चात्राधिदैवतम्
तालास्त्रयोऽर्धतालश्च पादयोरन्तरं भवेत् ६
अश्रमेकं द्वितीयं च पादं पक्षस्थितं लिखेत्
नैपमोरु भवत्येवं स्थानं वैशाखसंज्ञितम् ७
विशाखो भगवानस्य स्थानकस्याधिदैवतम्
ऐन्द्रं स्यान्मण्डलं पादौ चतुर्मूलान्तरस्थितौ ८
त्र्यश्रपक्षस्थितिश्चैव कटिर्जानुसमा तथा
प्रसार्य दक्षिणं पादं पञ्चतालान्तरस्थितम् ९
आलीढं स्थानकं कुर्याद् रुद्रश्चात्राधिदैवतम्
कुञ्चितं दक्षिणं कृत्वा वामपादं प्रसारयेत् १०
आलीढं परिवर्तेन प्रत्यालीढमिति स्मृतम्

दक्षिणस्तत्र समः पादस्त्र्यश्रः पश्चास्थितोऽपरः ११
समुन्नतकटिर्वामश्चावहित्थं तदुच्यते
एकः समस्थितः पादो द्वितीयोऽग्रतलान्वितः १२
शूद्रमविद्धं वातश्चक्रान्त उच्यते
स्थानत्रयमिदं स्त्रीणां नृणामपि भवेत्क्वचित् १३
कटीपार्श्वे करौ वक्त्रमुरो ग्रीवा शिरस्तथा
स्थानकेषु समस्तेषु कार्यमेतत् क्रियानुगम् १४
क्रियाणां पुनरानन्त्यात् समस्तेन न शक्यते
वक्त्रं तथापि दिङ्मात्रमस्माभिः संप्रदर्श्यते १५
हृष्टायाः प्रियनार्याः पुरुषस्य वा प्रियाभ्यर्णे
भवति स्थितसंस्थानं त्रिभिरिति तच्च कथयामः १६
यद्ब्रह्मसूत्रमृज्वागते भवेत् तन्मतृभागेऽपि
अवयवविभागतस्तत्कथयामः साम्प्रतं क्रमशः १७
शीनं तत्रय विनासिकाधरपुटेषु सृक्वणि च
कंगंते परचूचुकपूर्वेण कलान्तरे नाभौ १८
पश्चादूरोर्मध्ये पश्चिमगुल्फस्य तद्वदन्ते च
स्थाने त्रिभगा भामिनि सूत्रस्य गतिर्विनिर्दिष्टा १९
पादौ तालान्तरितौ कर्तव्यौ स्थानके त्रिभङ्गाख्ये
षोडशविंशत्यङ्गुलमध्येऽन्तरितो पितुदडिदाक्षे २०
गमनं त्रिविधं प्राहुद्रुतमध्यविलम्बितप्रभेदेन
स्थानेष्वर्धनेत्राख्यभित्तिषु त्रयगमध्ये २१
प्रान्ते करवीरस्याथ --- सृक्वपर्यन्ते

कण्ठान्ते परभागा स्तनतोगुलदुम्मपर्यन्ते २२
नाभ्यासन्ने मध्ये मेढ्रस्य तथा परस्य नलकस्य
प्रान्ते वङ्क्षायाते गमने स्याद् ब्रह्मसूत्रगतिः २३
सोधेगमने तु पूर्वे लोचनखीरके पुटे तद्धि
तविबुकरान्ते स्तनचूकस्य मध्ये तथा नाभौ २४
मध्ये मेढ्रस्यान्ते --- परजानुनः क्रमेणैव
अपराङ्गुष्ठकमूले विज्ञेयं ब्रह्मसूत्रमिति २५
परपादद्वाद्वङ्क्षि स्थित्या क्रियते तथाच पूर्वाह्णे
कुर्यात् तलमिह भूतलसूत्रार्धं --- गुलोत्क्षिप्तम् २६
भूपर्यन्तेऽपाङ्गे चिबुकांशो गोलकान्तरे नाभेः
सूत्रपरत्वतः पूर्वेण परावसार्धाद्धे २७
पार्श्वगते संस्थाने पश्चिमपादोऽत्र सप्तगोलः स्यात्
द्वयर्धाद्धगमनमुक्तं ब्रूमः पार्श्वागतेर्गमनम् २८
आवर्ते --- कूटे गण्डप्रान्ते च सृक्वभागस्य
गलवर्त्तौ स्तनमध्ये गोलत्रितयान्तरे नाभेः २९
स्फिक्पार्श्वपश्चिमजानुनश्चा पूर्वार्तमामृतं सूत्रम्
स्यादपरपार्ष्णिपूर्वस्थितं चभिवेत्थोने ३०
क्षपयेत् परभागाद्धि स्वस्मान्मानाद्यथोदितादत्र
पूर्वाह्णेरङ्गुष्ठः कर्तव्यो भूमिसूत्रस्थः ३१
पश्चादङ्गुष्ठाग्रं सुश्लिष्टं स्याद् विलम्बिते गमने
अङ्गुष्ठाङ्गुले ब्रह्मसूत्रतस्तालिके मध्ये ३२
द्रुतगमनेऽङ्गुष्ठाग्रं कर्तव्यं षोडशाङ्गुले तस्मात्

परपादाभूमेसः प्रोत्क्षिप्तो भवति पूर्वपादश्च ३३
इति सर्वेषु ज्ञेयं गमनस्थानेषु संस्थानम्
गोत्राणां मध्येषां विदधीत बुधः स्थितिं यथायोगम् ३४
विन्यासयोषणाक्षिप्तण दृष्टिहस्तादिविनिवेशैः
अथ स्थानचतुष्कस्य प्रविच्छन्दककीर्तनात् ३५
अन्या अपि क्रिया लेख्याः सम्भवन्तीह या नृणाम्
शिष्याणां प्रतिपत्त्यर्थं सूत्राणि त्रीणि पातयेत् ३६
ब्रह्मसूत्रगते सूत्रे ये च पार्श्वसमाश्रये
ऊर्ध्वानि त्रीणि सूत्राणि स्थानकेष्वभिष्वपि ३७
कुर्वीत तेषु मध्ये यद्ब्रह्मसूत्रं तदुच्यते
भित्तिके पुनरन्यस्य भागस्यापेक्षया मतम् ३८
पार्श्वस्थं ब्रह्मसूत्रं स्यात्कार्यतो मध्यगं हि तत्
ये द्वयोः पार्श्वयोः सूत्रे --- हि ते स्मृते ३९
प्रदेशावयवस्यात्र निष्पत्त्यै यद्यदीप्सितम्
तत्र सूत्रं विधातव्यं तिर्यगूर्ध्वानुसारतः ४०
अपेक्षेतानि यावन्ति प्रत्यङ्गव्यक्तिसिद्धये
तावन्त्यवयवव्यक्तिसिद्धयै तिर्यङ्निनयोजयेत्
ऊर्ध्वानि त्रीणि सूत्राणि तिर्यङ्ना नुसारतः ४१
स्थानानि वैष्णवमुखान्युदितानि सम्यक्
त्रिमंगितडिते गमनैरुपेते
सूत्रस्य पातनविधिश्च यथावदुक्तो
ज्ञाते न भवेत् तदिह सूत्रभृतां वरिष्ठः ४२

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे वैष्णवादिस्थानकलक्षणाध्यायो नामाशीतितमः

अथ पञ्चपुरुषस्त्रीलक्षणं नामैकाशीतितमोऽध्यायः

पञ्चानां हंसमुख्यानां देहबन्धाति खन्नृणाम्
दण्डिनीप्रमुखानां च स्त्रीणां ता ब्रूमहे पृथक् १
हंसः शशोऽथ रुचको भद्रो मालव्य एव च
पञ्चैते पुरुषास्तेषु मानं हंसस्य कथ्यते २
अष्टाशीत्यङ्गुलो हंसस्यायामः परिकीर्तितः
विज्ञेया वृद्धिरन्येषां चतुर्णां द्व्यङ्गुलक्रमात् ३
तस्यङ्गुलद्वयं सार्धं शाटालं नासिका मुखम्
ग्रीवा च वक्त्रश्चयमोद् भवेदेकादशाङ्गुलम् ४
एवमेवोदरं नाभिमेढ्रयोरन्तरं दश
विंशतिश्चाङ्गुलान्यूरू जङ्घे च त्रीणि जानुनी ५
त्रीण्यङ्गुलान्यङ्गुले च केशभूरङ्गुलद्वयम्
केशान्तमानं सर्वेषामधिकं स्यात्स्वमानतः ६
विस्तारेण भवेद् वक्षस्तस्यैवाङ्गुलविंशतिः
द्वादशाङ्गुलविस्तारो बाहुसंसस्य निर्दिशेत् ७
दशाङ्गुलौ प्रकोष्ठौ च हस्ततथे ---
तथा पृथक् पृथक् च्छ्रोणिः पीनाङ्गुलि ततो भवेत् ८
हंसस्वभावेन पृथग् --- म्भारनासिकः
शेसस्य त्र्यङ्गुलं --- नासिका वक्त्रमेव च ९

ग्रीवापि तत्प्रमाणैव वक्षस्त्वेकादशाङ्गुलम्
तथोदरं तथा नाभिमेढ्रयोरन्तरं दश १०
ऊरू विंशतिमात्रौ च शशस्य परिकीर्तितौ
त्र्यङ्गुले जानुनी जङ्घे मात्राविंशतिमायते ११
गुल्फौ च त्र्यङ्गुलायामौ तावन्मात्रं शिरो भवेत्
आयामोऽयं शशस्यैवं स्यान्नवत्यङ्गुलोन्मितः १२
द्वाविंशत्यङ्गुलं वक्त्यां विस्तारेणास्य कीर्तितम्
बाहुप्रबाहू पाणी च शशकस्यापि हंसवत् १३
समयाच्च स कर्तव्यः स्वभावाच्च कृशोदरः
तथोयवेत् केशोरुजङ्घो द्विद्वान् विचक्षणैः १४
रुचकस्य तुखायामद्याम प्रोक्तः सार्धदशाङ्गुलः
ग्रीवाङ्गुलत्रयं सार्धमायामेनास्य कीर्तिता १५
एकादशाङ्गुलो व्यापूर्वकृस्तस्य प्रमाणतः
तावन्त्येवोदरं तस्य नाभिमेढ्रान्तरं दश १६
विंशतिश्चाङ्गुलान्यूरू जानुनी चाङ्गुलत्रयम्
विंशत्यङ्गुलमायामं जङ्घयोस्तस्य निर्दिशेत् १७
अङ्गुलत्रितयं गुल्फौ कुर्यात्तस्य शिरोऽपि च
द्विनवत्यङ्गुलायामो रुचकः परिकीर्तितः १८
इत्यायामोऽस्य विस्तारो वक्षसोऽङ्गुलविंशतिः
भुजौ दशाङ्गुलायामौ प्रकोष्ठौ तद्वदेव च १९
एकाडशाङ्गुलौ हस्तौ विस्तारेणास्य कीर्तितौ
पीनांसः पीनबाहुश्च सलीलगतिचेष्टितः २०

बलवान् वृत्तबाहुः स्याद्रुचको रुचकाकृतिः
भद्रस्य प्राहुरायामं मस्तकस्याङ्गुलत्रयम् २१
एकाडशाङ्गुला --- ग्रीवा सार्धाङ्गुलत्रया
वक्षो जठरमप्यस्य सपादैकादशाङ्गुलम् २२
नाभिमेढ्रान्तरं चास्य विद्यात्सार्धदशाङ्गुलम्
आयाममूर्वोर्जानीयात् सपादाङ्गुलविंशतिम् २३
जङ्घे च तावदायामे जानुगुल्फं त्रिमात्रकम्
चतुर्तवर्तिसरामो चन्द्रस्यैष प्रकीर्तितः २४
आयाम एष विस्तारो वक्षसस्त्वेकविंशतिः
एकादशाङ्गुलौ बाहू तस्य --- २५
हंसादिपुंसामिदमेवमुक्तं
यद्वा यथालक्षणमानमत्र
स्त्रीणां च सम्यग्गदिता सुखानाद्
यो वेत्ति मान्यः स भवेन्नृपाणाम् २६

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे पञ्चपुरुषस्त्रीलक्षणं नामाध्याय एकाशीतितमः

अथ रसदृष्टिलक्षणं नाम द्व्यशीतितमोऽध्यायः

रसानामथ वक्ष्यामो दृष्टीनां वेइ लक्षणम्
तदायत्ता यतश्चित्रे भावव्यक्तिः प्रजायते १
शृङ्गारहास्यकरुणा रौद्रप्रेयोभयानकाः
वीरप्रत्ययाक्षौ च बीभत्सश्चाद्भुतस्तथा २

शान्तश्चैकादशेत्युक्ता रसाश्चित्रविशारदैः
निगद्यते क्रमेणैषां सर्वेषामपि लक्षणम् ३
सभ्रूकम्पकटीक्षपेच तथा प्रेमगुणान्वितः
यत्रेष्टललिता चेष्टा स शृङ्गारो रसः स्मृतः ४
विकासिललितापाङ्गो मृदु चा स्फुरिताधरः
लीलया सहितो यश्च स हास्यो रस उच्यते ५
अश्रुक्लिन्नकपोलान्तः शोकसङ्कुचितेक्षणः
चित्तसन्तापसंयुक्तः प्रोच्यते करुणो रसः ६
निर्मार्जितललाटान्तः संरक्तोद्वृत्तलोचनः
दन्तदष्टाधरोष्ठो यः स रौद्रो रस उच्यते ७
अर्थलाभसुतोत्पत्तिप्रियदर्शनहर्षजः
सञ्जातपुलकोद्भेदो रसः प्रमा स उच्यते ८
वैरिदर्शनवित्रासससम्भ्रमोद्भ्रान्तलोचनः
हृदि संक्षोभयोगाच्च रसो ज्ञेयो भयानकः ९
अष्टावष्टम्भसमेर्था सूत्रसङ्कुचितानतः
धैर्यवीर्यबलोत्पन्नः स वीरस्तु रसः स्मृतः १०
ईषदुत्प्रसित्तत्र कस्तच्च स्तिमिततारकः
ससम्भाव्यं विलोक्यार्थमद्भुतो जायते रसः ११
अधिविकारैः प्रसन्नैश्च भ्रूनेत्रवदनादिभिः
अरागाद्विषयेषु स्याद्यः स शान्तो रसः स्मृतः १२
इत्येते चित्रसंयोगे रसाः प्रोक्ताः सलक्षणाः
मानुषाणि पुरस्कृत्य सर्वसत्त्वेषु योजयेत् १३

इति रसाः ।

अथ दृष्टीरभिदध्मो ललिता हृष्टा विकासिता विकृता
भ्रुकुटी विभ्रमसंज्ञा संकुचिता छवितनाप्रीव १४
ऊर्ध्वगता योगिन्यथ दीना दृष्टा च विविष्टह्वला खेवे
स्यादङ्किता भिधाना विविरव्याव जिह्मा च १५
मध्यस्थेति तथान्या स्थिरेति चाष्टावेवमुद्दिष्टा
एता दृशोऽथ लक्षणमेतासामुच्यते क्रमशः १६
विकसितप्रगल्लाससम्भ्रमत्र कटाक्षविक्षेपा
शृङ्गाररसोद्भूता दृष्टिर्ललितेति विज्ञेया १७
प्रियदर्शने प्रसन्नां प्रोद्भूतरोमाञ्चविकसितापाङ्गा
प्रस्तरसासिजाता हृष्टा दृष्टिः समाख्याता १८
विकसितनयनप्रान्ता विकासितापाङ्गनयनगण्डतला
क्रीडाकारयुताहास्यरसे विकासिता दृष्टिः १९
विख्याता प्रीतिविकारिर्व्यक्तभया भ्रान्ततारका या च
ज्ञेया विकृत्यकारैः सारै च भयानका दृष्टिः २०
दीप्तोर्थताकातास्त्रप्रतता मन्ददर्शना
दृष्टिरूर्ध्वं निविष्टा तु भ्रूकुटिः परिकीर्तिता २१
सत्त्वस्था दृढलक्ष्मा ससौष्ठ व्यक्ततारका सौम्या
विप्रत्यपरजालाता दृष्टिः स्याद् विभ्रमा नाम २२
मन्मथमदेन युक्ता स्पर्शरसोन्मीलिताक्षिपुटयुग्मा
सुतरुसुखानन्दयुतासङ्कुचिता नाम दृष्टिराख्याता २३
निर्विकारा क्वचित्तावन्नासिकाग्रावलोकिनी

योगिनी नाम सा दृष्टिस्तत्त्वे चित्तस्य योजनात् २४
अर्धस्रस्तोत्तरपुटा किञ्चित्संरुद्धतारका
मन्दसञ्चारिणी सास्रा शोके दीनाभिधीयते २५
संस्थिते तारके यस्याः स्थिरा विकसिता तथा
सत्त्वमुद्गिरती दृष्टा दृष्टिरुत्साहसम्भवा २६
म्लानभ्रूपुटपद्मा या शिथिला मन्दचारिणी
क्रामप्रविष्टतारा च विह्वला तामला स्मृता २७
किञ्चिच्चला स्थिरा किञ्चिदुत्ताना तिर्यगायता
मूढा चकिततारा च शङ्किता दृष्टिरिष्यते २८
आनिकुञ्चितपद्मा या पुटैराकुञ्चितस्ता तथा
सत्रिजन्त ---तारा च कुञ्चिता दृष्टिरुच्यते २९
लम्बितार्धपुटा --- तिर्यग्ग्रूद्वेद्वणा शनैः
निगूढा गूढतारा च जिह्मा दृष्टिरुदाहृता ३०
ऋजुतारा ऋजुपुटा प्रसन्ना रागवर्जिता
त्यक्तादरा च विषये मध्यस्था दृष्टिरुच्यते ३१
समतारा समपुटा समभ्रूरविकारिणी
उपगारा विहीना च स्थिरा दृष्टिः प्रकीर्तिता ३२
हस्तेन सूचयन्नर्थं दृष्ट्या च प्रतिपादयन्
सजीव इति दृश्येत सर्वाभिनयदर्शनात् ३३
आङ्गिके चैव चित्रे --- साधनमुच्यते
भवेदत्रादतस्तस्मादनयोश्चित्रमाश्रितम् ३४
दृष्टिः ।

प्रोक्तं रसानामिदमत्र लक्ष्म दृशां च सांक्षिप्ततया तदेत्येत्
विज्ञेयचित्रालिखनान्तराणां न संशयं याति मनः कदाचित् ३५

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि
वास्तुशास्त्रे रसदृष्टिलक्षणाध्यायो नाम द्व्यशीतितमः

अथ पताकादिचतुष्षष्टिहस्तलक्षणं नाम त्र्यशीतितमोऽध्यायः

चतुःषष्टिरिहेदानीं हस्तानामभिधीयते
लक्षणं विनियोगश्च योगायोगविभागतः १
पताकस्त्रिपताकश्च तृतीयः कर्तरीमुखः
अर्धचन्द्रस्तथारालः शुकतुण्डस्तथापरः २
मुष्टिश्च शिखरश्चैव कपित्थः खटकामुखः
सुच्यास्यः पद्मकोशाशिरसौ मृगशीर्षकः ३
काङ्गलपद्मकोलश्च चतुरो भ्रमरस्तथा
हंसास्यो हंसपक्षश्च सन्दंशमुकुलावदि ४
ऊर्णनाभस्ताम्रचूढ इत्येषा चतुरन्विता
हस्तानां विंशतिस्तेषां लक्षणं कर्म चोच्यते ५
प्रसारिताग्राः सहिता यस्याङ्गुल्यो भवन्ति हि
कुञ्चितश्च तथाङ्गुष्ठ स पताक इति स्मृतः ६
उत्क्षिप्तन शिरो या --- त्पाणिनां मेरसा पुनः
नतेन वामतः किञ्चिद् भ्रुकुटीकुटिलभ्रु च ७
स्तोकविष्फारिताक्षेण प्रहारमभिनिर्दिशेत्
प्रतापनं तथोद्भूतो नरेसोग्रतेन च ८

तथैवाविकृतास्येन भालस्थः किञ्चिद् विचलितः करः
पताकस्फोरिताङ्गेण भ्रुकुटीकुञ्चितभ्रुवा ९
कार्योऽहमिति गर्वः स्याच्चित्रशास्त्रविशारदैः
अर्थेषु वक्ष्यमाणेषु संयुतं चैनमाचरेत् १०
द्वितीयहस्तयुक्तो यः स हस्तः संयुतः स्मृतः
तत्राग्निसूपणाचामः पुरतो क्षिणतः पुनः ११
ऊर्ध्वं प्रसर्प्य कर्तव्यः प्रचलद्विरङ्गुलिः
विदध्यादित्थमेवोक्तं वर्षधारानिरूपणम् १२
कित्वधामियंतं तौ तावमच्छन्तौ च दर्शयेत्
पुष्पवृष्टिप्रपतने प्रचलद्विरलाङ्गुलिः १३
कार्यं हस्तद्वयं वक्रं त्रयोऽप्यत्राधिकाघिः
कै तैव --- चोत्तानं विधाय स्वस्तिकं बुधः १४
कुर्वाणो विच्युतिं तस्य पल्वलं सम्प्रदर्शयेत्
पुष्पोपहारं सष्पाणि ये चार्था भूतलस्थिता १५
तानुन्नमितवामभ्रूः किञ्चिदुद्वाहयञ्छिरः
तादृशं हस्तयुग्मं तु कुर्यादविकृताननः १६
अधोमुखं च तेनैव कर्तव्याप्रघटना मिथः
संवृतं वा थविश्लिष्टं तारः --- १७
दर्शनीयं च वदनमस्मिन्नविकृतं सदा
पाल्यं छतन्न च कर्तव्यं शल्कशे परस्परा १८
किञ्चिद्विनतमूर्धा च विधायाधोमुखौ तलौ
निबिडं निबिडेनैव निर्विकारमुखाम्बुजः १९

उरसोऽग्रे तथोर्ध्वेन परावृत्ते च हस्तयोः
युगलेन मनसाशक्तिं प्रयत्नेन प्रदर्शयेत् २०
गोप्यं वामेन गुप्तेन किञ्चिद्विनतमस्तकः
किञ्चिदाकुञ्चितां वामां भ्रुवं कृत्वा प्रदर्शयेत् २१
पार्श्वस्थेन पताकेन पाणयङ्गद्वितयेन तु
अधिकस्थेन पताकेन पाणयब्जद्वितयेन तु २२
अधिकारिमुखे वायोः कुर्यादभिनन्दयं ततः
नतोत्त --- शिरास्तेन द्विहित भ्रुकुटिमानके २३
वेलामुर्वीं च मतिमान् पाणियुग्मेन दर्शयेत्
पुरःस्थितेन वामेन दक्षिणेन तु पाणिना २४
तसृष्टे सर्पता स्तोकमुद्वाहितशिरा नरः
वेगं प्रदर्शयेन्नित्यमविकारि दधन्मुखम् २५
इत्युश्वेनुश्च चलता हस्तयोर्द्वितयेन तु
मूर्ध्ना तदनुगेनैव तथैव विकृताननः २६
क्षोभस्यानयं कुर्याद्धस्ताभिनयकोविदः
उधस्तृधो मुखेनावः यतन्परार्थतापि च २७
पताकेनाभिनेतव्यो विधाय भ्रुकुटिं मनाक्
पार्श्वव्यवस्थितेनोर्ध्वं चलदङ्गुलिना मुहुः २८
उत्साहनं विधातव्यमुत्तप्य च शिरोधराम्
तिर्यग्विष्फार्यमाणेन प्रभूतमभिनिर्दिशेत् २९
महतोऽभिनयः कार्यः पार्श्वयोरूर्ध्वसर्पिणा
भ्रान्तेनोत्तानिते चानिकृतास्येन सिंहाजनम् ३०

रूपयेदुच्चमुच्चेन पताकेनैव पाणिना
इतस्ततः प्रचलता दर्शयेत् पुष्कराहतिम् ३१
सत्ताद्यपेण वक्त्रेण चलयै --- मुखेन च
स्थितेन पार्श्वयोस्तिर्यग्रिच्यमानेन दर्शयेत् ३२
पद्मोत्क्षेपक्रियां नित्यं वक्त्रेण विकृतेन च
उत्तानितेन वामेन विधृतेनेतरेण तु ३३
पुरःप्रसर्पिणाधौतं हस्तानुगतदृष्टिना
निघृष्टतलहस्तेन भ्रुकुट्या मृदितं पुनः ३४
प्रघृष्टमेकरूपेण द्वितीयेन प्रसर्पता
तेन स्योपरि हस्तेन निविष्टेन विधीयते ३५
अन्योन्य घर्षणात्येत् पिष्टं भ्रुकुट्या च प्रदर्शयेत्
पार्श्वस्थितेन शैलेन्द्रं दूरविष्फारितेन च ३६
प्रदर्शयेत् समुत्क्षिप्यमोमा भ्रूलतिकां शनैः
शैलधारणमन्योन्यशक्तेनाभिमुखेन च ३७
पार्श्वयोः सम्प्रवेश्याधः कृकतभ्रुकुटिना ततः
कार्यमुत्क्षिप्यमानेन शैलप्रोत्पाटनं तथा ३८
शिरःप्रदेशसंस्थेन दूरमुत्तानितेन च
समुन्नतभ्रुवा कार्या पर्वतोद्धरणक्रिया ३९
इति पताकहस्तः ।
पताके तु यदा वक्रानामिका त्वङ्गुलिर्भवेत्
त्रिपताकः स विज्ञेयः कर्म चास्याभिधीयते ४०
अयं --- अवि चलन्मध्याकनिष्ठिकः

अत्रोहेन विधातव्यो नतु मूर्ध्ना तथा मनाक् ४१
उन्नामेन समुत्क्षिप्तपुरोभागेन चामुना
नमता शिरसा कुर्यात्तथा वतरणक्रियाम् ४२
पार्श्वतः सर्पता कार्यममुनैव विसर्जनम्
पराङ्मुखानारयोग्र भ्रुकुटिं विरचय्य वा ४३
बारणं पार्श्वसंस्थेन प्रवेशोऽधो नतेन च
प्रवेशं कुर्वताकारो वेकुब्जमविकारिताः ४४
उत्क्षिप्ताङ्गुलियुग्मेन तथोत्तानेन चामुना
उन्नामनं विधातव्यमविकारिमुखेन च ४५
पार्श्वतो नमता कार्या प्राणेना नतमस्तकैः
निदर्शनं तथोद्वृत्तेनोर्ध्वाङ्गुलिशिखेन च ४६
प्रसर्पितमुखस्याग्रे विधिसम्बन्धनं पुनः
उत्तानेनासुमाङ्गुल्या श्वहीत्वा नामिकाख्यया ४७
मङ्गल्यानां समालम्भः पदार्थानां विधीयते
पराङ्मुखेन शिरसः प्रदेशे सर्पता तथा ४८
प्रदर्शयेच्छिरः सन्निवेशमेतेन पाणिना
एतानि दर्शनीयानि सर्वाण्ययविकृताननैः ४९
हस्तद्वयेनोभयतः केशानासन्नवर्तिना
उष्णीषमुकुटादीनि प्राप्नोतीति निरूपयेत् ५०
कर्तव्यः सोत्रनाशास्यं विधानेन समीपरा
पाणिः कृतभ्रुकुटिना तत्रोद्वस्तोङ्गुलिद्वयः ५१
अधोमुखं प्रस्थिताभ्यामङ्गुलीभ्यां प्रदर्शयेत्

चलाभ्यां मुकुलाभ्यां च हस्तस्यास्यैव पद्मदान् ५२
दर्शयेत्पाणियुग्मेन कदाचित् पद्मिणो लघून्
पवनप्रभृतींश्चैव पदार्थानपरानपि ५३
चलिताङ्गुलिना हस्तद्वयेनाद्योनति---स्या
अधोमुखेन वा स्रोतो दर्शयेत् सर्पता पुरः ५४
ऊर्ध्वावस्थितिना गङ्गास्रोतः सूत्रनिभेन च
अधो विनमता पाणिद्वितयेन प्रदर्शनायेत् ५५
पुरः प्रसर्पतैकेन चलता विकृताननः
हस्तेन सर्पाभिनयं विदधीत विचक्षणः ५६
अङ्गुलिद्वितयेनाधोमुखेनाश्रुप्रमार्जनम्
कुर्यात्कनीनिकाडेशसर्पिणा विनताननः ५७
अधश्चार्धं च सर्पन्त्या भालदेशे त्वनामया
तिलकं रचयेदेका सुन्द्रस्य भ्रलतां शये ५८
चैवानामिकया कार्या स्याद्रोचनाक्रिया
आलभ्य रोचनां मूर्ध्नि तथैव च विचिक्षेपेत् ५९
तथैव च विधातव्यमलकनो प्रदर्शनम्
उत्तानितेन हासश्च त्रिपताकेन पाणिना ६०
चदनेस्याग्रह स्तिर्यगङ्गुलिद्वयचालनात्
त्रिपताकाङ्गुलीभ्यां तु चलिताभ्यामुरोग्रतः ६१
शिखण्डिशारिकाकारकोकिलादीन् प्रदर्शयेत्
हस्तस्यानुगतां दृष्टिं त्रैलोक्य --- कारयेत् ६२
इति त्रिपताकः ।

त्रिपताके यदा हस्ते भवेद् पृष्ठावलोकिनी
तर्जनी मध्यमायाश्च तदासौ कर्तरीमुखः ६३
नमता संयुतेनेतस्ततः सञ्चरणं पदैः
तेतस्य स्तंद्वंलनंत्वं हि युगस्य तदमातया ६४
अधोमुखेन कर्तव्यमतेचैव रङ्गणम्
ललाटवर्तिना शृङ्गं संयुतेनोन्नतभ्रुवा ६५
प्रदर्शयेदुल्लिखता लेख्यमभ्युन्नतभ्रुवा
अधोमुखेन चैकेन तथाधो नमता मनाक् ६६
दर्शयेत् पतनं वाधो गच्छता मरणं तथा
नमतेतस्ततः शक्रविक्षेपेण विवर्जितम् ६७
पाणिना व्रजता भेस्ता कुञ्चितभ्रूर्नमच्छिराः
न्यस्तं प्रदर्शयेत् कार्यादृकसंयम्यमाचस्तं कुर्यान्निर्घाटनं तथा ६८
पीनं वालद्रुमीः कञ्चुकरानुगा
इति कर्तरीमुखः ।
यस्याङ्गुल्यस्तु विनताः सहाङ्गुष्ठेन चापवत् ६९
सोऽर्धचन्द्र इति प्रोक्तः करः कर्मा च कथ्यते
तेनोन्नतभ्रूरेकेन शशिलेखां प्रदर्शयेत् ७०
मध्यस्यौ यस्य मायस्तं कुर्यान्निर्घाटनं तथा
पीनं बालद्रुमाः कम्वु कलशा वलयानि च ७१
प्रदर्शनीयान्येतेन संयुतेनेति चापरे
रशनाकुण्डलादीनां तलपत्रस्य चामुना ७२
कटीजघनयोश्चाभिनयस्तद्देशवर्तिना

अस्याप्यनुगता दृष्टिः कार्या सर्वत्र नर्तकैः ७३
इत्यर्धचन्द्रः ।
आद्या धनुर्नता कार्या कुञ्चितोऽङ्गुष्ठकस्तथा
शेषा भिन्नोर्ध्ववलिता अरालेऽङ्गुलयः स्मृताः ७४
असृतेनारतोतेन किञ्चिदभ्युत्थितेन च
सत्त्वशौण्डीर्यगाम्भीर्यधृतिकान्तीः प्रदर्शयेत् ७५
दिव्याः पापार्ध ये चान्ये तानप्यविकृताननः
दर्शयेदुन्नतभ्रूश्च पाणिनानेन नर्तकः ७६
आशीर्वादं तथा कानां स्त्रीकेशग्रहणं च यत्
निर्वर्णनं च सर्वाङ्गमात्मनो यद्विधीयते ७७
उत्कर्षणं च तत्सर्वं कार्यमभ्युन्नतभ्रुवा
दर्शयेद्धस्तयुग्मेन प्रदक्षिणगतेन च ७८
विवाहं संप्रयोगं च कौतुकानि बहूनि च
अङ्गुल्यग्रसमायोगरचितस्वस्तिकेन च ७९
परिमण्डलयातेन प्रादक्षिण्यं प्रदर्शयेत्
परिमण्डलसंस्थानं तथानेन महाजलम् ८०
द्रव्यं महीतले यच्च रचितं तत्प्रदर्शयेत्
दानं वारणमाह्वानमनेकवचनं तथा ८१
दर्शयेच्चलता तेन हस्तेनासंयुतेन च
स्वेदापनयनं कार्यं गन्धाघ्राणं तथामुना ८२
तत्प्रदेशे प्रवृत्तेन पाणिना नृत्तकोविदैः
योषितां विषये चैष पाणिना प्रायेण युज्यते ८३

कर्मारभेतानि सर्वाणि त्रिपताकः सदाचरेत्
नाहमित्यभिनेतव्यमस्याडशस्थितेन च ८४
अस्यानुयायिनीं दृष्टिं विदधीत भ्रुवौ तथा
इत्यरालः
अरालस्य यदा वक्रानामिका त्वङ्गुलिर्भवेत् ८५
शुकतुण्डः स विज्ञेयः कर्म चास्याभिधीयते
न त्वमित्यमुना तिर्यक्प्रसृतेन प्रदर्शयेत् ८६
व्यावृत्तेन तु हस्तेन न् कृत्यमिति निर्दिशेत्
प्रसारितेन पुरतो नमताभिमुखं मुहुः ८७
कुर्यादावाहनं तिर्य --- मातु विसर्जनम्
व्यावृत्तेन तु हस्तेन न कृत्यमिति वारताम् ८८
अवेक्षे निपोनिषेक --- परावृत्तेन शस्यते
दष्टिभ्रुवौ चानुगते हस्तस्यास्य समाचरेत् ८९
इति शुकतुण्डः ।
अङ्गुल्यो यस्य हस्तस्य तलमध्येऽग्रसंस्थिताः
तासामुपरि चाङ्गुष्ठः स मुष्टिरभिधीयते ९०
एष प्रहारे व्यायामे कार्यः सभ्रुकुटीमुखैः
पार्श्वस्थहस्तयुग्मेन निर्गमे तु विधीयते ९१
इति मुष्टिः
यष्यतिग्रहणमात्रमर्धने स्तनपीडने
असंयुतो विधातव्यो सुदृष्टिभ्रवो तथा ९२
अस्यैव तु यदा मुष्ठेरूर्ध्वोऽङ्गुष्ठः प्रयुज्यते

हस्तः स शिखरो नाम तदा ज्ञेयः प्रयोक्तृभिः ९३
अयं वामो विधातव्यः कुशरश्मिचतुर्हि---
हस्तद्वयं व्याप्रियतो सृणिग्रहणकर्मणि ९४
शक्तितोमरमोक्षे तु सव्यहस्तः प्रयुज्यते
पादौष्ठञ्जने चैव चलिताङ्गुष्ठको भवेत् ९५
अलकस्य समुत्क्षेपे तत्प्रदेशस्थितो भवेत्
कुर्यादनुगतामस्य दृष्टिभ्रयुगलं तथा ९६
इति शिखरः ।
अस्यैव शिखराख्यस्य द्वयङ्गुष्ठकनिपीडिता
यदा प्रदेशिनी वक्रा स कपित्थस्तदा स्मृतः ९७
चापतोमरचक्रासिशक्ति चक्रांगदाविना
एतेनान्यानि शस्त्राणि सर्वाण्यभिनयेद्बुधः ९८
सत्यप्यभिनये जन्म --- विक्षिपेन्मुहुः
अत्रापि हस्तानुगतं दृष्टिभ्रूकर्म शस्यते ९९
इति कपित्थः
उत्क्षिप्तवक्रा तु यदा तां कार्या स कनीयसी
अस्यैव तु कपित्थस्य पदांशौषटकमुखः १००
अनेन होत्रं हव्यं च नमतान्नं विधीयते
द्वाभ्यामाकर्षणच्छत्रारं प्रग्रहप्रदर्शनम् १०१
एतेन न चास्यरादर्श वा जग्र पुनः
अवक्षेपसमुत्क्षेपौ व्यावृत्तेन तु खण्डनम् १०२
भ्रमता तु विधातव्यममुना परिपेषणम्

दीर्घदण्डग्रहे चैव षवस्त्रीतालम्बने तथा १०३
कुशकेशकलापादिग्रहे स्त्रग्दामसंग्रहे
दृष्टिभ्रू सहितो हस्तः प्रयोक्तव्यो विचक्षणैः १०४
इति खटकामुखः
खटकाख्ये यदा हस्ते तर्जनी संप्रसारिता
हस्तः सूचीमुखो नाम तदा ज्ञेयः प्रयोक्तृभिः १०५
एतदीयप्रदेशिन्या व्यापारः प्रायशो भवेत्
नतोऽर्वाक कम्पितो बालव्यालोद्वाहिकभ्रमाः १०६
ते स तत्र नत्र कर्मणि युज्यते
भ्रुमाया भिनयेच्चक्रं तं जृम्भितं चलयानया १०७
विलोलया पताकादीन् --- या
धूपदीपप्लुतावल्लीपल्लवान् वालपत्रमात् १०८
--- भ्रुद्वया पुष्पमञ्जरीम्
चलया वक्रगमनं चूलिकामुद्ध --- या १०९
सा बुधा चादाहु विधातर्धकम्पितपा
धूपदीपलतावल्लीपल्लवान् बालपन्नगान् ११०
शिखण्डकान् मण्डलं च नयनं चोर्ध्वलोलया
तारकानासिकादण्डयष्टी पूर्वसुस्थयानया १११
दक्षिणो दर्शयेत्रासन्नताधो नताक्रया
तिर्यङ्मण्डलया सर्वं तया लोकं प्रदर्शयेत् ११२
आद्यदीर्घे च विधास्ते विदध्यादुन्नतामिमाम्
विनमन्तीं पुनः कुर्यादपराङ्मुप्रदर्शने ११३

कर्तव्या वदनाभ्याशे सा कुञ्चितविजृम्भिता
अङ्गुलिः नृत्ततत्त्वज्ञैर्वाक्यार्थस्य निरूपणे ११४
सोऽयं तदिति निर्देशे प्रसृतोत्तानकम्पिता
रोषे प्रकम्पिताग्रा च हस्तेनाभ्युन्नतेन च ११५
प्रसृताग्रेण न मता च कर्तव्या स्वेदरूपणे
कुन्तलाङ्गदगण्डानां कुण्डलानां च रूपणे ११६
सर्द्विश वर्तना कार्या प्राचलती च सा मूहः
ललाटसंवृतोद्वृत्ता कार्या हस्तिनिरूपणा ११७
प्रसारितोन्नामिता वा रिपूद्देशेस विधीयते
कार्या संकपानी साग्रे सो प्रकोपदर्शने ११८
कोऽसावित्यापि निर्देशे कार्या तिर्यग्विनिर्गमा
कर्णकूटनयेन शब्दश्रवणेस्तातसंश्रया ११९
कार्ये हस्तद्वयाङ्गुल्यौ संयुते संमुखे युते
वियोगे विघटन्त्यौ तु कलहे स्वस्तिकाकृती १२०
चतुधनिता कार्ये परस्परनिपीडने
ऊर्ध्वाग्रचलिता यावत्कर्तव्यै के --- वर्णने १२१
कुर्याद् दृशं भ्रुवौ चास्य हस्तस्यानुगते बुधः
इति सूचीमुखः ।
यस्याङ्गुल्यस्तु विरलामाभोरुहाङ्गुष्ठेन कुञ्चिताः १२२
ऊर्ध्वाश्च सङ्गताग्राश्च स भवेत् पद्मकोशकः
श्रीफलकस्य कपित्थस्य ग्रहणं तेन रूपयेत् १२३
बीजपूरकमुरव्यानामन्येषामपि दर्शनम्

कार्यं फलानां तत्तुल्यरूपेणोर्ध्वस्थितेन च १२४
कुर्यात् प्रसारितास्येन योषित्कुचनिरूपणम्
कुर्याद् दृष्टिभ्रुवौ चास्य हस्तस्यानुगते बुधः १२५
पद्मकोशकः
अङ्गुल्यः संहताः सर्वाः सहाङ्गुष्ठेन यस्य तु
तथानितघाश्चैव स तु सर्पशिराः करः १२६
उत्तानितं तु कुर्वीत सेचनोदकदानयोः
अधोमुखं विचलितं भुजगस्य गतौ पुनः १२७
विधात द्विगुणां वामबाहुतस्थिशरादधः
विदध्यात्सर्पशिरसा हस्तेनास्फोटनक्रियाम् १२८
रचितभ्रुकुटिः कुर्यादेवं तिर्यक्छिरो दधत्
पुरतोऽधोमुखे न भास्या लनमाचरेत् १२९
दृष्टिर्भ्रूसहिता कार्या हस्तस्यास्यानुयायिनी
इति सर्पशिराः ।
अधोमुखीनानिसृणे मङ्गुलीनां समागतिः १३०
कनिष्ठाङ्गुष्ठकावूर्ध्वे तदासौ मृगशीर्षकः
इह साम्प्रतमस्तथेत्यत्रा प्रयोजयेत् १३१
स्थाच्छत्र्यलाभेने तिर्यगुक्ति पूश्चात्ने पातने
स्वेदापमार्जने कार्योऽधोमुखस्तत्प्रदेर्युशगः १३२
कुट्टमिते संचलितः कर्तव्योऽधोमुखश्च सः
अस्यानुयायिनी दृष्टिः पाणी कुर्याद्भवापि १३३
इति मृगशीर्षकः ।

त्रेताग्निसंस्थिता मध्यातर्जन्यङ्गुष्ठका मता
काङ्कलेऽनामिका वक्रा तथाचोर्ध्वा कनीयसी १३४
त्रेतोत्तनेन कर्कन्धूप्रभृतीनि प्रदर्शयेत्
तरुणानि फलान्यन्यद्वस्तु किञ्चिच्च यल्लघु १३५
वाक्यान्यङ्गुलिविक्षेपैः स्त्रीणां रोषकृतानि च
मुक्तामरकतादीनां रत्नानां च प्रदर्शनम् १३६
हस्तेनानेन कर्तव्यं भ्रुवौ चास्पृष्टष्टगे
इति काङ्कलः ।
आवर्तिन्यः करतले यस्याङ्गुल्यो भवन्ति हि १३७
पार्श्वागता विकीर्णाश्च सोऽलपद्मः प्रकीर्तितः
तिर्यक्पुरःस्थितः कार्यो हस्तोऽयं प्रतिषेधने १३८
कस्य त्वमिति नास्तीति वाक्ये शून्ये च धीमता
आत्मोपन्यसने स्त्रीणां न सन्देशच्छेतो भवेत् १३९
अस्य चानुगता दृष्टिर्विधातव्या भ्रुवौ तथा
इत्यलपद्मः ।
अङ्गुल्यः प्रसृतास्तिस्त्रस्तथाचोर्ध्वा कनीयसी १४०
तासां मध्ये स्थितोऽङ्गुष्ठः स करश्चतुरः स्मृतः
अधोमुखः प्रचलितो मतस्येन ततत्कथा १४१
विनये च नये चायं कार्योऽभिनयवेदिना
वैपुणा तून्नतशिवा साः कृस्वा भ्रेतां भ्रुवा १४२
विदध्याच्चतुरं हस्तमुत्तानं नियमे पुनः
किन्तु भ्रवं --- कुटिलां विनयं प्रति नाचरेत् १४३

अधोमुखेन हस्तेन तेन बालं प्रदर्शयेत्
बालप्रदर्शने कुर्याद् कुटीविनतानिरः १४४
तेनोत्तानवलता येदातुरनन्तरम्
तिर्यक्प्रसर्प्य तूत्तानो बहिश्चाविकृताननैः १४५
सत्ये चानुमतौ चैव हस्त एष विधीयते
एवमेव प्रयोक्तव्यो युक्ते पय्येशमध्यमः १४६
द्वाभ्यामेकेन वा स्तुस्तौ क मण्डलावस्थितेन च
विचारितं प्रयोक्तव्यं विह्वतं लज्जितं तथा १४७
वदनं तत्र कर्तव्यमविकार्यं नतभ्रुवा
वितर्कितमुरोभ्यर्णे मण्डलावस्थितेन तु १४८
अधोमुखेन पुरतः कार्यं विश्लिष्यता तथा
मुखं चानिकृतं तत्र कार्यमभ्युन्नते भ्रुवौ १४९
शिरस्तु वामतो तत्र नतं च पुनः
उभाभ्यां नयनाभ्यां तु मृगकर्णप्रदर्शनम् १५०
कार्यं तद्देशवर्तिभ्यां सभ्रूक्षेपं विचक्षणैः
उत्तानेन युतेनाथ पत्राकारं प्रदर्शयेत् १५१
हस्तेन चतुरा खे विनमय्य भ्रुवं मनाक्
लीलां रतिं स्मृतिं बुद्धिं संज्ञामायाविचारणा १५२
सङ्गतं प्रणयं शौचमावर्त्य भावमक्षमम्
पुष्टिं सविच शीलं च चातुर्यं मार्दवं सुखम् १५३
प्रश्नं वार्तां च वेषं च युक्तिं दाक्षिण्ययौवने
विभवाविभवौ स्तोकं सुरतं सद्वरं मृदु १५४

गुणागुणौ गृहा दारा वर्णा नानाविधाश्रयाः
चतुरेणाभिनेतव्यास्ते सर्वेऽपि यथोचितम् १५५
क्वचित्प्रभावता क्वापि भ्रमता मृदुता क्वचित्
प्रतीतिर्जायतेऽर्थस्य यस्य यस्य यथा यथा १५६
प्राज्ञैस्तथा तथा शीर्षेऽभिनेयान्युक्तपाणिना
भ्रूदृष्टिचकुरगोश्च कार्यास्तदनुसारतः १५७
मण्डलस्थेन हस्तेन पीतं रक्तं च दर्शयेत्
किञ्चिन्नतभ्रूः शिरसा परिमण्डलितेन च १५८
तेन भ्रूप्रदर्शयेत् कृष्णं नीलं च परिमृद्नता
चतुरेण कपोतादीन् वर्णान् स्वाभाविकेन च १५९
इति चतुरः ।
मध्यमाङ्गुष्ठसन्दंशो वक्रा चैव प्रदेशिनी
ऊर्ध्वमन्ये प्रकीर्णो --- अङ्गुल्यो भ्रमरे करे १६०
कुमुदोत्पलपद्मानां ग्रहणं तेन पाणिना
तथैव दीर्घवृन्तानामन्येषामपि रूपयेत् १६१
कर्णपूरो विधातव्यः कर्णदेशे स्थितेन च
दृष्टिभ्रुवौ चाभिन्ना तेषां कार्ये करानुगे १६२
इति भ्रमरः ।
तर्जनीमध्यमाङ्गुष्ठाभूताग्निस्था निरन्तरा
भवेयुर्हंसवक्त्रस्य शेष सम्प्रसारिता १६३
किञ्चित् प्रस्पन्दिताङ्गुष्ठेनामुनोत्क्षिप्य च भ्रुवौ
निस्सारमल्पं सूक्ष्मं च दर्शयेन्मृदुलं लघु १६४

कर्तव्येऽभिनये चैषां दृग्भ्रुवौ च करानुगे
इति हंसवक्त्रः ।
अङ्गुल्यः प्रसृतास्तिस्त्रस्तथा चोर्ध्वा कनीयसी १६५
अङ्गुष्ठः कुञ्चितश्चैव संसपद्म इति स्मृतः
उत्तानेन बहिस्तिर्यग्ग्रीवायजलभूषणम् १६६
कर्तव्यं तेन गण्डस्य रूपस्य गण्डवर्तनम्
कुर्वीत चैनमुत्तानं भोजने च प्रतिग्रहे १६७
तथाचमनकार्ये च कर्तव्योऽयं द्विजन्मनाम्
अधस्तादन्तयोरेनं कुर्यात् स्वस्तिकयोगिनम् १६८
किञ्चिन्नतेन शिरसा य परि यथारसम्
उभाभ्यां पार्श्वयोस्तिर्यग्वैताभ्यां स्तम्भदर्शनम् १६९
कुर्वीतैकेन रोमाञ्च वामबाहुप्रसर्पिणा
संवाहनेऽनुलेपे च स्पर्शे तद्देशवर्तिनम् १७०
विषादे विभ्रमे स्त्रीणां स्तन्यं तत्स्थं यथा रसः
अधस्तलं प्रयुञ्जीत तथैनं हनुधारणे १७१
अस्यानुयायिनीं दृष्टिं पाणेः कुर्याद् भ्रुवौ तथा
इति हंसपद्मः ।
तर्जन्यङ्गुष्ठसन्दंशस्व रोदनस्य यदा भवेत् १७२
आभुग्नतलमध्यश्च सन्दंश इति स स्मृतः
स चाग्रमुखपार्श्वानां भेदेन त्रिविधो भवेत् १७३
तं पुष्पावचये पुष्पर्माग्रथने च प्रयोजयेत्
तृणपर्णग्रहे केशसूत्रादिस्तथापरे १७४

शिल्पैकादेशग्रहणे त्वग्रसंदंशकं स्थिरम्
आकर्षणे तथा कृष्णे वृन्तात्पुष्पस्य चोद्धृतौ १७५
विदध्यादेवमेवैनं शलाकारनिरूपणे
रोषे धिगिति वाक्ये च बहिर्भागप्रसर्पिणम् १७६
यज्ञोपचितं तत्प्रदेशे स्थितेन च
उत्तानेनोरसोऽग्रे तु संयुतेन च तिर्द्धृतम् १७७
वचनं वलहा किञ्चित्समध्येनाधोमुखेन च
ग्रहणं गुणसूत्रस्य बाणलक्षनिरूपणम् १७८
ध्यानं योगं च हृद्देशवर्तिना संप्रदर्शयेत्
स्तोकतिभिन्ना ये कर्तव्यः संयुतस्तूरसः पुरः १७९
कुत्सास्तयाकोमलेषु सदोषवचनेषु च
विवर्तिताग्रः कर्तव्यो वामो विघटितो मनाक् १८०
प्रवालरचने वर्तिग्रहणे नेत्ररञ्जने
आलेख्ये चैष कर्तव्यस्तथालक्तकपीडने १८१
अस्य भ्रुवौ च दृष्टिं च कुर्यादनुगतां ततः
इति सन्दंशः ।
समागताग्रसहिता यस्याङ्गुल्यो भवन्ति हि १८२
ऊर्ध्वं हंसमुखस्येव स भवेन्मुकुलः करः
कर्तव्यः संहतोऽत्रातो मुकुलाम्भोरुहादिषु १८३
पुरः प्रसर्प्योच्चलितः कर्तव्यो विटचुम्बकः
इति मुकुलः ।
पद्मकोशस्य हस्तस्य त्वङ्गुल्यः कुञ्चिता यदा १८४

ऊर्णनाभः स विज्ञेयश्चौर्यकेशग्रहादिषु
चौर्यकेशग्रहे चैष कर्तव्योऽधोमुखः करः १८५
शिरःकण्डूयने मूर्ध्नः प्रदेशे प्रचलन्मुहुः
तर्यकवर्ती विधातव्यः कुष्ठव्याधेर्निरूपणे १८६
अधोमुखः स्थितेनाधः सिंहव्याघ्रादिरूपणे
कार्यो भ्रुकुटिवक्त्रेण संयतोऽस्य ग्रहस्तथा १८७
अत्रापि दृष्टिभ्रूकर्म प्राग्वदेव विधीयते
इत्यूर्णनाभः ।
मध्यमाङ्गुष्ठसन्दंशो वक्रा चैव प्रदेशिनी १८८
मृगव्यालादिविश्वासं बालसन्धारणे तथा
अयं हस्तो विधातव्यो भर्त्सने भ्रुकुटीयुतः १८९
सिंहव्याघ्रादियोगे च विच्युतः शब्दवान् भवेत्
दृष्टिभ्रुवौ च कर्तव्यौ न्यत्यमस्यानुगे बुधैः १९०
अपरैः छिदितासंज्ञो हस्तोऽयं परिकीर्तितः
इति ताम्रचूडः ।
असंयुतानां हस्तानां चतुर्विंशतिरीरिता १९१
त्रयोदशाथ कथ्यन्ते संयुता नामलक्षणैः
अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा १९२
खटकावर्धमानश्चाप्युत्सङ्गनिषधावपि
डोलः पुष्पपुटस्तद्वन्मकरो गजदन्तकः १९३
वरित्थादश कथ्यन्ते संयता नामलक्षणैः
अञ्जलिश्च कपोतस्य कर्कटः स्वस्तिकस्तथा १९४

त्रयोदशैते कथिता हस्ताः संयुक्तसंज्ञिताः
पताकाभ्यां तु हस्ताभ्यां संश्लेषात्सोऽञ्जलिः स्मृतः १९५
शिरश्च विनतं किञ्चित्तत्र कार्यं विपश्चिता
कार्यो गुरुनमस्कारो मुखस्यासन्नवर्तिना १९६
पेक्षते न मित्राणां न स्थाननियमः कृधे
इत्यञ्जलिः ।
उभाभ्यामपि हस्ताभ्यामन्योन्यं पार्श्वसङ्ग्रहात् १९७
स हस्तः कपोतनामा स्यात्कर्म चास्याभिधीयते
कुर्यात्प्रणमनं वक्षःस्थितेन तु न मच्छिराः १९८
गुरुसंभाषणं कुर्यात्तेन शीतं भयं तथा
विनयस्याभ्युपगमे चायमित्यभिधीयते १९९
तेनैवाङ्गुलिसंघृष्यमाणमुक्तेन पाणिना
एतान् वदति नेदानीं कृत्यंधो चेति प्रदर्शयेत् २००
एवंरूपो पमे च रूपेण
इति कपोतः ।
अङ्गुल्यो यस्य हस्तस्यान्योन्याभ्यन्तरनिःसृताः
स कर्कट इति ज्ञेयः करः कर्मास्य कथ्यते २०१
समुन्नतशिराः किञ्चिदुत्क्षिप्तभ्रूश्च जृम्भणम्
अनेनैवाङ्गमर्दं च कामार्तानां निरूपयेत् २०२
इति कर्कटः ।
उत्तानौ वामपार्श्वस्थौ स्वस्तिकः परिकीर्तितः
समन्ततस्तदूर्ध्वं च विस्तीर्णं वनानि च २०३

ऋतवो गगनं मेघा --- तेनार्थंवर्तिना
इति स्वस्तिकः ।
खटकः खटके न्यस्तः खटकावर्धमानकः २०४
शृङ्गारार्थे प्रयोक्तव्यः परावृत्तस्तथापरः
कार्यो विटगतौ नम्रमूर्धा --- तत्प्रमाणतः २०५
इति खटकः ।
अरालौ तु विपर्यस्तावुत्तानौ वर्धमानकौ
उत्सङ्ग इति ज्ञेयः --- स्पर्शग्रहणे करः २०६
उत्सङ्गसंज्ञकौ स्यातां हस्तौ तत्कर्म चोच्यते
विनियोगस्तयोः कार्यः बालकः प्रहरेण तु २०७
विधातव्याविमौ हस्तौ स्त्रीणामीर्ष्यायिते तथा
दक्षिणं वापि वामं वा न्यस्येत् कूर्परमध्यगम् २०८
इत्युत्सङ्गः ।
अस्यो प्रशिथिलौ मुक्तौ पताकौ तु प्रलम्बितौ
यदा भवेतां करणे स दोल इति संस्मृतः २०९
इति दोलः ।
यस्तु सर्पशिराः प्रोक्तस्तस्याङ्गुलिनिरन्तरः
द्वितीय पार्श्वसंश्लिष्टः स तुपुष्पपुटः पराणि च २१०
ग्रास्यान्यथो यानि यानि द्रव्याणयेतेन दर्शयेत्
जलादानापयने कुर्यात् --- २११
इति पुष्पपुटः ।
पताकौ तु यदा हस्तावूर्ध्वाङ्गुष्ठावधोमुखौ

उपर्युपरि विन्यस्तौ तदासौ मकरध्वजः २१२
इति मकरः
कर्परौ सन्धितौ हस्तौ यदा स्तां सर्पशीर्षकौ
गजदन्तः स विज्ञेयः करः कर्मास्य तस्य च २१३
इति गजदन्तः ।
शुकतुण्डौ करौ कृत्वा वक्षस्यभिमुखाञ्चितौ
शनैरधोमुखाविद्धौ सौबहिस्थल इति स्मृतः २१४
उक्तकण्ठाप्रभृतीनि च कुर्यादेतेन हस्तेन
इत्यवहित्थः ।
वर्धमानः स विज्ञेयः कर्म चास्य निगद्यते २१५
एतेन सत्यवचनं परिग्रह सग्रहस्तथा
संख्येयकल्पश्चानेन निपीडितेन कर्तव्यः २१६
अनयापि नीदृगेषां --- क्रौञ्चौ च कार्यौ
नलिनीपद्मकोशश्च तथा गरुडपक्षकः २१७
एतेषां नृत्तहस्तत्वेऽप्यभिनीत्युपयोगिताम्
समा---जितां तत्र स्वयमभ्युह्य कल्पयेत् २१८
चेष्टयाङ्गेन हस्तेन प्रयोगः सत्त्वकैरपि
गण्डोष्ठनासापार्श्वोरुपादचाराम्भदिभिस्तथा २१९
यथा यथा प्रतीतिः स्यात्प्रयतेत तथा तथा
कृतानुकरणं --- २२०
लक्षणं नृत्तहस्तानामिदानीमभिधीयते
चतुरश्रौ तथोद्वृत्तौ स्वस्तिकौ विप्रकीर्णकौ २२१

पद्मकोशाभिधानौ चाप्यरालखटकामुखौ
आविद्धवक्त्रकौ सूचीमुद्गरेविवसंज्ञकौ २२२
अर्धरेचितसंज्ञौ तु तथैवोत्तानवञ्चितौ
पल्लवाख्यौ निरावोऽथ केशबन्धौ लताकरौ २२३
करिहस्तौ तथा पक्षवञ्चिताख्यौ ततः परम्
पक्षे प्रद्योतकरेव्याच तथा गरुडपक्षकौ २२४
ततश्च दण्डपक्षाख्यावूर्ध्वमण्डलिनौ ततः
पार्श्वमण्डलिनौ तद्वदुरोमण्डलिनावपि २२५
अनन्तरं करौ ज्ञेयावुरः पार्श्वार्धमण्डलौ
मुष्टिकस्वस्तिकाख्यौ च नलिनीपद्मकोशकौ २२६
ततश्च कथितौ हस्तावलपल्लवकोल्बणौ
ललितौ वलिताख्यावित्येकान्नत्रिंशदीरिता २२७
पुरस्ताद्वक्षसा हस्तौ प्रदेशेऽष्टाङ्गुले स्थितौ
समान कर्पूरशौ तु संमुखौ खटकामुखौ २२८
चतुरश्राविति प्रोक्तौ नृत्तहस्तविशारदैः
इति चतुरश्रौ ।
तावेव हंसपक्षाख्यौ व्यावृत्तिपरिवर्तनात् २२९
नीतौ स्वस्तिकतां पश्चात्पक्षया वितौ मणिबन्धनात्
विप्रकीर्णाविति प्रोक्तौ नृत्ताभिनयकोविदैः २३०
इति विप्रकीर्णः ।
तावेव हंसपक्षाख्यौ कृत्वा व्यावर्तनक्रियाम्
अलपल्लवतां नीतौ ततश्च परिवर्तितौ २३१

विधायोर्ध्वमुखौ हस्तौ कर्तव्यौ पद्मकोशकौ
इति पद्मकोशकौ ।
पुनर्विवर्तितं कृत्वा परिवर्तनकं ततः २३२
अरालं दक्षिणं कुर्याद्वामं च खटकः सुखम्
खटकाख्यास्त्रयो हस्ताः स्वक्षेत्रेऽसौ विधीयते २३३
इत्यरालखटकामुखौ ।
भुजांसकूपरैः सार्धं कुटिलावर्तितौ यदा
हस्तावधोमुखतलावाविद्धावुद्धतावुभौ २३४
विनतौ नामतो विद्याद्दीनाना विद्धवक्रकौ
आविद्धविक्रकौ चैव गदावेष्टनयोगतः २३५
इतविद्धवक्रकौ ।
रचितौ सलावर्तितौ
यदा तु सर्पशिरसौ तलस्थाङ्गुष्ठकौ करौ
तेयकास्थौ प्रसृताग्रौ च शूलन्यासो भरस्तदा २३६
इति सूचीमुखौ ।
हस्तौ सूचीमुखा ते मणिबन्धनविच्युतौ
व्यावृत्तिपरिवृत्तिभ्यां वर्तितौ तदनन्तरम् २३७
हंसपक्षत्वमानीय कुर्यात्कमलवर्तिताम्
तथा द्रुतभ्रमौ कृत्वा रेचितौ पार्श्वयोः शनैः २३८
रेचिताविति विज्ञेयौ हस्तौ हस्तविशारदैः
इति रेचितौ
व्यावृत्तिपरिवृत्तिभ्यां वर्तितौ चतुरश्रवत् २३९

कूर्परांसाञ्चितौ हस्तौ नीतौ च त्रिपताकताम्
शकिञ्चि ग्राश्रस्थितावेतौ ज्ञेयावुत्तानितौ २४०
इत्युत्तानवञ्चितौ ।
बाहुवर्तनया कृत्वा पूर्वव्यावर्तितक्रियाम्
चतुरश्रक परिवृत्तिभ्यां चतुरश्रः कृतो यदा २४१
वामहस्तस्तदितरः कृत्वादेष्वितरेचितः करः
ग्रर्धरेचितसंज्ञौ तौ विज्ञातव्यौ तदा वुधैः २४२
इत्यर्धरेचितौ
बाहुवर्तनया बाहुशीर्षाद्व्यावर्तनेन वा
करणेन विनिष्क्रान्तौ मितं वाभ्यर्णमागतौ २४३
पतकावेव निर्दिष्टौ पल्लवौ नामतः करौ
इति पल्लवौ ।
उद्वेष्टितवर्तनया गत्या वस्त्रंत्रास्त्रया स्थितौ मूर्ध्नः
पार्श्वद्वितये पल्लवसंस्थनौ केशबन्धाख्यौ २४४
इति केशबन्धौ ।
ग्रभिमुखमुभौ निविष्टौ भुविष्टिर्तवर्तनक्रमादसौ
पल्लवहस्तौ पार्श्वद्वितये स्यातां लतासंज्ञौ २४५
इति लताहस्तौ ।
व्यावर्तितकरणाभ्यां दक्षिणो लताहस्तः
उन्नतविलोलितः स्यात्त्रिपताको वामहस्तस्तु २४६
इति करिहस्तः ।
उद्वेष्टितपरिवर्तनया त्रिपताकावभिमुखौ यदा घटितौ

करिहस्तसन्निविष्टौ करौ तदा पद्मवञ्चितकौ २४७
इति पद्मवञ्चितकौ ।
तावेव त्रिपताकौ हस्तौ कटिशीर्षासन्निविष्टाग्रौ
विपरावृत्तिविधानात् पद्मप्रच्योतकौ नाम्ना २४८
इति पद्मप्रच्योतकौ ।
त्रिप शाखौ हस्तावधोमुखा हि तद् विज्ञेयौ गरुडपद्माख्यौ
इति गरुडपद्मकौ ।
आवर्तितपरिवर्तितकरणकृतौ हंसपद्मकौ गम् २४९
पद्मतिरूपत्वमानान्तौ प्रसृतौ च यदा भवेत् उपद्मौ
व्यावर्तितपरिवर्तितयोगौ यदि मण्डलाकृती स्याताम् २५०
ऊर्ध्ववर्तितादघवदा स्मृतावूर्ध्वमण्डलिनौ
तथोर्ध्वमण्डलिसंज्ञौ वावर्तितं विधाया परिवर्तितकरणतारौ २५१
इति पार्श्वमण्डलिनौ ।
उद्वेष्टितौ यदैक एव भ्रमित उरसः स्थाने तौ द्वावपि स्याताम्
नियतमुरोमण्डलिनौ विज्ञातव्यौ तदा तज्ज्ञैः २५२
इत्युरोमण्डलिनौ ।
--- पल्लवो हस्तस्तथारालाह्वा वापरा
व्यावर्तनाकृतश्चैकस्तयोरन्योपवेष्टनात् २५३
उरोर्धयोगात्पार्श्वार्धयोगाच्च क्रमशः स्थितौ
एतौ विद्वान् विजानीयादुरःपार्श्वार्धमण्डलौ २५४
इत्युरःपार्श्वार्धमण्डलौ ।

शुभं भूयात् ।

Reference:
Kumar, Pushpendra, ed., *Bhoja's Samarāṅgaṇa-Sūtradhāra,* 2 vols., (Delhi: New Bharatiya Book Corporation, 1998).